प्रथमस्कंध

वैराग्यं संसारे ऽवलेपस्य बोधस्तं लब्ध्वा यत्नीयुः पामगुः प्रकंठ पिल्यं वैकुंठ लोके ॥ ५५ ॥ आत्मनि समा
धिः मनः स्थैर्यं संप्रवर्धयोगाउपायः नस्पबलेन तानयोगतः क्रमेण मोक्षः संसेगतः नत्कृण्याश्चवला
दिनावनायासेनैव प्रद्रह्ममनाविष्टानोहृतनकथंचिदितिभाव ॥ नदेवसन्नाशाश्चेयनेवनोभिः ॥ ५
ननस्मात् ॥ हे आयनेनवदीपावर्धयस्माल्लोकानासिस्वयानयाप्रसृष्टाः क्रमेणात्मादिनाः त्रि
भिरात्मभिः सन्नादिस्वभाववत्वाद्विमुक्ताः संतः परस्पृष्टाः तस्य विहारनेवेनत्कीडोपकरणेष्व
स्योऽहं ते नभ्यं च निहतेनसमर्पयि वेनशक्रमः ॥ अनन्तेनः सर्वत्वः परिदेहीति त्वयाणां स्तोकाना
पानेननेदेवकथ्यास्वधायाः प्रवृद्धमत्ताविषदापायावे ॥ वैराग्यसारं प्रतिलभ्यबोधंप
श्याज्ञसान्वीपुरकुंठधिल्यमू ॥ ५६ ॥ तथापरे वात्मसमाधियोगबलेनजित्वाप्रकृतिंवले
ष्टा त्वामेवधीराः पुरुषं विषतिते षां भ्रमः स्यान्तवसेवयाते ॥ ५ ॥ तनेवधलोकसिसृक्ष
यायनयाप्रसृष्टास्त्रिभिरात्मभिःसा ॥ सर्वैर्विमुक्तास्तविहारतेवेनशाक्रमस्त्वत्यतिहतेमृते
५७ ॥ पावद्धलिनेनहरामकालेयथावयं वात्रमदामयत्र ॥ यथोभयंपातरमेहिलोक
वनयैनात्वयः ॥ अस्तामर्थमेवमयेचयितं कार्यसातिवैचि बलिंहरंतान्नमंदंमनूहाः ॥ ५८ ॥
ममाहुः ॥ ५९ ॥ भोग्रजकालेनतदवसरे ॥ बलिभोगयावन्साकस्तेननेनभ्यंहरामसमर्पयामः
यथायेनमकारेणान्नमहामेल्लयासेत्वेनान्नमात्रमस्माकमेष्वर्येणान्नभोगास्त्वैवेवत्स्वकं
रभयेचान्नवास्माकंच ॥ यत्रस्थिताश्मेजीवाः ॥ अनन्त्याअमन्त्हाः त्रिविधाः यहाअनन्त्हाश्रवि
नकोः निःसेशायाश्मर्थः ॥ तथाचस्कृतिः ॥ तायनमत्रवन्त्रायतननःप्रजानीहियस्मित्व
तिष्ठिताअन्नमदामीति ॥ अवत्पनवेयास्माकमेषोवकार्यीपाधीनांजीवानांचवहूतिः परि

स्तीकाजनकाहिसाद ५८

भा० तृ० ३

नोस्माकं सान्वयानां सकार्याणां यदा प्रवेशेत तत्त्वयः कारणांतस्सहितानां त्वमेवायः कारणं तत्र दे
तवः कूटस्थः अविक्रियः पुरुषोपि ह्यान्तां पुराणः पुरातनः एतदुपपादयति ॥ त्वमिति ॥ हे देव अ
जएव त्वं गुणानां महदादीनां च योनौ कारणभूतायां शक्तौ मायायां यामस्य मरेतश्चाद्यधे ॥ आहित
वानसि स्वर्चः कीदृशं कविं सर्वसमर्दं चिद्रूपं ॥ ५ ॥ अतः हे आत्मन् ॥ देवाः सत्प्रमुखा महदादयः
योयदर्थं बभूविम ॥ तत् किं ते कार्यं करवाम हे इति मिलितं वेतनाहुः ॥ त्वं हि नः अस्माकं त्वं स्वचक्षुः
ज्ञानं देहि तथा स्वशक्त्या सह परिदेहि प्रयच्छ यस्मात्त्वमेव कावाप्यनुग्रहः येषां तेषामस्माकं कि

त्वं नः सुराणामसि सान्वयानां कूटस्थ आद्यः पुरुषः पुराणः ॥ त्वं देव शक्त्यां गुणकर्मयोनौ रेत
स्त्वजायां कविमादधेजः ॥ ५१ ॥ ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्करवाम किं ते ॥ त्वं नः
स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहाणां ॥ ५२ ॥ इति श्रीभागवते तृतीये पंचमः ॥ ५ ॥
ऋषिरुवाच ॥ इति तासां स्वशक्तीनां सतीनामसमेत्य सः ॥ प्रसुप्तलोकतंत्राणां निशाम्य ग
तिमीश्वरः ॥ १ ॥ कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः ॥ त्रयोविंशति तत्त्वानां गणं युगप
दाविशत् ॥ २ ॥

यार्थं यन्नेतावान् ॥ अनुग्रहो वा येषामिमे केवलं पदं त्वदीयज्ञानक्रियाश
क्तिध्यानमेव वयं स्वरूपेण समान्नाम्य योग्यर्थं ॥ ५२ ॥ इति श्रीतृतीये पंचमः ॥ ५ ॥ षष्ठे तु ईश्वराविष्टैः
सृष्टिमाह विराडनेनो ॥ अपि दैवादिभेदं च तत्रैव भगवत्कृतं ॥ १ ॥ स्वशक्तीनां महदादीनामस
मेत्य अमिलित्वा सतीनां स्थितानां प्रसुप्तलोकतंत्राणां विश्वरचनापासां ॥ एता प्रसुप्ता जीवोपकर
णानां गतिं स्थितिं दृष्ट्वा आविवेश इति संबंधः कालेन सत्त्वाद्यक्षोभयस्याः कालयति क्षो
भयति स्वकार्योन्मुखानीति वा कालसंज्ञां शक्तिं तां प्राप्ति मर्केन्या सहस्वेव त्रयोविंशति ॥ तत्त्वा

मिथः स्पर्धिस्वयोदेवानमिलेतः परस्परं॥ विसृष्टकर्मतत्त्वनीशानानिर्विश्याहरिमीडिवेशप्रपन्नानोनात्मो
पशमेप्रानतपरेकृत्यं॥ तत्र हेतुः यस्य पदारविंदं स्वमूले तन्मूले केतनाश्रयो येषां ते बहिरुत्क्षिपंति दूर
विसर्जयंति॥ यथा पांथः स्वगृहं प्राप्य मार्गश्रममिव॥ श्रमं विनिवेदयंत आहुः॥ ३८॥ हे धातः पितः य
स्मात्॥ भवे संसारे॥ आत्मन् चित्तसंबोधने वा॥ शर्म सुखं॥ न हे ईश दितिपादे॥ यस्मात् भजने विना
शर्म न लभंते॥ ननु ज्ञानादेव स्तानदुःखतापो निवर्तते॥ किमंघ्रिच्छायाश्रवणेन॥ तत्राहुः॥ स
विद्यां विद्याश्रयणमेव विद्याप्रापकमित्यर्थः॥ ज्ञानसाधनश्रवणाद्यारावृत्तस्तानसाधनसाहुः॥ ३९॥

देवाद्युचुः॥ नमाम ते देव पदारविंदं प्रपन्नतापोपशमातपत्रम्॥ यन्मूलकेता यतयोंऽज
सोरुसंसारदुःखं बहिरुत्क्षिपंति॥ ३८॥ धातर्यदस्मिन्भव ईश जीवास्तापत्रयेणाभिह
ता न शर्म आत्मंल्लभंते भगवंस्तवांघ्रिच्छायां सविद्यामत आश्रयेम॥ ३९॥ मार्गंति यत्ते
मुखपद्मनीडैश्छंदःसुपर्णैरृषयो विविक्ते॥ यस्याघमर्षोदसरिद्वरायाः पदं पदं तीर्थ
पदः प्रपन्नाः॥ ४०॥

मार्गंति अन्वेषयंति यत्तव॥ तीर्थपदस्तव पदं वयं प्रपन्नाः कैर्मार्गंति छं
दःसुपर्णैः॥ वेदपक्षिभिः तवैव मुखपद्मं नीडं येषां यथा पक्षिणो नीडादुत्तीर्य स्वस्थानं प
रिभ्रमंति पुनस्तत्रैव प्रविशंति॥ तथा वेदा अपि त्वत्त उद्भूताः त्वमेव वर्णयंतः संति॥ ऋतो वेदाश्र
यित्वं स्वयं भवतीति॥ विविक्ते एकांते मनसि किं च॥ अघमर्षणं सर्वनाशकं उदकं यस्याः सा स
रितां श्रेष्ठा यस्याः गंगायाः पदं मुहुः मस्थाने॥ अतो गंगा मनुसेवमाना अपि तदुद्गमस्थानं
त्वत्पदं प्राप्नुवंतीत्यर्थः॥ ननु विषयाकुलैर्विना नो कुतस्त्वत्पदं तन्निष्ठाणतत्राहुः॥ ४०॥

भा टी ३

यच्छ्रद्धयेति ॥ यच्छ्रद्धया हृदये अवधार्य ध्यात्वा वैराग्यं बलं यस्य तेन ज्ञानेन धीरा भवंति ॥ सम्यगेव चित्ते ध्यानमेव कृतः श्रद्धया श्रवणसविकया भक्त्या संमृज्यमाने संशोध्यमाने भक्त्या तु यद्धे स्मरंत आहुः विश्वस्येति ॥४३॥ अनयो मितयानितं सन्निहिते अनर्थकं भजनमित्याशंक्याहुः यदीति ॥४४॥ सानुबंधे सोपकरणे असति तुच्छे स्वपुर्यां स्वदेह एव वसतोऽपि सुदूरं वर्तमानं ॥ ननु यदि हृदिस्थः स्वापि परं तु केषांचित्सुदूरं तर्हि अन्येषामपि तथैव स्यात् ॥ अविशेषादित्याशंक्याहुः तानिति ॥४५॥ असद्वृत्तिभिर्विषयैरिन्द्रियैः पराहृतं हरमपहृतमन्तःस्थं मनो येषां ते ॥ अथो न तथा प

यच्छ्रद्धया श्रुतवत्या च भक्त्या संमृज्यमाने हृदयेऽवधार्य ॥ ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत्तेंऽघ्रिसरोजपीठम् ॥४२॥ विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदांबुजं ते ॥ व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यभयं स्वपुंसाम् ॥४३॥ यत्सानुबंधेऽसति देहगेहे ममाहमित्यूढदुराग्रहाणाम् ॥ पुंसां सुदूरं वसतोऽपि पुर्यां भजेम तत्ते भगवन्पदाब्जम् ॥४४॥ तान्वा असद्वृत्तिभिरक्षिभिर्ये पराहृतांतर्मनसः परेश ॥ अथो न पश्यंत्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ॥४५॥

ते नूनं तान्न पश्यंति ॥ वैषम्यसिद्धं ॥ कुतः पुनस्तेषां तत्संगः स्यात्तत्राह तेन वा पदन्यासेन गमनेन तस्य विलासो विभ्रमः तस्य लक्ष्मीः शोभा तस्याः येन वल्लीलाकथादिभिः शोभमाना स्वच्छंदकानि त्यर्थः पद्य इति लक्ष्मीन इति पाठे त्वत्पदविन्यासो विलासो लक्ष्म्यो येषां तान पद्यः त्वन्मार्गे भूतान्सतो मार्गान्वा श्रवणादीन्न पश्यंतीत्यर्थः यद्वा येवं भजमाना भागवताः ते तान्त्वत्पदान्नैव पश्यंतीत्यन्वयः ॥ सत्संगाभावे न हृदिकयाश्रवणाभावाद्धृदि स्थितमपि ते वा

वतार

५

कालेप्रविनाश्यत्वंभंस्तापानलत्वप्रदेपरित्यसममहतोलत्वणे॥ अतः पुंलिंगनिर्देशोविज्ञानात्मेति
सत्वप्रधानत्वात्स्वदेहस्थंविश्वंव्यंजनन्॥ बीजगतमंकुरादिरूपेहस्तमिवप्रकाशयन्॥ यतोसौ
तमोगुणदृष्टीतिनसोवदः॥ तदुक्तंसात्वतंतंत्रे॥ विष्णोस्तुत्रीणिरूपाणिपुरुषाख्यान्यथोविदुः प्र
थमंमहतःस्रष्टृद्वितीयंत्वंडसंस्थितं॥ तृतीयंसर्वभूतस्थंतानिज्ञात्वाविमुच्यतेइति॥ अहंकारोम
तिमाह॥ सार्धद्वाभ्यांसोपीति॥ २५॥ अंशाख्रिवाभासः निमित्तं॥ गुणाउपादानंकालःक्षोभकं तद
ात्मतदधीनः भगवान्सर्वाध्यक्षः तद्दृग्गोचरःसन्॥ स्वयमात्मानंव्यकरोत्॥ तपांतरमनयत्

ततोमवत्महत्तत्वमव्यक्तात्कालचोदितात्॥ विज्ञानात्मात्मदेहस्थंविश्वंव्यंजंस्तमोनुदः
२७॥ सोप्यंशगुणकालात्माभगवद्दृष्टिगोचरः॥ आत्मानंव्यकरोदात्माविश्वस्यास्यसिसृ
क्षया॥ २८॥ महत्तत्वाद्विकुर्वाणादहंतत्वंव्यजायत॥ कार्यकारणकर्त्रात्माभूतेंद्रियमनोम
यः॥ २९॥ वैकारिकस्तैजसश्चतामसश्चेत्यहंत्रिधा॥ अहंतत्वाद्विकुर्वाणान्मनोवैकारि
कादभूत्॥ ३०॥ वैकारिकाश्चयेदेवाअर्थाभिव्यंजनंयतः॥ ३१॥

अहंकारस्यलक्षणमाह॥ २९॥ कार्यमधिभूतंकारणमध्यात्मंकर्ताधिदैवंतेनतेषामात्मा
आत्मप्रयः॥ अतएवेतः भूतेंद्रियमनोमयः॥ तद्विकारवान्॥ मनइतिदेवानामप्युपलक्षणं
एतदेवविभागतःप्रपंचयतिवैकारिकइत्यादिना॥ ३०॥ वैकारिकःसात्विकस्तैजसोराज
सः॥ देवाश्चवैकारिकाःकार्यभूताइत्यर्थः यतोयेभ्यइंद्रियाधिष्ठातृभ्यः॥ अर्थाभिव्यंज
नंशब्दादिप्रकाशोभवति॥ ३१॥

तैजसात्मेवेभ्यन्वयः ज्ञानमयानां सात्विकत्वशंकामाभूदित्येवकारः । तामसो भूतसूक्ष्मादिस्तस्य भूतसूक्ष्मादिः कारणं ॥ यतः शब्दात्खमाकाशं भवति ॥ आत्मनो लिंगं स्वरूपतया ग्राह्यं रूपेण प्रकाशकं दृष्टप्रकाशत्वाच्च ॥ यद्वा लिंगं शरीरं ब्रह्मेति श्रुतेः ॥३१॥ नभसोनुसृतं अनुसृत्य स्पर्शं विकुर्वन् ॥ स्पर्शेनेरनुषक्त ॥ एवं सर्वत्र तन्मात्रद्वारा भूतोत्पत्तिरिति ज्ञातव्यं नभसा सहितः ॥ उरुबलान्वितः ॥३३॥ नभसोर्वायोर्लोचनं प्रकाशकं ॥३४॥ हे भद्र विदुर परपाठांतरे ॥ भाव्यं कार्यं यद्यद्वरं कार्यं तेषां कार्याणामवरैः कारणैरनुसंसर्गात् ॥ अन्वयाद्यथासंख्यं ॥ यथाक्रमं गुणान्तरेणाधिकान् गुणान्विदुः ॥ तथा

तैजसानीद्रियाण्येव ज्ञानकर्ममयानिवा ॥ तामसो भूतसूक्ष्मादिर्यतः खंलिंगमात्मनः ॥३१॥
कालमायांशयोगेन भगवद्वीक्षितं नभः ॥ नभसोनुसृतं स्पर्शं विकुर्वन्निर्ममेनिलं ॥३२॥
अनिलोपिविकुर्वाणो नभसोरुबलान्वितः ॥ ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनं ॥३३॥
अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितम् ॥ आधत्ताम्भो रसमयं कालमायांशयोगतः ॥३४॥
ज्योतिषाम्भोनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितं ॥ महीं गंधगुणामाधात्कालमायांशयोगतः ॥३५॥
भूतानां नभआदीनां यद्यद्भव्यावरावरं ॥ तेषां परानुसंसर्गाद्यथासंख्यं गुणान्विदुः ॥३६॥
एते देवाः कला विष्णोः कालमायांशलिंगिनः ॥ नानात्वात्स्वक्रियानीशाः प्रोचुः प्रांजलयो विभुं ॥३७॥

दि ॥ नभसः शब्द एव गुणः अन्येषामन्वयाभावात् ॥ वायोस्तु स्पर्शः आकाशान्वयाच्छब्दश्च ॥ एवं तेजस ॥ तोयं रूपं च ॥ अंभसस्तु त्रीणि च रसश्च मह्यास्सर्वे ॥३५॥ देवा महदादयोभिमानिनः ॥ विष्णोः कलांशभूताः कालं लिंगं विकृतिः मायालिंगं विक्षेपः अंशालिंगं चेतनता नानात्वानि विशेषत्वे पृथक्तः समवेतनानात्वात् ॥ परस्परासम्बंधात् ॥ स्वक्रियायां ब्रह्माण्डरचनायामनीशाः असमर्थाः संतः परमेश्वरं प्रोचुः ॥३८॥ ॥

विशेषतः श्रीकृष्णकथाकथनीयेत्याशयेनाह सइति योविश्वसर्गाद्यर्थंगृहीतशक्तिः सएवब्रह्म
येषु--तावतारः सन्ब्रह्मादीनतिक्रम्यवर्तमानानि यानिचकार १६ पुंसांनिःश्रेयसमेवार्थः
प्रयोजनंतेनहेतुनापृष्टः बहुमानमेवाहसाध्वितिपंचभिः १७ अधोक्षजएवात्मायस्य तस्या
त्मनः स्वस्यकीर्तिंचप्रसंगाद्वितन्वता १८ हरिर्यद्गृहीतः एतच्चित्रंनभवति कुतोबादरायण

सविश्वजन्मस्थितिसंयमार्थेकृतावतारःप्रगृहीतशक्तिः चकारकर्माण्यतिपूरुषा
णियानीश्वरः कीर्तयतानिमह्यं १६ ॥शुकउवाच॥ एवंसभगवान्पृष्टः क्षत्त्राकौषारवि
र्मुनिः पुंसांनिःश्रेयसार्थेनतमाहबहुमानयन् १७ ॥मैत्रेयउवाच॥ साधुपृष्टंत्वया
साधोलोकान्साध्वनुगृह्णता कीर्तिंवितन्वतालोकेआत्मनोधोक्षजात्मनः १८ नैत
च्चित्रंत्वयिक्षत्तर्बादरायणवीर्यजे गृहीतोनन्यभावेनयत्त्वयाहरिरीश्वरः १९ मांड
व्यशापाद्भगवान्प्रजासंयमनोयमः भ्रातुःक्षेत्रेभुजिष्यायांजातःसत्यवतीसुतात् २०
भवान्भगवतोनित्यंसम्मतःसानुगस्यच यस्यज्ञानोपदेशायमादिशद्भगवान्व्रजन् २१
अथतेभगवल्लीलायोगमायोपबृंहिताः विश्वस्थित्युद्भवांतार्थावर्णयाम्यनुपूर्वशः २२

वीर्यजेतुर्हिकथंशूद्रत्वंकथंवालोकानुग्राहकत्वं तत्राह मांडव्यशापादिति २० भ्रातुर्वि
चित्रवीर्यस्यक्षेत्रेतस्यत्वेनस्वीकृतायांभुजिष्यायांदास्यांयमएवत्वंजातोसि किंचभवानि
ति २१ कृतश्चयस्यतवज्ञानोपदेशायसमादिष्टवान् चकारात्त्वयमपिस्वमेवोपदिष्टवा
निति २१ विश्वस्थित्यादयः अर्थाविषयायासांताः नत्वहंस्वलीलांवर्णयितुं पुनः पूर्वव

भा
टी०
९

इदं विश्वमग्रे सृष्टेः सर्वमेव परमात्मा भगवानेक एव आस आसीत् ॥ आत्मनो जीवानामात्मा स्वरूपं वि
भुः स्वामी च ॥ नान्यद्द्रष्टृदृश्यात्मकं किंचिदासीत् ॥ कारणमात्मनास्यापि इच्छया कृतौ स्वभावादित्याद
अनानामत्युपलक्षणः ॥ नानाद्रष्टृदृश्यादिमतिभिः नोपलक्ष्यत इति ॥ यद्वा ॥ प्रकारभ्रंशेन विनैव
यमर्थः ॥ यः सृष्टौ नानामतिभिरुपलक्ष्यते ॥ स तदा एक एवासीदिति ॥ ऊनं आत्मेच्छा मायायामस्या अ
नुगतौ लये सति ॥ यद्वा आत्मन एकाकित्वेन अवस्थाने इच्छायामनुद्भूतायामित्यर्थः ॥ तत्र प्रथमं
मायोद्भवप्रकारमाह द्वाभ्यां स वै इति ॥२३॥ स वै द्रष्टा सन् दृश्यं नापश्यत् ॥ यतः एकराट् ॥ एक ए

भगवानेक आसेदमग्र आत्मात्मनां विभुः ॥ आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः
२३ ॥ स वा एष तदा द्रष्टा नापश्यद्दृश्यमेकराट् ॥ मेनेऽसंतमिवात्मानं सुप्तशक्तिरसुप्तदृक्
२४ ॥ सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका ॥ माया नाम महाभाग ययेदं निर्ममे विभुः
२५ ॥ कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः ॥ पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान्
२६

व तदा प्रकाशते ॥ असंतमिव मेने ॥ दृश्याभावे द्रष्टृत्वाभावात् ॥ तदाह ॥ सुप्ताः मायादयः शक्त
यो यस्येति ॥ न तु असंतमेव मेने यतोऽसुप्ता दृक् चिद्रूपं क्रियं यस्येति ॥२४॥ सा वेद द्रष्टृदृश्यानुसं
धानरूपा सदसदात्मिका कार्यकारणरूपा ॥ यद्वा सद्दृश्यं असत् द्रष्टृ ॥ आत्मस्वरूपं नयो
त्मायस्यास्तु उभयानुसंधानरूपत्वात् ॥२५॥ कालवृत्त्या कालशक्त्या गुणमय्यां क्षुभितगु
णायां ॥ अधोक्षजः परमात्मा आत्मांशभूतेन पुरुषेण महत्स्वधिष्ठातृरूपेण वीर्यं चिदा
भासमाधत्ते वीर्यवान् ॥ चिच्छक्तियुक्तः ॥२६॥

मत्स्याद्यवतारभेदैः क्रीडन् यानि यानि कर्माणि करोति ॥ ८ ॥ पुनर्विशेषं स्फुटमौत्सुक्यमाविष्करोति मन
इति ॥ पुण्यश्लोकाः पुण्यकीर्तयः तेषां मौलिरिवाधिको न विराजमानस्तस्य यो ॥ ९ ॥ अलोकांल्लोकाल्लो
कपर्वतात् बहिर्गतान् ॥ अवीवृतत् पल्लवयामास ॥ परं येषु सर्वाणि यानि सत्त्वानि तेषां निकाया
यो भेदो यैः कृतः ॥ तत्तत्कर्मादिकारी आश्रित इति वा ॥ ८ ॥ इतापि च येन प्रकारेण प्रज्ञानानां जीवानां
आत्मा स्वभावः ॥ तत्कृतेः कर्मतत्कृते रूपं ॥ तत्कृताभिधा ताभ्यां भेदं कृतवान् ॥ विश्वस्य स्थास्नु यमा

मेनानन्त्यमपि स्वावतीर्णः पुण्यश्लोकमौले स्फुरितामृतानि ॥ ९ ॥ येस्तत्त्वभेदैरधिलोकना
थो लोकानलोकान्सह लोकपालान् ॥ अचीक्लृपद्यत्र हि सर्वसत्त्वनिकायभेदोधिकृतः
प्रतीतः ॥ १० ॥ येन प्रज्ञानाममुत्र आत्मकर्मरूपाभिधानां च भिदां व्यधत्त ॥ नारायणो विश्वसृ
गात्मयोनिरेतन्नो वर्णय विप्रवर्य ॥ ११ ॥ परावरेषां भगवन् व्रतानि श्रुतानि मे व्यासमु
खादभीक्ष्णं ॥ अतृप्नुम स्वल्पसुखावहानां तेषामृते कृष्णकथामृतौघात् ॥ १२ ॥ कस्तृप्नु
यात्तीर्थपदोभिधानात् सत्रेषु वः सूरिभिरीड्यमानात् ॥ यः कर्णनाडीं पुरुषस्य यातो
भवप्रदां गेहरतिं छिनत्ति ॥ १३ ॥

आत्मयोनिः स्वतः सिद्धः ननु महाभारते त्वयास सर्वं श्रुतमेव तत्र
आह ॥ ११ ॥ परावरेषां वर्णिकाः अवरे शूद्राः तेषां व्रतानि धर्माः मे मया अभीक्ष्णं पुनः पुनस्तेषां अव
गानं तृप्नुमः तृप्ताः स्मः ॥ तेषां स्वल्पसुखावहत्वात् ॥ यस्तु तत्र श्रीकृष्णकथामृतौघः सूचि
तः तस्मादृते ॥ तत्र तत्र अल्पं तु दृष्टिं नास्ति तृप्यर्थः ॥ तत्र हेतुः कस्तृप्नुयादिति ॥ १२ ॥ तीर्थं पदं कृष्णस्याभिधाना
त् ॥ कथामृतात् सत्रेषु समाजेषु सूरिभिर्नारदादिभिः महाभारतस्यापि ॥ अत्रैव तात्पर्यमि
त्याह ॥ मुनिर्विविक्त ॥ १३ ॥

श्रुतिः श्रीकृष्णो वेदव्यासः॥ भगवद्गुणानुमोदयमानः॥ नारायणीयाख्याने वक्तुमिच्छुः सन्॥ धर्मार्थकामादि
वर्णनेन॥ हरिकथायामतिप्रवेशार्थमेवेत्याह यस्मिन्निति॥ वर्णनं मति ग्राम्यसुखानुवादैर्हरिभक्ते
पदे निश्चिते हरेः कथायां गृहीतानीता॥ तदुक्तमितिहाससमुच्चये॥ कामिनो वर्णयन्॥ कामाज्ञाभं
लब्धस्य वर्णयन्॥ नरः किं फलमाप्नोति कूपेऽन्धमिव पातयन्॥ लोकचिन्तावतारार्थं वर्णयिन्नाचने
नेतो॥ इतिहासैः पवित्रार्थैः पुनरत्रैव निर्दिष्टौ॥ अमृतधारा संसारदेवप्रदे तज्जनस्य नेतो॥ वर्णयेम

मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः॥ यस्मिन्नृणां ग्राम्यसुखानुवादैर्मति
र्गृहीता नु हरेः कथायां॥ १२॥ सा श्रद्दधानस्य विवर्धमाना विरक्तिमन्यत्र करोति पुंसः॥ ह
रेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखाप्ययमाशु धत्ते॥ १३॥ ताञ्शोच्यशोच्यानविदोऽनुशोचे ह
रेः कथायां विमुखानघेन॥ क्षिणोति देवोऽनिमिषस्तु येषामायुर्वृथावादगतिस्मृतीनां॥
तदस्य कौषारव शर्मदातुर्हरेः कथामेव कथासु सारं॥ उद्धृत्य पुष्पेभ्य इवार्तबंधो शिवा
य नः कीर्तय तीर्थकीर्तेः॥ १४॥

कथं विद्वान्महाकारुणिको मुनिरिति॥ हरिकथायामतिप्रवेशस्य फलमाह॥ सा कथामति
र्वोऽन्यत्र ग्राम्यसुखे॥ ततः किमत आह॥ हरेरिति॥ १३॥ एवंभूतायां कथायां येन रमंते ताञ्शोच
ति॥ शोच्या ये तेषामपि शोच्यान्॥ तत्राविदः॥ भारततात्पर्यानभिज्ञान्॥ शोच्यान्॥ येन वान्वा
हरेः कथायां विमुखत्वात्॥ तेषामपि शोच्यत्वान्॥ योऽयमनिमिषः कालो येषामायुः क्षपयति
अत्र हेतुः॥ वृथैव वादगतिस्मृतयो वाग्देहमनोव्यापाराः येषां तान् समस्तान्॥ १४॥ हे कौषारव॥ अस्य

मयिपरमेसतिज्ञानमर्हतीतिज्ञानयोग्योभवति॥३१॥मत्तःसकाशादीषदपिन्यूनोनभवति यद्यस्मात्
गुणैर्विषयैर्नार्दितोभिभूतःमद्वयुनंमद्विषयंज्ञानंलोकंग्राहयन्उपदिशन्॥३२॥एवमनेनाभिप्रायेणशब्दयो
निनावेदकर्त्राईजेपूजयामास॥३३॥पशुतत्प्रायाणांविक्लवात्मनामधीरचित्तानां॥३५॥मनसेक्षितं
चिंतितं॥३६॥कालिंद्याःसकाशात्सिद्धएवविदुरःकतिपयैर्दिनैःस्वःसरितंगंगांप्रापप्रापद्यतयाम॥३७

अस्माल्लोकादुपरतेमयिज्ञानंमदाश्रयं॥अर्हत्युद्धवएवाद्धासंप्रत्यात्मवतांवरः॥३१॥नोद्धवो
ण्वपिमन्न्यूनोयद्गुणैर्नार्दितःप्रभुः॥अतोमद्वयुनंलोकंग्राहयन्निहतिष्ठतु॥३२॥एवंत्रिलो
कगुरुणासंदिष्टःशब्दयोनिना॥बदर्याश्रममासाद्यहरिमीजेसमाधिना॥३३॥विदुरोप्यु
द्धवाच्छ्रुत्वाकृष्णस्यपरमात्मनः॥क्रीडयोपात्तदेहस्यकर्माणिश्लाघितानिच॥३४॥देहन्यासंच
तस्यैवंधीराणांधैर्यवर्द्धनं॥अन्येषांदुष्करतरंपशूनांविक्लवात्मनां॥३५॥आत्मानंचकुरु
श्रेष्ठकृष्णेनमनसेक्षितं॥ध्यायन्गतेभागवतेरुरोदप्रेमविह्वलः॥३६॥कालिंद्याःकतिभिः
सिद्धअहोभिर्भरतर्षभ॥प्रापद्यतस्वःसरितंयत्रमित्रासुतोमुनिः॥३७॥इतिश्रीभागव
तेतृतीयस्कंधेविदुरोद्धवसंवादेचतुर्थोध्यायः॥४॥श्लो॰३७॥द्वारिद्युनद्याऋषभःकुरू
णांमैत्रेयमासीनमगाधबोधं॥क्षत्तोपसृत्याच्युतभावशुद्धःपप्रच्छसौशील्यगुणाभितृप्तः॥१॥

इतिश्रीभागवतभावार्थदीपिकायांचतुर्थोध्यायः॥४॥पंचमेभगवल्लीलातत्त्वप्रश्नोमहामुनिः
प्रोवाचमहदादीनांसर्गंनेश्वरदेवैःस्तुतिं॥१॥अत्रनवभिरध्यायैःक्षत्तृमैत्रेयसंगमःसंवादस्तत
योःस्कंधद्वयेनानुनिरूप्यते॥१॥द्युनद्यागंगायाद्वारिहरिद्वारेआसीनंनत्वकर्मस्वयंतवेदहनंअ
गाधोपरिच्छिन्नोबोधोयस्यतंमैत्रेयंपप्रच्छसौशील्यमार्जवादिगुणास्तैरकार्पण्याद्युपेतैरभितृप्तःपा

भा॰ टी॰ ३ २५

प्रश्नानेवाह सुखायेति पंचदशभिः ॥ तैः कर्मभिः सुखं वान्यद्दुःखस्योपशमं वेत्यर्थः ॥ अथवा महा
न विंदेत ॥ किंतर्हि भूयस्तस्यैव निर्देशः उपारमं चेति ॥ ततस्तैः कर्मभिः भूयः पुनः पुनः दुःखमेव
विंदेत ॥ अतश्चैवंविधे संसारे नोऽस्माकं यद्युक्तं कर्तव्यं योग्यं ॥ तत्सर्वं नो भगवान्वदेत् ब्रवीतु ॥२॥ दैवा
त्प्राचीनकर्मणो निमित्तभूतात्कृष्णाद्विमुखस्यातोऽधर्मशीलस्य ॥ अतः सुदुःखितस्य जनस्यानुग्र
हाय भव्यानि मंगलानि भवंतः परोपकारस्वभावा एवेत्यर्थः ॥३॥ तत्तस्मात् हे साधुवर्य शं सुखरूप

विदुर उवाच ॥ सुखाय कर्माणि करोति लोको न तैः सुखं वान्यदुपारमं वा ॥ विंदेत भूयस्तत ए
व दुःखं यदत्र युक्तं भगवान्वदेन्नः ॥२॥ जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखित
स्य ॥ अनुग्रहायेह चरंति नूनं भूतानि भव्यानि जनार्दनस्य ॥३॥ तत्साधुवर्यादिश वर्त्म शं नः
संराधितो भगवान्येन पुंसां ॥ हृदिस्थितो यच्छति भक्तिपूते ज्ञानं सतत्वाधिगमं पुराणम् ॥४॥
करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्यधीशः ॥ यथा ससर्जाग्र इदं निरीहः सं
स्थाप्य वृत्तिं जगतो विधत्ते ॥५॥ यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः ॥
योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथासीत् ॥६॥ क्रीडन्विधत्ते द्विजगोसुराणां

वर्त्म नः अस्मानादिश कथय ॥ येन वर्त्मना संराधितो हृदिस्थितः सन् ॥ तत्त्वाधिगमम् आत्मापरोक्षं सत्वा
हितं पुराणं अनादिवेदप्रमाणकं ॥४॥ करोति कर्माणीत्यादीनां कथयेति पंचश्लोके क्रियासंबंधः
यथा येन प्रकारेण गुह्यरूपेण कृतावतारः सन् ॥ त्र्यधीशः त्रिगुणमायानियंता अतः स्वतंत्रत्वा
द्यानि कर्माणि करोति ॥ कर्माण्येव विशेषतः दर्शयति ॥ यथेत्यादिना ॥ निरीहो निष्क्रियः वृत्तिं स्व
होवा संस्थाप्य स्थितिं कृत्वा पालयतीति विकं ॥५॥ स्वे स्वीये खे हृदयाकाशे निवेश्य स्थापयित्वा निद्र

अनीहस्य निष्क्रियस्य तिः स्वरस्य वा कर्माणि ॥ अभवस्याजन्मनो भवो जन्म कालात्मनस्त्वारिभयाद्
गोष्ठ्यः पलायनं च स्वात्मनिरतिर्यस्य न स्य च स्त्रीभिः स्त्रीभिः सहरत्याश्चर्यं इति ॥ गृहस्थाश्रमरतिच
नं ॥ इहास्मिन्विषये विदामपि धीः संशयेन खिद्यति ॥१६॥ किंच मंत्रेषु स्वमंत्रेषु ते भूसत्त्वमा स्वपहू
य पृच्छेः अपृच्छः अकुंठितः कालादिना अखंडः सन्नूनतः सदात्मा संयमादिसहितो बोधो वियाग्ज्ञा
क्रियं ईशस्य सुपृच्छवत् ॥ अप्तवदप्रमत्तः प्रवर्तितः सन् ॥१७॥ स्वस्यात्मनः नवरहः रहस्यं तत्त्वेन समप्रका

कर्माण्यनीहस्य भवोऽभवस्य ते दुर्गाश्रयोऽथारिभयात्पलायनं ॥ कालात्मनो यत्प्रमदायुताश्र
यः स्वात्मन्रतेः खिद्यति धीर्विदामिह ॥१६॥ मंत्रेषु मां वा उपहूय यत्त्वमकुंठिताखंडसदात्मबो
धः ॥ पृच्छेः प्रभो मुग्ध इवाप्रमत्तस्तन्नो मनो मोहयतीव देव ॥१७॥ ज्ञानं परं स्वात्मरहःप्रका
शं प्रोवाच कस्मै भगवान्समग्रं ॥ अपि क्षमं नो ग्रहणाय भर्तर्वदांजसा यद्वृजिनं तरेम ॥१८॥
इत्यावेदितहार्दाय मह्यं स भगवान्परः ॥ आदिदेशारविंदाक्ष आत्मनः परमां स्थितिं ॥१९॥
स एवमाराधितपादतीर्थादधीततत्त्वात्मविबोधमार्गः ॥ प्रणम्य पादौ परिवृत्य देव
मिहागतोऽहं विरहातुरात्मा ॥२०॥ सोऽहं तद्दर्शनाह्लादवियोगार्तियुतः प्रभो ॥ गमि
ष्ये दयितं तस्य बदर्याश्रममंडलं ॥२१॥

शं कस्मै वक्ष्यसि सर्वेनामत्वमाबं ॥ नोऽस्मा
कं ग्रहणायापि क्षमं ॥ यदि योग्यं न तर्हि वद भर्तः स्वामिन् यतो वृजिनं संसारदुःखं अनाया
सेन तरेम ॥१८॥ आवेदितो हार्दो हृदिस्थोऽभिप्रायो येन तस्मै आराधितपादो भगवान्स एव
तीर्थं गुरुः तस्मादधीतोऽधिगतः ॥ तत्त्वात्मविबोधस्य परमात्मज्ञानस्य मार्गो येन देवं परिवृत्य प्र
दक्षिणीकृत्य ॥२०॥ तस्य दर्शनेनाह्लादः वियोगेनार्तिस्ताभ्यां युतः बदर्याश्रमं स्थानं गमिष्या

मस्तुपरतेपदवम्मंतेनीवेदस्यंदीर्घमाकस्यांतेनेपानेनपक्षेरत्नविमर्शः॥ लोकभावनोलोकानुग्रह
कारको॥२३॥ ज्ञानेन विवेकेन विस्रंभात् विश्वासमात्॥२२॥ यद्यस्मात्त्वं भगवत्प्रयोजनं मम प्रयोजनमथकाः संत
नन्वात्मसंस्थस्य ममयं भाव॥२४॥ नन्वात्मसंस्थस्य ममभावः॥ भगव
श्चरंति॥ नहितेषां कृतार्थानां मम कृत्यमस्तीत्यर्थः केवलमसंभावनादिति इहनये स्तानीकांश्चि
नैवस्मरणात्रवेला॥ नवनत्वमुपदिष्टमाधंः

यत्र नारायणो देवो नरश्च भगवानृषिः॥ मृदुतीव्रं तपो दीर्घं तेपाते लोकभावनौ॥२४॥
श्रुक उवाच॥ इत्युद्धवादुपाकर्ण्य सुहृदां दुःसहं वधम्॥ ज्ञानेनाशमयत्क्षत्ता शोकमुत्प
तितं बुधः॥२५॥ स तं महाभागवतं व्रजन्तं कौरवर्षभः॥ विस्रंभादभ्यधत्तेदं मुख्यं कृष्णपरि
ग्रहे॥२६॥ विदुर उवाच॥ ज्ञानं परं स्वात्मरहःप्रकाशं यदाह योगेश्वर ईश्वरस्ते॥ वक्तुं भवा
न्नोऽर्हति यद्धि विष्णोर्भृत्याः स्वभृत्यार्थकृतश्चरंति॥२७॥ उद्धव उवाच॥ ननु ते तत्त्वसंराध्य ऋ
षिः कौषारवोऽन्तिके॥ साक्षाद्भगवतादिष्टो मर्त्यलोकं जिहासता॥ श्रुक उ॥ इति सह विदुरेण
विश्वमूर्तेर्गुणकथया सुधया प्लावितोरुतापः॥ क्षणमिव पुलिने यमस्वसुस्तां समुषित औ
पगविर्निशां ततोऽगात्॥२८॥ राजोवाच॥ निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथप
पेषु मुख्यः॥ स तु कथमवशिष्ट उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः॥ २९॥ श्रुक
उ॥ ब्रह्मशापापदेशेन कालेनामोघवांछितः॥ संहृत्य स्वकुलं नूनं त्यक्ष्यन्देहमचिंतयत्॥ २९

ह्याराध्यः सत्वत्वाराध्योमेमैत्रेयोनतत्वं हंसमांतिकएवतत्उपदेशोसम्प्रादिष्टइति॥२५॥ प्लावितःअप
नीतः उरुस्तापोयस्य यमस्वसुः यमुनायाः पुलिने तीरे निशांतिराणमिवसमुषितः औपगविरुद्ध
वः॥२६॥ ब्रह्मशापेन निधने प्राप्ते कथं यस्मात्॥ ब्रह्मादीनामधीशोहरिरप्याकृतिंमत्युषा
कारत्यक्तवान्॥२७॥ ब्रह्मशापः अपदेशो मिषं यस्य तेन कालेन स्वशक्तिरूपेणामोघं वांछितं

वातत्वेवंमेवंयंतस्वदोषेणतिष्ठोचतिश्रलंगच्छतिसतिमदैनेकरने॥३॥उपस्पृश्यसरस्वत्यामाचम ।
श्रदेवोक्तंः इदंमेवदारकायो॥४॥ततस्त्रिप्रेतंकुलसहायारिकं॥५॥ह्रमकेनेह्रुतावासश्रुकेतनमम
श्रयं॥६॥विरजमविदितंलच्छिनंकौशांकोशघंकोशांवरेणापीतावरेणा॥७॥ग्रीथिश्रितउपरिस्था
पचितास्पाश्रितः दृष्टेनोवद्धः श्रमकोवालः कोमलोस्वस्योपेनंनेत्नकं पिप्पलविषयमहतेपेन

तेषांमेवद्वेषेणविषमीकृतचेतसां॥तिष्ठोचतिरवावासीद्देहानामिवमहंनम॥५॥भग
वानाममायायागतिनामवलोकसः॥सरस्वत्याउपस्पृश्यहृत्तमलउपाविशत॥६॥श्रदे
वोक्तोभगवतायपंचार्तिहरेणाह॥बदरीवनमयाहीनिसकुलसंजिहीर्षुणा॥७॥श्रया
पितदभिप्रेतंनानवद्यमशिदम॥दृष्टनोत्वयामभक्तेःपादविम्ब्रषणाहृम॥८॥प्रद्वाव
मेकमासीनंविविवरपितपाति॥प्रीतिकेनेतरस्मयाहृतकेतमकेतनं॥९॥प्रपामाव
दांतविरजंप्रसन्नाहृणलोचनम॥दोर्भिश्चतुर्भिर्विदितंपीतकौशांबरेणच॥१०॥वामउ
रावधिश्रितदक्षिणांघ्रिसरोरुहम॥अपाश्रितार्भकाश्वत्थमकृशंत्यक्तपिप्पलं॥११॥तस्मि
न्महाभागवतोद्वैपायनसुहृत्सखेः॥लोकाननुचरन्सिद्धआससादयदृच्छया॥१२॥तस्या
१६ नुरक्तस्यमुनेर्मुकुंदःप्रमोदभावानतकंधरस्य॥आशृण्वतोमामनुरागहाससमीक्षयावि
श्रमयन्नुवाच॥१३

तेयाश्रकृपामानंदमूलं॥१४॥हेपावनःसुहृत्सखापमसःस्वगुरुपुत्रमात् पाराशरशिष्योमेमे
परस्परं॥१५॥प्रमोदेनभावेनचाननतकंधरणयस्य॥पातानवेप्रमोदस्वरागेनानुरागेणहा
सेयस्मातयासमीक्षयाविश्रमयन॥विगतश्रमंकुर्वन॥१६॥

भा
टी
१२

ते मनसीप्सितमहं अनन्यो वेद वेद्मि ददाने हे तं विश्वसृजां वसूनां मिलितानां सत्रे हे वसो इति ॥ भग
पूर्वजन्मनि त्वं वसुरूपः तदा मत्प्राप्तिकामेन त्वयाहमिष्टः ॥ अतस्तत्साधनं ददामि दास्यामि
ग्रमे मत्प्राप्तिं विंदुं प्राप ॥ तस्य भाग्यमभिनंदति ॥ १२ ॥ स एष भवो जन्म ते भवानां मध्ये चरमः यद्य
स्मिन् ॥ मदनुग्रहः आसादितो लब्धः ॥ यस्मान्मामिहैकांते विषदानुवृत्त्या एकांतभक्त्या दृष्ट
वानसि पतति हि ह्यामहं मानतमित्यर्थः ॥ नृलोकान् ॥ रहाहेतनीवास्तेषां लोकानां रहसि उत्सृजंतं एकांते वैकुंठं ग
तं तमिच्छंतं ॥ ददामि इति यदुक्तं तदेव निर्दिशति भवानेवास्मिन्नाद्ये कल्पे आदिसर्गे सर्गोपक्रमे
श्रीभगवानुवाच ॥ वेदाहमंतर्मनसीप्सितं ते ददामि यत्तद् दुरवापमन्यैः ॥ सत्रे पुरा विश्वसृ
जां वसूनां मत्सिद्धिकामेन वसो त्वयेष्टः ॥ ११ ॥ स एष साधो चरमो भवानामासादितस्ते म
दनुग्रहो यत् ॥ यन्मां नृलोकान् रह उत्सृजंतं दिष्ट्या ददृश्वान् विशदानुवृत्त्या ॥ १२ ॥ पुरा मया प्रो
क्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ॥ ज्ञानं परं मन्महिमावभासं यत्सूरयो भा
गवतं वदंति ॥ १३ ॥ इत्यादृतोक्तः परमस्य पुंसः प्रतिक्षणानुग्रहभाजनोऽहं ॥ स्नेहोत्थरो
मा स्खलिताक्षरस्तं मुंचञ्छुचः प्रांजलिराबभाषे ॥ १४ ॥ को न्वीश ते पादसरोजभाजां सुदु
र्लभोऽर्थेषु चतुर्ष्वपीह ॥ तथापि नाहं प्रवृणोमि भूमन् भवत्पदांभोजनिषेवणोत्सुकः ॥ १५ ॥
ममसहिमालीलावभासकं ते पेनतत ॥ १४ ॥ इत्येवमाह तच्छ्रावा तु कृष्णाहं प्रतिक्षणं कृपा वलो
कनपात्रभूतः पादांतरे प्रतिक्षणमनुग्रहस्य पात्रमिति ॥ पुंसो ईश्वरस्य
वं तप्राबभाषे ॥ उक्तवानस्मि ॥ १५ ॥ नहि स्वात्मावमात्वनिष्कृतिकामो हं ॥ किंतु त्वत्सेवयैव त्व
कम्यर्थः त्वद्विवादरमानात्वरणं ह्यामे मोहो भवति ॥ अतस्तवं तत्त्वं नेदृशी निषाध्येयितमा
हा ॥ कोन्विति ॥ वनशुंधमोदि शुन यापिता न हंत हृणोमि प्रव स्मानाचरित देशे पवित ॥ कमो लि

व्यावाग्म्यउपायः ॥ किंतमपुनायग्रामदः सर्वतोमदः नेनानानाम्बविलोचनानामेषांविवादोयदाम
विष्यति । नदादृष्यानेवैषांवधोपायः ग्रतोम्मोनास्ति पकामनोपिमप्युयनेसतिस्वयमेवविवादे
नांतर्दधीरत्रिलयं ॥ एवंश्लोकद्वयेनोक्तंकमेणसं चित्तमस्वराज्ञेस्थापयिता ॥ १९ ॥ श्रुतःरक्षितः
१ ॥ अनुजैःसह ॥ २ ॥ सांख्यप्रकृतिपुरुषविवेकं ॥ २१ ॥ स्मितयोयःस्मितसहितोवलोकःतेनपीयूष

मिषोयदेव्योभवितविवादोमध्यामदात्तानस्यविलोचनानां ॥ नेषांवधोपायउपायानतोन्योम
पृथनेनर्देयनेस्वयंस ॥ २२ ॥ एवंसेवितभगवान्नराज्ञेस्थाप्ययर्मजे ॥ नेदयामासस्वहृदः
साधूनोबन्धेर्दर्शयन ॥ २३ ॥ उत्तरायाश्रुतः एतोवुधाः साधुभिमनस्विना ॥ सर्वेदेशगणस्त्रसवन्धः
पुनर्भगवतश्चुतः ॥ २४ ॥ अयाजयदृन्मस्तनस्यमेधैस्त्रिभिर्विभुः ॥ सोपिक्ष्मामनुनेरक्षन्नेम
कृष्णमनुव्रतः ॥ २५ ॥ भगवानपिविश्वात्मालोकवेदपथानुगः ॥ कामानिषेवेद्द्वार्वत्यामसक्तः
सांख्यमास्थितः ॥ २६ ॥ स्निग्धस्मितावलोकेनवाचापीयूषकल्पया ॥ चरित्रेणानवद्येनश्रीनि
केतेनचात्मना ॥ २७ ॥ इमंलोकममुंचैवरमयन्सुतरांयदून ॥ रेमेक्षणदयादत्तक्षणस्त्रीक्षण
सौहृदः ॥ २८ ॥ तस्येवंरममाणस्यसंवत्सरगणान्बहून ॥ गृहमेधेषुयोगेषुविरागःसमजा
यत ॥ २९ ॥

केलस्यपास्तयानत्समपापाद्वांतरेसमधाप्रवाहत्वपयाआत्मनादेहेन ॥ ३० ॥ तस्यापारा
मादत्तंक्षणेवसवउत्सवोवायासांस्त्रीणांनात्सक्षणसौहृदंयस्यसः ॥ ३१ ॥ गृहमेधेषुगृहस्थ
मेषुयोगेषुकामोपायेषुविरागऔदासीन्यंजातमित्यर्थः ॥ ३२ ॥

यदा स्वाधीनेष्वपि भगवतो विरागः॥ तदा दैवाधीनेषु को विश्रंभेत विश्वासं प्रीतिं वा कः कुर्यात्॥ योगे
न वै योगेश्वरं श्रीकृष्णमनुव्रतः॥२४॥ शेपुः शापं ददुः॥ भगवतो मते अभिप्राये कोविदाः अभिज्ञाः॥२५
वृष्णयः शीलादिबहुगुणोपेताः गावः ततः कन्या धरां वृत्तिकरीं जीविकाप्रदां भूमिम्॥२८॥ भगवदर्प

दैवाधीनेषु कालेषु दैवाधीनः स्वयं पुमान्॥ को विश्रंभेत योगेन योगेश्वरमनुव्रतः॥२४॥
पुर्यां कदाचित्क्रीडद्भिर्यदुभोजकुमारकैः॥ कोपिता मुनयः शेपुर्भगवन्मतकोविदाः॥२५॥
ततः कतिपयैर्मासैर्वृष्णिभोजांधकादयः॥ ययुः प्रभासं संहृष्टा रथैर्देवविमोहिताः॥२६॥
तत्र स्नात्वा पितॄन्देवानृषींश्चैव तदंभसा॥ तर्पयित्वाथ विप्रेभ्यो गावो बहुगुणा ददुः॥२७
हिरण्यं रजतं शय्यां वासांस्यजिनकंबलान्॥ यानं रथानिभान्कन्या धरां वृत्तिकरीम
पि॥२८॥ अन्नं चोरुरसं तेभ्यो दत्वा भगवदर्पणं॥ गोविप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्धभिः
इति श्रीभागवते महापुराणे तृतीयस्कंधे तृतीयोऽध्यायः॥३॥ उद्धव उवाच॥ अथ ते तद
नुज्ञाता भुक्त्वा पीत्वा च वारुणीं॥ तया विभ्रंशितज्ञाना दुरुक्तैर्मर्म पस्पृशुः॥१॥

णं यथा भवति॥ गोविप्रार्था असवो येषां॥२९॥ इति श्रीभागवते महापुराणे भावार्थदीपि
कायां तृतीयस्कंधे तृतीयोऽध्यायः॥३॥ वृत्तमेवं पुनर्निधनं कृत्वा स्वमस्थानं सिद्धये॥ उद्धवस्यो
पदेशेन वृत्तामैत्रेयमागमत्॥१॥ तैः वा स्वरैर रत्तुक्तानां वारुणीं पैष्टीं मदिराम्॥१॥
॥ ॥

भा० ३ टी० ११

११

ककुद्मिनो वृषान् । अविद्धनासिकान् ॥ विद्धनासिका विद्धनासिकीकृत्वेतिवा । तेहि वृषभे सत्यस्तनेन
वभद्रो सातेयोयेषां तथापि तान् गृध्नतः कामयमानान् । अज्ञान् एव वा तान् ॥ शास्त्रभृतो राज्ञः तद्धेरत
नपवने दान ॥ ४ ॥ यदाः दितिः कुन्ड्लेदानस्य यतः मदाम्भुः सत्तश्चोपि ग्रामः सीयरतन्न वद्रिया
याः सत्यभामायाः प्रियमभ्यधात् सिकुः पुनरू पारिजातमानीतवान् । यदर्थे यविमितेकृष्ण च स्रीपे
रितोयोदु मनधावत ॥ स्वकार्यसाधके नतेनेपुद्दो यम लसापुरुषएव त्वाह ॥ क्रीडामृगावेति । ग्रथेव

ककुद्मिनो विद्धनसो दमित्वा स्वयंवरे नाग्नजितीमुवाह । तद्भग्नमानानपि गृध्यतोऽज्ञाञ्जघ्ने
क्षतः शस्त्रभृतः स्वपार्श्वैः ॥ ५ ॥ प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुरार्च्छद्द्युतरुं यदर्थे । वज्र्यभ्य
धावत्तरसामरेन्द्रः क्रीडामृगो नूनमयं वधूनाम् ॥ ६ ॥ सुतं मृधे खं वपुषा ग्रसन्तं दृष्ट्वा सुनाभो
न्मथितं त्रिलोक्या ॥ अमर्षितं तत्र नयावधेशे एवदानदन् त्र शुभमाविवेशा ॥ ७ ॥ तत्राहृतास्ता
नरदेवकन्याः कुजेन हत्वा हरिमाननेवं वपुः ॥ उत्पाद्य सद्योजगृहुः प्रहर्षव्रीडानुरागप्रहि
तावलोकैः ॥ ८ ॥ आसां मुहूर्त एककस्मिन्नानागारेषु योषिताम् ॥ सविधं जगृहे पाणीननुरू
पः स्वमायया ॥ ९ ॥ ॥ ॥
नीः ॥ ५ ॥ स्तनाभेनवत्के गाउन्मथितं हते सतं भौमं हत्वा तस्य सा
ग्रामस्य धरित्रियाग्रामे वितः प्राथितः सन् ॥ तस्य तनयाय भगदत्ताय दत्वा प्रहवत्रोषं वा संदत्वा
तत्रान्तः पुरे कुजेन भौमेन यान्याहृतास्ताः प्रहर्ष व्रीडा चयानुराग स्तैः प्रहिताः प्रेषिता येषु
वलोकाः तैः जगृहुः स्वीकृतवत्यः ॥ ५ ॥ आसां योषितां पाणीन् ॥ तत्तदनुरूपः सन् ॥ सविधं विवाहो
चितनप्रकारसहितं यथा भवति ॥ ५ ॥ ॥ ॥ ॥

भा
टी
११

सर्वेतः सर्वैर्गुणैः स्वतस्त्वात्रिमत्कृतेर्मायया विविधं भवनं ॥ तदिच्छया ॥ यद्वा मत्कृते हेतोः विविधं भवित
मिच्छया ॥ ९ ॥ कालः कालयवनः स्वपतस्त्राहृतावतो मुचुकुंदभीमादिभिः निमित्तैः स्वयमेवाजीवनत
वातितवान् ॥ तेषां स्वपुंसां तेजः प्रभावकीर्त्तिं वादितवान् ॥ १० ॥ ग्रावरहद्विविदबल्वलानन्यानपिकाश्रित्य
शुभ्रवरामादिभिर्घातयत ॥ अघातयत ॥ घातयाञ्चित्रिविधा पाठः ॥ दंतवक्रादीन् स्वयमवधीत् ॥ इत्था
नवातघरिमवुषगः ॥ ११ ॥ कथंभूतान् ऊरुहदेवमापततां गच्छतां येषां वलैः सेनाभिः भूः सर्वापि च

तास्वपत्यान्यजनयदात्मतुल्यानि सर्वतः ॥ एकैकस्यां दशदश प्रकृतेर्विबुभूषया ॥ ९ ॥
कालमागधशाल्वादीननीकैः रुंधतः पुरं ॥ अजीघनत्स्वयं दिव्यं स्वपुंसां तेज आदिशत् ॥ १० ॥
शंबरं द्विविदं बाणं मुरं बल्वलमेव च ॥ अन्यांश्च दंतवक्रादीनवधीत्कांश्च घातयत् ॥ ११ ॥ अ
थ ते भ्रातृपुत्राणां पक्षयोः पतितान्नृपान् ॥ चचाल भूः कुरुक्षेत्रं येषामापततां बलैः ॥ १२ ॥
स कर्णदुःशासनसौबलानां कुमंत्रपाकेन हतश्रियायुषं ॥ सुयोधनं सानुचरं शया
नं भग्नोरुमूर्व्यां न ननंद पश्यन् ॥ १३ ॥ कियान्भुवोयं क्षपितोरुभारो यद्द्रोणभीष्मार्जु
नभीममूलैः ॥ अष्टादशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनां ॥ १४ ॥

चालचकंपे ॥ १२ ॥ सकर्णसः हता श्रीः आयुश्च यस्य भग्नावूरू यस्य ॥ तमूर्व्यां शयानं पश्यन्नपि न ननं
दतोषं न प्राप ॥ अनभिनंदनप्रकारमेवाह ॥ १३ ॥ कियानिति ॥ द्रोणादिभिर्मूलैः कारणभूतैः
यदिति ॥ यः अष्टादशाक्षौहिणीयुक्तः ॥ हस्तबलमास्ते ॥ क्षपितः उरुभारो भुवः अयं कियानल्प
मर्थः ॥ यस्मान्मदंशैः प्रद्युम्नादिभिर्हेतुभूतैर्दुर्विषहं बलमास्ते ॥ १४ ॥

धी२

स एवाधिके वयसि ग्रामः सन् लक्ष्म्याः शोभायाः स्थानं निकेतनं सिता गोवृषा यस्मिन् नानावर्णो गो
संघो यस्मिन् रणद्वेणुं कुर्वन् वेणुं यस्य अरीरमत् ॥ रमयामास ॥२९॥ भोजराजेन कंसेन प्रयुक्तान्
नानादिविनिर्मितान् ॥ सिंहादीन् ॥ यथा विपन्नान् मृतान् ॥ गोपान् ॥ गावश्च ॥ तान् उत्थाप्य तत् वृन्दा
यमुनाजलं प्रकृतिस्थितं निर्विषं कृत्वा अपाययत् ॥ गोसवेन गोपराजं नन्दं वित्तस्य वे

स एव गोधनं लक्ष्म्या निकेतं सितगोवृषं ॥ चारयन्ननुगान् गोपान् रणद्वेणुररीरमत् ॥
२९ ॥ प्रयुक्तान् भोजराजेन मायिनः कामरूपिणः ॥ लीलया व्यनुदत्तांस्तान् बालः क्रीडन
कानिव ॥ ३० ॥ विपन्नान् विषपानेन निगृह्य भुजगाधिपं ॥ उत्थाप्यापाययद्गावस्त
त्तोयं प्रकृतिस्थितं ॥ ३१ ॥ अयाजयद्गोसवेन गोपराजं द्विजोत्तमैः ॥ वित्तस्य चोरुभार
स्य चिकीर्षन् सद्व्ययं विभुः ॥ ३२ ॥ वर्षतीन्द्रे व्रजः कोपाद्भग्नमानेऽतिविह्वलः ॥ गोत्रली
लातपत्रेण त्रातो भद्रानुगृह्णता ॥ ३३ ॥ शरच्छशिकरैर्मृष्टं मानयन् रजनीमुखं ॥ गाय
न्कलपदं रेमे स्त्रीणां मण्डलमण्डनः ॥ ३४ ॥ इति श्रीभागवते तृतीयस्कंधे द्वितीयः ॥ २ ॥

ति च कारादिं समानभंगं कुर्वन् ॥ उरुभारस्यातिसमृद्धस्य ॥ ३२ ॥ कोपाद्वर्षति गोत्रः पर्वत
एव लीलातपत्रं तेन हे भद्र ॥ मण्डलमंडयतीति ॥ २ ॥ इति श्रीभावार्थदीपिकायां तृती
ये द्वितीयः ॥ २ ॥ इतीयं मथुरामेत्य व्रजात् कंसवधादिकम् ॥ यत्तत्र द्वारिकायां च कृत्स्नेन तत्र च

भा
द.टी.
१०

ॐ श्रीगुरवे नमः ॥ श्रुतमिति ममायं पितृव्यः स्वस्य सविकीर्षये मर्थः ॥ तेनागतोऽहं समे चात्मनित्रिगुणपूर्णत्वायेकं स
वृष्णेरपि निकर्षेण ॥ पितृव्यः स्वरूपार्थं ॥ १ ॥ ब्रह्मवेदं सविस्तरं षडंगादिसहितं पंचजनोदरविदारणाद्द
तगुरुमानीयेत्यर्थः ॥ २ ॥ भीष्मककन्यया रुक्मिण्या ये आहूता राजानः तुल्यबलमार्ष ॥ समाहूतानाह
ति पादेयाः कृष्णाद्यर्थः केन साधनेन श्रियो लब्धाः सवर्णेन समानेन रूपेण ॥ यद्यपि तयाके
वलं श्रीकृष्णस्य वाहूतः न सर्वे ॥ तथापि तत्साला वर्ण्य ॥ तेषां मध्ये मन्ने हेत्वेति ॥ तथापि तेषु

उद्धव उवाच ॥ ततः सभ्यागमम्हं त्वयि योऽभिकीर्षया शंबलदेव से
पूत ॥ निपातात्तेगात्रिगुणपूर्णनार्थ हतमकर्षयेत्व सामोज्जसोर्या ॥ १ ॥
सांदीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरं ॥ तस्मै प्रादाद्वरं पुत्रं मृतं
पंचजनोदरात् ॥ २ ॥ समाहूता भीष्मककन्यया ये श्रियः सवर्णेन बुभू
षयैषां ॥ गांधर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ॥ ३ ॥

वाहूतास्त्वयात्ते ॥ तेषां मिषतां मूर्ध्नि पदं दधत् ॥ तथा सह गांधर्ववृत्त्या परस्परसमयरूपया
भवितमिक्कयाजहार ॥ कथंभूतां स्वभागं लक्ष्मी स्वस्य भागतां तया आत्मनोपितत्वाच्च ॥ सुपर्णः सु
पतनः ॥ यथा सुपर्णो वस्वभागं तथा मिह्यर्थः ॥ यद्वा श्रिया रुक्मिण्या समानं वर्णादर्थं वा
वर्कयत्ससः श्रियः सवर्णा रुक्मिणी तेन समाहूताः शिशुपालादयः किमर्थं भीष्मकन्यायाम
हत्तेषां बुभूषया भूतिः भवतिस्येतदर्थं तत्र शिशुपालस्याह्वानं वरत्वेन बुभूषया जरासंधा
दीनां तु द्विवाहोत्सवेन पोषणार्थं वत् ॥ ३ ॥

स्वयं त्वयपवेभृतः तस्य तत्कैंकर्यं नोस्मान् विग्लापयतीत्युत्तरेणान्वयः॥ न साम्यातिशयौ यस्य
यस्मै स साम्यसाम्यमतिशयश्च नास्तीत्यर्थः॥ तत्र हेतवः त्र्यधी णां ब्रह्मादीनामधीशः
स्वाराज्यलक्ष्म्या परमानंदरूपसंपत्त्यैव प्राप्तः समस्तभोगः॥ बलिं करं समर्हणं वा हरद्भिः स
मर्पयद्भिः॥ चिरकालीनैर्लोकपालैः किरीटाग्रेणोडितं स्तुतं पादपीठं यस्य प्रणतकि
रीटसंघट्टनध्वनिरेव स्तुतिस्तेनोत्तेस्पते॥२१॥ अंग विदुर भृतान्नस्त्यान्॥ उग्रसेनं यत्किं

स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः॥ बलिं हरद्भिश्चि
रलोकपालैः किरीटकोटीडितपादपीठः॥२१॥ तत्तस्य कैंकर्यमलं भृतान्नो
विग्लापयत्यंग यदुग्रसेनम्॥ तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद्देव निधा
रयेति॥२२॥ अहो बकी यं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी॥ लेभे ग
तिं धात्र्युचितां ततोन्यं कं वा दयालुं शरणं व्रजेम॥२३॥॥ ॥

करत्वं न देवाह॥ परमेष्ठिधिष्ण्ये राजासने॥ निषण्णमासीनं॥ स्वयं तिष्ठन्॥ हे देव॥ अवधा
रयेति॥ यद्विज्ञापितवान्॥ एवमनुवृत्तिं कृपयैवेति सूचयन् प्रकारान्तरेणापि तस्य कृपा
लुतां दर्शयन्नाह॥२२॥ अहो आश्चर्यं दयालुतायाः॥ हन्तुमिच्छया यस्मिन्स्तनयोः संभृतं
कालकूटविषं यमपाययत्॥ बकी पूतना अप्यसाध्वी दुष्टापि॥ धात्र्या यशोदाया उचितां
गतिं लेभे॥ भक्तवेषमात्रेणयः स्वपदं दत्तवान्॥ ततोन्यं कं वा भजेम॥२३॥

भा
टी
३

ननुभागवतानेवभगवाननुगृह्णातीतिसत्यं असुरानप्यहंभागवतानेवमन्ये यतोभागवताइव तेपिभगवद्ध्यानाभिनिवेशेनभगवंतमपरोक्षंपश्यंतीत्याह ॥ मन्येइति ॥ संरंभः क्रोधावेशस्तेन मार्गेणाभिनिविष्टंचित्तंयेषांतान् ॥ अतएवयेसंग्रामेतार्क्ष्यःकश्यपस्तस्यपुत्रंगरुडंअंसेस्कंधे सुनाभायुधःचक्रायुधोहरिर्यस्यतं ॥ तमचक्षत अपश्यन् ॥ तस्मात्तेषामप्यनुग्रहोयुक्तएवेत्यर्थः ॥ वक्ष्यतिच ॥ तस्मात्केनाप्युपायेनमनःकृष्णेनिवेशयेदिति ॥ २४ ॥ इदानींतस्यानर्थानप्रकारेवकर्मा

मन्येसुरान्भागवतांस्त्र्यधीशेसंरंभमार्गाभिनिविष्टचित्तान् ॥ येसंयुगेचक्षततार्क्ष्यपुत्रमंसे सुनाभायुधमापतंतं ॥ २४ ॥ वसुदेवस्यदेवक्यांजातोभोजेंद्रबंधने ॥ चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः ॥ २५ ॥ ततोनंदव्रजमितःपित्राकंसाद्विबिभ्यता ॥ एकादशसमास्तत्र गूढार्चिःसबलोवसत् ॥ २६ ॥ परीतोवत्सपैर्वत्सांश्चारयन्व्याहरद्विभुः ॥ यमुनोपवनेकूजद्द्विजसंकुलितांघ्रिपे ॥ २७ ॥ कौमारींदर्शयंश्चेष्टांप्रेक्षणीयांव्रजौकसां ॥ रुदन्निवहसन्मुग्धबालसिंहावलोकनः ॥ २८ ॥

दितआरभ्यतच्चरितंसंक्षेपतःकथयति ॥ वसुदेवस्यभार्यायांजातःभोजेंद्रःकंसःतस्यबंधनागारे ॥ अस्याःपृथिव्याःशंसुखंस्वयंचिकीर्षुःअजेनाभियाचितःसन् ॥ २५ ॥ पित्राहेतुभूतेननंदव्रजमितःगतःसमाःसंवत्सरान् ॥ गूढार्चिःगुप्ततेजाःअवसत् ॥ कूजद्भिर्द्विजैःपक्षिभिःसंकुलिताव्याप्ताअंघ्रिपाःयस्मिन् ॥ २७ ॥ रुदन्निवेतिइवशब्दस्ययथायोगंसर्वत्रान्वयः ॥ मुग्धोबालस्तस्ययःसिंहस्तद्वदवलोकनंयस्य ॥ २८ ॥ ॥ ॥ ॥

२.

यन्मर्त्यलीला स्वरूपौपयिकं योग्यं स्वस्यापि विस्मयजनकं ॥ यतः सौभगर्द्धेः सौभाग्यातिशयस्य परं पदं प
रं काष्ठा भूषणानां भूषणाङ्गानि यस्मि ॥ १२ ॥ हर्षात् स्वस्त्ययने परमानन्दकरे ॥ त्रिभुवनस्थो लोकः
माग्गौ मत्वा यमद्य इदानीमिह विधेरर्वाक्सृतौ अर्वाचीन संसारनिर्माणे मनुष्यनिर्माणे च यत्कौश
लं तेन पुनर्गतं कार्त्स्न्येन गतं पर्याप्तम् ॥ नातः परं तस्य कौशलमस्तीत्येवमैने ॥ तन्मत्तैर्विधातृस्व
ता भावेपि लोकस्य दृष्टिविषयं युक्ता ॥ १३ ॥ अनुरागेण प्लुतोद्गमो हासः रासो विनोदः लीलावलो
कः प्रेमैः स्वकृते हासायनेनेतरं प्रतिलब्धमानो याभिस्ता ॥ दृग्भिः सहानुप्रवृत्ता गच्छन्नेवानुगता

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतम् ॥ विस्मापनं स्वस्य च सौभगर्द्धेः
परं पदं भूषणभूषणाङ्गम् ॥ १२ ॥ यद्धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्स्वस्त्ययनं त्रिलोकः ॥
कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्सृतौ कौशलमित्यमन्यत ॥ १३ ॥ यस्यानुरागप्लुतहास
रासलीलावलोकप्रतिलब्धमानाः ॥ व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः किल कृत्यशे
षाः ॥ १४ ॥ स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकम्पितात्मा ॥ परावरेशो महदंशयु
क्तो ह्यजोऽपि जातो भगवान्यथाग्निः

धियो यासां ताः कृत्यशेषा यासां ताः ॥ असमापितकृत्या एव तत्
स्थुः एवंभूतं विविधं प्रदर्शनं प्रकारमाह ॥ १४ ॥ स्वीयान्येव शान्तानि च रूपाणि ॥ तत्र शान्तरूपेषु इतरैः
घोररूपैः पीड्यमानेषु ॥ अनुकम्पितः कृतानुकम्प आत्मा यस्य ॥ अजोपि जातः आविर्भूतः ॥ महांश्च तद्रूपेणाति
त्मसिद्ध्यवामित्यर्थः यथा काष्ठे अग्निराविर्भवति तद्वत् ॥ अत एव जन्मनि हेतुः महदंश ॥ महदादयस्तेऽंशाः कार्याणि ले
शो यस्यास्य तत्कस्य ॥ तन्महदंशयुक्तं ॥ तद्युक्त इति ॥ न उत्तमः सौपराणामवराणामीशः परवान्तेऽप्रमनीतेस्व
राज्ञोऽस्मा ॥ १५ ॥

भा
टी
८

मामपेतत्रुर्वितकोरर्वरंचावेदयति ॥ तदेवाह ॥ वसदेवगेहेवे यनागारे जन्मनो यहि संवनमतुकस्यां
नवनरसिद्धवदकसादाविर्भावः कं समयादिव ॥ निलीयत्रजेवासक्त ॥ कालयवनादिरिपुभयादिव पुरा
मथुरायां ञ्वासीत ॥ पलायत ॥ पतत्र्वेदरेषु रिंतसरतोमम चेतः कर्मभ्रनेतुनोति अथयति ॥ तदे
वदर्शयति यदाहेति ॥ हे तात हे प्रवधु वां प्रसीद तम प्रसादे कुरू तेन कृपा निष्कृतिः सुसुष्टयं पेत्वां
स्माकं वहुव वनेरामा यमिप्राये ॥ ननु तर्हि प्रतीष्व रपवक्तिं नसाव ॥ नवत ञ्चदामावमे ननेत्रा हविः

मांखेद यमेन नहजस जनन्नविद्रं वनं यहस देवगेहे ॥ वने चवा सो विभया दिव सत्यं पुराद्यवा
स्तोपदनेन वीर्यं ॥५॥ हृतोति चेतः स्मरतो ममेन यदा रूपा दा वभिवं यापिशे ॥ तातांवक
सादुरूपां कितानाप्रसीद तेन्नो कृतनिष्कृतीनाम ॥६॥ कोवाप्रभ त्रसां ब्रिसरो जवे रंग विस
नेमी शेनपुमानिविनिवन ॥ यो विस्फुरद्दुविटपे नममे भोरे हमेनासेन निरमत्रकार ॥७॥ हृ
ष्टामवनि नं तुरागस्य पेचे दयसकसंहिषतो पिसि द्वि ॥ यायोगिनः संस्पृहयंति सम्यग्यो
गेन कम्बादिरहं सहेत ॥८॥ न धैववचामेन रलोकवीरायमा हवेहसमत्ता वरविरद्भ
नेत्रेः पिवतो नयनाभिरामे पार्थोद्भवस्तनाः पदस्मा पुरस्य ॥९॥

भि ॥ २७ ॥ कोवाप्रभं त्रिसरोजे योरे गस्मपिविजितृन्स्ते वमानः विस्मतेमीशेत शाकृपानं ॥ विस्फु
रन्नदूविटपः स्फुलतामपव हम्नोतः नेत्र ॥ नहूनस्पृरंवे साधनीयं भवद्भिरपिहष्यादिना
हृष्टेति ॥ २८ ॥ यां सिद्धिमसम्यग्योगेन प्रापमवो तमिति ॥ २९ ॥ आहवेपुद्धे पार्थस्यारैः कृतानिष्पा
पाः संतः नदेवंपरमेष्वयेपिपद्धयसेना त्रुशिने त्वे ॥ तस्मन्नरस्या नमंतं नयथपको स्याह ॥ ३० ॥
॥ ॥ ॥

द्वितीये कृष्णविश्लेषादुद्धवो चक्षुघो द्रवः ॥ तन्नैवाल्लचरित्राणि कृष्णस्यावर्णयन्न्वचित ॥१॥
तदेवं शिष्य वार्तां पृष्टस्योद्धवस्य श्रीकृष्णविरहोत्कंठावेशेन प्रतिवचनासामर्थ्यमाह इत्यादि ॥ प्र
तीत ॥ स्मारितेश्वरो यस्मिन्देवकीसुतस्मापनं प्रश्नं च पत्रिहाभ्यां ॥ ॥२॥ यः पंचवर्षो यो बाल
लीलया कृष्णसेवकवित्सदिकस्य परिकल्पितैरेव साधकैः परिचर्यां कुर्वन् ॥ प्रातर्भोजनं नाथ्यमा
र्थितोपि ॥ न ऐच्छत् ॥३॥ न रसेह हत् तंत्र गतः सामः ॥४॥ श्रीकृष्णांघ्रिसुधया साधु निर्वृतः

श्रीशुक उवाच ॥ इति भागवतः पृष्टः क्षत्त्रा वार्तां प्रियाश्रयां ॥ प्रतिवक्तुं न चोत्सेहे औत्कंठ्यात्
स्मारितेश्वरः ॥१॥ यः पंचहायनो मात्रा प्रातराशाय याचितः ॥ तन्नैच्छद्रचयन्यस्य सपर्यां
बाललीलया ॥२॥ स कथं सेवया तस्य कालेन जरसं गतः ॥ पृष्टो वार्तां प्रतिब्रूयाद्भर्तुः पा
दावनुस्मरन् ॥३॥ स मुहूर्तमभूत्तूष्णीं कृष्णांघ्रिसुधया भृशं ॥ तीव्रेण भक्तियोगेन निम
ग्नः साधु निर्वृतः ॥४॥ पुलकोद्भिन्नसर्वांगो मुंचन्मीलद्दृशा शुचः ॥ पूर्णार्थो लक्षितस्ते
न स्नेहप्रसरसंप्लुतः ॥५॥ शनकैर्भगवल्लोकान्नृलोकं पुनरागतः ॥ विमृज्य नेत्रे विदुरं प्र
त्याहोद्धव उत्स्मयन् ॥६॥

न स्मा मेव तीव्रेण विवशत्वो न्मादके न भक्तियोगेन निमग्नः पुष्ट्ठ ॥४॥
पुलकैरुद्भिन्नानि ॥ उद्गमितानि सर्वांगानि ॥ यस्य मीलन्त्याः दृशा शुचः अश्रूणि मुंचन्
तेन विदुरेण पूर्णार्थः कृतार्थो लक्षितः ॥ यतो भगवति ॥ यः स्नेहप्रसरः स्नेहप्रवाहः तस्मि
न्संप्लुतो निमग्नः ॥५॥ भगवानेव लोकस्तस्मात् ॥ नृलोके देहानुसंधाने ॥ उत्स्मयन् ॥ पद्
मलस हासादि ॥ भगवद्वार्तयं स्मरणेन ॥ विस्मयं प्राप्तवान् ॥ श्रीकृष्णविरहेण संतप्यमानः

भा
२टी
८

श्रीकृष्णपदयुगमरगाः सर्वेसत्त्वानिन्द्रोवेग्रत्नमयेसति अजगरेणकालसहासर्पेणाग्रीतेषु
विगलितेषुतः एहदेहेषुतत्स्रष्टानावयंतोकिंतुक्ष्याम् अतुतम्यन्ताह १ इभंगोभागवहीनः ये
सहवसतोपिहरिरयमितिनविदुः यथासीरसमुद्रेनातगुरुपेतमत्स्याःमीनाःकेवलकम
नीयंःकश्चित्तलवदर्दसेवविदुः नतुस्तनमयद्भुतिनहतन यथानलेप्रतिबिंबितं चंद्रंनयोति
यथाग्रीनाहरिमस्सल्यगिराउरूपसंसारतास्कंनविदुरितिकेचित् यथामीनाल्विमिगालाद
यस्यसहदमयनानास्वेवसंतोपिइरूपवंदनविदुरितिकेचित किंभूतंचंद्रंजरारोगादिहवि

इदंवउवाच कृष्णयुगमरगानिन्द्रोवेगीतोषजगरेणाह किंतनःकृपालंत्रयांगातश्री
भृगदेहेखहं १ इभंगोवनलोकोयपदवोतितनरामपि येसंवसतोनविदुर्हेरिमीनाह
वोहरुपं ८ इतितत्स्याःगुरुमोतापकारामाप्नुतान्तनः साक्त्वनास्त्वभंसवेभूतावासम
मसतन ९ देवस्यमायथास्पृष्टायेवान्यदसहाश्रिताः भाम्यन्तेधीनेनदाकेणास्त्वगुमाम
नोहदये १० प्रदर्शनमनपसामविनस्महृष्णारणा आदायानरथाद्यसास्वविवलोक

तांस्त्रीहरिरयमितिनविदुः भागवहीनत्वादेवंनविदुःनतुतनसामस्यभावादित्याह ८ इतिनं
वितस्यंजानंतीति तथापुरुप्रतिशयेनमोहानिद्रगणः वकुस्मिन्नेवस्थानेआरमंतीतित
यापवंभूतामियिभूतानामावास्मीस्वरसंतसात्त्वनास्वभंश्रेष्ठमममंसत ९ येयादवाय
वेमायायामाःयास्वोपमस्सहदयीरितिवदंति येचशिशुपालादयःअसदेवान्यहेरमाश्रि
ताःनिदंति तेषांवाकेयामनतिहताउभात्मनोनिदिमचितस्यमारदामस्तुहिनेभाम्यते य

ध्रियते जीवति न वा ॥ अस्मात्सर्वैर्यतितो भैंकार्ये ध्रियते न मो मार्ये ॥ तथाप्यास्मर्थमेवाह ॥ तेन तथा भूते
न विना न देवाह ॥ यह्निति ॥ यत्रैरेव हिती यं सहायो यस्य ह्यथा भैंकार्ये जीवती तिष्ठ कस्मे वे त्याह
ध ॥ हे सोम्य ते ध्रुत राहं जीवं तन्मन यो चास्मि ॥ न क्रिमर्थं यत नं तं न च रे तः यरे ताप स्त ताय भ्रातृ वे यांड
वे त सुवट्टो हे रण यो विदुर हे द्वौ हं हन्त न वा न ॥ किं च जीवितो पिध्मात: समापिक न वा लि त्याह ॥ ये न स्व
हत ॥ भ्राता ॥ यह स्वपर्यः सका यात ॥ निर्यापित: विश्वासित: अहो खल विस्मय: जानतो पितस्ये

अहो ह्याविध्रियते भैंकार्ये राजर्षिवर्येण विनापितेन ॥ य
लौकवी रोधिरथो विनिरपिय तुहिं नी य: कञ्जभस्मतस्य: ॥ ४० ॥
सोम्यातु यो वे त सथ: पततं भ्रात्रे ये रताय विदुरहे य: ॥ तियो
पितो ये न स्व हत्वपुर्या अहं स्वपुत्रस्य समनुव्रतेन ॥ ४१ ॥ सोऽहं
हरे मर्त्यविडंबनेन दृशो न्यणा चालयतो विधातु: ॥ नान्यो
पलक्ष्य: पदवी प्रसादाच्चरामि पश्यन्गतविस्मयोऽत्र ॥ ४२ ॥

वेदत्रेविहिनं यतनत्वं सापुरयिङ्ग: त्वं मा पितो सीत्यत आह ॥ ४३ ॥ सोऽहं हरे: प्रसादात्तस्य पदवीमा
त्मस्वरूपं न ॥ गतविस्मय: अत्र भूतले मात्मोपलक्ष्य: न च संसन ॥ स्वच्छं विचरामि ॥ कथं भूतस्य
मर्त्यविडंबनेन वेषपर्यालापादिना ॥ मात्मयाणां तु करणेन नृणां दृश: ॥ श्रिज्ञ ह जीवालयत: आ
सयतं नयक्रिमेवं हरे: लीलया येन स्वभक्तानां वनवासादि क्लेशं संभवेति ॥ स्वस्य च दोषः बंध
मोक्षमात्रिये वा भवः ॥ तेषां हरेन्तेषां मयराधानं तरे हन नेवना परायी पे दाश्मत आह ॥ ४४ ॥

भा
तृती
१

नूनं निश्चितं त्रिभिर्मदैरुत्पथानां मुहुश्चालयतां वधाय हेतोः प्रपन्नानामार्तिजिहीर्षया ॥ ईशः समर्थोऽप्येवं सन् तेषामघम् उपैक्षत ॥ तदानीमेव तेषां वधे सर्वदुष्टराजवधो न स्यादिति भावेनेत्यर्थः ॥ विद्यामदो धनमदस्तथैवाभिजनो मदः ॥ एते मदा मदान्धानां त एव हि सतां दमाः ॥ सर्वदुष्टहन्तृत्वं यथार्थमेव भगवतो जन्मकर्माणीति ॥ नान्यथेति कैमुतिकन्यायेनाह ॥ ४४ ॥ अजस्यापि जन्म अकर्तुरपि कर्माणि पुंसां ग्रहणाय कर्मसु प्रवृत्तये ॥ अन्यथा न चेदेवं न हि भगवतो जन्मादिकं यथा वान्यो लोको

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः ॥ वधाय प्रपन्नार्तिजिहीर्षयेशोऽप्युपैक्षताघं भगवान्कुरूणां ॥ ४३ ॥ अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां ॥ ४४ ॥ नन्वन्यथा कोऽर्हति देहयोगं परो गुणानामुत कर्मतन्त्रम् ॥ ४४ ॥ तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे ॥ अर्थाय जातस्य यदुष्वजस्य वार्तां सखे कीर्तय तीर्थकीर्तेः ॥ ४५ ॥ इति श्री भागवते महापुराणे तृतीये प्रथमः १

वान्योऽपि परो गुणानां गुणातीतः देहयोगं कर्मविस्तारं वार्हतीति ॥ तस्मादेवंभूताचिन्त्यमायाविनोदस्य कथां कथयेत्याह ॥ ४४ ॥ तस्य प्रपन्नाः येऽखिललोकपालास्तेषां वशीये अनुशासने स्थितानामर्थाय प्रयोजनाय यदुषु जातस्य तीर्थं संसारतारिणी कीर्तिर्यस्येति ॥ ४५ ॥ इति श्री भागवते भावार्थदीपिकायां श्रीधरस्वामिविरचितायां तृतीयस्कन्धे प्रथमोऽध्यायः ॥ १

कर्णाभरणकुंडलेनाभ्यां निर्भातौ यौ कपोलौ ताभ्यां श्रीर्य

महांतो मणयो यस्मिन् ॥ तेन किरीटेन ‸ लक्ष्मीवत्सविभ्रती ॥ २ ॥ देवप्रवरो वरो यस्मात्स
स्यांबुजेन यस्य सः ॥ ४ ॥ कौस्तुभः आभरणं कंठे यस्याः लक्ष्मीवदसि बिभ्रती ॥ भुवन ॥ महाभिषेति क्रि
वीर्ये रवलिंगनैः सासुरासुरगणैः ॥ अनादिनिधनविशेषेण नाभूतो भवतीति ॥ सुवन् ॥ महाभिषेति
सत्वविधत्वे भगवन्ननोः ॥ ५ ॥ श्रीमत्तेरयमाविर्भावः ॥ नत्वसदादिवज्जन्मादि नवास्तीः
माह ॥ नजातानन्मादयो यस्य कृतः ॥ अगुणागुणतो निर्वाणत्वे सार्णवाय ॥ अपारमो
तस्य रूपायेम चौः ॥ तथापि अगोचराणि मत्प्रतिसत्वाय दर्शननिलात् ॥ वलनत्व अपरिग

महामणिकिरीटेन केयूराभ्यां च भूषितां कर्णाभरणनिर्भातकपोलश्रीमुखांबुजां ॥ २ ॥
कौस्तुभाभरणां लक्ष्मीविभ्रतीं वनमालिनीं ॥ २ ॥
कांचीकलापवलयहारनूपुरशोभितां कौस्तुभाभरणां लक्ष्मीविभ्रतीं वनमालिनीं ॥ ३ ॥
सहस्रेर्नादिभिः सार्द्धं त्रिमद्भिरुपासितां ॥ महादेवप्रवरैः सपार्षदैः प्रहृष्टमनसे ॥ ४ ॥
सर्वामरगणैः सार्के सर्वांगैरवलिंगनैः ॥ ५ ॥ **ब्रह्मोवाच** ॥ अजातजन्मस्थितिसंयमाया
गुणाय निर्वाणसुखार्णवाय ॥ अणोरणिम्नेपरिगण्यधाम्ने महानुभावाय नमो नमस्ते
रूपंतवैतत्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतांत्रिकेण ॥ योगेन धातः सह नस्त्रिलोका
न्पश्याम्यमुष्मिन्नुह विश्वमूर्त्तौ ॥ ६ ॥
त्वय्यग्रतो नमस्ते

त्वंव्युपजातौ तेथा समूर्तिर्यस्मात् से ॥ न चैतद् संभा... सनातन त्वमपरिमेयतत्वोपपारदपति
वि ॥ यत्तो महानविंसोनुभावो यस्य ॥ ६ ॥ तत्स्मृतेः सनातन त्वमपरिमेयतत्वोपपारदयति योगेन गुणायेन अपो
रूपमिति ॥ हे स्तुरर्षभ हे धातः ॥ एतत्तव रूपं वैदिकेन तांत्रिकेण च योगेन गुणायेन अपो
स्थिभिः सहारु नेहज्जं ॥ अतो नेह मित्रातीमहत्वेज्ञात मिति भावः ॥ न च यत्पदेवाः हत्सवे
नयविहाः सन्यसवैम्यवेनामेनारस्मात् ॥ उअहोरस्कृतं अमुष्मित्सखिनोस्मान् ॥ त्रि
लोकांश्च सत्यरूपश्यामि ॥ तवहेतुः विश्वमूर्त्तौ यस्य ॥ अनत्तवेतद्रूपं परिच्छिन्नमपिनभ

नयावैकल्यमुपयाद्यति ॥ अवमः अल्पोपिकर्मकल्पः कर्माभासोपि ॥ ईश्वरार्पितश्चेद्धिफलाय
प्रभावयतकल्पते ॥ हि यस्मात्परईश्वरः पुरुषस्यास्मात्स्मात्तत्पदर्पितोहितस्य ॥ नत्वात्मनिर
र्पितेहितेचार्पिते ॥ निष्फलस्यात् ॥ ४४ ॥ अनंतफलत्वमाह ॥ यथाहिमूलावसेचनेस्कंधानांशा
खानांचभवति ॥ ४५ ॥ एवंसत्यर्पितदर्पितकर्मणांतदङ्गानांमस्माकंयदिमिनमिदद्भुःखमि
ति नमेववेत्सीत्याशयेनाह ॥ नमइति ॥ दुर्वितर्क्याणात्मकर्माणिस्वभावचेष्टितानियस्यत

नावमः कर्मकल्पोपिविफलायेश्वरार्पितः ॥ कल्पतेपुरुषस्यैवसत्याम्मादर्पितोहितः ४८
यथाहिस्कंधशाखानांतरोर्मूलावसेचनं ॥ एवमाराधनंविष्णोः सर्वेषामात्मनश्चहि ४९
नमस्तुभ्यमनंतायदुर्वितर्क्यात्मकर्मणे ॥ निर्गुणायगुणेशायसत्त्वस्थायचसांप्रतं ५०
इतिश्रीभागवतेमहापुराणेऽष्टमस्कंधेऽमृतमथनेपंचमोध्यायः ॥ ५ ॥ श्रीशुकउवाच ॥
एवंस्तुतः सुरगणैर्भगवान्हरिरीश्वरः ॥ तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः ॥ १ ॥
तेनैवसहसासर्वेदेवाः प्रतिहतेक्षणाः ॥ नापश्यन्खंदिशः क्षौणीमात्मानंचकुतोविभुं ॥ २ ॥
विरिंचोभगवान्दृष्ट्वासहशर्वेणतांतनुं ॥ स्वच्छांमरकतश्यामांकंजगर्भारुणेक्षणां ॥ ३ ॥
तप्तहेमावदातेनलसत्कौशेयवाससा ॥ प्रसन्नचारुसर्वांगींसुमुखींसुंदरभ्रुवं ॥ ४ ॥

से ॥ ५ ॥ इत्यष्टमस्कंधेपंचमः ॥ ५ ॥ षष्ठेतुनः स्तुतिर्विलासाविर्भूते सुरैः कृता ॥ तत्संज्ञयाज्ञासुरैःसा
कममृतार्थंमहोद्यमः ॥ १ ॥ सहस्रार्कोणामुदयेद्युतिरिवद्युतिर्यस्य ॥ १ ॥ सहसातेजसाप्र
तिहतानीक्षणानिचक्षूंषि ॥ २ ॥ तामाविर्भूतांतनुंविरिंचोदृष्ट्वानदृष्टावेतिपंचमेनान्वयः
कंजगर्भंवदरुणेईक्षणेयस्याः ॥ ३ ॥ तप्तहेमवदवदातेनपीतेनलसताकौशेयवाससा
युक्तांप्रसन्नान्यानिचारूणिसर्वाण्यंगानियस्याः शोभनेशब्देयस्याः सुंदरेभ्रुवौयस्याः सातां

यदमेव किं चित्रकृतेतिचेत्तमाह ॥ अच्छमिति अमृष्टैः केनचो विस्फुलिंगाइव ॥ ते त्वतो वयं इत्यादि
पादमेव किं चित्रकृतेतिचेत्तमाह ॥ श्रुतमिति ॥ अनन्तमेव हि ज्ञानादेवानां च मंत्रं विपत्स्व ॥ इदं कृतेनेत
मातः सेनः यामनः संप्रेषः किंवा विश ॥ अनन्तमेव हित्वा नादेवानां च मंत्रं विपत्स्व ॥ इदं कृतेनेत
पाद्यनुपरिशोत्तयेः ॥ ९ ॥ इदं यत्र यं ॥ इयदेहमइ त्वमिमेतेयथाऽव चेव विज्ञाय जगाद संहता
विपत्तितां नक वीणि कारका गीहि या नीशे कान्नं ॥ १० ॥ ईश्वरस्यापि न चैवाभिमेतमिन्नाद
एकमवेष्य इ समयोपि ॥ ७ ॥ इदं यत् देवा ॥ अप्येव च गंधर्वोदयः ॥ ९ ॥ वः स्यात्मनः ॥ त्वतो यावद्भ
ग्रहंगीतिवि यत्र सतादयो वेदस्तादयो गीविकेतवस्ते ॥ किंवा विरामे पादस्य शिवमानाविध
स्व पानो हि जन्देवमंत्रं ॥ १० ॥ श्लोक ३ ॥ पूर्वविदित्यादिभिर्गीदितः सन् विज्ञापते पादस्यप
देव ॥ जगाद जीमनगभीरयागिपाव हाजली स्तह न सर्वकारकान्न ॥ ११ ॥ एकत्वेवपरस्त
सिन्नरकार्यं स्वरेश्वरः ॥ विहते कामस्थानादमगुह्योत्पनादिभिः ॥ १२ ॥ श्रीभगवानुवाच
हन्तव्यमनहोप भोहेदेवाममभाषिते ॥ स्मृतांतावदिनाः सर्वेपश्येयावः स्याद्यवस्य ॥ १३ ॥
याह दाखवेदनेपे स्तावतस्थि विधीयता ॥ काव्येनाउगरहतेनस्तेयावद्धोभवस्थास्तन ॥ १४ ॥
अरयोपि हि संयया सतिकार्या वीगोरवे ॥ यदि मयकवदेवायस्य सपरवीगतेः ॥ १५ ॥
अमतोत्पादनेयत्नः क्रियतामविलंवितं ॥ यस्यपीतस्य वै जन्तुर्मृत्युग्रस्तोमरो भवेत् ॥ १६ ॥
तिन्वा तौ वेरयो सर्वावीक्ष रस्माल्लनो यथेः ॥ मेथानेमेदरकृत्वा नेत्रं कृत्वा तवाक्षकिं ॥ १७ ॥
वोहहि मं वृत्ति ॥ १८ ॥ अयंपस्य प्रयोजनस्य पदवी सिद्धिप्राप्ते ॥ ततः पश्चादहिमयकवदस्य
यातकभावेनवर्तितव्यमितियावः ॥ यदापि दिकायोनिरुद्धाहियंयानिर्गमदा इविधा
नाथं प्रयामेमन्थकेणासंपिं विपते ॥ पश्चात्तमेवकदाचिद्भवयतितयार्थमार्गप्रहरैः ॥ म
यसंपेयामृतस्यर्थः ॥ मतस्तैः सहयत्नार्थेनदाह अमृतोत्पादनइति ॥ यथामृतस्य पीतस

विश्वमूर्तिर्विमेवा र॥ त्वयीति॥ वटस्य मृत्तिकाया यथा॥ आदिरंतश्च मध्यं च त्वं तयात्वमस्य जगतः तत्र
हेतुः परस्मात्प्रधानादपि परः॥ ३१॥ मृत्तिकादृष्टांतेन परिणामे प्राप्ते मेवारयति॥ त्वमिति॥ स्वया
साधीनया॥ अत एव गुणानां त्वयैवापि परिणामेऽपि गुणामेव त्वं तु कूटः पश्यंति मनीषिणो विवे
किनः विपश्चितः शास्त्रज्ञाः॥ ३२॥ एतदेव स्पष्टयन्नाह॥ यथाग्निः काष्ठे मथनेन॥ अमृतं मात्मे
गोषु दोहनादिना॥ भुवि अन्नं बीजावापादिना अन्नं अंबु उद्यमनेन खननेन॥ उद्यमनेषु

त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यंत आसीदिदमात्मतंत्रे॥ त्वमादिरंतो जगतोऽस्य म
ध्यं घटस्य मृत्स्नेव परः परस्मात्॥ ९॥ त्वं माययात्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रवि
ष्टः॥ पश्यंति युक्ता मनसा मनीषिणो गुणव्यवायेऽप्यगुणं विपश्चितः॥ १०॥ यथाग्निमेधस्य
मृतं च गोषु भुव्यन्नमंबूद्यमने च वृत्तिं॥ योगैर्मनुष्या अधियंति हि त्वां गुणेषु बुद्ध्या कवयो व
दंति॥ ११॥ तं त्वां वयं नाथ समुज्जिहानं सरोजनाभातिचिरेप्सितार्थं॥ दृष्ट्वा गता निर्वृतिमेव स
र्वे गजा दवार्ता इव गांगमंभः॥ १२॥ स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव पाद
मूलं॥ समागतास्ते बहिरंतरात्मन् किं वान्यविज्ञाप्यमशेषसा क्षिणः॥ १३

प्रकारे वा गणिस्मादिना इति
नो विकासः॥ यद्वा अबुद्धउद्यमने॥ वृत्तिं गमनादिना उत्थयो योगैः पार्थिवे मनुष्या अधियंति तथा
कवयस्तत्त्वज्ञा गुणेषु बुद्ध्या विवेचयंति वदंति च॥ ११॥ हे नाथ सरोजनाभ॥ अतिचिरादीप्सितं मर्थं
तं योगैकप्राप्यं त्वां समुज्जिहानं॥ आविर्भवंतं अद्य दृष्ट्वा॥ अद्य वयं निर्वृतिं गताः॥ दवा
र्ताः दावाग्निपीडिताः॥ १२॥ यदर्थं वयं पादमूलं समागताः॥ तदेव त्वं विधत्स्व॥ अशेषसाक्षिणः

भा॰टी॰ किंचा ६ विंशत्यनमसि २५

भा०
अष्टी
११

विसर्जितः प्रस्थापितः स्वपर्वते न च स्थिते वा स्वके रागमनोयोगादिति भावः ॥३९॥ इत्यष्टमे षष्ठोऽध्यायः ॥६॥ समुद्रमथनोद्भूतविषभीत्याखिले जने ॥ स्वतः सन् कृपया हरः पपौ विषमितीर्यते ॥१॥ फलभागेन तवाप्यमृते भागो भविष्यतीति संमन्त्र्य वासुकिं नेत्रं गिरौ परिवीय सं

तांस्तथाभग्नमनसो भग्नबाहूरुकंधरान् ॥ विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ॥३७॥ गिरिपातविनिष्पिष्टान्विलोक्यामरदानवान् ॥ ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा ॥ गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया ॥ आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः ॥३८॥ अवरोप्य गिरिं स्कंधात्सुपर्णः पततां वरः ॥ ययौ जलांत उत्सृज्य हरिणा स विसर्जितः ॥ इति श्रीभागवतेऽष्टमस्कंधेऽमृतमथने मंदराचलानयने षष्ठोऽध्यायः ॥६॥ श्रीशुक उवाच ॥ ते नागराजमामंत्र्य फलभागेन वासुकिं ॥ परिवीय गिरौ तस्मिन्नेत्रमब्धिं मुदान्विताः ॥ आरेभिरे सुरा यत्ता अमृतार्थे कुरूद्वह ॥ हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोऽभवन् ॥२॥ तन्नैच्छन्दैत्यपतयो महापुरुषचेष्टितं ॥ न गृह्णीमो वयं पुच्छमहेरंगममंगलं ॥३॥ स्वाध्यायश्रुतसंपन्नाः प्रख्याता जन्मकर्मभिः ॥ इति तूष्णीं स्थितान्दैत्यान्विलोक्य पुरुषोत्तमः ॥ स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः ॥ कृतस्थानविभागास्त एवं कश्यपनंदनाः ॥४॥ ममंथुः परमं यत्ता अमृतार्थं पयोनिधिं ॥५॥ मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत् ॥ ध्रियमाणोऽपि बलिभिर्गौरवात्पांडुनंदन ॥६॥ ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः ॥ आसन्स्वपौरुषे नष्टे दैवेनातिबलीयसा ॥७॥

वेष्टय ॥ आरेभिरे प्रारेभिरे ॥ वासुकिवक्त्रदेहदिः पुरस्तान्मुखं जगृहे ॥ ततोऽभवन् ॥ पुच्छेन सह ॥ २॥ कृतो यथा स्वं स्थानविभागो यैः ॥४॥ दैवेन हेतुना स्वपौरुषे नष्टे सति ॥७॥

नंदनं हि तेषाम् स्तनपानेनामृतानां सुसत्वाह्लादो शोभाजद्रति ॥ बलिभिः सह कालिभिः साध्यार्थाः सद्ग
सरसा विवानं सिद्ध्यतीति कृत्वा सामादिकं पदं दिशति ॥ एवमिति हृष्टाः प्राह स यः ॥ २४ ॥ संरंभेण
सभ्मे णसां नयासा मन्मार्गेण यथा सिद्ध्यति ॥ वल्लभमर्थनाद्धुत्मन्नेषु ॥ २५ ॥ सदा ह्यबलिष्ठये
द्वेषभाजो भविष्यंति हे सा पूर्वकल्पहा ॥ एवं तद्वन्मोदर्थं यदिष्टं स्वसंगाः सुराः २६
न संरंभेणासिद्ध्यंति सर्वेषां सांत्वयायथा ॥ न भेद्यत्वकालकृतादि पाजलधिसंभवान्
लोभः कार्योन वो जातरोषः कामस्तव सत्व ॥ २७ ॥ इति देवान् समादिश्य भगवान् पुरुषो
त्तमः ॥ तेषामंतर्दधे राजन् स्वच्छंदगतिरीश्वरः ॥ २८ ॥ अथ तस्मै भगवते नमस्कृत्य पितामहः
भवश्च जग्मतुः स्वं स्वं धामोपेयुर्बलिं सुराः ॥ २९ ॥ दृष्ट्वारीनप्यसंयत्तान्जातक्षोभान्स्वनाय
कान् ॥ न्यषेधद्दैत्यराट्श्लोक्यः संधिविग्रहकालवित् ॥ ३० ॥ ते वैरोचनिमासीनं गुप्तं चासुर
यूथपैः ॥ श्रिया परमया जुष्टं जिताशेषमुपागमन् ॥ ३१ ॥ महेंद्रः श्लक्ष्णया वाचा सांत्वयित्वा
महामतिः ॥ अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात् ॥ ३२ ॥ तदरोचत दैत्यस्य तत्रान्ये येऽसु
राधिपाः ॥ शंबरोऽरिष्टनेमिश्च ये च त्रिपुरवासिनः ॥ ३३ ॥ ततो देवासुराः कृत्वा संविदं
द्धिमान् ॥ संतएवास्यछिंदंतिमनोव्यासंगमुक्तिभिः ॥ २६ ॥ संतोनपेक्षामच्चित्ताः प्रशांताः
समदर्शिनः ॥ निर्ममानिरहंकारानिर्द्वंद्वानिष्परिग्रहाः ॥ २७ ॥ तेषुनित्यंमहाभागमहाभा
गेषुमत्कथाः ॥ संभवंतिहितानृणांजुषतांप्रपुनंत्यघम् ॥ २८ ॥ तायेशृण्वंतिगायंतिह्य
नुमोदंतिचादृताः ॥ मत्पराः श्रद्दधानाश्चभक्तिंविंदंतितेमयि ॥ २९ ॥ भक्तिंलब्धवतःसाधोः
किमन्यदवशिष्यते ॥ मय्यनंतगुणेब्रह्मण्यानंदानुभवात्मनि ॥ ३० ॥

एषुदेवेषुचरीव्यतीतितथा ॥ २५ ॥ उक्तिभिर्हितोपदेशैरिति ॥ तीर्थदेवादिसंगादपिसत्संगःश्रे
यानितिदर्शयति ॥ संतइतिविशेषणाष्टकस्ययथोत्तरंहेतुहेतुमद्भावः नचनैरपेक्ष्यंदर्पापेक्षाः पितृके

تفسیر سلسلہ کامارق

तृतीयस्कंद

श्री
भाग
टी
८१

श्रीकृष्णस्य चरितं समासतो वर्णयति ॥ जात इति द्वाभ्याम् ॥ जातो निजेन रूपेण पश्चात्सुकृतो मनुष्याकारः सन्
व्रजं गतः ॥ व्रजं गत्वा मित्राणि पित्रा प्रार्थितं येन तेन मुदा रेमे सुतानां गतानां स्वस्याय ॥ आत्मनिगमं स्वकीयं वेदमार्गं
६३ भ्रातः समुत्थेन कलिना निमित्तेन ॥ उरुभरं क्षपयन् ॥ दृष्टैव भूपचमूं विधूय विजये जयमंत्रं नेनजि
तमित्येवं सुखेच्छया नापरतत्त्वमुद्धवायोपदिश्य ॥ स्वधाम सम्यक् केन वक्त्रेणाजगामेति ॥ ६४ ॥ इति श्री भा वा

जातो गतः पितृगृहाद्व्रजमेधितार्थो हत्वा रिपून्सुतशतानि कृतोरुदारः ॥ उत्पाद्य तेषु पुरु
षः क्रतुभिः समीजे आत्मानमात्मनिगमं प्रथयञ्जनेषु ॥ ६३ ॥ पृथ्व्याः स वै गुरुभरं क्षपयन्कु
रूणामन्तः समुत्थकलिना युधि भूपचम्वः ॥ दृष्ट्या विधूय विजये जयमुद्विघोष्य प्रोच्यो
द्धवाय च परं समगात्स्वधाम ॥ ६४ ॥ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां नवम
स्कंधे यदुवंशानुवर्णने नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ समाप्तोऽयं नवमस्कंधः ॥

र्थदीपिकायां नवमस्कंधे चतुर्विंशतितमोऽध्यायः ॥ २४ ॥ नवभिर्लक्षणैर्लक्ष्यं नवभक्तिफलप्रदं ॥ ब्रह्मानं
परमं वेदं परमानंदविग्रहं ॥ १ ॥ श्रीभागवतभावार्थदीपिकासंप्रकाशिना ॥ सपादनवभक्तानामस्तु
दाना महेश्वरः ॥ २ ॥ परमानंदसंसेविश्रीधरस्वामियतिना ॥ कृतिमालोपगृह्णातु नः श्रीशुकोक्तिमस्तु
प्रायेशः ३ जगत्त्रयपरानंदपरमानंदविग्रहं ॥ संसेवध्वं गुरुं शांतं भक्तमानसविग्रहं ॥ ४ ॥

द्वितीयस्य भजमानस्य वंशमाह । शूरो विदूरथादिति । भजमानाच्च विदूरथः । शूर इति पराशरादिवचनात् । यद्यष्ट
पुत्रो विदूरथाद्यास्त्वेति शूर्वो कश्चिच्छूरस्तस्मान्नाम्नात् । विदूरथात् ॥ २४ ॥ देवमीढस्य यः शूरो नाम पुत्रः । तस्य देवमीढो हृदी-
कस्यैव सुतः । यथाह पराशरः । तस्यापि कृतवर्मशतधनुर्देवमीढुषाद्याः पुत्रा बभूवुः देवमीढस्य शूरः शूरस्यापि मा-
रिषा नाम पत्न्यभवत् । तस्यां चासौ दश पुत्रानजनयत् । वसुदेवपूर्वानिति । आनकाश्चानेदुः ॥ २८ ॥ हरेः प्रादुर्भावस्था-
नं ॥ २८ ॥ पृथायाः । कन्यकावस्थायां कर्णोत्पत्तिप्रकारमाह । कुन्तेरिति पञ्चभिः कदाचिद्गृहमागतं दुर्वाससं शुश्रूषा-

शूरो विदूरथादासीद्भजमानस्तु तत्सुतः । शिनिस्तस्मात्स्वयं भोजो हृदिकस्तत्सुतो मतः ॥ २४ ॥ देवबाहुः शत-
धनुः कृतवर्मेति तत्सुताः । देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् ॥ २५ ॥ तस्यां स जनयामास दश पु-
त्रानकल्मषान् । वसुदेवं देवभागं देवश्रवसमानकम् ॥ २६ ॥ सृञ्जयं श्यामकं कंकं शमीकं वत्सकं वृकं ।
देवदुंदुभयो नेदुरानका यस्य जन्मनि ॥ २७ ॥ वसुदेवं हरेः स्थानं वदंत्यानकदुंदुभिम् । पृथा च श्रुत-
देवी च श्रुतकीर्तिः श्रुतश्रवाः ॥ २८ ॥ राजाधिदेवी चैतेषां भगिन्यः पंच कन्यकाः । कुंतेः सख्युः पिता
शूरो ह्यपुत्रस्य पृथामदात् ॥ २९ ॥ साप दुर्वाससो विद्यां देवहूतीं प्रतोषितात् । तस्या वीर्यपरीक्षार्थमाजु-
हाव रविं शुचिः ॥ ३० ॥ तदैवोपगतं देवं वीक्ष्य विस्मितमानसा । प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे
॥ ३१ ॥ अमोघं दर्शनं देवि आधत्से त्वयि चात्मजं । योनिर्यथा न दुष्येत कर्ताहं ते सुमध्यमे ॥ ३२ ॥

परिचर्यादिना तोषयामास । ततस्तस्मात्सा देवहूतीं देवाह्वानहेतुं विद्यामवाप । तदाह सापेति देवमुपागतं वी-
क्ष्य प्राह प्रत्ययार्थं परीक्षार्थं मया विद्या प्रयुक्ता । ननु तया किं चिन्त्यं कार्यमित्यभिसंधिना अतो याहीत्येवमु-
क्तो रविरुवाच । अमोघं देवदर्शनमिति कन्याहमिति चेत्तत्राह । यथा योनिर्न दुष्येत् तथाहं करिष्या

श्रीभाग॰ टी॰ ८४

श्रावं मौ विदातु विदै ॥ ३२ ॥ तदेवसुदेवस्य भगिनीनीं नोपतीन्युद्वोह्य ह्योकान् शात् एणेनवानोपत्नीः पुत्रोस्याह दे

रनित तस्यास आधायगर्भं सूर्यो दिवंगतः सयः कुमारः संजज्ञे द्वितीय इव भास्करः ॥ ३३ ॥ तं सात्यज
न्नदीतोये कृच्छ्राल्लोकस्य बिभ्यती प्रपितामहस्तामुवाह पांडुर्वै सत्यविक्रमः ॥ ३४ ॥ श्रुतदेवां तु का
रूषो वृद्धशर्मा समग्रहीत् यस्यामभूद्दन्तवक्त्र ऋषिशप्तो दितेः सुतः ॥ ३५ ॥ कैकेयो धृष्टकेतुश्च श्रु
तकीर्तिमविंदत पंचसंतर्दनादय स्तस्यासन्कैकयाः सुताः ॥ ३६ ॥ राजाधिदेव्यामावन्त्यौ जयसेनोज
निष्ट ह दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ॥ ३७ ॥ शिशुपालः सुतस्तस्याः कथितस्तस्य सं
भवः देवभागस्य कंसायां चित्रकेतुबृहद्बलौ ॥ ३८ ॥ कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा
कंकायामानकाज्जाता सत्यजित्पुरुजित्तथा ॥ ३९ ॥ सृंजयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान्
हरिकेशहिरण्याक्षौ शूरभूम्यां च श्यामकः ॥ ४० ॥ मिश्रकेश्यामप्सरसि वृकादीन्वत्सकस्तथा ॥ तक्ष
पुष्करशालादीन्दुर्वाक्ष्यां वृक आददे ॥ ४१ ॥ सुमित्रार्जुनपालादीन्शमीकात्तु सुदामिनी ॥ कंक
श्च कर्णिकायां वै ऋतधामजयावपि ॥ ४२ ॥ पौरवी रोहिणी भद्रा मदिरा रोचना इला ॥ देवकीप्र
मुखा आसन्पत्न्य आनकदुंदुभेः ॥ ४३ ॥ बलं गदं सारणं च दुर्मदं विपुलं ध्रुवं ॥ वसुदेवस्तु रोहिण्या
कृतादीनुदपादयत् ॥ ४४ ॥ सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च ॥ पौरव्यास्तनया ह्येते भूताद्या
द्वादशाभवन् ॥ ४५ ॥ नंदोपनंदकृतकशूराद्या मदिरात्मजाः ॥ कौसल्या केशिनं त्वेकमसूत कुलनंदनं
॥ ४६ ॥ रोचनायामतो जाता हस्तहेमांगदादयः ॥ इलायामुरुवल्कादीन्यदुमुख्यानजीजनत् ॥ ४७ ॥ वि
वभागसेनितनवभिः श्लोकार्धैः ॥ ३४ ॥ वसुदेवस्य पत्नीः पुत्रांश्चाह पौरवीत्येकादशभिः कौसल्या भद्रा ॥ ४५ ॥

८४

अष्टमस्तु स्वयमेवासीत्॥ न तु कर्मादिना हेतुना॥ ताभ्यां जनितो वा यतो मोहहविः॥५५॥ न देवोपपादयति।
यदेतन्मित्रिभिः॥५६॥ ईशस्य मायाया यानियन्तुः परस्य॥ असंगस्य द्रष्टुः साक्षिणः आत्मनः सर्वगतस्य॥ न ह्यो
वेभूतस्य मायाया विनादेहं विना जन्मनः कर्मणो वा हेतुः संभवतीत्यर्थः॥५७॥ किं च यस्य मायाचेष्टितं पुं
सो जीवस्यानुग्रहः॥ तस्य सर्वजीवानुग्राहकस्य कुतः कर्मादिपारतंत्र्याज्जन्मादिसंभवः अनुग्रहमेवा

देवा स्त्रितयालब्धा नववात्रगदादयः॥ वसुदेवः सुतानष्टावादधे सहदेवया॥५२॥ पुरुविश्रुत
मुख्यांस्तु साक्षाद्धर्मो वसूनिव॥ वसुदेवस्तु देवक्यामष्टपुत्रानजीजनत्॥५३॥ कीर्तिमन्तं सुषेणं
च भद्रसेनमुदारधीः॥ ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरं॥५४॥ अष्टमस्तु तयोरासीत्स्वयमे
व हरिः किल॥ सुभद्रा च महाभागा तव राजन्पितामही॥५५॥ यदा यदा हि धर्मस्य क्षयो वृद्धिश्च
पाप्मनः॥ तदा तु भगवानीश आत्मानं सृजते हरिः॥५६॥ न ह्यस्य जन्मनो हेतुः कर्मणो वा महीप
ते॥ आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः॥५७॥ यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि॥
अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते॥५८॥ अक्षौहिणीनां पतिभिरसुरैर्नृपलाञ्छनैः॥ भुवा
आक्रम्यमाणाया अभाराय कृतोद्यमः॥५९॥ कर्माण्यपरिमेयानि मनसापि सुरेश्वरैः॥ सह संक

ह॥ हि यस्मात्ते देवस्थित्यादय इष्यन्ते॥ प्रलयप्रलीनोपि जीवस्य धर्माद्यसंभवादुपाधिसृष्ट्यादिना॥ धर्मा
दिसंपादनेनानुग्रहः॥ तथात्मलाभाय मोक्षाय च इष्यते॥ न त्वहेतुः॥ तेनैव वक्ष्यमाणेन स्वस्थित्यादे
निवृत्तेः॥५८॥ तस्य चेष्टितं भूमेरनुग्रह इत्याह॥ अक्षौहिणीनामिति द्वाभ्यां॥ अभाराय भारविहाराय।
॥५९॥ सुरेश्वरैरपि मनसाप्यपरिमेयानि॥ अविनष्टानि संकर्षणसहितश्च ॥६०॥ ॥

श्री·
भा न·
टी·
५·

संकल्पमात्रेणाभूभारहरणसमर्थस्यापि कर्मकरणं यशोविस्तारद्वारा भक्तानुग्रहार्थमित्याह ॥ कला-
विति द्वाभ्यां ॥ दुःखशोकतमो सिन्नदतीति तथा तद्यशो व्यतनोत् ॥ ६१ ॥ यस्मिन्सतां कर्णपीयूषे यशस्तीर्थवरे श्रो-
त्रमेवांजलिः पानसाधनं यस्य सः पुरुषः सकृदपि उपस्पृश्य आचमनमात्रेण कृत्वा ॥ तमसो-
दयाहृष्टश्चित्तः कर्मवासनां धुनुते ॥ ६२ ॥ तदेवाह द्वाभ्यां ॥ भोजादिभिः श्लाघनीयमीहितं यस्य ॥ ६३ ॥ सर्वे-

कलौ जनिष्यमाणानां दुःखशोकतमोनुदं ॥ अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः ॥ ६१ ॥
यस्मिन्सत्कर्णपीयूषे यशस्तीर्थवरे सकृत् ॥ श्रोत्रांजलिरुपस्पृश्य धुनुते कर्मवासनां ॥ ६२ ॥
भोजवृष्ण्यन्धकमधुशूरसेनदशार्हकैः ॥ श्लाघनीयहितः शश्वत्कुरुसृंजयपांडुभिः ॥ ६३ ॥
स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया ॥ नृलोकं रमयामास मूर्त्या सर्वांगरम्यया ॥ ६४ ॥
यस्याननं मकरकुंडलचारुकर्णभ्राजत्कपोलसुभगं सविलासहासं ॥ नित्योत्सवं न ततृ-
पुर्दृशिभिः पिबंत्यो नार्यो नराश्च मुदिताः कुपिता निमेश्च ॥ ६५ ॥ ॥

रंगरम्यया मूर्त्या च ॥ ६४ ॥ तस्य दर्शनार्थि-
सुखवेशाभामाह ॥ यस्याननं दृशिभिर्नेत्रैः पिबंत्यो नार्यो नराश्च ॥ न ततृपुः न तृप्ताः निमेः सोन्मेषमा-
त्रव्यवधानमप्यसहमानास्तत्कर्तुर्निमेः ॥ कुपिताश्च बभूवुः । कथंभूतमाननं ॥ मकरकुंडलाभ्यां चा-
रुकर्णौ भ्राजंतौ कपोलौ च तैः सुभगं ॥ सविलासो हासो यस्मिन् ॥ नित्यमुत्सवो यस्मिन् ॥ ६५ ॥
गेनमः कमलदलविपुलनयनाभिश्रीरामचंद्रायनमः ॥ ॥ राम राम ॥

अहोदुर्घटघटनापटुःकालइत्याह॥ यत्रेति॥ कृष्णोनेता अस्त्रीधन्वीततः तत्रापिविपत्॥ एषशा
रीरबलअस्त्रनैपुण्यमस्त्रदेवसंपत्तावपीत्यर्थः॥ १५॥ ननुकृष्णेकथंकालोतिक्रामेदित्यपेक्षा
यामाह॥ नह्यस्यश्रीकृष्णस्यसेनंगत्यानिर्दिशति॥ विधित्सितंकर्तुमिष्टंयस्यविधित्सितंसर्वजिज्ञा

यत्रधर्मसुतोराजागदापाणिर्वृकोदरः॥ कृ
ष्णोऽस्त्रीगांडिवंचापंसुहृत्कृष्णस्ततोविपत्॥ १५॥
नह्यस्यकर्हिचिद्राजन्पुमान्वेदविधित्सितं॥ य
द्विजिज्ञासयायुक्तामुह्यंतिकवयोपिहि॥ १६॥
तस्मादिदंदैवतंत्रंव्यवस्यभरतर्षभ॥ तस्यानु
विहितोनाथानाथपाहिप्रजाःप्रभो॥ १७॥ एष
वैभगवान्साक्षादाद्योनारायणःपुमान्॥ मो
हयन्माययालोकंगूढश्चरतिवृष्णिषु॥ १८॥

सया॥ १६॥ दैवतंत्रमीश्वराधीनंव्यवस्यनिश्चित्य॥ तस्येश्वरस्यानुविहितः अनुवर्तीसन्॥ कर्तेति
हेनाथकुलपरंपरागतस्वामिन्॥ प्रभोसमर्थ॥ अनाथाःप्रजाःपाहि॥ १७॥ अनुविधेयःपरमेश्वरः॥
श्रीकृष्णएवेत्याह॥ एषएवभगवान्॥ सर्वेश्वरःयतः आद्यःपुमान्॥ नत्वयतोनारायणःसाक्षा

भा
प्र टी
४

तद्रुपपादयन्ति ॥ अस्येति ॥ अनुभावं प्रभावं ॥ १९ ॥ त्वमज्ञानाद्यमेवं मन्यसे ॥ मातुलेयं देवक्याः सुतं प्रियं प्रीतिविषयं मित्रं प्रीतिकर्त्तारं सुहृत्तममुपकारानपेक्षोपकारकं च ॥ सौहृदात् विश्वासात् ॥ अकरोः कृतवानसि ॥ सचिवं मंत्रिणं ॥ २० ॥ नन्वीश्वरस्यैवं कथं नीचे सारथ्यादौ प्रवृत्तिः ॥ तत्राह सर्वेति ॥ तत्कृतं नीचोच्चकर्मकृतं मम योग्यमयोग्यमिति मतिवैषम्यं कश्चिदपि नास्ति ॥ कुतः नि

अस्यानुभावं भगवान्वेद गुह्यतमं शिवः ॥ देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप ॥ १९ ॥ यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्तमम् अकरोः सचिवं दूतं सौहृदादथ सारथिम् ॥ २० ॥ सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः ॥ तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥ २१ ॥ तथाप्येकांतभक्तेषु पश्य भूपानुकंपितं ॥ यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः ॥ २२ ॥ भक्त्यावेश्य मनो यस्मिन्वाचा यन्नाम कीर्तयन् ॥ त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥ २३

रवद्यस्य रागादिशून्यस्य तत्र हेतुः अनहंकृतेः ॥ तच्च कुतः ॥ अद्वयस्य तदपि कुतः समदृशः तत्रापि हेतुः ॥ सर्वस्यात्मनः ॥ यद्येवं हृद्वैतद्देहमज्ञावं ॥ तथापि समत्वेपि हे भूप भक्तेष्वनुकंपितमनुकंपा ॥ यतो मे प्राणांस्त्यजतः साक्षात्स्वयमेव न तु विद्वादिद्वारेण ॥ २२ ॥ इदानीं देहत्यागपर्यंतं श्रीकृष्णावस्थानं प्रार्थयते ॥ भक्त्येति द्वाभ्याम् ॥ २३ ॥

व

४

युधिष्ठिराय भीष्मेण सर्वधर्मनिरूपणे ॥ कृष्णस्तुतिश्च मुक्तिश्च जनमेजय मेन सवर्णिते ॥ ५ ॥ यद्दर्शनं तस्मा
विवेकः ॥ श्रीकृष्णेन संवर्हितं तद्दर्शयति ॥ इतीति ॥ सर्वेषां धर्माणां विवित्सया वेदितुमिच्छया
विनशनं कुरुक्षेत्रे ॥ देवव्रतो भीष्मः ॥ १ ॥ संततः श्रेष्ठाश्व स्थायेषु तैरश्वैः ॥ २ ॥ तत्र च न दानं त तत्रा सवनं तत्

सूत उवाच ॥ इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ॥ ततो विनशनं प्रागाद्यत्र देवव्रतो
पतत् ॥ १ ॥ तदा ते भ्रातरः सर्वे सदश्वैः स्वर्णभूषितैः ॥ अन्वगच्छन्रथैर्विप्रा व्यासधौम्यादयस्त
था ॥ २ ॥ भगवानपि विप्रर्षे रथेन सधनंजयः ॥ स तैर्व्यरोचत नृपः कुबेर इव गुह्यकैः ॥ ३ ॥ दृष्ट्वा
निपतितं भूमौ दिवश्च्युतमिवामरं ॥ प्रणेमुः पाण्डवा भीष्मं सानुगाः सह चक्रिणा ॥ ४
तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम ॥ राजर्षयश्च तत्रासन्द्रष्टुं भरतपुंगवं ॥ ५ ॥ पर्व
तो नारदो धौम्यो भगवान्बादरायणः ॥ बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥ ६
वसिष्ठ इन्द्रप्रमदस्त्रितो गृत्समदोऽसितः ॥ कक्षीवान्गौतमोऽत्रिश्च कौशिकोऽथ सुदर्शनः ॥ ७
अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोऽमलाः ॥ शिष्यैरुपेता आजग्मुः कश्यपाङ्गिरसादयः ॥ ८
तान्समेतान्महाभागानुपलभ्य वसूत्तमः ॥ पूजयामास धर्मज्ञो देशकालविभागवित् ॥ ९
कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरं ॥ हृदिस्थं पूजयामास माययोपात्तविग्रहम् ॥ १०

तान्समेतानागतान्दृष्ट्वा ॥ ६ ॥ रेणुकासुतः परशुरामः ॥ ६ ॥ कौशिको विश्वामित्रः ॥ ७ ॥ ब्रह्मरातः शु
कः ॥ अंगिरसो बृहस्पतिः ॥ ८ ॥ वसूत्तमो भीष्मः ॥ ९ ॥ हृदिस्थं सन्तं पुरत आसीनं पूजयामास ॥ १०

उपासीनान् समीपे उपविष्टान् ॥ प्रश्रयो विनयः प्रेम स्नेहस्ताभ्यां संगतान् उपसन्नान् ॥ पालीतेवे-
ताभ्यामवनतान् ॥ अभ्याचष्ट अभ्यभाषत ॥ अनुरागास्रैः स्नेहाश्रुभिः ॥ अंधीभूतेन चक्षुषा उप-
लक्षितः ॥ ददर्शेति वा ॥ ११ ॥ अभिभाषणमाह ॥ अहो इति पंचदशभिः हे धर्मनंदनाः क्लिष्टं
यथा भवत्येवं जीवितेन नार्हथ यद्यूयमिति यत्तदहो कष्टं जुगुप्सितं ॥ अहो अन्याय्यं चैतत् ॥ यतो

पांडुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान् ॥ अभ्याचष्टानुरागास्रैरंधीभूतेन चक्षुषा ॥ ११ ॥
अहो कष्टमहोऽन्याय्यं यद्यूयं धर्मनंदनाः ॥ जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः ॥ १२ ॥
संस्थितेऽतिरथे पांडौ पृथा बालप्रजा वधूः ॥ युष्मत्कृते बहून्क्लेशान्प्राप्ता तोकवती मुहुः ॥ १३ ॥
सर्वं कालकृतं मन्ये भवतां च यदप्रियम् ॥ सपालो यद्वशे लोको वायोरिव घनावलिः ॥ १४ ॥

यूयं विप्राः ॥ धर्मोऽच्युतश्च आश्रयो येषां ते ॥ १२ ॥ किंच ॥ संस्थिते मृते बालाः प्रजाः पुत्राः
यस्याः ॥ सा वधूः प्रेतिदैत्येदर्शितं ॥ तोकान्यपत्यानि तद्वती अपत्यैः ॥ सह क्लेशान्प्राप्ता मे
सर्थः ॥ १३ ॥ कालकृतत्वेन शोकं वारयति सर्वमिति द्वाभ्यां ॥ भवतामपि यद्वशे यस्य
वशवर्ती ॥ १४ ॥

स्नेहात्पुत्रासयुद्धेनदोषइतिचेत् ॥ तत्राह ॥ नैनोराज्ञ इति द्विषांवधःएनःपापंनभवतीतियत्शा
स्त्रेणगिलितारूपंवचः ॥ कुतोनकल्पते ॥ यतस्तद्वचः ॥ प्रजाभर्तुरेव ॥ अयंभावःस्वप्रजानामन्यतोव
धेप्रसक्तेतद्द्वयोःयुद्धातः इत्यर्थःअनेनतुप्रजायांपाल्यमानायांमयाकेवलंराज्यलोभेनहतत्वा
त्पापमेवेदमिति ॥ ५१ ॥ किंच ॥ युद्धेयुसाववधोभवत्वनामधर्मःस्त्रीणांतुमयाहतबंधूनांयो
सौतत्संबंधोसौद्रोहोयुद्धेहोपुत्थितः ॥ तस्यापोहितमपाकर्तुंकल्पःसमर्थोनाहंगृहमेधीयै

नैनोराज्ञःप्रजाभर्तुर्धर्मयुद्धेवधोद्विषाम् ॥ इतिमेनतुबोधायकल्पतेशासनंवचः ॥ ५१ ॥
स्त्रीणांमद्धतबंधूनांद्रोहोयोसाविहोत्थितः ॥ कर्मभिर्गृहमेधीयैर्नाहंकल्पोव्यपोहितुं
यथापंकेनपंकांभःसुरयावासुराकृतम् ॥ भूतहत्यांतथैवैकांनयज्ञैर्मार्ष्टुमर्हति ॥ ५३ ॥
इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेयुधिष्ठिरानुतापोऽष्टमोऽध्यायः ८ ॥

गृहमेधाश्रमविहितैः ॥ ५२ ॥ ननुयदसर्वंपाप्मानंतरतिब्रह्महत्यांयोऽश्वमेधेनयजतेयउचैन
मेवंवेदेतिश्रुतेः ॥ पापमश्वमेधेननश्यतेदेवस्याशंकाविवेकविरुद्धंभिनंहेतुवादमात्रि
त्यनिराकरोति ॥ यथाबलनपंकेनपंकांभोनमृज्यतेयथावासुरालेशाकृतमपाविश्रेवसुरा
सुरयानमृज्यते ॥ तथैवभूतहत्यामेकांप्रमादतोज्ञातांबुद्धिपूर्वकहिंसाप्रायैर्यज्ञैर्मार्ष्टुंशो
धयितुंनार्हतीति ॥ ५३ ॥ इतिश्रीभावार्थदीपिकायांप्रथमस्कंधेऽष्टमोऽध्यायः ८

सद्यश्रीमन्निर्याणोत्सवं वस्तुतपोह्यानकथां प्रस्तौति ॥ आसाद्यैः प्रबोधितोपि सुवाव्यामः सत्राव
धृतविवेकेन प्राप ॥ कृतः ईश्वरेहापाश्रितैः स्वभक्तश्रीमन्निर्याणमहोत्सवायरान्तासहक्रूदेव
गेतद्येतस्मादेवैनैवायं प्रबोधनीयउतीश्वराभिप्रायेकार्यद्वयविधायकमज्ञानद्विरिमर्थः श्री
कृष्णेनापि प्रबोधितोनावबुध्यत ॥ अत्र हेतवं कृतकर्मणाययाकरूपोऽस्व संधानार्थं गतोपिव
याविनमेववदद्वपिविग्रहमेवदृष्टीकृतवान् ॥ एवमत्रापि प्रबोधयन्प्रबोधमेवदृष्टीव
कारेमर्थः ॥ ४८ ॥ प्रबोध्यमेवप्रपंचयति ॥ आहेतिषड्भिः प्राकृतेन अविवेकप्रामेन आत्मना

आसाद्यैरीश्वरेहाद्यैः कृस्नेनाद्भुतकर्मणा ॥ प्रबोधितोपीतिहासैर्नाबुध्यत सुवार्पितः
॥ ४८ ॥ आह राजा यथा स्वमसतश्छिन्नयस्तदहं वधं ॥ प्राकृतेनात्मना विप्राः स्नेहमोहवशंगतः
४९ ॥ अहोअस्मेपश्यताज्ञानं हृदिरूढं दुरात्मनः ॥ पारक्यस्यैव देहस्य बह्व्यो मेक्षौहिणीर्हताः
५० ॥ बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः ॥ नमे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः
५१

विनेनरे विप्राः ॥ ५१ ॥ पारक्यस्यस्वसगालायाहारस्वदेहस्यार्थेमेमयाद्यक्षौहिणीः ॥ अक्षौ
हिण्यः अक्षौहिणीप्रमाणमासेनोक्तं ॥ अक्षौहिणीप्रसंख्यानां रथानां द्विजसत्तमाः ॥ संख्या
गणानतत्वज्ञैः सहस्राण्येकविंशतिः ॥ शतानामुपरि चैवाष्टौ तथाभूयश्च सप्ततिः ॥ गजानां
च प्रसंख्यानमेतदेव प्रकीर्तितं ॥ ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु ॥ नराणामपि पं
चाशत्शतानि त्रीणि चैव हि ॥ पंचषष्टिसहस्राणि तथाश्वानां शतानि च ॥ दशोत्तराणि ष
ट्प्राहुः संख्यानतत्वविदो जनाः ॥ एतामक्षौहिणीं प्राहुर्यथावदिह संख्ययेति ॥ ५२ ॥ सुहृदः स

ननु बंधवो यादवाः पुत्राश्च पांडवाः स्मृताः समर्थाश्च तत्किं कार्यमेवं भाषसे ॥ अत आह ॥ केवलमि
ति यर्हि भवतो दर्शनं यदा त्वमस्मान्न पश्यसि तदा नाम्ना विख्यात्या रूपेण सौंदर्येण च यदुभिः
सहिताः पांडवा नाम के वयं न केपि ॥ अतितुच्छा इत्यर्थः ॥ हृषीकाणामीशितुर्जीवस्यादर्शने
यथा न किंचिन्नामरूपं च न तद्वत् ॥ किंच यथेदानीमियमस्मदीया भूमिः ॥ स्वैरसाधारणैर्वज्रां
कुशादिभिर्लक्षणैर्विलक्षितैस्त्वत्पदैरंकिता सती भाति न तथा त्वदीयविनिर्गमने सति

के वयं नामरूपाभ्यां यदुभिः सह पांडवाः ॥ भवतोऽदर्शनं यर्हि हृषीकाणामिवेशितुः
३८ ॥ नेयं शोभिष्यते तत्र यथेदानीं गदाधर ॥ त्वत्पदैरंकिता भाति स्वलक्षणविलक्षितैः
३९ ॥ इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः ॥ वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षितैः ॥ ४
अथ विश्वेश विश्वात्मन् विश्वमूर्ते स्वकेषु मे ॥ स्नेहपाशमिमं छिंधि दृढं पांडुषु वृष्णि
षु ॥ त्वयि मेऽनन्यविषया मतिर्मधुपतेऽसकृत् ॥ रतिमुद्वहतादद्धा गंगेवौघमुदन्वति ॥ ४२

न शोभिष्यते ॥ ३९ ॥ अपि चेमे जनपदा देशाः स्वृद्धाः सुसमृद्धाः संतः ॥ ४० ॥ गमने पांडवा नाम
कुशलेऽत्र गमने च यादवानामित्युभयतो व्याकुलचित्तस्य सतीनां स्नेहनिवृत्तिं प्रार्थयते अ
थेति विश्वेशेत्यादिसंबोधनानि स्नेहच्छेदसामर्थ्यज्ञापनाय दृढं संतं ॥ ४१ ॥ ततः किमत आ
ह ॥ त्वयीति ॥ अनन्यविषया सती मे मतिः ॥ रतिमुद्वहतात् ॥ अनवच्छिन्नां प्रीतिं करोत्वि
त्यर्थः ॥ ओघं प्रवाहं यथा गंगा प्रतिबंधं विनार्णवं याति ॥ एवं मतिरपि विश्रान्तगुणाणपेदि निभाव ॥ ४२

एवमभ्यर्थितःपुनः॥प्रणमति॥हेकृष्णतेनमः॥उपकारानतुस्मरंतीवहुधासंबोधयति॥कृष्णस
खेत्यर्जुनेनसहसखेवृष्णीनांऋषभश्रेष्ठइत्यवनेर्भूमेर्ध्रुहोद्रोग्धारोयेराजन्याः॥तेषांवंशस्यदहन॥अ
वमप्यनपवर्गोवीर्य्यंअक्षीणप्रभावगोविप्रामकामथेनैस्पर्ध्यंगोद्विजसुराणामार्तिंहरो
वतारोयस्येति॥४३॥कलानिमधुराणिपदानियेषुतैर्वाक्यैः॥परिणुतः॥अखिलउदयोमहि
मायस्यसः वहसन्नाविस्मयात्तपरिणतेनितिवक्तव्येदीर्घ्यश्छंदोभंगायेन॥मंदमीषत्ते न

हेकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य्य॥गोविं
दगोद्विजसुरार्तिहरावतारयोगेश्वराखिलगुरोभगवन्नमस्ते॥४३॥सूतउवा
च॥पृथयेत्थंकलपदैःपरिणूताखिलोदयः॥मंदंजहासवैकुंठोमोहयन्निवमा
यया॥४४॥तांवाढमित्युपामंत्र्यप्रविश्यगजसाह्वयं॥स्त्रियश्चस्वपुरंयास्यन्प्रेम्णाराज्ञानि
वारितः॥४५॥

महासएवमायायावस्यतिहिहासोजनोन्मादकरीचमायेति॥४४॥त्वयिमेनन्यविषया
मतिरितियत्तथापितेननवाढमित्यंगीकृत्यरथस्थानात्तगजाह्वयमागत्य॥पश्चात्
त्तोवमन्यांश्चसुभद्राप्रमुखाः॥स्त्रियश्चपांडुस्वपुरंद्वारकांयास्यन्॥राज्ञायुधिष्ठि
रेणप्रेम्णाकंचित्कालंनिवसेतिसंप्रार्थ्यनिवारितः॥४५॥

३२

ननु निग्रहानुग्रहरूपं विषमसिद्धं वैषम्यमत आह ॥ न वेति ॥ नृणां विडंबनमनुकरणमीहमानस्य
कुर्वतः यस्मिंस्त्वयि विषमा मतिरनुग्रहनिग्रहरूपा भवति ॥ २९ ॥ अजस्य जन्म अकर्तुः कर्मेति यत्तिर्यक्षु वरा
हादिरूपेण नृषु रामादिरूपेण ऋषिषु वामनादिरूपेण ॥ ३० ॥ नरविडंबनमत्याश्चर्यमित्याह
गोपी यशोदा त्वयि कृतागसि दधिभांडस्फोटनेन कृतनवनीयावदाम रज्जुमादातुं जग्राह तावत्
ते तत्क्षणमेव यादृशमासीदवस्था सा मां विमोहयति ॥ किंभूतमश्रुभिः कलिलं व्याप्तमंजनं

न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडंबनं ॥ न यस्य कश्चिद्दयितोस्ति कर्हि
चिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृणां ॥ २९ ॥ जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः
तिर्यङ्नृषिषु यादःसु तदत्यन्तविडंबनं ॥ ३० ॥ गोप्याददे त्वयि कृतागसि दाम तावद्या ते दशा
श्रुकलिलांजनसंभ्रमाक्षं ॥ वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भी
रपि यद्बिभेति ॥ ३१ ॥ केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये ॥ यदोः प्रियस्यान्ववाये म
लयस्येव चंदनं ॥ ३२ ॥ अपरे वसुदेवस्य देवक्यां याचितोऽभ्यगात् ॥ अजस्त्वमस्य क्षेमाय व

नेन यथोदोसौ वेत संभ्रमे आकुले अक्षिणी यस्मिंस्तत् ॥ वक्त्रं निनीय अधः कृत्वा ताडयिष्यतीति भ
यस्य भावनया स्थितस्य तव यत्तत्त्वतः भीरपि त्वत्तो बिभेति तत्स्य तेन दशा ॥ ३१ ॥ अजन्य एव जन्मनो
हेतुतयानुसंधेयत्वात् ॥ न च जन्मादि विडंबनमित्याह ॥ केचिदिति चतुर्भिः ॥ पुण्यश्लोकस्य
प्रियस्य युधिष्ठिरस्य कीर्तये यदुर्नाम वा ॥ मलयस्य कीर्तये यथा चंदनं यथा ॥ ३२ ॥ तथा वसुदेवस्य देवक्यां
प्रार्थितो याच्या अजन्य एव त्वमभ्यगात् ॥ पूर्वतपमिति शेषः प्रथमपूर्णरूपसत्त्वार्थं ॥ अभ्यगमिति निपातः

चात्मभुवेति ॥ ब्रह्मप्रार्थनस्य प्राधान्यविवक्षया मतांतरं ॥ ३४ ॥ परमानंदस्वरूपात्तानमविद्यातो
देहाद्यभिमानात्तत्कामः ॥ ततः कर्माणि तैः क्लिश्यमानानां तद्विहृतये श्रवणस्मरणार्हाणि करिष्य
न् ॥ ३५ ॥ अन्यपक्षस्य सिद्धांततामभिप्रेत्य । श्रवणादिफलमाह । शृण्वंतीति । नंदंति अन्यैः की
र्त्यमानमभिनंदंति ये जनाः ईहितं चरितं तावकं त्वदीयपदांबुजं त एव पश्यंत्येव अचिरे

भारावतारणायान्ये भुवो नाव इवोदधौ ॥ सीदंत्या भूरिभारेण जातो ह्यात्मभुवार्थितः ॥ ३४
भवेस्मिन् क्लिश्यमानानामविद्याकामकर्मभिः ॥ श्रवणस्मरणार्हाणि करिष्यन्निति केच
न ॥ ३५ ॥ शृण्वंति गायंति गृणंत्यभीक्ष्णशः स्मरंति नंदंति तवेहितं जनाः ॥ ३६ ॥ त एव पश्यंत्य
चिरेण तावकं भवप्रवाहोपरमं पदांबुजम् ॥ अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहा
ससि स्वित्सुहृदोनुजीविनः ॥ येषां न चान्यद्भवतः पदांबुजात्परायणं राजसु योजितां
हसाम् ॥ ३७

णो वेति सर्वं सावधारणो । कीदृशं भवप्रवाहस्य जन्मपरंपरायाः ॥ उपरमो य
स्मात् ॥ ३६ ॥ कृष्णनीतवासस्य स्थित्या योग्योचितमित्याशयेनाह ॥ अपीति चतुर्भिः ॥ हे प्रभो
सुहृदोनुजीविनस्तान् अपि स्वित् किं स्वित् जिहाससि ॥ येषामस्माकमन्यत्परायणं नैवा
स्ति तत्कुतः राजसु योजितमंहो द्रुहः । दूरे येषां स्वानां कृतमीहितं यस्य हे स्वकृतेहित येन तस्य संबो
धनं विसर्गांतपाठे त्वंपदविशेषणम् ॥ ३७ ॥

विपद्गणमेव दर्शयति॥ विषान्नभीमस्य विषमोदकदानात्॥ महाग्नेर्जतुगृहदाहात्॥ पुरुषाद्धिडिंबा
द्योरात्तस्मात् तेषां दर्शनात्॥ असत्सभाया द्यूतस्थानात्॥ अभितो रक्षिताः॥ आस्म अभवाम॥२४॥ यत्र यासु
विपत्सु कीदृशं दर्शनं नास्ति पुनर्भवदर्शनं यस्मात्॥ अथवा अपुनर्भवं मोक्षं दर्शयतीति यत्तत्॥२५॥
ननु संपन्नस्यैव परमेश्वरदर्शने प्रयत्नेऽस्य वितत्वात्॥ न किं विपदः प्रार्थ्यंते॥ संपदस्तु प्रत्युत प्रतिबंधि
का इत्याह॥ जन्म सत्कुले जन्मादिभिरेधमानो मदो यस्य सः॥ अभिधातुं कुलगोविंदेति वक्तुमपि॥ अकिं
चनानां गोचरं विषयम्॥ ते॥२६॥ भक्तजनमनोरथसंपूरणाय प्रणमति॥ अकिंचना भक्तास्त एव वित्तं सर्वस्वं य

विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः॥ मृधे मृधेऽनेकमहारथास्त्रतो द्रौ
ण्यस्त्रतश्चास्म हरेऽभिरक्षिताः॥२४॥ विपदः संतु नः शश्वत्तत्र तत्र जगद्गुरो॥ भवतो दर्शनं य
त्स्यादपुनर्भवदर्शनं॥२५॥ जन्मैश्वर्यश्रुतश्रीभिरेधमानमदः पुमान्॥ नैवार्हत्यभिधातुं वै
त्वामकिंचनगोचरं॥२६॥ नमोऽकिंचनवित्ताय निवृत्तगुणवृत्तये॥ आत्मारामाय शांताय कैव
ल्यपतये नमः॥ मन्ये त्वां कालमीशानमनादिनिधनं विभुं॥ समं चरंतं सर्वत्र भूतानां यन्मिथः क
लिः २८

स्य तस्मै तुभ्यं॥ किं निवृत्ता गुणवृत्तयो धर्मार्थकामविषया यस्मात्तस्मै॥ अतः आत्मारामाय अतः शां
ताय रागादिरहिताय किंच कैवल्यपतये कैवल्यदाने समर्थाय॥२७॥ ननु देवकीनंदनं मां कथमेवं
स्तौषि॥ तत्राह॥ मन्ये त्वां कालं न तु देवकीदेवकीपुत्रं तत्र हेतवः ईशानं नियंतारं अनादिनिधनं
अत एव विभुं प्रभुं समं यथा भवति तथा चरंतं॥ ननु पार्थसारथेः कथं मम साम्यं॥ तत्राह॥ यद्य
तस्तो विभिन्नभूतानां॥ भूतानां मिथः॥ कलिः॥ कलहो भवति॥ न तु स्वतस्त्वयि वैषम्यं॥२८

किंच परमहंसानामात्मानात्मविवेकिनां ततो मुनीनां मननशीलानामपि ततश्चामलात्मनां निवृत्तरागा
दीनामपि तथा तेन निजमहिम्ना न लक्ष्यसे ॥ अतो भक्तियोगं विधातुं त्वां वयं स्त्रियः कथं हि पश्येम ॥ य
द्वा परमहंसानामपि भक्तियोगविधानार्थं त्वं आत्मारामाणामपि अचिंत्यनिजगुणैराकृष्य भक्ति
योगं विधातुं कारयितुमवतीर्णोसि इत्यर्थः ॥२०॥ तान्न भक्त्यैव शक्नुमः अशक्ताः पुनः केवलं नमस्करोति ॥ कृ
ष्णायेति द्वाभ्यां ॥ पंकजं नाभौ यस्य पंकजानां माला हि यस्य पंकजवन्नेत्रे यस्य पंकजांकितावंघ्री

तथा परमहंसानां मुनीनाममलात्मनाम् ॥ भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः ॥२०॥
कृष्णाय वासुदेवाय देवकीनंदनाय च ॥ नंदगोपकुमाराय गोविंदाय नमो नमः ॥२१॥ नमः
पंकजनाभाय नमः पंकजमालिने ॥ नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥२२॥ यथा हृ
षीकेश खलेन देवकी कंसेन रुद्धाति चिरं शुचार्पिता ॥ विमोचिताहं च सहात्मजा विभो त्व
यैव नाथेन मुहुर्विपद्गणात् ॥२३॥

यस्तस्मै ॥२२॥ तत्कृतोपकारान् अनुस्मरति ॥ यथेति द्वाभ्यां ॥ अयमर्थः मातृतोपि मय्यधिकात
व प्रीतिः ॥ तथाहि ॥ हे हृषीकेश यथा देवकी कंसेन रुद्धा तथा विमोचिता ॥ अहं च तथैव वि
मोचितेति का वा महान् विशेषस्तत्राह ॥ तद्दर्शयति ॥ सा अतिचिरं रुद्धा सती ॥ तस्मादेव सकृ
द्विमोचिता ॥ तथा शुचार्पिता च सती न च तस्याः पुत्रा रक्षिताः ॥ अस्मि चाम्यो नात्यल्पस्याः
अहं च विपद्गणात् ॥ तत्रापि हृषीकेशं सात्मजा च त्वयैव च नाथेनेति ॥२३॥

वैराट्याः उत्तरायाः अंतस्थः सन् ॥ तं गर्भमावृतवान् ॥ यतः आत्मा अंतर्यामी योगेश्वर इति विशिष्टस्यापि प्रवेशो आवरणार्थमुक्तः ॥ कुरुतंतवे संतानाय ॥ पांडवानामपि कृष्णवैष्णवत्वादेवमुक्ते ॥१४॥ अमोघं अप्रतिक्रियं च सत् समशाम्यत् ॥ शांतमासीत् ॥१५॥ एतद्ब्रह्मास्त्रशमनं आश्चर्यं मा मंस्था मा मन्यस्व ॥१६॥ कृष्णया सह ॥१७॥ त्वा इति त्वां नमस्ये नमस्करोमि ॥ ननु कनिष्ठो मां कथं नमस्करोषि

अंतस्थः सर्वभूतानामात्मा योगेश्वरो हरिः ॥ स्वमाययावृणोद्गर्भं वैराट्याः कुरुतंतवे ॥१४॥ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियम् ॥ वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह ॥१५॥ मा मंस्था ह्येतदाश्चर्यं सर्वाश्चर्यमयेऽच्युते ॥ य इदं मायया देव्या सृजत्यवति हंत्यजः ॥१६॥ ब्रह्मतेजोविनिर्मुक्तैरात्मजैः सह कृष्णया ॥ प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती ॥१७॥ कुंत्युवाच ॥ नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परम् ॥ अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितम् ॥१८॥ मायाजवनिकाछन्नमज्ञाधोक्षजमव्ययम् ॥ न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥१९॥

ध

तत्राह ॥ आद्यपुरुषं कुतः प्रकृतेः परं ततः ॥ कुतः ईश्वरं प्रकृतेरपि नियंतारं ॥ अत एव सर्वभूतानामंतर्बहिश्च पूर्णत्वेनावस्थितं तथाप्यलक्ष्यं ॥१८॥ तत्र हेतुः ॥ मायैव जवनिका तिरस्करिणी ॥ तयाच्छन्नं ॥ अतो हं मत्ता भक्तियोगानभिज्ञा केवलं नमस्यामि ॥ अधः अक्षजं ज्ञानं यस्मात्तं ॥ अव्ययं अपरिच्छिन्नं त्वं न लक्ष्यसे ॥ मूढदृशा देहाभिमानिना मादृशेन न लक्ष्यसे ॥१९॥

४४

वैनेयः सोऽनेनेमा साम्य कृतिनो ह्रवेन वसंवृतः ॥ ७ ॥ तथमास्थितः स नत उत्तरां परीक्षित्यातवं अभि
मुखं यावती उपलेभे ददृशे ॥ ८ ॥ उत्तरा श्रीकृष्णं संप्रार्थयति ॥ पाहि पाहीति द्वाभ्यां ॥ अन्यस्त्वार्थयना
योऽस्यानात्मीत्याह त्वत्तः ॥ अन्यं अभयं भयरहितं नपश्यामि यत्र लोके परस्परं मरणं भवति तत्र ॥ ९
प्रत्यं तं भयमावेदयति अभिद्रवति अभिमुखमायाति ॥ तप्तमायसं लोहमयं शरं यस्य सः ॥ अति

अहं प्रपोऽदुष्टं शस्त्रं यो न ते योऽद्भुवसंवृतः ॥ दैपायनादिभिर्विप्रैः पूजितैः प्रति पूजितः ॥ ७ ॥ गतं तु
कृतमतिः त्रैस्यनद्वारकां रथमास्थितः ॥ उपलेभे भिधावंतीमुत्तरां भयविह्वलां ॥ उत्तरोवाच
पाहि पाहि महायोगिन्देवदेवजगत्पते ॥ नान्यं त्वदभयं पश्ये यत्र मृत्युः परस्परं ॥ ९ ॥ अभिद्र
वति मामीश शरस्तप्तायसो विभो ॥ कामं दहतु मां नाथ मा मे गर्भो निपात्यतां ॥ १० ॥ सूत उ
वाच ॥ उपधार्य वचस्तस्या भगवान्भक्तवत्सलः ॥ अपांडवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ॥ ११ ॥
तर्ह्येवाथ मुनिश्रेष्ठ पांडवाः पंचसायकान् ॥ आत्मनोऽभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाद
दुः ॥ व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनां ॥ सुदर्शनेन स्वास्त्रेण स्वानां रक्षां व्यधाद्विभुः

कार्यमित्याह ॥ काममिति ॥ कामं यथेच्छं ॥ १० ॥ पराभवेनाभिज्ञः पित्रसद्द्रौणेः ॥ अपांडवं पौंडव
शून्यं ददं विश्वं कर्तुं प्रवृत्तं ब्रह्मास्त्रमबुध्यत ॥ ११ ॥ तत एव बहुषु खं तदागतमित्याह ॥ तर्ह्येव तस्मि
न्नेव ॥ ब्रह्मास्त्रस्यास्त्रांतरैरनिवर्त्यत्वात् ॥ १२ ॥ परिहृतं व्यसनं ॥ १३ ॥ स्वं वीक्ष्य अनन्यविषया आत्म
नो येषां स्वैकनिष्ठानामित्यर्थः ॥ १२

अष्टमे कुंतिस्तोत्रं द्रौण्यस्त्राद्रक्षा परीक्षितः ॥ श्रीकृष्णेन स्तुतिः ॥ राज्ञः शोकश्च वर्ण्यते ॥१॥ अथ ते पांडवाः संपरेतानां मृतानां गंगायामुदकं दातुं ॥ सकृष्णाः ॥ श्रीकृष्णेन सहिताः स्त्रियः स्त्रीपुरस्कृत्य अग्रतः कृत्वा तस्मिन्कार्ये स्त्रीपुरःसरत्वविधानात् ॥१॥ निनीय दत्वा हरिपादाब्जरजोभिः पू

सूत उवाच ॥ अथ ते संपरेतानां स्वानामुदकमिच्छतां ॥ दातुं सकृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः ॥१॥ ते निनीयोदकं सर्वे विलप्य च भृशं पुनः ॥ आप्लुता हरिपादाब्जरजःपूतसरिज्जले ॥२॥ तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजम् ॥ गांधारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः ॥३॥ सांत्वयामास मुनिभिर्हतबंधून्शुचार्पितान् ॥ भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियाम् ॥४॥ साधयित्वाजातशत्रोः स्वं राज्यं कितवैर्हृतम् ॥ घातयित्वासतो राज्ञः कचस्पर्शक्षतायुषः ॥५॥ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः ॥ तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥६॥

तायां सरिति गंगायां तस्यां जले पुनः स्नात्वा ॥ आप्लुताः स्नाता इत्यन्वयः ॥२॥ कुरुपतिं युधिष्ठिरं सहानुजं भीमादिभिः सहितं ॥३॥ मुनिभिः सहितः ॥४॥ कितवैर्धूर्तैर्दुर्योधनादिभिः ॥ द्रौपद्याः कचग्रहणादिना क्षतं नष्टमायुर्येषां तान् ॥५॥ याजयित्वेत्यादि भाविकथासंक्षेपः ॥ शतमन्योः श

वधार्हणः वधार्हः॥ ममैवाम्नाते कृते॥ ब्राह्मणो न हंतव्यः तथा॥ आततायिनमायांतमपि वेदांतपारगं॥ जिघांसंतं जिघांसीयान्न तेन ब्रह्महा भवेदिति वदता॥ तदुभयमप्यनुशासनं परिपालय॥५३॥ किं च प्रतिश्रुतं पूरयेत्याह॥ प्रियां सांत्वयता त्वया यत्प्रतिश्रुतं हननेन तच्च सत्यं कुरु मह्यं मम॥ तच्च वधे भीमस्य प्रियं भवति॥ अवधे द्रौपद्याः हृदयस्य श्रीकृष्णस्य॥५४॥ हार्दं अभिप्रायं ज्ञात्वा॥

श्रीभगवानुवाच॥ ब्रह्मबंधुर्न हंतव्य आततायी वधार्हणः॥ मयैवोभयमाम्नातं परिपाह्यनुशासनं॥५३॥ कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियां॥ प्रियं च भीमसेनस्य पांचाल्या मह्यमेव च॥५४॥ सूत उवाच॥ अर्जुनः सहसाज्ञाय हरेर्हार्दमथासिना॥ मणिं जहार मूर्द्धन्यं द्विजस्य सहमूर्द्धजं॥५५॥ विमुच्य रशनाबद्धं बालहत्याहतप्रभं॥ तेजसा मणिना हीनं शिबिरान्निरयापयत्॥५६॥ वपनं द्रविणादानं स्थानान्निर्यापणं तथा॥ एष हि ब्रह्मबंधूनां वधो नान्योस्ति दैहिकः॥५७॥ पुत्रशोकातुराः सर्वे पांडवाः सह कृष्णया॥ स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं॥५८॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे सप्तमः॥ ७

यत्तावत्त्वयाभ्युपेतं विदध्यात्॥ अतोयमभिप्रायज्ञो नित्यामेत्यर्थः॥ असिना खड्गेन मस्तके मूर्द्धजान्तं सहमूर्द्धजं सकेशं॥५५॥ मणिना च हीनं निरयापयत्॥ निःसारितवान्॥५६॥ अनेन श्रीकृष्णोक्तं सर्वं संपादितमित्याह॥ वपनमिति॥५७॥ निर्हरणादाहार्थं नयनं॥५८॥ इ

भा
प्र टी
३२

धर्म्यमित्यादयोवचसःषड्गुणाःपूर्वश्लोकषट्केद्रष्टव्याः॥ तत्रधर्म्यंधर्मादनुपेतंशुश्रूतोशुश्रूतामिति न्याय्यंन्यायादनपेतंसरहस्यमित्यादि॥ सकरुणंतस्यात्मनोर्हमितिनिर्व्यलीकंनच्छद्मकंतेति॥ समंसमारो दोनिरुःसाम्यात्॥ महत्॥ येःकोपितमितिनिष्ठुरोस्माद्धितोपदेशात्॥ एवंभूतंराज्ञ्यावचःद्रौपदि नाःप्रत्यनंदत॥ अयंमारितवान्॥४९॥ नकुलादयश्च॥ प्रत्यनंदन्॥ युयुधानःसात्यकिः॥५०॥ तस्य

सूतउवाच॥ धर्म्यंन्याय्यंसकरुणंनिर्व्यलीकंसमंमहत्॥ राजाधर्मसुतो राज्ञाःप्रत्यनंदद्वचोद्विजाः॥४९॥ नकुलःसहदेवश्चयुयुधानोधनंजयः भगवान्देवकीपुत्रोयेचान्येयाश्चयोषितः॥५०॥ तत्राहामर्षितोभीमस्तस्य श्रेयान्वधःस्मृतः॥ नभर्तुर्नात्मनश्चार्थेयोहन्सुप्तान्शिशून्वृथा॥५१॥ निश म्यभीमगदितंद्रौपद्याश्चचतुर्भुजः॥ आलोक्यवदनंसख्युरिदमाहहस न्निव॥५२॥ ॥ ॥

तथाविधस्यद्रौणेर्वधःश्रेयान्॥ अन्यथास्मन्नरकपातप्रसंगात्। तदाह॥ भर्तुरिति अरु न॥ नवान्॥५१॥ चतुर्भुजोक्रेरघभावः॥ भीमेपतंहंतिप्रहते॥ द्रौपद्यांचसहसातन्नि वारणेप्रहत्तायामुभयोःसंवारणायाविष्कृतचतुर्भुजइति॥ संदिहानस्यसख्युर र्जुनस्य॥५२॥ ॥

३१

सरहस्यः॥ सोपनिषत्कः मंत्रसहितः विसर्गोऽस्त्रप्रयोगः उपसंयम उपसंहारः ताभ्यां सहितोऽस्त्रसमूहश्चे
ति॥ ४४॥ किंच॥ तस्य द्रोणस्यात्मनो देहस्यार्द्धं कृपी आस्ते अर्द्धं देहेन हेतुः पत्नी अर्द्धो वा एष आत्मनो
यत्पत्नीति श्रुतेः॥ जायापती अग्निमादधीयातामिति श्रुतेः॥ उभयोरेकाकारत्वाद्वा गम्यता च॥ न
नु भर्तारं विसृज्य तेकतेकथं सा जीविता॥ तत्राह॥ नान्वगात् भर्तारं॥ यतो वीरसूः पुत्रवती॥ ४५॥

सरहस्यो धनुर्वेदः सविसर्गोपसंयमः॥ अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात्॥ ४४॥
स एष भगवान्द्रोणः प्रजारूपेण वर्तते॥ तस्यात्मनोऽर्द्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी॥ ४५॥
तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलं॥ वृजिनं नार्हति प्राप्तुं पूज्यं वंद्यमभीक्ष्णशः॥ ४६॥
मा रोदीदस्य जननी गौतमी पतिदेवता॥ यथाहं मृतवत्सार्ता रोदिम्यश्रुमुखी मुहुः॥ ४७॥
यैः कोपितं ब्रह्मकुलं राजन्यैरजितात्मभिः॥ तत्कुलं प्रदहत्याशु सानुबंधं शुचार्पितं॥ ४८

तत्तस्मात् गौरवं गुरोः कुलं भवद्भिः कर्तृभिर्वृजिनं दुःखं प्राप्तुं नार्हति किंतु पूज्यं वंद्यं च
४६ मृतवत्सा मृतपुत्रा ४७ विपक्षे दोषमाह यैरिति तेषां राजन्यानां कुलं कर्मक
र्मभूतं सानुबंधं सपरिवारं शुचा शोकेनार्पितं प्राप्तं च ब्रह्मकुलं कर्तृ प्रदहति ४८

रिपोरपि स्वमस्य बालस्य वधो न धर्म इत्यमुमर्थं दर्शयति ॥ मत्तं मद्यादिना ॥ प्रमत्तं अनवहितं ॥ उन्मत्तं ग्रहवातादिना ॥ जडं अज्ञं यं प्रपन्नं शरणागतं ॥ विरथं भग्नरथं ॥ ३६ ॥ तद्धयो देहरूपः तस्यैव श्रेयः पुरुषार्थः यद्यस्मात् दण्डप्रायश्चित्तरहिताद्दोषात् ॥ पुमान्नधो यातीति ॥ ३७ ॥ यद्यपि चोदितः ॥ तथापि

मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडं ॥ प्रपन्नं विरथं भीतं न रिपुं हन्ति धर्मवित् ॥ ३६ ॥ स्वप्राणान्यः परप्राणैः प्रपुष्णात्यघृणः खलः ॥ तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ॥ ३७ ॥ प्रतिश्रुतं च भवता पाञ्चाल्यै शृण्वतो मम ॥ आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ॥ ३८ ॥ तदसौ वध्यतां पाप आततताय्यात्मबन्धुहा ॥ भर्तुश्च विप्रियं वीर कृतवान्कुलपांसनः ॥ ३९ ॥ एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः ॥ नैच्छद्धन्तुं गुरुसुतं यद्यप्यात्महनं महान् ॥ ४० ॥ अथोपेत्य स्वशिबिरं गोविन्दप्रियसारथिः ॥ न्यवेदयत्तं प्रियायै शोचन्त्या आत्मजान्हतान् ॥ तथाहृतं पशुवत्पाशबद्धमवाङ्मुखं कर्मजुगुप्सितेन ॥ निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च ॥ ४२ ॥ उवाच चासहन्त्यस्य बन्धनानयनं सती ॥ मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ॥ ४३ ॥

हन्तुं नैच्छत् ॥ आत्महनं गुरुहन्तारमपि यतो महान् ॥ ४० ॥ गोविन्दः प्रियः सारथिर्यस्य ॥ आत्मजान् हतान् शोचन्त्यै ॥ ४१ ॥ तथा परिभवेनाहृतमानीतं ॥ कर्मणा जुगुप्सितेन दोषेणावाङ्मुखं ॥ अधोमुखं ॥ अपकृतं ॥ अपकारिणं ॥ कृपया निरीक्ष्य ॥ वामः शोभनः स्वभावो यस्याः सा ननाम ॥ ४२ ॥ उवा-

ततस्तूभयोर्वेगात्तयोस्तेजसी पावकैः संहते संवेष्टिते परस्परं मिलित्वा वहद्याते ॥ अवर्द्धतां किं कृ
त्वा रोदसी द्यावापृथिव्यौ एवं मत्वा विदितं आहत्य यथा प्रलये संकर्षणमुखाग्निः ॥ उपरिस्थितौ तौ कें
सुसंहत्य वर्द्धतेन दहत ॥ १० ॥ तयोः द्रौ गिरिफाल्गुनयोः तेन दह्यमानाः ॥ सा वनं तेकं प्रलयाग्निं मस
त मेनिरे ॥ ११ ॥ लोकानां अंतिकरं अन्यं नाम्ना मित्यर्थः ॥ वासुदेवसमं ते चालस्य वक्षा सुहृदयमुप

संहत्या सोम्यमुभयोस्तेजसी पावकसंहते ॥ आहत्य रोदसी खे च ववृधाते ऽकेवद्धिवत ॥ १ ॥
दृष्ट्वा दहते नस्तनयोः स्त्री लोकान्यद्दहन्महत ॥ दह्यमानाः प्रजाः सर्वाः सा वनं तेकमसमसत ॥ २ ॥
प्रजोपप्लवमालक्ष्य लोकक्षतिकरं च तम ॥ मेने च वासुदेवस्य संजुहाराज्जेनो हृदयम ॥ ३ ॥
तत आसाद्य तरसा दारुणं गौतमीसुतम ॥ ववे धात्मुर्वेनाम्नात्रं पञ्चरव्यानयायथा ॥ ४ ॥
शिविराय गति तीव्रं तं रज्वा वध्वा रिपुं बलात ॥ माहाजेनेन प्रकुपितो भगवानत्त्वुनेदनम ॥ ५ ॥
मैनं पार्थार्हसित्रातुं ब्रह्मवंधुमिमं जहि ॥ योः सा वनानागसः सुप्तान्वधीन्निशि वालकान ॥ ६ ॥

संहतवान ॥ १२ ॥ गौतमवं ब्राजागौतमीकृपीतस्याः सुतं ॥ अमर्षेणाकोपेनतामे अदि णीयस्य
सः ॥ नि कृष्णवेद हणांतः पञ्चं प्रत्येतितत्सर्वं पतं धर्मरस्य त्र हृष्टानः ॥ पाण्यापातिकः पञ्च शिति
रव्यानयारज्वा ॥ १३ ॥ शोकरोषादि युक्तस्यापच्यंतस्य धर्मनिष्ठाव्यामनाय श्रीकृष्ण वाक्यंन
दाहृषद्धिः शिविराय राजनिवेशनाय ॥ नेन्न मिच्छंतं ॥ प्रकुपित इति ॥ १४ ॥ अनागसो निपरपराधा

तथावाऽनेनावतारेण न वसाधुपदपातो लक्ष्यत इत्याह ॥ तथेति ॥ किंभारहरणमात्रेण
न भवति ॥ त्वमाह ॥ स्वानां ज्ञातीनां च अनुध्यानाय च तथा अनन्यभावानां एकांतभक्तानां च ॥२५॥ एवं
स्तुत्वा प्रस्तुतं विज्ञापयति ॥ किमात्मकमिदं कुतो वा आयातीति स्विदिति वितर्के ॥२६॥ इदं द्रोणपु
त्रस्य ब्राह्ममस्त्रं तेन च प्राणबाधे प्राप्ते प्रदर्शितं केवलं न तु तत्प्रयोगे कुशल इत्यर्थः यतोऽसावुप

तथायं चावतारस्ते भुवो भारजिहीर्षया ॥ स्वानां चानन्यभावानामनुध्यानाय चासकृत् ॥२५॥
किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहं ॥ सर्वतो मुखमायाति तेजः परमदारुणं ॥ श्रीभगवा
नुवाच ॥ वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितं ॥ नैवासौ वेद संहारं प्राणबाध उपस्थिते ॥२७॥
न ह्यस्यान्यतमं किंचिदस्त्रं प्रत्यवकर्षणं ॥ जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा ॥२८॥ सूत उवा
च ॥ श्रुत्वा भगवता प्रोक्तं फाल्गुणः परवीरहा ॥ स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्मास्त्राय संदधे ॥२९॥

संहारं न वेद पतत्वं तं वेत्स्यज्ञानासि ॥२७॥ प्रत्यवकर्षणं कृपालकरं निवर्तकमित्यर्थः ॥ अस्त्रतेजस्त्र
तेजः उन्नद्धं उत्कटं ब्रह्मास्त्रतेजसैव जहि यान यतत्वं प्रयुक्तं चास्त्रं तदुपसंहरस्व स्वयमुपशाम्यति
यतस्त्वमस्त्रज्ञोऽसि ॥२८॥ परेषां च वतएव वीरान्हंतीति तथा ॥ फाल्गुणो अर्जुनः ॥ अपः स्पृ
ष्ट्वा आचम्य श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्राह्मास्त्राय ब्रह्मास्त्रं निवर्तयितुं ॥२९॥

ग्रहणं स्वकरवाहितं ॥ न तु पलायनमेव रक्षकमस्ति न तस्यापि क्वचित्त्वादित्याह ॥ श्रांतवाजिनो यस्य तं ब्रह्मशिरो नेत्रं ब्रह्मास्त्रं ॥ द्विजात्मजः अश्वत्थामा ॥ १९ ॥ तद्ब्रह्मास्त्रं समाहितः उपसंहारमजानन्नपि संधाने इत्यतः प्राणकृच्छ्रे इति ॥ २० ॥ ततः ब्रह्मास्त्रात्सर्वतो दिशः प्रादुष्कृतं प्रकटीभूतं तेजः अभिप्रेक्ष्य ततः प्राणापदं वाभिप्रेक्ष्य ॥ २१ ॥ वक्तव्ये विज्ञाप्य विजयं प्राप्य संस्तौति ॥ कृष्णेति च तत्र भीः संसृतेर्दह्यमानानां तस्या अपवर्गः अपवर्जयिता असि नाशकः अस्तीति ॥ २२ ॥ यस्मादीश्वरः सा

यदाशरणमात्मानमैक्षत श्रांतवाजिनं ॥ अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः ॥ १९ ॥
अथोपस्पृश्य सलिलं संदधे तत्समाहितः ॥ अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते ॥ २० ॥
ततः प्रादुष्कृतं तेजः प्रचंडं सर्वतो दिशं ॥ प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥ २१ ॥ अर्जुन उवाच ॥ कृष्ण कृष्ण महाबाहो भक्तानामभयंकर ॥ त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः ॥ २२ ॥ त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः ॥ मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ स एव जीवलोकस्य मायामोहितचेतसः ॥ विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणम् ॥ २४

त्वात्प्रकृतेः परः प्रकृतेः परः पुरुषः ॥ तत्प्रकृतेः परः आद्यः पुराणः कारणं कारणत्वे एव विकारितामाह ॥ मायां व्युदस्य अभिभूय केवल्यरूपे आत्मन्येव स्थित इति ॥ २३ ॥ त्रिवर्गदातृत्वमेवेत्याह ॥ स इति ॥ यस्त्वं मायामभिभूय स्थितः स एव मायाभिभूतस्य जनस्य धर्मादिफलं उपासितः सन् ॥ विधत्से वीर्येण प्रभावेन ॥ २४ ॥

पुवः ॥ अथैकास्मिन् समये सजामिपरिमाजेयामिपतयस्तस्य सर्वंथोर्गोन्मागधमस्य ॥ आनन्तापिनरेति ।
प्रत्रिदेगरदस्त्रैव शास्त्रपाणिर्धन्नापहा ॥ देवदारवररस्त्रैवषडेनेसानन्नापिन इति सुरस्णान ॥ अथान
तापी शास्त्रपाणिः ॥ तेन वप्रवरेहत्त्वं लसते ॥ गोष्ठी वानयत्रषोप्रकेर्विशिखैवीरोरूपाहरेवस्य
मीपमानयामियतशिरः ॥ आक्रम्य प्रासनं विधायदर्पप्रजासती ॥ २९ ॥ वलावोरम्यादिविचराजसाः
भाषणानितैः ॥ सप्रत्नेनः प्रत्युतएवमित्रेसजमप्रयसदेशितः वद्धकवचः उग्रपत्रुः चापयुसकपि
देनमानधनेपसमसः उरोः प्रत्रेरथेन ॥ अन्नाद्रवत्तमनुधावत ॥ २७ ॥ आपतंतेप्रायावेतसह्रोणि:

तदाप्रुवलेपमजामिभद्रेयद्रुस सर्वंथोः शिरः आनन्तापितः ॥ गोष्ठीवप्रकेर्विशिखैरूपाहरे
त्वाक्रम्य यस्त्वासिदृप्यप्रजा ॥ २९ ॥ इतिप्रियांवल्गुविविधनस्यैः समांतयित्वाप्तुनमिचस
तः ॥ अन्नाद्रवदेशितउग्रधन्वाकपिध्वजोग्रहप्रत्रेरथेन ॥ ३० ॥ तमापतंतंसविलक्ष्यहरात्कु
मारहोदिप्रमनारथेन ॥ पराद्रवत्माणपरिस्फुरद्यौयावद्गमेरुद्रभयाद्ययार्कः ॥ ३१ ॥

कुमारहावालवातीउद्दिग्नमनाः कंपितहृदयः प्राणपरीप्सुः प्राणेणलब्धुमिच्छुः तनकीर्ति या
वद्गमेयावद्गतेशाकेतावद्गर्योपराद्रवत ॥ अपलायत ॥ कं वप्रास्मगोमसात्तसतोयप्रथतःसन
रुद्रस्य भयात्तयथापलायतेस्म अर्कः इति पादेवामनपुराणकथा सूचिता ॥ तथाहि विद्युन्माली
नामकश्चिद्दानवसोमाहेश्वरः तस्मैरुद्रेणसौवर्णं विमानंदत्तं ततोसावर्कस्य द्वेष्टो भाम्यविमा
नदीप्त्याराविविलोपितवान् ततोर्केण निजतेजोभिर्द्रावयित्वा तद्विमानंपातितं तत्क्रुद्धात्रि
नेरुद्रेभयादर्कः पराद्रवत ॥ ततोरुद्रस्यकुरहष्याद्दह्यमानः पतन्वाराणसांपतितः ॥ लोला

तत्र परीक्षितो जन्मनिरूपयिष्यन्नादौ मावक्रुर्भस्यपवाम्बत्यामोव स्मास्तात कलेन रक्षितस्त्रव
तेकं याग्रस्तोताति ॥ यदेत्यादिना ॥ यदा द्रौणिरश्वत्थामा कृष्णासुतानां द्रौपदीपुत्राणां शिरांस्युपा
हरत् ॥ तदा तन्माता अरुदत् तां च सांत्वयन् ॥ किरीटमाली अर्जुन आहेति तृतीयेनान्वयः ॥ किमिति
वा बालानां शिरांस्यानीतवान् ॥ इत्यपेक्षायामाह ॥ मृधे युद्धे ॥ यद्यपि पांडवा अपि कौरवा एव तथा
पि संजयवंशजो धृष्टद्युम्नः पांडवानां सेनापतिरिति संजयानामित्युक्तं वीरगतिं स्वर्गं प्राप्ते

यदा मृधे कौरवसृंजयानां वीरेष्वथो वीरगतिं गतेषु ॥ वृकोदराविद्धगदाभिमर्शभग्नोरु
दंडे धृतराष्ट्रपुत्रे ॥ २२ ॥ भर्तुः प्रियं द्रौणिरिति स्म पश्यन् कृष्णासुतानां स्वपतां शिरांसि
उपाहरद्विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयंति ॥ २४ ॥ माता शिशूनां निधनं सुतानां
निशम्य घोरं परितप्यमाना ॥ तदारुदद्बाष्पकलाकुलाक्षी तां सांत्वयन्नाह किरीटमाली ॥ २५ ॥

अनेनेतरे वृकोदरेण आविद्धाया क्षिप्ताया गदाया अभिमर्शेन घातेन भग्नावुरुदंडौ यस्य तस्मिन्
धृतराष्ट्रपुत्रे दुर्योधने सति ॥ २२ ॥ भर्तुर्दुर्योधनस्य स्यादिति वितर्कोऽयं इति ॥ एवं स्यादिति पश्यन्
तस्य तद्विप्रियमेवेति वाक्यार्थे तत्र विप्रियत्वे हेतुः ॥ जुगुप्सितमिति ॥ २४ ॥ घोरं दुःसहं यथा भव
ति तथा बाष्पस्य कलाभिर्बिंदुभिराकुले अक्षिणी यस्याः सा किरीटस्यैकत्वेपि तद्रत्नानां बहुत्वा
त् किरीटमालीत्युक्तं ॥ २५ ॥

संहितायाः प्रवर्त्यार्थं यस्यामनुकत्वं दर्शयति॥ यस्यां श्रूयमाणायामेव किं पुनः श्रुतायामित्यर्थः॥७॥ अनुक्रम्य शोधयित्वा॥८॥ कस्य वा हेतोर्बृहतीं विततां॥९॥ निर्ग्रन्थाः ग्रन्थेभ्यो निर्गताः तदुक्तं गीतासु॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति॥ तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेति॥ यद्वा॥ ग्रन्थिरेव ग्रन्थः निर्गतो हृदयग्रन्थिर्येषां इत्यर्थः॥ ननु मुक्तानां किं भक्त्या इत्यादि सर्वाक्षेपपरिहारार्थमाह॥ इत्थंभूतगुण इति॥१०॥ भक्तिं कुर्वन्तु नाम परं तच्छास्त्राभ्यासे शुकस्य किं कारणमित्यत आह॥ हरेरिति॥ आक्षि

यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे॥ भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा॥७॥ स संहितां भागवतीं कृत्वानुक्रम्य चात्मजं॥ शुकमध्यापयामास निवृत्तिनिरतं मुनिः॥८॥ शौनक उवाच॥ स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः॥ कस्य वा बृहतीमेतामात्मारामः समभ्यसत्॥९॥ सूत उवाच॥ आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे॥ कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः॥१०॥ हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः॥ अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः॥११॥ परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनं॥ संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयं॥१२॥

गात अधीतवान्॥ विष्णुजनाः प्रिया यस्येति व्याख्यानादिप्रसंगेन तत्संगतिः॥ क्ष मुरन्नि भावः॥११॥ ये तेन तत्र शुको महायोगीत्यादिना शुकस्याख्याने प्रवृत्तिः कथमिति यत्पृष्टं तस्योत्तरं वक्तुं यदन्यत्पृष्टं परीक्षितः प्रायोपवेशेन प्रवर्गाकथमिति तस्य जन्म महाश्चर्यमित्यादिना॥ तस्योत्तरं वक्तुमाह॥ परीक्षित इति॥ विलापनं मुक्तिं संस्थां वा संस्थां महाप्रस्थानं श्रीकृष्णस्य कथानामुदयो यस्यां भवति तया॥१२॥

अथ भागवतश्रोतृन्संस्तवत्कं परीक्षितः। सम्मवालकवृद्धेणोद्देशः सम्मस्यते॥१॥ तस्मिन्नारदस्याभिप्रेतं श्रु-
तवान्॥२॥ ब्रह्मनद्योब्रह्मदेवस्यापांब्राह्मणोरन्निताघोवा॥ सत्रंकर्मवर्द्धयतीति तथा॥३॥ बदरीषण्डखण्डे
नसम्हेतमण्डितो मनः प्रणिदध्योस्थिरीचकार॥ समाधिनावुस्करेतिनारदोपदिष्टध्यानेन कृतवानित्य
र्थः॥४॥ प्रणिहितेनिश्चलेत्रत्रहेतभक्तियोगेनामले॥ पूर्वं प्रथमंपुरुषमादिपुरुषमीश्वरमपश्य
त्सर्वांश्चितिवापाठः॥ तदपाश्रयांतदधीनांमायांचापश्यत्॥५॥ ईशामायाकृतोवजीवानांसं
सृतिमपश्यदित्याह॥ ययासंमोहितः स्वरूपावरणेनविमोहितः॥ परोपिगुणत्रयातीतोपितत्कृ
तंत्रिगुणात्वाभिमानकृतमनर्थंबकर्तृत्वभोक्तृत्वादिकंप्राप्नोति॥६॥ अनर्थोपशममपतियोपोन

शौनक उवाच॥ निर्गते नारदे सूत भगवान्बादरायणः॥ श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः॥
सूत उवाच॥ ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे॥ शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्द्धनः॥
२ तस्मिन्स्व आश्रमे व्यासो बदरीषण्डमण्डिते॥ आसीनोप उपस्पृश्य प्रणिदध्यौ मनः स्वयं॥३॥ भक्तियो
गेन मनसि सम्यक्प्रणिहितेमले॥ अपश्यत्पुरुषं पूर्णं मायां च तदपाश्रयां॥४॥ यया संमोहितो
जीव आत्मानं त्रिगुणात्मकं॥ परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते॥५॥ अनर्थोपशमं साक्षाद्भक्ति
(योगमधोक्षजे॥ लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां॥ ६
तेसाक्षाद्भक्तियोगमलंवापश्यत्॥ एतत्स
र्वंस्वयंदृष्ट्वापवमजानतोलोकस्यार्थं सात्वतसंहितां श्रीभागवताख्यां चक्रे॥ तदनेनश्लोकत्रयेण
भागवतार्थः संक्षेपतोदर्शितः॥ एतदुक्तं भवति॥ विद्याशक्त्यामायायानियंतानित्याविर्भूतपरमा
नंदस्वरूपः॥ सर्वज्ञः सर्वशक्तिरीश्वरः॥ तन्माययासंमोहितस्तिरोभूतस्वरूपस्तद्विपरीतधर्मा
वलस्यचेश्वरस्यभक्त्यालब्धज्ञानेनमोक्ष इति॥ तदुक्तं॥ स्वामिनाहूर्विद्यासंविदाश्लिष्टः॥ सच्चिदानं
दईश्वरः स्वाविद्यासंवृतोजीवः संक्लेशनिकराकरः॥ तथा सईशोयद्वशोमायासजीवोयस्तयार्दितः॥

कृतस्त्वर्हि द्रष्टासि ॥ तत्राह ॥ सकृद्दर्शितमप्येतिद्यदेतत्कामाय मय्यनुरागाय ॥ तत्कामेन किमित्यत आह ॥ मत्कामः ॥ पुमान्हृच्छयान् कामान् ॥ २२ ॥ अदीर्घयापि सतां सेवया यावद्यदिवं लोके देहः ॥ मज्जनतां मत्पार्षदत्वं गंतासि ॥ २३ ॥ प्रजानां सर्गे संहारेऽपि निरोधे संहारेऽपि प्रजासर्गस्मृतिरोधं इति वा ॥ २४ ॥ तन्महद्भूतं ॥ अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिश्रुतेः ॥ कीदृशं ईश्वरं सर्वनियंतारं नभसि लिंगं यस्य तिर्यं सतत्वभोलिंगं ॥ सन्निहितमपि न लिंग्यते इति अलिंगं ॥ तस्मै अहं शीर्ष्णा अवना

सकृद्यद्दर्शितं रूपमेतत्कामाय तेऽनघ ॥ मत्कामः शनकैः साधुः सर्वान्मुंचति हृच्छयान् ॥ २२ ॥ सत्सेवयादीर्घयापि जाता मयि दृढा मतिः ॥ हित्वावद्यमिमं लोकं गंता मज्जनतामसि ॥ २३ ॥ मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित् ॥ प्रजासर्गनिरोधेऽपि स्मृतिश्च मदनुग्रहात् ॥ २४ ॥ एतावदुक्त्वोपरराम तन्महद्भूतं नभोलिंगमलिंगमीश्वरं ॥ अहं च तस्मै महतां महीयसे शीर्ष्णावनामं विदधेऽनुकंपितः ॥ २५ ॥ नामान्यनंतस्य हतत्रपः पठन् गुह्यानि भद्राणि कृतानि च स्मरन् ॥ गां पर्यटंस्तुष्टमना गतस्पृहः कालं प्रतीक्षन् विमदो विमत्सरः ॥ २६ ॥ एवं कृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः ॥ कालः प्रादुरभूत्काले तडित्सौदामिनी यथा ॥ २७ ॥ ॥

मं प्रणामं विदधे कृतवानहं ॥ तेनानुकंपितः सन् ॥ २५ ॥ हतत्रपः त्यक्तलज्जः विमत्सरो जातोऽस्मीति शेषः ॥ २६ ॥ काले स्वावसरे कालो मृत्युः प्रादुरभूत् आविर्बभूव अकस्मात्प्रादुर्भावे दृष्टांतः ॥ विद्युद्दिवेति ॥ सौदामिनीति विशेषणं स्फुरत्वप्रदर्शनार्थं ॥ सुदामा माला तद्भवा सौदामिनी ॥ मालाकारेत्यर्थः ॥ यद्वा सुदामा पर्वतः ॥ तेनैकदिग्गितिस्त्रेण स्फटिकादिमयपर्वतप्रांतभवा विद्युदिति स्फुटा भवति तद्वदित्यर्थः ॥ यद्वा तडिदिति स्वेतिकरणार्थः ॥ तडित्संनिकर्षवत् यो विततिनिरू

घोरं दुःसहं प्रतिभयाकारं भयंकररूपं ॥ बालादीनां अतिरेकी नाशस्थानं ॥ परिश्रान्तानीन्द्रियाणि श्रा-
माद् देहश्च पश्चात्तथा परीतो व्याप्तः ॥ २० ॥ उपस्पृष्टः आचान्तः ॥ २० ॥ पिप्पलोपस्थे अश्वत्थमूले आश्रितः उ-
पविष्टः आत्मनात्मा आत्मस्थं हृदिस्थं आत्मानं परमात्मानं ॥ २१ ॥ भावेन भक्त्या निर्जितं वशीकृतं पश्य-
तस्तेनउत्कंठेन अश्रुकलापूर्णकेः विशीर्णस्य ॥ २१ ॥ प्रेम्णोतिभरेण निर्भिन्नपुलकाङ्गगात्रिपस्य

घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरं ॥ परिश्रान्तेन्द्रियात्माहं तृट्परीतो बुभुक्षितः ॥ २० ॥ स्ना-
त्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥ २० ॥ तस्मिन्निर्मनुजेरण्ये पिप्पलोपस्थ आश्रितः ॥ आत्म-
नात्मानमात्मस्थं यथाश्रुतमचिन्तयन् ॥ २१ ॥ ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा ॥ औत्क-
ण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥ २१ ॥ प्रेमातिभरनिर्भिन्नपुलकाङ्गोतिनिर्वृतः ॥ आन-
न्दसंप्लवे लीनो नापश्यमुभयं मुने ॥ २२ ॥ रूपं भगवतो यत्तन्मनःकान्तं शुचापहं ॥ अपश्यन्स-
हसोत्तस्थे वैक्लव्याद्दुर्मना इव ॥ २३ ॥ दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि ॥ वीक्षमाणोपि ना-
पश्यमवितृप्तो यथातुरः ॥ २४ ॥ एवं यतन्तं विजने मामाहागोचरो गिराम् ॥ गम्भीरश्लक्ष्णया वा-
चा शुचः प्रशमयन्निव ॥ २५ ॥ हन्तास्मिन्जन्मनि भवान्न मां द्रष्टुमिहार्हति ॥ अविपक्वकषाया-
(णां दुर्दर्शोहं कुयोगिनां ॥ २२ ॥

आनंदानां संप्लवे महाह्रदे परमानंदे ॥ उभयं आत्मानं परं च ॥ २२ ॥
मनसः कान्तं अभीष्टं ॥ शुचः शोकान् अपहन्तीति तथा ॥ तद् दृष्ट्वा उत्थितोस्मि ॥ २३ ॥ हृदि मनः प्रणिधाय
स्थिरीकृत्य अवितृप्तोहं आतुर इव ॥ अभवमिति शेषः ॥ २४ ॥ गिरामगोचरः संवेदनस्याविषयभूत
ईश्वरः ॥ २५ ॥ हन्तेति सानुकम्पसंबोधने मा इति मां द्रष्टुं नार्हसि ॥ यतः ॥ न विपक्वा दग्धाः कषाया म-
लाः कामादयो येषां कुयोगिनां अनिष्पन्नयोगानां ॥ २२ ॥

भा॰ प्र॰ टी॰ २५

स्फीतान्जनपदादीनतियातःसन्महद्विपिनमद्राक्षमितिचतुर्थेनान्वयः॥जनपदादिषुतानाश्र
णदोषयुक्तेषुसमदृष्टिः॥सन्नुगतोऽहमितितात्पर्यार्थः॥स्फीतान्समृद्धान्जनपदान्देशान्तत्रत
स्मादिपिपुरग्रामव्रजाकरान्तत्रपुराणिराजधान्यः॥ग्रामाःमनुष्यप्रोक्ताःविप्राश्चविप्रस्मात्सुप
रचैवचसंतिते॥सत्युग्रामइतिप्रोक्तः॥शूद्राणांवासएवचेति॥व्रजागोकुलानि॥आकराःरत्नाद्युत्प
त्तिस्थानानितान्॥खेटाःकर्षकग्रामाःखर्वटाःगिरितटग्रामाःमनुप्रोक्तावा॥एकतोयत्रतुग्रा
मोनगरंचैकतःस्थितं॥मिश्रंतत्खर्वटंनामनदीगिरिसमाश्रयमिति॥वाट्यःपुष्पवाटिकाः

स्फीताञ्जनपदांस्तत्रपुरग्रामव्रजाकरान्॥खेटखर्वटवाटीश्चवनान्युपवनानिच॥११॥
चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान्॥जलाशयाञ्छिवजलान्नलिनीःसुरसेवि
ताः॥१२॥चित्रस्वनैःपत्ररथैर्विभ्रमद्भ्रमरश्रियः॥नलवेणुशरस्तंबकुशकीचकग
ह्वरं॥एकएवातियातोऽहमद्राक्षंविपिनंमहत्॥१२॥

ता॥वनानिस्वतःसिद्धवृक्षाणांसमूहाःउपवनानिरोपितवृक्षाणां॥नानिच॥११॥चित्रैर्धातु
भिःस्वर्णरजतादिभिर्विचित्रानद्रीन्॥इभैर्भग्नाःभुजाःशाखायेषांतान्द्रुमान्॥शिवजलान्॥शिवानिम
ङ्गलानिजलानियेषांतान्॥नलिनीःसरसीः॥१२॥चित्राःस्वनाःयेषांतैः॥पत्ररथैःपक्षिभिः॥न
दद्भिरुद्देशितप्रदेशैः॥विभ्रमद्भिर्भ्रमरैःश्रीःशोभायासांतानलिनीः॥अतियातः॥अतिक्रम्यगतः
सन्महद्विपिनंवनमद्राक्षं॥कीदृशं॥नलवेणुशराणांस्तंबैःकुशैःकीचकैश्चगह्वरंदुर्गमं॥तत्र
वेणवःतानयएवविपुलान्तरालगर्भाःकीचकाः॥१२॥

२५

नवतावत्कं चित्कालं चैवमास्ते हं यं त्रितो मवसमित्याह त्रिभिः ॥ एकमेवाहमात्मजो यस्याः सा ९
योषितं मृते ति च स्नेहानुबंधे हे नं ९ ॥ किंकरी तस्याश्च प्रपंचयति अस्तं तत्र सा सा ऽपि तेनकल्या
न समयेऽप्यासीत् ॥ दारुमयी योषिति पारवश्यहृष्टे न ॥ तदेवं सा स्नेहं चक्रे ॥ १ ॥ अहं च दिगादि
विवर्जितः ॥ अतस्त्वेवमवसमित्याह ॥ अहं च तस्मिन्नस्य कुले तस्याः मातुः स्नेहानुबंधस्यावेदया

एकात्मजा मे जननी योषिन्मृता च किंकरी ॥ मय्यात्मजे न मगतौ चक्रे स्नेहानुबंधनं ॥ ९
सा मृतं ते या न कल्यासीद्यो गहे मं ममे कृती ॥ ईदृशस्य हि वषो लोको योषा दारुमयी यथा
॥ अहं च तत्कुलेऽस्य षिवानस्त दवेत्तया ॥ दिग्देशकालाद्युत्पन्नो बालकः पंचहायनः ॥
एकदा निर्गतो गेहाद्दुहंतीं निःसिरोगो पथि ॥ सर्पोऽदष्ट पादास्पृष्टः क्षणेनाकालचोदितः
॥ तदातदेहमीषा स्मभक्तानां ग्रामभीस्पतः ॥ अनुग्रहं मम मानः प्रातिष्ठं दिग्भ्रमात्तदा ॥ ९

कदाचिद्रमे दिनिपती ते स्पर्शः ॥ कुषिवानवासं कृतवान्पंचहायनः पंचवर्षः ॥ ७ ॥ गेहान्निर्ग
तोगो दुहंती हेतो ग्रामस्य पथः ॥ दोग्धुं निर्गता मित्यर्थः ॥ यदा पादेना स्पृष्टः ईषदाक्रांतः अद
ष्टात् ॥ ४ ॥ तस्मात्तमेरणं शंकस्यागां अभीसितं ॥ ईदृशस्यानुग्रहं ममस्य मानः ॥ प्रातिष्ठं प्रस्थिता ॥

भा
प्र टी
२०

किमितिपर्यटसीत्यत्राह तथा लोकमंगलार्थमित्याह चतुर्भिः ॥ देवेनेश्वरेण दत्तां स्वराः ॥ निषादर्षभगान्धारषड्जमध्यमधैवतपंचमा इति सप्त इति सप्त एव ब्रह्म तस्याभिव्यंजकत्वात् ॥ तेन विभूषिता स्वतः सिद्धस्वरान्वितामित्यर्थः ॥ मूर्च्छयित्वा मूर्च्छनालापवतीं कृत्वा ॥३२॥ स्वप्रयोजनमाह ॥ प्रगायत इति ॥३३॥ परप्रयोजनमाह ॥ एतद्धीति ॥ मात्रा विषयास्तेषां स्पर्शा भोगाः तेषामिच्छया आतुराणि चित्तानि येषां तेषां हरिचर्यानुवर्णनमेतत् ॥ एतदेव भवसिंधोः प्लवः पोतः न केवलं श्रुतिमात्रापे

देवदत्तामिमां वीणां स्वरब्रह्मविभूषितां ॥ मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहं ॥३२॥
प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः ॥ आहूत इव मे शीघ्रं दर्शनं याति चेतसि ॥३३॥
एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः ॥ भवसिंधुप्लवो दृष्टो हरिचर्यानुवर्णनं ॥३४॥
यमादिभिर्योगपथैः कामलोभहतो मुहुः ॥ मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति ॥३५॥
सर्वं तदिदमाख्यातं यत्पृष्टोहं त्वयानघ ॥ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं ॥३६॥
सूत उवाच ॥ एवं संभाष्य भगवान्नारदो वासवीसुतं ॥ आमंत्र्य वीणां रणयन्ययौ यादृच्छिको मुनिः ॥३७॥ अहो देवर्षिर्धन्योयं यत्कीर्तिं शार्ङ्गधन्वनः ॥ गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं जगत् ॥३८॥ इति श्रीभागवते प्रथमे षष्ठः ६ ॥

नकिंतु न व्यतिरेकाभावो दृष्ट एवेत्यर्थः ॥३४॥ तदेवेत्युक्तं प्रवधारणमनुभवेन द्रढयति ॥३५॥ यमादिभिस्तु यथा न शाम्यति यद्वन्मुकुंदसेवा-यात्मा साक्षादात्मा मनः शाम्यति ॥ कथंचिन्मुकुंदसेवामात्रेण शाम्यति ॥ किं पुनस्तद्गुणवर्णने-नेति भावः ॥३५॥ भवतो मनः पवित्रोपकं व्याख्यातं ॥३६॥ आमंत्र्य अनुज्ञाप्य यादृच्छिकः स्वप्रयोजनस-कलस्पृहः ॥३७॥ हरिकथागायकमात्मं श्लाघते ॥ अहो इति मायन् तत्प्यन् तंत्र्या वीणया ॥३८॥ इति

२२

प्रयुज्यमानेमयितामिति ॥ अयमर्थः हित्वावद्यमिमंलोकंगंतामज्जनतामसीतियाभागवतीभगवत्पा
र्षदरूपाशुद्धासत्वमयीतनुः ॥ प्रतिश्रुतातांप्रतिभगवतामयिप्रयुज्यमानेनीयमानेआरब्धंयत्कर्म
तन्निर्वाणंसमाप्तिर्यस्यआरब्धकर्मणोनिर्वाणमेवनिर्माणंयस्येतिवा ॥ सःपंचभूतात्मकोदेहोन्यप
तत् ॥ अनेनपार्षदतनूनामकर्मारब्धत्वंशुद्धत्वंनित्यत्वमित्यादिसूचितंभवति ॥ २८ ॥ इदंत्रैलोक्यमादा
यसंहृत्यउदन्वतः ॥ एकार्णवस्यांभसिशयानेनारायणेशिशयिषोः ॥ शयनंकर्तुमिच्छोर्विभोर्ब्रह्म
णः ॥ अंतःमध्येअनुप्राणंतिः ॥ श्वासेनसहविविशेप्रविष्टोहं ॥ ततोवर्तीत्थंविस्मान्नादेहमाविश्य

प्रयुज्यमानेमयितांशुद्धांभागवतींतनुं ॥ आरब्धकर्मनिर्वाणोन्यपतत्पांचभौतिकः ॥ २८ ॥ क
ल्पांतइदमादायशयानेंभस्युदन्वतः ॥ शिशयिषोरनुप्राणंविविशेंतरहंविभोः ॥ २९ ॥ स
हस्रयुगपर्यंतेउत्थायेदंसिसृक्षतः ॥ मरीचिमिश्राऋषयःप्राणेभ्योहंचजज्ञिरे ॥ ३० ॥ अंतर्ब
हिश्चलोकांस्त्रीन्पर्येम्यस्कंदितव्रतः ॥ अनुग्रहान्महाविष्णोरविघातगतिःक्वचित् ॥ ३१ ॥

वक्रिणः ॥ अवापवैसवैनिद्रामेकीभूयाथविस्तनेतिकूर्मोक्तेःस्वापनेंभसिशयतिपाठे ॥ स्वापने
तस्मिन्नयनेंभसिशिशयिषोर्ब्रह्मणइतिश्रीनारायणेनाभेदविवक्षयोक्तमितिमंतव्यं ॥ २
९ ॥ प्राणेभ्यः इंद्रियेभ्यः ॥ अहंमरीचिमिश्राः ॥ तन्मध्येऋषयश्चजज्ञिरे ॥ ३० ॥ येकर्मिणस्तेवहिर्गे
यातिलपश्वादिभिर्ब्रह्मलोकंगताः ॥ अंतर्नेयाति ॥ अहंतुमहाविष्णोरनुग्रहात् ॥ अखंडितब्रह्म
चर्यव्रतः ॥ सर्वेषामंतर्बहिश्चपर्येमिपर्यटामिक्वचिदपिअविघातानास्तिप्रतिघ्नःसयः ॥ ३१ ॥

अज्ञायबोध्यतोप्रपंचयन्नाह ॥ स वा इति द्वाभ्यां ॥ सर्वगुह्यज्ञाने हेतुः यद्यस्मात्पुराणः पुरुषः उपासि
तस्त्वया कथंभूतः ॥ परावरेशः कार्यकारणनियंता मनसैव संकल्पमात्रेण गुणैः कृत्वा विश्वं सृज
तीत्यादि ॥६॥ किंच ॥ त्वं त्रिलोकीं पर्यटन् ॥ अर्क इव सर्वदर्शी योगबलेन च प्राणवायुरिव सर्वप्राणि
नामंतश्चरः सन् आत्मसाक्षी बुद्धिवृत्तिज्ञः ॥ अतः परे ब्रह्मणि धर्मतः योगेन निष्णातस्य ॥ तदुक्तं या
ज्ञवल्क्येन ॥ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां अयं तु परमो धर्मो यद्योगेनात्मदर्शनमि

स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः ॥ परावरेशो मनसैव विश्वं सृज
त्यवत्यत्ति गुणैरसंगः ॥६॥ त्वं पर्यटन्नर्क इव त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी ॥
परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व ॥७॥ नारद उवाच ॥ भवता
नुदितप्रायं यशो भगवतोऽमलं ॥ येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलं ॥८॥ यथा
धर्मादयश्चार्थाः मुनिवर्यानुकीर्तिताः ॥ न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥९॥

ति ॥ अपरे ब्रह्मणि वेदाख्ये व्रतैः स्वाध्यायनियमैः ॥ निष्णातस्य मे अलं अत्यर्थं यन्न्यूनं तद्विचक्ष्व
वितर्कय ॥७॥ अनुदितप्रायं अनुक्तप्रायं भगवद्यशो विमलं विना येन वै धर्मादिज्ञानेनासौ
भगवान्न तुष्येत तदेव दर्शनं ज्ञानं खिलं न्यूनं मन्ये ॥८॥ ननु भगवद्यशः प्रपंचितं तत्र तत्रानुवर्णि
तं ॥ नेत्याह ॥ यथेति ॥ च शब्दाद्धर्मादिसाधनानि च न तथा धर्मादिवत्प्राधान्येन वासुदेवमहि
मा नोक्तः स्पष्टः ॥९॥

पंचमेसर्वधर्मेभ्योहरिकीर्तनगौरवं॥ व्याससचित्तप्रसादायनारदेनोपदिश्यते॥१॥ उपसमीपे
आसीनंविप्रर्षिंबृहच्छ्रवामहायशाः स्मयन्॥ ईषद्धसन्निवेत्यनेनसुखप्रश्नतिर्द्योत्यते॥ यद्वा॥ र
वेश्मनधिकाराध्येत्रहोमहान्तविमुह्यतीतिस्मयमानः॥१॥ शारीरः शरीराभिमानीआत्माआत्मना
तेनशरीरेणकच्चित्किंपरितुष्यति॥ मानसआत्मामनोभिमानीतेनमनसातिकच्चित्तोवेति॥२॥
जिज्ञासितंज्ञातमिष्टयमादिपनन्तस्त्वंसुसंपन्नंसम्यक्ज्ञातंअपियाहाद्दनुष्ठितंचेत्यर्थः॥ अधीति

सूतउवाच॥ अथतंसुखमासीनउपासीनंबृहच्छ्रवाः॥ देवर्षिःप्राहविप्रर्षिंवीणापाणिः
स्मयन्निव॥१॥ नारदउवाच॥ पाराशर्यमहाभागभवतःकच्चिदात्मना॥ परितुष्यतिशा
रीरआत्मामानसएववा॥२॥ जिज्ञासितंसुसंपन्नमपितेमहदद्भुतं॥ कृतवान्भारतंयस्त्वं
सर्वार्थपरिबृंहितं॥३॥ जिज्ञासितमधीतंचब्रह्मयत्तत्सनातनं॥ तथापिशोचस्यात्मान
मकृतार्थइवप्रभो॥४॥ व्यासउवाच॥ अस्त्येवमेसर्वमिदंत्वयोक्तंतथापिनात्मापरितु
ष्यतेमे॥ तन्मूलमव्यक्तमगाधबोधंपृच्छामहेत्वात्मभवात्मभूतं ५

पादेसंबोधनंसुसंपन्नत्वेहे
तुः महदद्भुतमित्यादि॥ सर्वैरर्थैःधर्मादिभिःपरिबृंहितंपरिपूर्णं॥३॥ किंच॥ यत्सनातनंनित्यंपरं
ब्रह्मतत्त्वंत्वयाजिज्ञासितंविचारितं॥ अधीतंप्राप्तंतेषामंचेत्यर्थः तथापिशोचसितत्किमर्थं
मितिशेषः॥४॥ आत्माशारीरोमानसश्चतन्मूलंतस्यापरितोषस्यकारणंअव्यक्तंअस्फुटं॥ हे
नारदत्वांपृच्छामआत्मभवोब्रह्मातस्यात्मनोदेहाद्भूतः॥ तेअगाधबोधअगाधोनिगमोभीतोबोधोय

वासुदेवव्यतिरिक्तान्यविषयत्वान्नवदेवान्यविषयं वाक्यं चातुर्ये चाखिलमेवेत्याह॥ नेति॥ विचित्र
पदमपि यद्वचो हरेर्यशो न प्रगृणीत न तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानं उशंति म
न्यते॥ कुतः मानसाः सत्त्वप्रधाना मनस्विनस्ते मानाहंसा यतस्ते॥ यत्र न निरमंति कर्हिचिदपि नितरा
न रमंते॥ उशिक्क्षयाः उशिक्कमनीयं ब्रह्म तत्रैव क्षयो निवासो येषां ते॥ यद्वा प्रसिद्धा हंसा मानससरसि
चरंतः कमनीयपद्मखंडेरनिवासाः॥ स्रक्विचित्रान्नादियुक्तेप्युच्छिष्टगर्ते काकक्रीडास्थाने न निर

न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित्॥ तद्वा
यसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्युशिक्क्षयाः॥१०॥ तद्वा
ग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि॥ नामा
न्यनंतस्य यशोंकितानि यत्शृण्वंति गायंति गृणंति साधवः॥११

मंतीति शेषः॥१०॥ विनापि पदचातुर्यं भगवद्यशः प्रधानं वचः पवित्रमित्याह॥ तद्वाग्विसर्गः
स चासौ वाग्विसर्गो वाचां प्रयोगः जनानां समूहो जनता तस्य अघं विप्लावयति नाशयती
ति॥ तथा यस्मिन्वाग्विसर्गे अबद्धवत्यपि अपशब्दादियुक्तेपि प्रतिश्लोकं अनंतस्य यशोंकि
तानि नामानि भवंति॥ तत्र हेतुः॥ यत् यानि नामानि साधवो महांतः वक्तरि सति शृण्वंति श्रो
तरि सति गृणंति अन्यदा तु स्वयमेव गायंति कीर्तयंतीति॥११॥

भक्तिहीनेन कर्मबंधनमेवेति किं पुनस्तन्न्यायेन दर्शयति ॥ नैष्कर्म्यमिति ॥ नैष्कर्म्यं निष्कर्म ब्रह्म तदेका-
कारत्वान्निष्कर्मता रूपं नैष्कर्म्यं ॥ अज्यतेऽनेनेत्यंजनमुपाधिस्तन्निवर्तकं निरंजनं एवंभूतमपि
ज्ञानं अच्युते भावो भक्तिस्तद्वर्जितं चेत् ॥ अलमत्यर्थं न शोभते सम्यगपरोक्षाय न कल्पत इत्यर्थः
तदा शश्वत्साधनकाले च फलकाले च अभद्रं दुःखरूपं यत्काम्यं कर्म यदप्यकारणमकाम्यं त-
च्चेति चकारस्यान्वयः तदपि कर्म ईश्वरेनार्पितं चेत् ॥ कुतः पुनः शोभते ॥ बहिर्मुखत्वेन सत्वशो-

नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनम् ॥ कु-
तः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यकारणम् ॥ १२ ॥
अथो महाभाग भवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः ॥
उरुक्रमस्याखिलबंधमुक्तये समाधिनानुस्मर तद्विचेष्टितम् ॥ १३ ॥

धकत्वात् ॥ १२ ॥ तदेवं भक्तिशून्यानि ज्ञानवाक्चातुर्यकर्मकौशलानि व्यर्थान्येव यतः अतो ह-
रेः कीर्तिमेवानुवर्णयेत्याह ॥ अथो अतः कारणात् ॥ अमोघापार्यार्था दृक् धीर्यस्य शुचिशुद्धं श्र-
वो यस्य सत्ये रतः ॥ धृतानि व्रतानि येन स भवानेवं महागुणस्तावत् ॥ अत उरुक्रमस्य विविधं वि-
चेष्टितं लीलां समाधिना चित्तैकाग्र्येण अखिलबंधमुक्तये त्वमनुस्मर स्मृत्वा वर्णयेत्यर्थः ॥
एतच्च वाक्यांतरमिति मध्यमपुरुषप्रयोगो नानुपपन्नः ॥ १३ ॥

विपर्यये दोषान्तरमाह ॥ ननु उत्क्रमविच्छेदितस्य शुक्लहयाः ॥ अत एवान्यथा प्रकारेणानेनायत्किंचि

दर्थान्तरं विवदन्तस्तथाविवत्तयाकृतैः स्फुरितैः हृयैर्नामभिश्च वक्ष्यत्वेनोपस्थितैः ॥ इः स्थिता

नवस्थिता सतीमतिः ॥ कदाचित्क्वापि विषये ॥ आस्पदं स्थानं न लभेत न वा तेन हता आवृर्णि

तानेवि ॥ तदुक्तं गीतासु ॥ व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ॥ बहुशाखा ह्यनन्ताश्च बुद्

योव्यवसायिनाम् ॥ इत्यादि ॥ तदेवं द्विविधोविनाभावत्वादिकृतं धर्मादिवर्णनमकिंचित्करमि

त्युक्ते ॥ २४ ॥ प्रस्तुतविरुद्धमेवज्ञानमित्याह ॥ तत्र स्थिते नित्यं काम्यकर्मादिस्वभावतयव्य

क्तस्यतत्वरागिणः ॥ पुरुषस्य धर्मकृते धर्मार्थ अनुशासनस्तवमहानयं व्यतिक्रमः ॥ अन्या

ततोन्यथा किंचन यद्विवक्षितः पृथक्कृत्य शास्त्रकृतनुपतामभिः ॥ न कुत्र चित्क्वापि चतु

स्थितामविलंभेत वातात्कृतनोरिवास्पदं ॥ २४ ॥ तत्र स्थिते धर्मकृतेः अनुशासनं स्वभाव

रक्तस्य महान्व्यतिक्रमः ॥ यद्वा कर्तो धर्मः इतिनरः स्थितोनमन्यते तस्य निवारणं जनं

यः कुतरत्यतस्याह ॥ यस्य वा कर्तो यमेव शुक्लो धर्म इति स्थितः इतरः प्राकृतो जनः ॥ तत्

स्य काम्यकर्मादेः ॥ अन्येनतत्वज्ञेन क्रियमाणं निवारणं स्वयमेव वा क्रियमाणं यद्वानकृ

मेणानप्रजयानयनेन त्यागेनैकेनऋमतत्वमानश्च विन्यादिकृत्याक्रियमाणं निवारणं

यथार्थमेनदितिनमन्यते ॥ किं तर्हि तन्निमार्गोनयिकृत विपर्यं तदितिकल्पयति ॥ तदुक्तं

मतान्तरोपन्यासे भट्टैः ॥ तत्रैवं शंकातेवत्तं येन्ये परवादयो नवाः ॥ गरहस्यत्वन प्राकृतनिक

तेतेषामयंविधिः इति नैष्ठिक ब्रह्मचर्यं वा परिव्राजकता पिवानेरवश्यं गृहीतव्याने

नादावेनतु व्यनइत्यादि ॥ २५ ॥ ॥

ननुयद्येवंप्रवृत्तिमार्गोनिंद्यतेतर्हिनिवृत्तिमार्गेणसर्वक्रियात्यागेनैवपरमेश्वरस्वरूपा॰
नुभवःकिंनतद्यथाःकथनेनापि॥नेत्याह॥विचक्षणइतिनिपुणः॥कश्चिदेवनिवृत्तितःसर्वक्रिया
निवृत्त्याअस्यविभोःसुखंनिर्विकल्पकसुखात्मकंस्वरूपंवेदितुंज्ञातुमर्हतिनपुनरविचक्षणः
प्रवृत्तिस्वभावःविधुत्वेहेतुः॥अनंतःकालतःपारंचदेशतोयतस्यविभोःचेष्टितंततःकारुण्यात्
हेविभोअनात्मनोदेहाद्यभिमानिनअतएवगुणैःसत्वादिभिःप्रवर्तमानस्यजनस्यदर्शयभवा
नितित्वमित्यर्थः॥पाठांतरेहेभवद्भिरितिसंबोधनं॥१६॥एवंतावत्काम्यधर्मादेरनर्थहेतुत्वात्तंवि
हायहरेर्लीलैववर्णनीयेत्युक्तं॥इदानींतुनित्यनैमित्तिकस्वकर्मनिष्ठामप्यनादृत्यकेव

विचक्षणोस्यार्हतिवेदितुंविभोरनंतपारस्यनिवृत्तितःसुखं
प्रवर्तमानस्यगुणैरनात्मनस्ततोभवान्दर्शयचेष्टितंविभोः॥१६
त्यक्त्वास्वधर्मंचरणांबुजंहरेर्भजन्नपक्वोथपतेत्ततोयदि॥यत्र
क्ववाभद्रमभूदमुष्यकिंकोवार्थआप्तोभजतांस्वधर्मतः॥१७॥

लंहरिभक्तिरेवोपदेष्टव्येत्याशयेनाह॥त्यक्त्वेति॥ननुस्वधर्मत्यागेनभजन्भक्तिपरिपाकेन॰
यदिकृतार्थोभवेत्तत्तदानकाचिच्चिंतायदितुनरपक्वएवम्रियेततततोभ्रंशेपिहानस्तदास्वधर्मत्या
गनिमित्तोनर्थःस्यादित्याशंक्याह॥ततोभजनात्कथंचित्पतेत्भ्रश्येत्म्रियेतवायदितदापि
भक्तिरसिकस्यकर्मानधिकारान्नानर्थशंकाअंगीकृत्याह॥वाशब्दोकटाक्षे॥यत्रक्ववानीच
योनावपिअमुष्यभक्तिरसिकस्यअभद्रमभूत्किंनाभूदेवेत्यर्थः॥भक्तिवासनासद्भावादिति
भावः॥अभजद्भिस्तुकेवलंस्वधर्मतःकोवाअर्थः॥आप्तःप्राप्तःअभजतामितिनिर्धारणेषष्ठीसर्वेषमाव

ननुस्वधर्मस्याचारादपिकर्मणापितृलोकइतिश्रुतेः॥ पितृलोकप्राप्तिफलमस्त्येवतत्राह॥ तस्यै
वहेतोस्तदर्थंप्रयतेतकुर्वीत॥ यद्वस्तुपरिभ्रमतांपर्यटतांऊर्ध्वंस्थावरपर्यन्तंचभ्रमद्भिर्जीवैर्नलभ्य
ते॥ यच्चोक्तंपूर्ववत्॥ तत्रविषयसुखंअन्यतएवप्राचीनकर्मणासर्वत्रनरकादावपिलभ्यते
दुःखंयथा॥ दुःखंप्रयत्नंविनापिलभ्यतेनह्युक्तं॥ तदुक्तं॥ अप्रार्थितानिदुःखानियथैवा
यान्तिदेहिनां॥ सुखानिचतथामन्येदैन्यमत्रातिरिच्यतेइति॥ १८॥ यदुक्तंयद्यपक्वोवाभद्रमभू

तस्यैवहेतोःप्रयतेतकोविदोनलभ्यतेयद्भ्रमतामुपर्यधः॥ तल्लभ्यतेदुःखवदन्यतःसुखं
कालेनसर्वत्रगभीररंहसा॥ १८॥ नवैजनोजातुकथंचनाव्रजेन्मुकुंदसेव्यन्यवदं
गसंसृतिंस्मरन्मुकुंदांघ्र्युपगूहनंपुनर्विहातुमिच्छेन्नरसग्रहोयतः॥ १९॥

दिति॥ तदुपपादयति॥ नवाइति॥ मुकुंदसेवीजनः॥ जातुकदाचित्॥ कथंचनकुयोनिगतोपिसं
सृतिंनाव्रजेत्तद्विशेषेण॥ अंगहेव्यासअन्यवत्॥ केवलकर्मनिष्ठवदितिवैधर्म्यदृष्टांतः कुतइ
त्यतआह॥ मुकुंदांघ्र्युपगूहनंआलिंगनंपुनःस्मरन्विहातुंनेच्छेत्॥ यतोऽयंजनोरसग्रहः
रसेनरसनीयेनग्रहःस्वतएवस्वीक्रियते॥ यद्वा॥ रसनीयेअर्थेआग्रहोयस्य॥ यदुक्तंभगवता
पतनेचततोभयः॥ नमेहिसिद्धोकुरुनंदन॥ पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोपिसइति॥ १९॥

तदेवं भगवल्लीलाश्रवणाभावेनानुवर्णयेत्युक्तं ॥ तत्र को भगवान् का च तस्य लीला इत्यपेक्षायामाह ॥ इ-
दं विश्वं भगवानिवेतरः तस्मादिदं विश्वमादितरः ॥ ईश्वरात्प्रपंचो न पृथक् ईश्वरस्तु प्रपंचात्पृथगित्यर्थः
तत्र हेतुः ॥ यतो भगवतो हेतोर्जगतः ॥ स्थित्यादयो भवंति ॥ अनेनैव लीलाप्यपि दर्शिता ॥ यद्वा ॥ इदं
विश्वं भगवानितरस्तद्वद्यः स ॥ जीवोपि भगवान् चेतनाचेतनप्रपंचवस्तुव्यतिरेकेण नास्ति स एवैकत-
त्वमित्यर्थः ॥ हिशब्देन सर्वं खल्विदं ब्रह्मेत्यादिप्रमाणं सूचितं ॥ तदिदं स्वयमेव भगवान् वेद प्रादेशमा-
त्रं एकदेशमात्रं ॥ आचार्यत्वान्मुख्येवेदेत्यादिकृतार्थसंपादनाय प्रदर्शितं ॥ ५ ॥ तच्च न वाचार्य-

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसंभवाः ॥ तद्धि स्वयं वेद भवांस्तथापि ते
प्रादेशमात्रं भवतः प्रदर्शितं ॥ २० ॥ त्वमात्मनात्मानमवेह्यमोघदृक् परस्य पुंसः परमात्म-
नः कलां अजं प्रजातं जगतः शिवाय तन्महानुभावाभ्युदयोधिगण्यतां ॥ २१ ॥ इदं हि पुंसस्तप-
सः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः ॥ अविच्युतोर्थः कविभिर्निरूपितो यदुत्तमश्लो-
कगुणानुवर्णनं ॥ २२ ॥

यद्वा ईश्वरावतारत्वादित्याह ॥ त्वमिति ॥ हे अमोघदृक् त्वं आ-
त्मना स्वयं आत्मानं अजमेव संतं जगतः शिवाय प्रजातमवेहि कुतः परस्य पुंसः कलां अंशभू-
तं ततस्तस्मात् महानुभावस्य हरेरभ्युदयः पराक्रमो अधि अधिकं गण्यतां निरूप्यतां ॥ २१ ॥ अनेनैव
तप आदि सर्वं सफलं स्यादित्याह ॥ इदं हीति ॥ श्रुतादयो भावे निष्ठा इदमेव हि तपः श्रवणा-
देरविच्युतो नित्योर्थः फलं किं तत् ॥ उत्तमश्लोकस्य गुणानुवर्णनमिति नियतं ॥ २२ ॥

सत्संगतो हरिकथाश्रवणादिफलं स्वहतो तेन प्रपंचयति ॥ अहं पुरा पूर्वकल्पे अतीतभवे पूर्वजन्मनि
वेदवादिनां दास्याः सकाशात् अभवं जातोस्मि निरूपितः नियुक्तः योगिनां शुश्रूषणे प्रावृषि वर्षाकाल
निते चातुर्मास्ये निर्विविक्षतां निर्वेशं एकत्र वासं कर्तुमिच्छतां ॥२३॥ अपेतान्यखिलानि चापल्यानि य
स्मात् तस्मिन् निवृत्ते इंद्रिये अधृतक्रीडनके त्यक्तक्रीडासाधने अनुवर्तिनि अनुकूले ॥२४॥ उच्छिष्टस्य लेपा
न् पात्रलग्नान् तैर्द्विजैरनुज्ञातः सन् भुंजे स्म तेन भोजनेन अपास्तकिल्बिषो जातोस्मि तेषां धर्मे परमे

अहं पुरातीतभवे भवं मुने दास्यास्तु कस्याश्चन वेदवादिनां ॥ निरूपितो बालक एव योगिनां शु
श्रूषणे प्राव्रृषि निर्विविक्षतां ॥२३॥ ते मय्यपेताखिलचापलेऽर्भके दान्तेऽधृतक्रीडनकेऽनुवर्तिनि
चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि ॥२४॥ उच्छिष्टलेपाननुमोदि
तो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्बिषः ॥ एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः
प्रजायते ॥२५॥ तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणाशृणवं मनोहराः ॥ ताः श्रद्धया मे
नुपदं विशृण्वतः प्रियश्रवस्यंग ममाभवद्रतिः ॥२६॥ तस्मिंस्तदा लब्धरुचेर्महामुने प्रिय
श्रवस्यस्खलिता मतिर्मम ॥ ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पितं परे ॥२७॥

अर्भके नने एव आत्मनो मनसो रुचिः प्रजायते स्म तद्धर्मेषु ॥२५॥ अशृणवं श्रुतवानस्मि मे श्रद्धया
न मे वक्तृतः विशृण्वतः तत्स्थेन बलाज्जनितया अतो मम तस्यामेव रुचेः ॥२६॥ प्रियं श्रवो यस्य तस्मिन्
भगवति लब्धरुचेर्मम अस्खलिता अप्रतिहता मतिः ॥ अभवदित्यनुषंगः ॥ यया मत्या परे प्रपंचा
तीते ब्रह्मरूपे मयि सदसत् स्थूलसूक्ष्मं च एतत् शरीरं स्वमायया अविद्यया कल्पितं न तु वस्तुतो
स्तीति तत्त्वतया एवं पश्यामि अतः सत्संग एव आत्मतत्त्वदर्शने हेतुरिति भावः ॥२७॥

भा
प्र टी
३३

एवं शुद्धे त्वंपदार्थे ज्ञाते देहादिकं न विवेचनं हि तत्कारणभूतरजस्तमो निवर्तकाद्दृढभक्ति ज्ञा-
तेत्याह ॥ इत्थमिति ॥ हरेर्यशः अनुसवं त्रिकालं ॥२८॥ तस्येति ॥ शुद्धे त्वंपदार्थे संजातदृढभक्तिमतो
मम प्रश्रितस्य विनीतस्य ॥२९॥ गुह्यतममिति ॥ साधनभूतं यन्मतं तज्ज्ञानं गुह्यं तत्साध्यविविक्तात्म-
ज्ञानं गुह्यतरं तत्साध्यं स्वरूपज्ञानं गुह्यतमं ॥ भगवतोदितं भागवतशास्त्रं अन्ववोचन् उपदिष्टवन्तः ॥३०॥
तदेव ज्ञानं पूर्वोक्तत्वंपदार्थज्ञानानन्तरं विवेकेन दर्शयति ॥ येनैवेति ॥ अविदं ज्ञातवानहं ॥३१॥ त-
त्साधनं धर्ममेव ह संक्षेपतः सूचितमिति भावः ॥ एतदिति ॥ तापत्रयस्याध्यात्मिकादेश्चिकित्सितं भे-

इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोऽमलं ॥ संकीर्त्यमानं मुनिभिर्महात्म-
भिर्भक्तिः प्रवृत्तात्मरजस्तमोपहा ॥२८॥ तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः ॥ श्रद्दधानस्य
बालस्य दांतस्यानुचरस्य च ॥२९॥ ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितं ॥ अन्ववोचन्गमिष्यं-
तः कृपया दीनवत्सलाः ॥३०॥ येनैवाहं भगवतो वासुदेवस्य वेधसः ॥ मायानुभावमविदं ये-
न गच्छंति तत्पदं ॥३१॥ एतत्संसूचितं ब्रह्मंस्तापत्रयचिकित्सितं ॥ यदीश्वरे भगवति कर्म ब्र-
ह्मणि भावितं ॥३२॥ आमयो यश्च भूतानां जायते येन सुव्रत ॥ तदेव ह्यामयं द्रव्यं न पुनाति चि-
कित्सितम् ॥३३॥

षजं निवर्तकं सत्त्वशोधकमिति यावत् किं तत् भगवति भावितं समर्पितं च क-
र्मतत् ॥ कथंभूते भगवति ईश्वरे सर्वनियन्तरि विपूर्वः पिचक्षः ब्रह्मणि पूर्णरूपे ॥३२॥
ननु संसारहेतोः कर्मणः कथं तन्निवर्तकत्वं समर्थीभूतेन दृष्टान्तेन ... ॥
द्वाभ्यां य आमयो रोगः येन द्रव्यादिना जायते ॥ तदेव केवलमामयकारणं द्रव्यं तेन द्रव्येण आम-
यं न पुनाति निवर्तयतीत्यर्थः ॥ किंतु चिकित्सितं द्रव्यांतरैर्भावितं सत्तमामयमपनयत्येव ॥ ३३

आत्मविनाशाय कर्मनिर्हरणाय कल्पन्ते समर्था भवन्ति परे ईश्वरे कल्पिता अर्पिताः सन्तः ॥ ननु च सर्वस्य कर्मत्वेनानन्तत्वात् कथं तेन तत्कर्म अशुद्धानां भगवति रतिः ॥ तथा च देहेन्द्रियविविक्तात्मज्ञानं ततो दृढा भक्तिः ॥ ततो भगवत्तत्त्वज्ञानं ततस्तत्कृपया सर्वतत्त्वादि भगवद्गुणाविर्भाव इति क्रमो दर्शितः ॥ ३४ ॥ ननु च ज्ञानेनाज्ञानात्मककर्मनाशः ॥ न च ज्ञानं भक्तियोगाद्भवति ॥ कथं कर्मणा कर्मनाशः स्यात् ॥ तत्राह ॥ यदत्रेति ॥ भगवत्परितोषणं क्रियमाणं कर्म भक्तियोगं जनयतीति

एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ॥ त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ॥ ३४
यदत्र क्रियते कर्म भगवत्परितोषणं ॥ ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम् ॥ ३५ ॥
कुर्वाणा यत्र कर्माणि भगवच्छिक्षयासकृत् गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च ॥
नमो भगवते तुभ्यं वासुदेवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥ ३७ ॥
इति मूर्त्यभिधानेन मन्त्रमूर्तिममूर्तिकं ॥ यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ॥ ३८

यत्र यदा भगवतः शिक्षया कर्माणि कुर्वाणा भवन्ति तदा कृष्णस्य गुणनामानि गृणन्ति अनुस्मरन्ति चेति वक्ष्यमाणमित्यर्थः ॥ इदं भगवत्परितोषणकर्म यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति ॥ ३६ ॥ कीर्तनश्रवणाद्युपभक्तिहेतुत्वमुक्तं ॥ तत्र नमस्कारमाह द्वाभ्यां ॥ ॐ नमः इति ॥ नमो धीमहि मनसा नमनं कुर्वीमहि ॥ ३७ ॥ अमूर्तिकं मन्त्रोक्तव्यतिरिक्तमूर्तिशून्यं यजते पूजयति स सम्यग्दर्शनो भवति ॥ ३८ ॥

एवं कृतवति मयि हरिः स्वसदृशं ज्ञानादिकं दत्तवानित्याह ॥ इमं स्वनिगमं स्वोपदेशं मया अनुष्ठितं अवेत्य ज्ञात्वा भावे प्रीतिं च ॥३९॥ अतस्त्वमप्येवं कुर्वित्याह ॥ त्वमिति ॥ अदभ्रं अनल्पं श्रुतं यस्य हे अदभ्रश्रुत विभोर्विश्रुतं यशः प्राख्याहि कथय ॥ येन विश्रुतेन वृद्धेन विदां विदुषां बुभुत्सितं बोद्धुमिष्टं समाप्यते पर्यवस्यति ॥ दुःखैः पीडितानां क्लेशशांतिं प्रकारान्तरेण न मन्यन्ते ॥४०॥ इति प्रथमे पंचमः ॥५॥ आससप्रत्ययार्थं च षष्ठे भागवत्संभवं ॥ स्वभाग्यं नारदः प्राह कृत्स्नसंकथनोद्भवं ॥१॥ स्वयमपि तथा विकीर्षुरेतदुपदेशानंतरभावि।

इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितं ॥ अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च केशवः ॥३९॥ त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितं ॥ प्राख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशंति नान्यथा ॥४०॥ इति श्रीभागवते प्रथमस्कंधे पंचमः ॥५॥ सूत उवाच ॥ एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च ॥ भूयः पप्रच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः ॥१॥ व्यास उवाच ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव ॥ वर्तमानो वयस्याद्ये ततः किमकरोद्भवान् ॥२॥ स्वायंभुव कया वृत्त्या वर्तितं ते परं वयः ॥ कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरं ॥३॥ प्राक्कल्पविषयामेतां स्मृतिं ते मुनिसत्तम ॥ न ह्येष व्यवधात्काल एष सर्वनिराकृतिः ॥४॥ नारद उवाच ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम ॥ वर्तमानो वयस्याद्ये तत एतदकारषम् ॥५॥

तत्र चरितं पृच्छति भिक्षुभिरिति ॥ विप्रवसिते देशान्तरं गते सति ॥ विज्ञानस्यादेष्टृभिः ॥२॥ परं वय उत्तरमायुः ॥ केन प्रकारेण वर्तितं नीतं इदं कलेवरं उदस्राक्षीः उत्सृष्टवानसि ॥३॥ प्राक्कल्पगतां तव स्मृतिं कालः नैव कथं न व्यवधात् ॥ न खण्डितवान् ॥ अत्र भावः सर्वार्थः पतत्येषः सर्वस्य निराकृतिः प्रलापो यस्मात् ॥४॥ प्रकारमेवाह ॥ तदेतदकारषम् ॥ रेफषकारयोर्विश्लेषे

जन्माद्यस्येति ॥ परं परमेश्वरं धीमहीति ॥ ध्यायतेर्लिङि छान्दसं ध्यायेमेत्यर्थः ॥ बहुवचनं च शिष्याभि
प्रायेण तमेव स्वरूपतटस्थलक्षणाभ्यामुपलक्षयति ॥ तत्र स्वरूपलक्षणं ॥ सत्यमिति ॥ सत्यत्वे हे
तुः यत्र यस्मिन्ब्रह्मणि त्रयाणां मायागुणानां तमोरजःसत्वानां सर्गो भूतेंद्रियदेवतारूपः ॥ अमृषा सत्यः
यत्सत्यतया मिथ्यासर्गोपि सत्यवत्प्रतीयते ॥ तं परं सत्यमित्यर्थः ॥ अत्र दृष्टांतः ॥ तेजोवारिमृदां य
था विनिमयो व्यत्ययः ॥ अन्यस्मिन्नन्यावभासः ॥ स यथाऽधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः ॥ त
त्र तेजसि वारिबुद्धिः मरीचितोये प्रसिद्धा ॥ मृदि काचादौ वारिबुद्धिरित्यादि ॥ यथायथमूह्यं ॥ य
द्वा ॥ तस्यैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तं ॥ यत्र मृषैवायं त्रिसर्गो न व
स्तुतः ॥ सन्निति ॥ यत्रेत्यनेन प्रतीतमुपाधिसंबंधं वारयति ॥ स्वेनैव धाम्ना महसा निरस्तं कुहकं

जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यंति
यत्सूरयः ॥ तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोमृषा धाम्ना स्वेन सदा निरस्तकुह
कं सत्यं परं धीमहि ॥ १ ॥

कपटं यस्मिन्तं ॥ तटस्थलक्षणमाह ॥ जन्मादीति ॥ अस्य विश्वस्य
जन्मस्थितिभंगं यतो भवति तं धीमहीति ॥ तत्र हेतुः ॥ अन्वयादितरतश्चार्थेषु कार्येषु परमेश्वरस्य
सद्रूपेणान्वयात्कार्येभ्यः खपुष्पादिभ्यश्च व्यतिरेकात् ॥ यद्वा ॥ अन्वयशब्देनानुवृत्तिरितरश
ब्देन व्यावृत्तिः ॥ अनुवृत्तत्वात् ॥ सद्रूपं ब्रह्म कारणं मृत्सुवर्णादिवत् ॥ व्यावृत्तत्वात् ॥ विश्वं कार्यं घट
कुंडलादिवदित्यर्थः ॥ यद्वा ॥ सावयवत्वात् ॥ अन्वयव्यतिरेकाभ्यामस्य जन्मादि यतो भवतीति
संबंधः ॥ तथा च श्रुतिः यतो वा इमानि भूतानि जायंते येन जातानि जायंते येन जातानि जीवंति
यत्प्रयंत्यभिसंविशंतीत्याद्या ॥ स्मृतिश्च ॥ यतः सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च प्र

भा
प्र टी
२

लयं यांति भुवनेश्व गुणसर्गरूपया ॥ तर्हि किं प्रधानं जगत्कारणं तत्राह ॥ ध्येयमभिप्रेतं तत्राह ॥ अ
भिज्ञो यः तेन स एव तत्तल्लोकान्सृजतीति ॥ स इमांल्लोकानसृजतेति श्रुतेः ॥ ईक्षतेर्नाशब्दमिति न्याया
द्वा ॥ तर्हि जीवः स्यात्तत्राह ॥ स्वराट् ॥ स्वेनैव राजते यः तेन स्वतःसिद्धज्ञानमित्यर्थः ॥ तर्हि किं ब्र
ह्मा हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः ॥ पतिरेक आसीदिति श्रुतेः ॥ तत्राह ॥ तेन इत्यादि
कवये ब्रह्मणेपि ब्रह्म वेदं यः ॥ तेन प्रकाशितवान् ॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्र
हिणोति तस्मै ॥ तर्हि देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्य इति श्रुतेः ॥ ननु ब्रह्म
णः स्वतो वेदाध्ययनमप्रसिद्धम् ॥ सत्यम् ॥ तत हृदा मनसैव तेन ॥ अनेन बुद्धिवृत्तिप्रवर्त
कत्वेन गायत्र्यर्थो दर्शितः ॥ वक्ष्यति हि ॥ प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृ
तिं हृदि स्वलक्षणा प्रादुरभूत्किलास्यतः ॥ स मे ऋषीणामृषभः प्रसीदतामिति ॥ ननु ब्रह्मास
र्यमेव समस्तबुद्ध्या येन वेदमुपलभतां तत्राह ॥ यस्मिन्ब्रह्मणि सूरयोपि मुह्यंतीति ॥ तस्मा
द्ब्रह्मणोपि पराधीनज्ञानत्वात् ॥ स्वतःसिद्धज्ञानः परमेश्वर एव जगत्कारणं ॥ अनेन एवंभा
वः सत्तास्फूर्त्योश्च परमार्थसत्यः ॥ सर्वं तत्त्वेनैव निरस्तकुहकं तं धीमहीति ॥ गायत्र्याख्यारंभे
ण गायत्र्याख्यब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितं ॥ यथोक्तं मत्स्यपुराणे ॥ पुराणानि प्रस्ता
वे यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ॥ वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥ लिखित्वा
तच्च यो दद्याद्धेमसिंहसमन्वितं ॥ प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदं ॥ अष्टादशसहस्रा
णि पुराणं तत्प्रकीर्तितं ॥ पुराणांतरे च ॥ ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसंमितः ॥ हयग्रीव
ब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ गायत्र्या च समारंभस्तद्वै भागवतं विदुः ॥ पद्मपुराणे ॥ अंबरीष शु
कप्रोक्तं नित्यं भागवतं शृणु ॥ पठस्व स्वमुखेनापि यदीच्छसि भवक्षयमिति ॥ अत एव भागवतं

श्री॰
भा॰पु॰
टी॰
१११

एवंभूतस्य सर्वं स्वार्थनैव व्यर्थमित्याह ॥ किमिति त्यागेन सन्न्यासेन विविक्तेनैकान्तसेवया मौ
नेन वाग्यमेन ॥११॥ अस्तु तमः सत्त्व आत्मानं निंदति द्वाभ्यां स्वार्थस्येति ॥ अकोविदमज्ञां
नं ॥ गोखरवत् ॥ गौरिव खर इवेति ॥ अथ यत्सर्वं सेवमानस्यात्मभूर्मनसिजः पुनः पुनरे
धते ॥१३॥ एवमष्टभिर्निर्वेदो निरूपितः ॥ इदानीं तस्य विवेकमाह दशभिः पुंश्चल्येति ॥ अयमा

किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा ॥ किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतं ॥११॥
स्वार्थस्याकोविदं धिङ्मां मूर्खं पण्डितमानिनं ॥ योऽहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः ॥१२॥
सेवतो वर्षपूगान्मे उर्वश्या अधरासवं ॥ न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा ॥१३॥
बोधितस्यापि देव्या मे सूक्तवाक्येन दुर्मतेः ॥ मनोगतो महामोहो नापयात्यजितात्मनः ॥१४॥
किमेतया नोऽपकृतं रज्ज्वा वा सर्पचेतसः ॥ रज्जुस्वरूपाविदुषो योऽहं यदजितेन्द्रियः ॥१५॥
पुंश्चल्यापहृतं चित्तं को न्वन्यो मोचितुं प्रभुः ॥ आत्मारामेश्वरमृते भगवन्तमधोक्षजम् ॥१६॥

वः कर्मभिर्देवानिष्ट्वाहं स्वयमेव शाप्तोऽस्मि ॥ अतः परमेश्वरमेव भजेयमिति ॥१४॥ परमेश्वरस्मरणं
विना देवैरुपदिष्टेऽपि विवेकवाक्यात् ॥ मोहो न निवर्तित इत्याह बोधितस्यापीति ॥ देव्या उर्वश्या सू
क्तवाक्येन यथार्थवचनेन पुरूरवो मा मृथा मा प्र मम जो मा त्वा वृका सो अशिवास उक्षन् ॥ न वै स्त्रैणा
नि सख्यानि सन्ति शालावृकाणां हृदयान्येता इत्यनेन ॥१५॥ एवं पुंश्चल्यापहृतं चित्तमित्यादि
ना तस्या अपकारो नास्ति ततः इदानीं ममैवापराध इत्याह ॥ किमेतयेति ॥ नोऽस्माकं का

कामानिति॥ वर्षाणांयामिनीः रात्रीः यांतीः अपयांतीः॥ आयांतीः॥ आगामिनीः॥ आकृष्टचेतनायस्य सः॥ ६॥ तस्य गंधर्वलोकप्राप्तस्य बहुकालमुर्वशीसंभोगानंतरं निर्विण्णस्य गाथामाह षड्भिः॥ तत्राष्टभिरनुतापः प्रपंच्यते अहो इति॥ यतो मया इमे अहोरात्रा अल्पा आयुःखंडानस्मृताः॥ ७॥ तदेवाह॥ नाहमिति॥ अभिनिर्मुक्तः मत्यैरममाणोऽस्तगतः अभ्युदितो वा सूर्य

कामानतृप्तोनुजुषन्क्षुल्लकान्वर्षयामिनीः॥ नवेदयांतीर्नायांतीरुर्वश्याकृष्टचेतसः॥ ६॥ ऐलउवाच॥ अहोमेमोहविस्तारः कामकश्मलचेतसः॥ देव्यागृहीतकंठस्य नायुःखंडाइमेस्मृताः॥ ७॥ नाहंवेदाभिनिर्मुक्तः सूर्योवाभ्युदितोमुया॥ मुषितोवर्षपूगानांबताहानिगतान्युत॥ ८॥ अहोमेआत्मसंमोहोयेनात्मायोषितांकृतः॥ क्रीडामृगश्चक्रवर्तीनरदेवशिखामणिः॥ ९॥ सपरिच्छदमात्मानंहित्वातृणमिवेश्वरं॥ यांतींस्त्रियंचान्वगमंनग्नउन्मत्तवद्रुदन्॥ १०॥ कुतस्तस्यानुभावःस्यात्तेजईशत्वमेववा॥ योन्वगच्छंस्त्रियंयांतींखरवत्पादताडितः॥ ११॥

इति अस्तुया उर्वशपवेचितः वन खिदेउ नापि वर्षपूगानामपि गतान्यहानि न वेदेति॥ ८॥ येन सम्मोहेनात्मा देहः क्रीडामृगः कृतः॥ ९॥ ननु प्राणयकृपितायाः अन्तु न यार्थमधीननाभुत्कं वसत्यनन्तरन्तदेशीत्याह॥ सपरिच्छदं राज्यादिसहितं ईश्वरं चक्रवर्तिनं तृणमिव स्मा यांतीमपि॥ अन्वगमं अनुगतो

नवैवंभूतस्य विषयसंगो नास्तीत्याह ॥ गुणमय्येति ॥ गुणमयी या जीवयोनिः जीवोपाधि स्तया विमुक्तः गुणेषु वर्त्तमानोपि तैर्न युज्यते संगं न प्राप्नोति ॥ अत्र हेतुः अवस्तुभिः नव वस्तुभिरवस्तुत्वेन युज्यमानात् दृश्यते तेनाह ॥ अवस्तुत्वेन दृश्यमानेषु ॥१॥ तथापि संगं वर्जयेदि त्याह ॥ संगमिति ॥ असतां लक्षणमाह ॥ शिश्नोदरे तर्पयंतीति ॥ शिश्नोदरतृपस्तेषां क्वचि त्कदाचिदपि प्राप्तो ॥ तावद्बहूनां संगः ॥ किं तत्स्यैकस्याप्यनुगः अनुवर्ती अंधमनुगच्छ

गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया ॥ गुणेषु मायामात्रेषु दृश्यमानेष्ववस्थितः ॥ वर्त्तमानोपि न पुमान्युज्यतेवस्तुभिर्गुणैः ॥२॥ संगं न कुर्यादसतां शिश्नोदरतृपां क्वचि त् ॥ तस्यानुगस्तमस्यंधे पतत्यंधानुगांधवत् ॥३॥ ऐलः सम्राडिमां गाथामगायत बृह च्छ्रवाः ॥ उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयमे ॥४॥ त्यक्त्वात्मानं व्रजंतीं तां नग्न उन्म त्तवन्नृपः ॥ विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः ॥५॥

तिर्यापसहस्र ॥ अत्रेतिहासमा ह ॥ ऐलः पुरूरवाः सम्राट् चक्रवर्ती ॥ बृहच्छ्रवाः कीर्तिर्यस्य सः ॥ उर्वशीविरहात्प्रथमं मु ह्यन्पश्चात्कुरुक्षेत्रे तां समागम्य ॥ गंधर्वदत्तेनाग्निना देवानिष्ट्वा तत्र उर्वशीलोकं प्राप्य शोकस संयमे शोकापगमे सति ॥ ततो निर्विण्णः सन्निमां गाथामगायत तेन तत्र वमस्कंधात् सारेण दृष्टांतं ॥५॥ प्राक्तनीं मोहावस्थामाह ॥ त्यक्त्वेति ॥ घोरे तिष्ठेति ॥ हे जाये मन सा तिष्ठ घोरे वचसि प्राक्तनावस्थावर्णनेन नग्नो मंत्रः अनुदिनात्सप्तमे पक्षे रमते रेवनाह त्रितस्य वमस्य

भजनप्रकारमाह || निःसंग इति सार्धेन || सत्त्वसंसेवया सात्त्विकान्येव सेवमानस्सत्त्वविवृद्ध्येति भावः || नैरपेक्ष्येण || उपशमात्मकेन सत्त्वेनैव || ३४ || एवं च सति मां प्राप्नोतीत्याह संपद्यत इति || जीवं जीवत्वकारणं || लिंगशरीरं मां प्राप्य न पुनः संसार इत्याह || ३५ || जीव इति न बहिर्विषयभोगेन || नांतरः तत्स्मरणेन || गुणाहंकृतात्मकाः संसरणप्रथा मजि तपूर्ण एव कथाकथनादिभिः || धनतभक्तिरसेन विवेकिनो नहि पुनः सत्वभजन्त्वरीदृशं || ३६ || इति श्रीभावार्थदीपिकायामेकादशे पंचविंशः || २५ || षड्विंशे योगनिष्ठाया विघातो दुष्ट

निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः || रजस्तमश्चाभिजयेत्सत्त्वसंसेवया मुनिः || ३४ || सत्त्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शांतधीः || संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां || ३५ || जीवो जीवविनिर्मुक्तो गुणैश्चाशयसंभवैः || मयैव ब्रह्मणा पूर्णो न बहिर्नांतरश्चरेत् || ३६ || इति श्रीभागवते एकादशस्कंधे भगवदुद्धवसंवादे पंचविंशः || २५ || श्रीभगवानुवाच || मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः || आनंदं परमात्मानमात्मस्थं समुपैति मां || १ ||

संगतः || साधुसंगेन तन्निष्ठा पराकाष्ठेति वर्ण्यते || योगिनो योगविभ्रंशः संगतः संभवेदिति || सर्वथा तन्निवृत्त्यर्थमैलगीतं विनम्यते || निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रिय इत्युक्तं || तत्र विपक्षे दोषं कथयिष्यन् || जीवन्मुक्तस्यापि न हि संगो दुर्वार इत्यर्थं || स्यादित्याशंकां भक्तानुवादपूर्वकं परिहरति सार्धद्वाभ्याम् || मल्लक्षणं मत्स्वरूपं लक्ष्यते येन तं मिमं नरदेहं लब्ध्वा मद्धर्मे भक्तिलक्षणे आस्थितः सन्नात्मन्येव नियंतृत्वेन स्थितं परमानंदरूपमात्मानं मां समुपैति सम्यक् प्राप्नो

आत्मोत्थं सुखं सत्त्वं मदुपाश्रयमित्यपि निर्गुणत्वं तस्य दार्ढ्यं विषयत्वेन ज्ञानवद्द्वैविध्यम्॥२९॥ द्रव्यं संसारहेतुभूतं त्रैगुण्यमुपसंहरति द्रव्यमिति द्रव्यं पथ्यपूतादि देशो वनग्रामादिः फलं सात्त्विकं सुखमित्यादि कालः॥ प्रातर्मध्यंदिनमभक्त्या॥ यदेव रोगेषु ज्ञानादिकारकः सात्त्विकं कारकोऽसंगीत्यादि॥ श्रद्धा सात्त्विक्याध्यात्मिकीत्यादि॥ अवस्था सत्त्वं जागरणमित्यादि॥ आकृतिः ऊर्ध्वपरिणामो देवत्वादिरूपा निष्ठा॥ सत्त्वे प्रलीनाः स्व

सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम्॥ तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयम्॥२९॥ द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि॥३०॥ सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ॥३१॥ एताः संसृतयः पुंसो गुणकर्मनिबन्धनाः येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः॥३२॥ भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते॥ तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवं॥ गुणसंगं विनिर्धूय मां भजन्तु विचक्षणाः॥३३॥

र्यान्तीत्यादिनोक्ता स्वर्गादिः॥ एवं सर्वोऽप्ययं भावसंघो गुणत्रिगुणात्मकः॥ न केवलमेतावदेव॥ किं तर्हि यावन्तः पुरुषाव्यक्ताभ्यामधिष्ठिता अधिष्ठितास्ते सर्वे भावा गुणमया एवेत्याह सर्वे इति॥३१॥ इदानीं गुणत्रैगुण्यस्य संसारहेतुत्वमनुवदं स्तन्निर्जयात्मोक्षमाह एता इति सार्धेन॥ येनैते जिताः स एव प्रकृष्टाद्विविक्तेन भक्तियोगेन मन्निष्ठः सन्मद्भावाय मोक्षाय प्रपद्यते योग्यो भवति॥३२॥ तस्माद्विवेकिना

मदर्पणं मय्यीश्वरे पदेशेन कृतं निष्फलं केवलं स्वभावेनैव कृतं निजं कर्म नित्यादि त
त्सात्त्विकं फले ॥ संकल्प्यते यस्मिंस्तत् ॥ हिंसाप्रायं हिंसा द्वेषेण कृतं हिंसावत्त्वं च ॥ आ
दिशब्दाद्दम्भमात्सर्यादिकृतं ॥२२॥ इदानीं सगुणनिर्गुणभेदेन ज्ञानादीनां चातुर्विध्यमा
ह कैवल्यं देहादिव्यतिरिक्तात्मविषयं वैकल्पिकं देहादिविषयं यत्तद्रजः प्राकृतं
बालमूकादिज्ञानतुल्यं मन्निष्ठं परमेश्वरविषयं ॥२४॥ वनं विविक्तत्वात्सात्त्विको वासः

मदर्पणं निष्फलं वा सात्त्विकं निजकर्म तत् ॥ राजसं फलसंकल्पं हिंसाप्रायादि
तामसं ॥२३॥ कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं तु यत् ॥ प्राकृतं तामसं ज्ञानं
मन्निष्ठं निर्गुणं स्मृतम् ॥२४॥ वनं तु सात्त्विको वासो ग्रामो राजस उच्यते ॥ ताम
सं द्यूतसदनं मन्निकेतं तु निर्गुणम् ॥२५॥ सात्त्विकः कारकोऽसंगी रागान्धो रा
जसः स्मृतः ॥ तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥२६॥ सात्त्विक्याध्यात्मि
की श्रद्धा कर्मश्रद्धा तु राजसी ॥ तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥२
७ ॥ पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतम् ॥ राजसं चेन्द्रियप्रेष्ठं तामसं वा

भगवन्निकेतनं तु सात्त्विकानन्दाविर्भावाविर्गुणं स्थानम् ॥२५॥ का ॥ निर्गुणश्चिं "
रकः कर्ता असंगी अनासक्तः रागान्धः अभिनिवेशवान् ॥ स्मृतिविभ्रष्टः अनुसंधा
नशून्यः मदपाश्रयो मदेकशरणः सन् निरहंकारत्वान्निर्गुणः ॥२६॥ सात्त्विकी आ
ध्यात्मिकीति अधर्मे धर्मबुद्धिया श्रद्धा ॥२७॥ पथ्यं हितं पूतं शुद्धं अनायस्तमनायास
लं प्राप्तं आहार्यं भक्ष्यभोज्यादि इन्द्रियाणां प्रेष्ठं अत्यन्तप्रियं कटुम्ललवणादि ॥ आर्तिदाशुचि ॥ दे
सकरमशुद्धं वा च यदाहार्यं भगवन्निवेदितं निर्गुणम्मिमेमिभेतम् ॥२८॥

श्रीः भा॰ ए॰ टी॰ १६८

यदासीदन्तरो भवेत्‌ ॥ चेतसोऽग्रहणे विदाकारपरिणामे अस्तमं सत्त्विने विलीयेत ॥ मनोऽपि संकल्पा
त्मकं ॥ नष्टलीनं तमोऽज्ञानं ग्लानिर्विषादश्च भवन्ति तदा तम उक्तं तदुपधारय विद्धि ॥ १८ ॥ किंच पच्य
मान इति ॥ इंद्रियाणि पवनित्यूनि पत्रत्रिमोहस्वभावानि देवासुररक्षांसि यद्दा प्रसादयिदेवि
कानां गुणानामुत्कर्षकार्याण्युक्तानि निर्ज्ञेयं ॥ १९ ॥ गुणोत्कर्षेणावस्थाभेदं दर्शयति ॥ सत्त्वादि
नि प्रसंगात्त्रिगुणावस्थामाह ॥ तुरीयं चतुर्थमवस्थान्तरं नाम विभुजागरणादिषु संततमेकरू

सीदंश्चित्तं विलीयेत चेतसो ग्रहणेऽक्षमं ॥ मनो नष्टं तमो ग्लानिस्तमस्तदुपधारय ॥ १८ ॥
पच्यमाने गुणे सत्त्वे देवानां बलमेधते ॥ असुराणां च रजसि तमस्युद्धव रक्षसाम्‌ ॥ १९ ॥
सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत्‌ ॥ प्रस्वापं तमसा जन्तोस्तुरीयं त्रिषु संततम्‌ ॥ २० ॥
उपर्युपरि गच्छन्ति सत्त्वेन ब्राह्मणा जनाः ॥ तमसाधोध आमुख्याद्रजसान्तरचारिणः ॥ २१ ॥
सत्त्वे प्रलीनाः स्वर्यान्ति नरलोकं रजोलयाः ॥ तमोलयास्तु निरयं यान्ति मामेव निर्गुणाः ॥ २२ ॥

पमात्मतत्त्वमेवेत्यर्थः ॥ २० ॥ गुणोत्कर्षद्वारेणान्तकर्मफलनिर्षेदं दर्शयति ॥ उपर्युपरीति ब्रा
ह्मणा वेदार्थानुष्ठानाभियुक्ताः ॥ आब्रह्मणः इति पाठे ब्रह्मलोकमभिव्याप्येत्यर्थः ॥ आमुख्यात्‌
स्थावरानभिव्याप्य अन्तरचारिणो मनुष्या एव भवन्ति ॥ २१ ॥ देहाद्युत्क्रान्तिकालीनगुणोत्कर्षे
फलमाह ॥ सत्त्वे देहे सति प्रलीना मृताः रजोलयाः रजसि प्रलीनाः तमोलया येषां ते ॥ पवनमो

तदेवं विश्वामित्रगुणानां कार्याणि प्रदर्श्य पदार्थान्तरं ॥ एकैकगुणोद्रेककार्याणि दर्शयति ॥ यदेति सप्तदशभिः ॥ यदेत्यादि ॥ यदेतरौ गुणौ जयेदभिभवेत् ॥ भास्वरः प्रकाशात्मकं विशदं स्वच्छं शिवं शान्तं ॥ शिवमविशदं तमोभास्वरत्वाभावात् यथाक्रमं सत्वधर्मज्ञानहेतुत्वात् तदा तेन रूपेण ॥ आदिशब्दात् शमदमादिमिश्रं ॥ १२ ॥
तमः सत्वं च कर्माभिभूतं रजः कर्मसंगसंगहेतुः ॥ भिदाभेदहेतुः ॥ बलं प्रवृत्तिस्वभावं ॥ अतः संगहेतुत्वात् ॥ यथा सात्विया च दुःखेन तत्कामः ॥ पुमान्भवतीत्यर्थः ॥ भिदाहेतुः दुःखेन दुःखेन ॥ द्वितीयाहे
यदेतरौ जयेत् सत्वं भास्वरं विशदं शिवं ॥ तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान् ॥ १२ ॥
यदा जयेत् तमः सत्वं रजः संगं भिदा बलम् ॥ तदा दुःखेन युज्येत कर्मणा यशसा श्रिया ॥ १४ ॥
यदा जयेद्रजः सत्वं तमो मूढं लयं जडम् ॥ युज्येत मोहशोकाभ्यां निद्रया हिंसया शया ॥
१५ ॥ यदा चित्तं प्रसीदेत इन्द्रियाणां च निर्वृतिः ॥ देहेऽभयं मनोऽसंगं तत्सत्वं विद्धि मत्पदम् ॥ १६ ॥
विकुर्वत् क्रियया चाधीरनिर्वृत्तिश्च चेतसाम् ॥ गात्रास्वास्थ्यं मनो भ्रान्तं रज इत्येतन्निशामय ॥ १७ ॥
भयं भवतीति निश्चितेः ॥ बलत्वात्कर्मणा युज्येत ॥ १४ ॥ यदा रजः सत्वं च कर्माभिभूतं तमः कार्तं जयेत्
मूढं विवेकभ्रंशः लयं मावरणात्मकं जडं मनन्तुद्यमात्मकं ॥ अतो मूढत्वाच्छोकमोहहिंसाभिः
लयत्वान्निद्रया जडत्वात् उद्यमाभावेन केवलमाशया युज्येतेति ॥ इष्टं छेत्तुं नश्यतिपाठे लयात्मक
त्वमेव निद्राशयोर्हेतुः ॥ १५ ॥ किं च यदा चित्तं प्रसीदेत स्वच्छं भवेत् निर्वृतिरूपरतिः ॥ ततदा सत्वं मदुप
लब्धिस्थानं सत्वं मत्पदं विद्धि ॥ १६ ॥ यदा पुनः क्रियया विकुर्वन् विकारं प्राप्नुवत् ॥ आसमन्ताद्विक्षि

सार्थीर्यस्य: चेतसां बुद्धीन्द्रियाणां मतिर्वृत्तिः गात्राणि कर्मेन्द्रियाणि तेषामस्वास्थ्यविकारादिसंभ्रमो भ्रान्तं च चलं रज उत्कटं निशामय जानीहि १७

२

आधीर्भवति

यदासीदन्वरोभवेत् ॥ चेतसो ग्रहणो चिदाकारपरिणामे अग्रहणे सत्त्वे विलीयेन मनोपि संकल्पा
त्मके ॥ नष्टे लीनेन तमोज्ञाने सानिविषादश्च भवंति तेन तदा तम उपधारय विद्धि ॥ १८ ॥ किंचयथमान
शेन ॥ इंद्रियाणि पवनिवृत्ति मोहस्वभावानि देवासुर रक्षोसियद्वाशसमादषिदेविकाना गुणाना
मुत्कर्षकार्याण्युक्तानी तिज्ञेयं ॥ १९ ॥ गुणोत्कर्षेनावस्था भेदं दर्शयति ॥ सत्त्वादिनिश्रमणात्रिगु
णावस्थामाह ॥ तुरीयं चतुर्थमवस्थांतरं नाम त्रिषुजागरणादिषु संततमेकरूपमात्मनत्त्वमेवेत्य

सीदं यस्मिन्विलीयेत चेतसो ग्रहणे त्वमं ॥ मनो नष्टं तमो ज्ञानि त्तमसत्त्व उपधारय ॥ १८ ॥
यमाने गुणा सत्त्वे देवानां तलमेधते ॥ असुराणां च रजसि तमस्य इव रक्षसाम् ॥ १९ ॥ स
त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् ॥ प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततम् ॥ २० ॥
उपर्युपरि गच्छंति सत्त्वेन ब्राह्मणा जनाः ॥ तमसाधोध आ मुख्यादिरजसांतरचारिणः ॥ २१ ॥
सत्त्वे प्रलीनाः स्वर्यांति नरलोकं रजोलयाः ॥ तमोलयास्तु निरयं यांति मामेव निर्गुणाः ॥ २२

गुणोत्कर्षद्वारेणान्तरकर्मफलनिष्ठां दर्शयति ॥ उपर्युपरीति ॥ ब्राह्मणावेदार्थाः
स्मर्थः ॥ २० ॥ गुणोत्कर्षद्वारेणान्तरकर्मफलनिष्ठां दर्शयति ॥ उपर्युपरीति ॥ ब्राह्मणा वेदार्थाः
नुष्ठानाभियुक्ताः ॥ आब्रह्मणा इति पाठे ब्रह्मलोकमभिव्याप्येत्यर्थः ॥ आमुख्यात्स्थावरान्निव्या
पश्चान्तरचारिणो मनुष्या एव भवंति ॥ २१ ॥ देहादुत्क्रांतिकालीनगुणोत्कर्षफलमाह ॥ सत्त्वे देहे
सति प्रलीनाः मृता रजोलयाः रजसि प्रवृद्धे सति लयो येषां ते ॥ एवं तमोलयाश्च यपि निर्गुणास्तु
सत्वतुलयशब्दानुपादानाज्जीवंतोपि निर्गुणा अंत्या मेव यांतीत्यर्थः ॥ २२ ॥
इदानीं गुणोत्कर्षहेतुमेव तन्नरफलसाधनकर्मभेदे विध्यमाह ॥ २३ ॥

रजसो वृत्तीराह ॥ कामोऽभिलाषः ईहा व्यापारः मदो दर्पः तृष्णा लाभेऽप्यसंतोषः स्तंभो गर्वः आ-
शीर्धनाद्यभिलाषो देवतादिप्रार्थनं ॥ विषयभोगः मदोत्साहः मदेन युद्धाद्यभिनिवेशः यशःप्रीतिः
स्तुतिप्रियता हास्यमुपहासः क्लमः श्रमः कलिः कलहः ॥ शोकमोहौ ॥ अनुशोचनं भ्रमश्च ॥ विषा-
दोऽतीदुःखं दैन्यं च ॥ निद्रा तंद्रा ॥ आशा मे भविष्यतीत्यवीक्षा ॥ भीर्भयम् ॥ अनुद्यमो जाड्यं ॥ ४ ॥ अनु-
पूर्वशः क्रमेणैताः श्लोकत्रयोक्ताः वर्णितप्रायाः ॥ अन्याश्च प्रायुक्ता इति भावः ॥ ५ ॥ विमिश्रतानां गुणा-
नां वृत्तयो वर्णितास्ताः मिश्राणामाह सन्निपात इति त्रिभिः अहं ममेति या मतिः सा उक्तं सर्ववृत्तिसामानाधि-

कामं ईहा मदस्तृष्णा स्तम्भ आशीर्भिदा सुखं ॥ मदोत्साहो यशःप्रीतिर्हास्यं वीर्यं बलोद्यमः ॥ ३
क्रोधो लोभोऽनृतं हिंसा याच्ञा दंभः क्लमः कलिः ॥ शोकमोहौ विषादार्ती निद्राशा भीरनुद्य-
मः ॥ ४ ॥ सत्त्वस्य रजसश्चैतास्तमसश्चानुपूर्वशः ॥ वृत्तयो वर्णितप्रायाः सन्निपातमथो शृणु ॥
५ ॥ सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः ॥ व्यवहारः सन्निपातो मनोमात्रेंद्रियासुभिः ॥ ६
धर्मे चार्थे च कामे च यदासौ परिनिष्ठितः ॥ गुणानां सन्निकर्षोऽयं श्रद्धारतिधनावहः ॥ ७ ॥

करणपदार्थानां सन्निपातनं तत्त्व ॥ अहं शान्तः कामी क्रोधी इत्यादि तथा मम शान्तिरस्ति कामः क्रो-
ध इत्यादि वृत्तिश्च ॥ तत्सर्वकः सर्वो व्यवहारश्च सन्निपातकार्यमित्याह व्यवहार इति तत्र हेतुः मनश्च
मात्रा गुणाश्चेंद्रियाणि चासवश्च तैः मनआदीनां सात्त्विकतामसराजसत्वान्नैव व्यवहारः सन्निपातज इ-
ति भावः ॥ ६ ॥ असौ पुरुषो यदा धर्मादिषु परिनिष्ठितो भवति तदायं त्रिनिष्ठरूपः सन्निपातका-
र्यं धर्मादीनां सत्त्वतमोरजः कार्यत्वात् ॥ विषयतः सन्निपातजन्यमुक्त्वा फलतश्च तथात्वमाह ॥ श्र-
द्धारतिधनानि सत्त्वरजस्तमोमयान्यावहतीति तथा ॥ ७ ॥ ॥ रामानुजाय नमः ॥ ७

श्री: भा: पु: टी: १२९

श्रवणकथनसम्प्रश्नेनोपयोगमाह ॥ एवमिति मनसः कथं भेदनिमित्तो भ्रमः स्यात् ॥ ज्ञानोदयाकार्ये
हृदि तिष्ठेत ॥ २८ ॥ उक्तमुपसंहरति ॥ एष इति अस्य तामेवयेनेदं दर्शितं तत्त्वमात्मनः ॥ सांख्यं प्रख्यानं तत्
स्मै ईदृशाय गुरवे नमः ॥ ॥ ॥ इति श्रीभागवतेकादशस्कन्धे टीकायां चतुर्विंशोऽध्यायः ॥ २४ ॥ पञ्चविंशे
तु नैर्गुण्यप्राप्तिप्रयत्नेतिनिरूप्यते चित्तप्रभवसत्त्वादिगुणावृत्तिरनेकधा ॥ १ ॥ एवं प्रकृतिपुरुषविवेकज्ञान
वतोऽपि यावत्तस्य यत्नविशेषेण गुणजयस्तावत् निर्जयो न स्यात् ॥ ननावदस्योपरमः अतस्तज्जयोपायक।

कालो मायामये जीवे जीव आत्मनि मय्यजे ॥ आत्मा केवल आत्मस्थो विकल्पापायलक्षणः ॥ २६
एवमन्वीक्षमाणस्य कथं वैकल्पिको भ्रमः ॥ मनसो हृदि तिष्ठेत व्योम्नीवार्कोदये तमः ॥ २७ ॥
एष सांख्यविधिः प्रोक्तः संशयग्रन्थिभेदनः ॥ प्रतिलोमानुलोमाभ्यां परावरदृशा मया ॥ २८
इति श्रीभागवते एकादशस्कन्धे भगवदुद्धवसंवादे सांख्यकथनं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥
श्रीभगवानुवाच ॥ गुणानामसम्मिश्राणां पुमान्येन यथा भवेत् ॥ तन्मे पुरुषवर्येदमुपधा
रय शंसतः ॥ १ ॥ शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः ॥ तुष्टिस्त्यागः स्पृहा श्रद्धा

घनाय गुणवृत्तिनिरूपणार्थमाह ॥ गुणानामिति ॥ सङ्करमिश्रीभूय वर्तमानाः सम्मिश्रा न सम्मि
श्रा असम्मिश्रास्तेषां विभक्तानां गुणानां मध्ये येन गुणेन यथा यादृशो भवेत्तदिदं कथयतो मे
मे निबोधेत्यर्थः ॥ १ ॥ तत्र सत्त्वस्य वृत्तीराह शम इति ॥ ईक्षा विवेकः तपः स्वधर्मः स्मृतिः पूर्वापरा
नुसन्धानं तुष्टिर्यदृच्छालाभसन्तोषः त्यागो व्ययशीलत्वं अस्पृहा वैराग्यं श्रद्धा आस्तिक्यबुद्धिः ह्रीरनुचिते
कर्मणि लज्जा ॥ दयादानं ॥ दयादानं गर्भनिरक्षणोद्विनिस्सरणात् ॥ आदिशब्देनार्जवविनयादिः स्वा

९

योनिरित्युद्देशगतत्वादेकत्वमविवक्षितम्॥ योनयो देवतास्ता मनसि क्षेत्रे ईश्वरे नियंतरि मनो वशो यस्य भ
वत्स्वदेवाद्यहंकृतत्वात्॥ इंद्रियलयोप्येवमत्राप्यभिप्रायः॥ मनश्च देवताभिः सह वैकारिके अहंकारे इ
त्यर्थः॥ तामसाहंकारकार्यावशेषितस्य शब्दस्य लयमाह॥ शब्दो भूतादिनामसाहंकारमप्येति तस्मिं
ल्लीयत इत्यर्थः॥ भूतादिरिमुपलक्षणं॥ त्रिविधोप्यहंकारो महतीति॥ जडांशंविहाय॥ ज्ञानक्रियाशक्ति
मात्ररूपो भवति॥ कथंभूतः प्रभुः समर्थः॥ सर्वजगन्मोहकत्वात् ॥२४॥ स तु महान्स्वकारणेषु ज्ञान
क्रियाशक्तिमत्त्वाद्गुणवत्तमस्तादृग्भावंविहाय गुणमात्ररूपो भवति॥ ते अव्यक्तं साम्यावस्थां गच्छंति

योनिर्वैकारिके सौम्य लीयते मनसीश्वरे॥ शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः॥ २४
स लीयते महान्स्वेषु गुणेषु गुणवत्तमः॥ तेव्यक्ते संप्रलीयंते तत्काले लीयतेव्यये ॥२५

त्यर्थः॥ तदव्यक्तं कालाधीनत्वात्तेनैकीभूयावतिष्ठते॥ अव्यये उपरतत्वहमेतौ॥२५॥ मायामये मायया
प्रवर्तके ज्ञानमये वा॥ तपोजीवयतीति जीवस्तस्मिन्महापुरुषे ये माकं॥ विश्वसृष्टुं महापुरुषस्यो
पकरणरूपः॥ कालो हि सृष्टान सृज्य इत्यमनतस्तदात्मनावतिष्ठत इति॥ तदुक्तं सत्त्वमेकालंचरते
सृजती शास्त्रा अयं प्रधानपुंभ्यां नरदेवसत्यकृदितिदशमेव॥ योयं कालस्तस्य तेव्यक्तं बयो चेष्टमा
हुर्वैश्व इतेयेन विश्वं॥ निमेषादिर्वत्सरांतो महीयांस्तं त्वीशानं क्षेमधामप्रपद्य इति॥ जीव आत्मनि
क्षमेतेलीनत्वेन प्रतियोगपत्नी मा वामविशेषेण स्वरूपेणावतिष्ठते॥ आत्मात्मा त्वस्थ एव तास्य चलीय
ते॥ यतः केवलो निरुपाधिः अत्र हेतुः विकल्पापायाभ्यां विश्वोत्पत्तिलयाभ्यां लक्ष्यते विशेषते

तत्र तस्माद्वा एतस्मादात्मनः आकाशः॥ संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिव्या ओषधयः॥ ओषधीभ्योन्नं अन्नात्पुरुष इति श्रुत्युक्तसृष्टिक्रमप्रातिलोम्येन प्रलयमाह॥ अन्न इति॥ मर्त्यं शरीरं येनोपचितं तस्मिन्नन्ने शतवर्षायामनावृष्ट्यां लीनो सति तन्नैव लीयते इत्यर्थः॥ अन्नं धानासु बीजमात्रावशेषं भवतीत्यर्थः॥ भूमिर्गंधे संवर्तकादित्यशोषिता संकर्षणमुखाग्निना दग्धा च सती भूतसूक्ष्मरूपगंधमात्रावशेषा भवति॥२१॥ अप्सु गंधः शतवर्षयावृष्ट्यासा

अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते॥ धानाभूमौ प्रलीयंते भूमिर्गंधे प्रलीयते॥२१॥
अप्सु प्रलीयते गंध आपश्च स्वगुणे रसे॥ लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते॥२२॥
रूपं वायौ स च स्पर्शे लीयते सोपि चांबरे॥ अंबरं शब्दतन्मात्र इंद्रियाणि स्वयोनिषु॥२३॥

अमानो प्रलीयते॥ एवमेवापश्च॥ ज्योतिषा शोष्यमाणा रसमात्रावशेषा भवंति॥ ततो रसोपि ज्योतिस्मिल्लीयते॥ ज्योतिश्च वायुनाभिभूयमानं सत्॥ तस्मिंल्लीयते॥२२॥ वायुश्च कालशक्तिनेनावरणायत्तः स्पर्शमात्रः सन्॥ तस्मिन्नंबरं च भूतादिना॥ इकारेणाभाव्यमाने॥ शब्दतन्मात्रे॥ तदेवं तामसाहंकारकार्यस्य शब्दपर्यंतलयमुक्त्वा॥ राजसाहंकारकार्यस्याप्याह॥ इंद्रियाणि स्वयोनिषु इति॥ स्वप्रवर्तकदेवतासु तेषां प्रवृत्तिस्वभावत्वात्तेषामपि देवताधीनत्वात्तासु लयं उक्त्वा निवाचो॥

स्यादिदं तस्य विवर्त्तते तदानन्त्यात् ॥ सत्यमभिधीयते आत्मा ॥ परं कारणस्यात्मनः ॥ सत्त्वविवर्त्तयोरन्य-
थ्यः ॥ १७ ॥ ननु तथापि सर्वे विकारा मिथ्या न प्रकृतिपुरुषकालानाम कार्याभजानां भिन्नत्वात्कथ-
मद्वितीयत्वं ॥ तत्राह प्रकृतिरिति अस्य सतः कार्यस्योपादानं या प्रकृतिः प्रसिद्धा ॥ यश्च तस्या
आधारः अधिष्ठाता परः पुरुषः ॥ यश्च गुणक्षोभेणाभिव्यंजकः कालस्तत्त्रितयं ब्रह्मस्वरूपोऽहमेव न
तु पृथक् कार्यकृतेः शक्तित्वात् ॥ पुरुषकालयोरंशस्वरूपत्वात् ॥ १८ ॥ एवं तावत्कालत्रयेप्यभि

प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः सतोऽभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहम् ॥ १९

सर्गः प्रवर्त्तते तावत्पौर्वापर्येण नित्यशः ॥ महान् गुणविसर्गार्थः स्थित्यन्तो यावदीक्षणं ॥ २०

विराण्मयासाद्यमानो लोककल्पविकल्पकः ॥ पंचत्वाय विशेषाय कल्पते भुवनैः सह ॥ २१

चाविरतत्वाद्ब्रह्मैव सत्यमिति वक्तुं जगत्सृष्टिकारणानां तोसत्त्वमुक्त्वा मध्ये तस्यैव सत्त्वमुपपादयति
प्रवर्त्तितेन ॥ सत्त्वं दर्शयितुं प्रसर्गप्रवाहरूपायाः स्थितेरवधिमाह ॥ सर्ग इति ॥ महान् बहुलः पौर्वा-
पर्येण पितृपुत्रादिरूपेण नित्यशः ॥ अविच्छेदेन किमर्थं प्रवर्त्तते ॥ तदाह ॥ गुणा देहस्तद्विविधस्त-
स्याहं जन्म तदैव गुणविसर्गो जीवस्तदर्थः ॥ तद्भोगप्रयोजनः किंपर्यन्तं प्रवर्त्तते यावत् ॥ स्थितेरंतः
सोपि किमवधिस्तदाह ॥ यावदीक्षणं परमेश्वरस्य तावत् ॥ २० ॥ प्रलयं निरूपयति ॥ विराड् ब्रह्म-
घ्राऽहं मया कालात्मनाऽऽप्यमानः लोकानां महरादिः कल्पः सृष्टिः प्रलयाविविधाः कल्प्यन्ते य-
स्मिन् ॥ नानात्वा अस्मिन् विकल्पयतीति तथा सत्तया भजनोपि पंचत्वरूपाय विशेषाय विभा-

त्रिलोक्यां पातालादिसहितायां योगादितारतम्येन यथोत्तरं महर्लोकादयः ॥ मन्वन्तरैर्वैकुण्ठलोकः ॥ १२
तत्र तु मन्वन्तरनिर्याणे च केषांचिद्गतागतं यस्य चलाउस्या हवैराग्यार्थः ॥ मया कालशक्तिनाथ्या जापरमेश्वरे
णकर्मफलप्रदेन देहतन्मूतेन गुणप्रवाहे संसारे ॥ उन्मज्जति ॥ आसत्यलोकमुन्नमार्गेनीः प्राप्नोति।
पुनर्निमज्जति ॥ आस्थावरं नीचयोनीः प्राप्नोति ॥ १४ ॥ हस्तिनिर्पुणस्याहितीयात्मप्रतिपत्त्यर्थं तत्प्र
तिपादनाय कारणेन कार्यस्योपाप्तिमाह ॥ अणुरिति ॥ उभयेन संयुक्तो व्याप्तः तदेवाह प्रकृत्येति ॥ १५
इदानीं कार्यस्य कारणात्मतां दर्शयति ॥ यस्य कार्यस्य यच्चादिः कारणं यत्र तल्लयस्थानं च तस्य मध्यम

त्रिलोक्यां युगमानेन सर्वाः कर्मणां विगुणात्मना ॥ योगस्य तपसश्चैव न्यासस्य गतयोऽमलाः ॥ १३ ॥
महर्जनः तपः सत्यं भक्तियोगस्य सङ्गतिः ॥ मया कालात्मना धात्रा कर्मयुक्तमिदं जगत् ॥ १४ ॥
गुणप्रवाह एतस्मिन्नुन्मज्जति निमज्जति ॥ १४ ॥ अणुर्बृहत्कृशः स्थूलो यो यो भावः प्रसिध्यति
सर्वोऽप्युभयसंयुक्तः प्रकृत्या पुरुषेण च ॥ १५ ॥ यस्तु यस्यादिरन्तश्च स वै मध्यं च तस्य सन् ॥ विकारो
व्यवहारार्थो यथा तैजसपार्थिवः ॥ १६ ॥ यदुपादाय पूर्वस्तु भावो विकुरुतेऽपरः ॥ आदिरन्तो य

ध्यावस्थापि सम्पवदेव प्रसिद्धत्वात्सुवर्णादिव (दा यस्य तत्सत्यमभिधीयते ॥ १७ ॥ अन्तपवाव्यभिचारि।
नात्सपव सन्नेनरः ॥ अलं तर्हि मिथ्यास्तु न कार्यं दृष्टान्तमाह विकार इति ॥ तैजसाः कटककुण्डला
दयः ॥ पार्थिवा घटशरावादयश्च यथेति ॥ १८ ॥ ननु तर्हि सत्कार्यं प्रति मृदादीनामप्यस्ति तद्रूप
त्वात्सत्यत्वं स्यात् ॥ तत्राह यदिति ॥ यदुपादाय उपादानकारणतया स्वीकृत्य पूर्वः ॥ कारण
रूपो मृदादिर्भावः ॥ परमाणुकारणादिकं भावविकृत्य नतु जनि ॥ यथा दशाहद्धुपादाय स्वय
निमित्तभूतो घटहजनति ॥ नहृत्तपवसन्निति ॥ एवं स्यानुपाशः ॥ कथं तर्हि सति कत्यवसत्यमित्या।

तन्मात्रिकाश्रुद्धादितन्मात्रकारणात् ॥ तामसात्तु स्वरार्थी महाभूतरूपोऽनन्ते वभूतभूतानामावरण।
त्वभावात् ॥ इंद्रियाणि दशतैजसाद्राजसात् तेषां प्रवृत्तिस्वभावत्वात् ॥ वैकृतात्सात्विकाद्देवताः ॥ दिग्वा
तार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः ॥ चन्द्र इत्येकादश चशब्दात्मनश्च ॥ तेषां प्रकाशस्वभावत्वात् ॥८॥
समवैराजोन्तर्यामिणः ॥ ९ ॥ सलिले संस्थितिर्यस्य तत्सलिलसंस्थिति ॥ तस्मिन्सलिलसंस्थिते ।
अंडे श्रीनारायणरूपो लीलाविग्रहेण समभवत् स्थित इत्यर्थः ॥ विष्णु लोककारणभूते ॥ तत्र चा
अर्थस्तन्मात्रिकाज्जज्ञे तामसादिंद्रियाणि च ॥ तैजसाद्देवता आसन्नेकादश च वैकृतात् ॥८॥
मया संचोदिता भावाः सर्वे संहत्यकारिणः ॥ अंडमुत्पादयामासुर्ममायतनमुत्तमम् ॥९॥ तस्मिन्न
हं समभवमंडे सलिलसंस्थितो ॥ मम नाभ्यामभूत्पद्मं विश्वाख्यं तत्र चात्मभूः ॥१०॥ सोऽसृजत्त
पसा युक्तो रजसा मदनुग्रहात् ॥ लोकान्सपालान्विश्वात्मा भूर्भुवः स्वरिति त्रिधा ॥ ११ ॥ देवा
नामोक आसीत्स्वर्भूतानां च भुवः पदम् ॥ मर्त्यादीनां च भूर्लोकः सिद्धानां त्रितयात्परम् ॥ अ
त्मभूः ॥ चतुराननः (योसुराणां नागानां भूमेरोकोऽसृजत्प्रभुः ॥१२॥ तपोयोगविग्रहेणानवैराजप
वत्तस्मिन्नाविर्भूत इत्यर्थः ॥१०॥ रजसा युक्तो मदनुग्रहात्तपसासृजत् ॥ भूः अतलादिसहिता ॥ भुवः
अंतरिक्षलोकः ॥ स्वः स्वर्गः महर्लोकादेरप्युपलक्षणं ॥११॥ लोकसृष्टिप्रयोजनमाह ॥ देवानामि
तिसार्धेन ओको निवासः पदं स्थानं ॥ त्रितयात्परं महर्लोकादि ॥ भूमेरधः अतलादि ॥१२॥ एवं
व्यवस्थायाः कारणमाह त्रिलोक्यामिति सार्धेन ॥ ॥ रामानुजाय नमः ॥ ॐ नमः कमलदः

श्री
भा॰प
टी॰
१०२

सत्त्वं क्रियाशक्तिमान्प्रथमो विकारः ॥ ततो महान् ज्ञानशक्तिमान् ॥ नन्वयं महानेव प्रथमो विकारः
प्रसिद्धस्तत्राह ॥ सर्वज्ञानस्य क्रियागर्भत्वात् ॥ स तेन संयुतः तत्पृथक् ॥ एकमेव तत्त्वं क्रियाज्ञानशक्ति
भ्यां द्विधोच्यत इत्यर्थः ॥ विमोहनः जीवस्य स्वमहेतुः संजातः ॥ ६ ॥ यतस्तन्मात्रादीनां कारणमतः प्रा
धान्येन देवतानामप्युपलक्षणं ॥ चिदचिन्मयः ॥ चिदाभासव्याप्तत्वात् ॥ ननु भयं ग्रंथिरूपयति जीवो यापि
तेदर्शितम ॥ यद्यपि ॥ तस्माद्वा एतस्माद्वा एतस्मादात्मनः ॥ आकाशः संभूत इत्यादिश्रुतेः अन्नमयं
हि सौम्य मन इत्यादिश्रुतेश्च प्रथमं भूतानि जायंते ॥ तेभ्यश्चापंचीकृतेभ्यः प्राणादिक्रमेण समष्टा

तेभ्यः समभवत्तत्रं महांस्तद्गुणसंयुतः ॥ ततो विकुर्वतो जातो योऽहंकारो विमोहनः ॥ ६ ॥ वै
कारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् ॥ तन्मात्रेन्द्रियमनसां कारणं चिदचिन्मयः ॥ ७ ॥

त्मकं लिंगशरीरं पंचीकृतेभ्यश्च ब्रह्मांडं तस्मिन्वैराजस्तदंतर्यामी लीलाविग्रहः क्षीराब्धिशायी
श्रीनारायण ॥ तन्नाभिपद्मे च वैराजस्य भोग्रह ब्रह्मानुशासनतः ततो यथावत्समस्तेषां जीवानामावि
र्भाव इति प्रक्रिया ॥ तथापि विना भिन्नशक्तिपूर्वकोऽहंकारस्तत्वान्मतेन्द्रियादिव्यवहारश्चान्यतावता
महदादिक्रमेणास्त्विति चेत्तत्र ॥ तथा वालो ॥ स्फुल्लाह विस्फुलिंगाद्यैः स्वशियाचोदितान्यथा ॥ ३
पायः सोवतारायतास्तिभेदः ॥ कथं चनेति ॥ ३ ॥ तस्माद्विविधप्रपंचो नास्तीति दर्शयति ॥ अर्थ इ
ति ॥ ७ ॥ रामानुजाय नमः ॥ ७ ॥

गति २

अद्वितीयपरमात्मनो मायया प्रकृतिपुरुषद्वारा ॥ सर्वं द्वैतमुदेति पुनस्तत्रैव लीयते तत्तत्त्वं तु संख्यानं सां-
ख्यं तद्भ्रमानिवर्तितं निवर्तकं सांख्यं प्रवक्ष्यामीति ॥ अथेति पूर्वैः कपिलादिभिः विनिश्चितं वैकल्पिकं भे-
दनिमित्तं भ्रमं सुखदुःखादिरूपं ॥ १ ॥ अथो शब्दः कार्त्स्न्ये ज्ञानं द्रष्टा तेन दृश्यः कृत्स्नोऽप्यर्थः अवि-
कल्पितं विकल्पशून्यमेव ब्रह्मरूपे प्रविलीनमासीदित्यर्थः ॥ कदेत्यपेक्षायामाह ॥ अयुगयुगेभ्यः पूर्वं
प्रलय इत्यर्थः तथा आदौ कृते युगे ॥ तस्मिंश्चान्यदपि यदा विवेकिनिपुणा जना भवन्ति तदापि ने

श्रीभगवानुवाच ॥ अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितं ॥ यद्विज्ञाय पुमान्सद्यो जह्याद्वै-
कल्पिकं भ्रमं ॥ १ ॥ आसीज्ज्ञानमथो अर्थ एकमेवाविकल्पितं ॥ यदा विवेकनिपुणा आदौ
कृतयुगे युगे ॥ २ ॥ तन्मायाफलरूपेण केवलं निर्विकल्पितं ॥ वाङ्मनोऽगोचरं सत्यं द्विधा स-
मभवद्बृहत् ॥ ३ ॥ तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ॥ ज्ञानं त्वन्यतमो भावः पुरु(
षः सोऽभिधीयते ॥ ४ ॥ तमो रजः सत्त्वमिति प्रकृतेरभवन्गुणाः ॥ मया प्रक्षोभ्यमाणायाः उ

षां भेदास्फूर्तेः ॥ २ ॥ तद्बृहद्दृश्यं वाङ्मनोगोचरं यथा भवति ॥ तथा (रुषानुमतेन च ॥ ५ ॥
दृश्यफलेन तत्प्रकाशः ॥ तद्रूपेण मायाविलासरूपेण वा द्विधाभवत् ॥ ३ ॥ तयोर्द्विधाभूतयोर्मध्ये उभ-
यात्मिका कार्यकारणरूपिणी ॥ ४ ॥ अभवन् अभिव्यक्ता अभवन् ॥ मया परमेश्वरस्य रूपेण जीवा-
दृष्टप्रयुक्तत्वात्तत्क्षोभः पुरुषानुमतेन ॥ यदा सत्त्वसंवरणी तत आरूपयावत्पुरुषावस्थया तदनुमतेन त-
द्वारेणेत्यर्थः ॥ ५ ॥ ॥

श्री॰
भा॰ ए॰
टी॰
१२२

श्रुतोदमप्येतद्ग्रैव परमात्मनिष्ठया तरिष्यामीत्याह ॥ एतामिति ॥ सोहमित्यन्वयः ॥ ननु तिर्यङ्निष्ठेव कथं
भवेत्तदाह मुकुन्देति ॥ ५८ ॥ एतावेन सह गाथार्थं संक्षेपतो दर्शयति ॥ इत्थं नष्टद्रविणो निर्विण्णो गतः
क्लमः ॥ तमसो ज्ञानतः ॥ तमसो ज्ञानतः आत्मनो मनसो विभ्रममात्रः कृतो न तत्त्वतः इत्यर्थः उ
क्त्वं द्वंद्वसहनोपायमुपसंहरति ॥ ९० ॥ मनोनिग्रहाशक्तोप्येतत्स्तुवन्नादि तिष्ठस्तत्फलं प्राप्नोति ॥

एतां समास्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्महर्षिभिः ॥ अहं तरिष्यामि दुरंतपारं तमो मु
कुन्दाङ्घ्रिनिषेवयैव ॥ ५८ ॥ श्रीभगवानुवाच ॥ निर्विद्य नष्टद्रविणो गतक्लमः प्रव्रज्य
गां पर्यटमान इत्थम् ॥ ५९ ॥ निराकृतोऽसद्भिरपि स्वधर्मादकम्पितोऽमूं मुनिराह गाथाम् ॥ ५९
सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः ॥ मित्रोदासीनरिपवः संसारस्तमसः कृतः ॥ ६०
तस्मात्सर्वात्मना तात निगृहाण मनो धिया ॥ मय्यावेशितया युक्त एतावान्योगसंग्रहः ॥ ६१
य एतां भिक्षुणा गीतां ब्रह्मनिष्ठां समाहितः ॥ धारयञ्छ्रावयञ्छृण्वन्द्वन्द्वैर्नैवाभिभूयते ॥ ६२

त्याह ॥ य इति द्वंद्वैः सुखदुःखादिभिः ॥ ६२ ॥ भिक्षुगीतमिमं कृत्वा भक्तचित्तगतं हरिः ॥ मोहं
निघ्नन्नृहरिर्भाति परमानंदरूपतः ॥ ॥ इतिश्री भागवतभावार्थदीपिकायामेकादशे त्रयोविंशोऽध्या
यः ॥ २३ ॥ चतुर्विंशे तु सांख्येन मनो मोहो निवार्यते ॥ आत्मनः सर्वभावानामागमापायचिंत
या ॥ १ ॥ स्वपदद्वंद्वभक्तानामद्वंद्वाय संयमं विनिस्पोका पुनः कृत्स्नः सांख्यमत्राह तत्कृते २

२४

१०२

कर्मदेवश्चेत् ॥ अस्तित्वस्यापगमः कर्मैव नास्ति कुतस्तस्य देहत्वमिति ॥ तदाह द्वियस्मात्तत्कर्मैव
कस्य जगज्जडत्वे स्यात् ॥ जडस्यादिकारित्वोपपत्तेः ॥ अजडस्याच्च हितस्य संभवात् ॥ यश्चिज्जडो देहः अत
स्तस्य प्रवृत्तिर्न संभवति ॥ पुरुषस्त्वस्य पराणां शुद्धज्ञानस्वरूपः ॥ अतः कर्म कुण्ठेन ॥ यतः स खण्डः
स्वयोस्तल्लभ्यते कर्मैव नास्तीति ॥५५॥ तत्र कालपक्षे प्यात्मनः कियता सो कालात्मक एव अस्याभा
नाव ॥ स्वाशास्य स्वतः पीडा नास्तीत्यत्र दृष्टान्तः ॥ नाग्नेर्हि नोल्लदशस्य ज्वाला देहस्तापो दाहनो नाशोऽस्ति
तथा पापि भूतकाशप्रदाहानुगाः स्यादित्ति दृष्टान्तेन रमाह ॥ हिमस्य नच्छेद्यम् ॥ तदशस्य तथार
कर्मोस्तदेहस्य खण्डः स्वयोर्वै किमात्मतत्त्व हि जडाजडत्वे ॥ देहस्य चित्स्वरूपस्य परायां कुण्ठे
नकुसैन हिकर्मस्थले ॥५५॥ कालस्तदेहः स खण्डः स्वयोश्चेत् किमात्मनस्तत्र नेदात्मको सो
नाग्नेर्हि नोपो न हिमस्य तत्स्यात् कुण्ठेन कर्मैव परस्य देहं ॥ न केन चित् क्वापि कथंचनास्य देहो
परागः परतः परस्य ॥ यथाहमः संसारिरूपिणः स्यादेवं प्रबुद्धो न विभेति मृत्योः ॥५७॥
कृणास्यनाशकं तस्यादिपर्ययः किंचात्मा स्वतानवस्त्वतः परएवायं ॥ न च परस्य देहस्य खण्डः स्वा
दिकमस्तीति ॥५८॥ तदेवषडेते हेतवः प्रसिद्धा निरस्ताः यदि कश्चिद्देहं तं तरमज्ञावयेत ॥ तदा
पि वस्तु महिमा वेत्तायां न संभवतीत्याह ॥ न केनचिदिति न तत्परोक्षः कथमपनुद्यते ततश्चाह ॥ यथे
ति संसृतिमविद्यमानामेव रूपयति ॥ प्रकाशयतीति ॥ तथात्मस्य अहमः अहंकारस्य यथा स्यात्
तत्तथापरतः प्रकृतेः ॥ परस्यात्मनो देहसंबंधः ॥ अहंकारनिमित्तो ज्ञानवश्यमर्थः एवं प्रबुद्धो यः
सम्यक् ज्ञानेन वेत्ति ॥५७॥

यदि देवतास्तनामतत्रापि पदेऽग्रात्मनः किं यतो विकारयोर्विक्रियमाणयोर्देवतयोस्तत्॥ हस्तेन मुखे विभि
हतेऽनेन वा हस्ते दृष्टे तदभिमानिनोर्वह्नीन्द्रयोरेव तत्॥ न न विक्रियमाणदेहकारस्यात्मनः देवतानां च स
र्वदेहेष्वभेदात्तत्कोपविषयोऽस्तीति सदेहदृष्टान्तमाह॥ यद्यदा अङ्गदेवताधिष्ठानं हस्तमुखादि अतः प
दृश्यते न देवतानामधिष्ठानरूपस्य विकारमुदाहरणा॥ ५१॥ आत्मनः सुखदुःखयोराकारः परिणामः
अतः स एव देहे त्वयि दि स्यात्तत्र तस्मिन्यदेऽग्रात्मनः किं न किंचिदन्यतो भवति॥ यतो रूपादि स्पर्शः॥ ततो नि
दुःखस्य देहे त्वयि दि देवता तत्किमात्मनस्तत्र विकारयोस्तत्॥ यदंगमंगेन निहन्यते क्वचित्क्रुध्ये
त कस्मै पुरुषः स्वदेहे॥ ५२॥ आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजः स्वभावः॥ न
ह्यात्मनोऽन्यद्यदि तन्मृषा स्यात्क्रुध्येत कस्मान्न सुखं न दुःखम्॥ ५३॥ ग्रहा निमित्तं सुखदुःखयो
श्चेत्किमात्मनोऽजस्य जनस्य ते वै॥ ग्रहैर्ग्रहस्यैव वदन्ति पीडां क्रुध्येत कस्मै पुरुषस्ततोऽन्यः॥ ५४॥
न एव स्वभावः तः तत्रात्मनस्तया परिणामोत्पत्तिर्निमित्ततो भवति॥ अतो न कोपविषय इति चेत्तत्राह न
दीति॥ आत्मव्यतिरिक्तं नास्त्येव॥ यदि स्यात्तदात्मनः किं दस्तीति प्रतीयते॥ तर्हि तन्मृषैव अतः कस्मात्क्रुध्येतः।
क्रुध्येत यतो नात्मातिनिमित्तं न च सुखं वा न स्थः॥ ५३॥ ग्रहपक्षे अजस्यात्मनः किं यतो जन्मरहित॥ जनो देह
स्तस्यैव जन्मलग्नापेक्षया द्वादशाष्टमादिराशिस्थग्रहाः सुखदुःखयोर्निमित्तं भवति॥ किं चान्तरिक्षस्थै
ग्रहैस्तत्रस्थस्य ग्रहस्यैव पाहार्यो दिहस्यादिभेदैः॥ पीडां वदन्ति देवज्ञाः॥ न तु ग्रहकोणादिस्थितस्य तद
ह्मणोऽवयवस्य पुरुषस्य ग्रहगा नैव न पीडा न त्वग्रो मम ते देहे न स्याभिमानात् भवति॥ अतः पुरुष स्तनाग्रहः

अतो मय्यारागादयो वेगायस्यंतं ॥ अत एव अहं तदंतदं ॥ अहंममेति मन्यते व्याप्यतीमतं तदः ॥ तं नाने तिछे
दः ततविजिमयजिता ॥ तमनः ये केचित ॥ ममैः केश्चिद सद्दिग्रहं कुर्वंति ॥ ततचानुकूलप्रतिकू
लादीन् ॥ उन्मादिमिश्रादीन ॥ कुर्वंति तमृ७३ त्यर्थः ॥ ४४ ॥ ततश्चैतेन प्रकारेण संसारे भ्रमतीत्याह
देहमिति ॥ मनोमात्रपरिकल्पितमिमं सदेहमहमिति पुत्रादिदेहं चममेति स्त्री हत्यन्नममिसंसारे
५२ ॥ तदेवं मनएव संसारवंहेतुः स्वकारणत्वमुपपाद्येदानीं जनादीनां संसारकारणप्रपंचयति जन

नंदुनेयंशात्रुममससवेगमरुं तुदंतन्नविजिमकेचित ॥ कुर्वंत्यसद्विग्रहममत्रसमैर्मिश्राणएदा
सीन रिपुर्तितमृ ७३ः देहं मनोमात्रमिमंरदृीतममाहमित्यथधियामनुष्याः ॥ यथाहमन्यो
यमिति भ्रमेणदुरंतपारेतमसि भ्रमंति ॥ ५० ॥ जनस्तु हेतुः सुखदुःखयोश्चेत्किमात्मन
श्चात्रहभौमयोस्तत ॥ जिह्वांक्वचित्संदशति स्वदद्भिस्तद्वेदनायांकतमाय कुप्येत ॥ ५१ ॥

ष्विति षड्भिः ॥ अत्र चास्मिन्नपि पदे आत्मनः ॥ किंन किंचित ॥ सुखदुःखकर्मतं तत्रक्व मर्त्यं वेत्यर्थः
कृतइत्यतआह ॥ निश्चितं भौमयोः विकारयो र्देहयोस्तत ॥ नन्वात्मनश्रमत्तेस्पर्शक्रियस्यचद
नतादिषुकर्मत्वकर्तृत्वानुपपत्तेः ॥ तथापि दुःखमात्मपर्यवसाय्येवेति चेत ॥ एवमपि परमात्म
नउभयत्राप्येकत्वान्नकोविषयोस्तीति सदृष्टांतेन दर्शयति ॥ जिह्वामिति ॥ ५१ ॥

श्री·
भा· प·
टी·
१००

अतो मनोनिग्रहे कृते न सर्वं कृतं स्यात् ॥ तं विना तु सर्वं व्यर्थमित्याह दानमिति द्वाभ्यां ॥ स्वधर्मः नित्यनै
मित्तिकः सद्व्रतान्येकादश्युपवासादीनि ॥ अन्यानि च यावंति कर्माणि ॥ एते सर्वे उपाया मनोनिग्रह
लक्षणाः ॥ अंतो निष्ठा फलं येषां तेन तथा न तु ज्ञानांगानि तेषां प्रसिद्धत्वात् ॥ मनसः समाधिर्निग्रह एव
परो योगो ज्ञानं ॥४५॥ अतो यस्य मनः समाहितं भवति ॥ तस्य किं कृत्यमस्ति वदेति परं प्रत्युपदिश
न्निव स्वयमेवाह ॥ असंयतं विलीनं चेत् ॥ यद्वा विनश्यत् ॥ आलस्यादिना लीयमानं चेद्भवेत् ॥ तर्हि

दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि ॥ सर्वे मनोनिग्रहलक्षणान्ताः प
रो हि योगो मनसः समाधिः ॥४५॥ समाहितं यस्य मनः प्रशान्तं दानादिभिः किं वद तस्य कृ
त्यम् ॥ असंयतं यस्य मनो विनश्यद्दानादिभिश्चेदपरं किमेभिः ॥४६॥ मनोवशेऽन्ये ह्यभवन्स्म
देवा मनश्च नान्यस्य वशं समेति ॥ भीष्मो हि देवः सहसः सहीयान्युंज्याद्वशे तं स हि देवदेवः

एभिर्दानादिभिः किमपरं प्रयोजनं स्यात् ॥ न किंचिदित्यर्थः ॥४७॥ ननु तर्हि इंद्रियजयः प्रयोजनं स्यात्तत्रे
त्याह ॥ मनोवश इति देवा इंद्रियाणि तदधिष्ठातारो वा भीष्मः योगिनामपि भयंकरो मनोलक्षणो देवः
अनंतः सहसः बलादपि बलिनोऽपि वा सहीयान् बलीयान् ॥ अतस्तं यो वशवर्तिनं कुर्यात् ॥ स एव दे
वदेवः सर्वेंद्रियजेता भवति नान्यः तथा च श्रुतिः ॥ मनसो वशे सर्वमिदं बभूव
नान्यस्य मनो वशमन्वियाय भीष्मो हि देवः सहसः स
हीयानिति ॥४८॥ रामात्मना

वर

धर्मोत्मान यद्भिः परिभूतोपि सात्विकीं धृतिमास्थाय ॥ स्वधर्म ॥ पर्यवस्थित इमां वक्ष्यमाणां गाथामगा
यत ॥ सात्विकी धृतिश्च ॥ धृत्या यया धारयते मनः प्राणेन्द्रिय क्रियाः ॥ योगेनाव्यभिचारिण्या धृतिः
सा पार्थ सात्विकी स्मृतेति ॥ ४३ ॥ तामेवाष्टादशभिः श्लोकैर्गाथामाह ॥ नायमिति ॥ न चात्मानापि च
हाद्दयः मनः परं केवलं सुखदुःखयोः कारणं वदन्ति ॥ मनसा ह्येव पश्यति मनसा शृणोतीत्यादि
श्रुतेः ॥ ४४ ॥ परिवर्तन प्रकारमेवाह ॥ मन इत्यादि ॥ गुणान् गुणवृत्तीः सृजति तेभ्यश्च तेभ्यो गुणेभ्यः
शुक्लानि सात्विकानि ॥ कृष्णानि तामसानि लोहितानि राजसानि सवर्णानि तत्कर्मानुरूपाः सृतयः दे
परिभूत इमां गाथामगायत नराधमैः ॥ पातयद्भिः स्वधर्मस्थो धृतिमास्थाय सात्विकीं ॥ ४३ ॥
द्विज उवाच ॥ नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः ॥ मनः परं कारणमा
मनन्ति संसारचक्रं परिवर्तयेद्यत् ॥ ४४ ॥ मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्ष
णानि ॥ शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवन्ति ॥ ४५ ॥ अनीह आ
त्मा मनसा समीहता हिरण्मयो मत्सख उद्विचष्टे ॥ मनः स्वलिङ्गं परिगृह्य कामाञ्जुषन्निब
व तिर्यग्गादिगतयः ॥ ४५ ॥ तर्हि मनसः परवश संसारः स्या (द्धो गुणसङ्गतोसौ ॥ ४६ ॥
त्रात्मनः संसारो बन्धो वाह ॥ अनीह इति ॥ अयमर्थः अविद्यया मनोध्यासेनेयमात्मनः संसृतिर्न तु स्वतः
यतस्त ईशे हि तेश्च रस्य सा नास्ति ॥ किन्तु तदहंतो जीवस्यैवेति ॥ तदेवाह ॥ मनसा समीहमानेन सह नि
दुःखं न स्यात्तत्राह सदृष्टांतमाह ॥ छाया प्रतिबिंबं प्रत्याह्वयः प्रतिध्वनिराभासः शुक्तिरजतादिः एते य

थासंतोप्यर्थकारिणो भवंति ॥ आमृत्युतो मृत्युमभिव्याप्य ॥ यद्वा मृत्युर्भयः यावत् नैव लीयते तावत्पर्यंतमित्यर्थः ॥ ५ ॥ ॥

ननु स्रष्टादिषु प्रतीतिभेदेन द्वैतं न कथमसत्त्वं स्यात्तत्राह आत्मैवेति द्वाभ्यां ॥ त्रायते पालनं त्राति
पालयति ॥६॥ अतस्तस्मान्न ह्यात्मनोऽन्यस्माद्व्यतिरिक्ता त्रिविधा आत्मादिरूपा भातिः प्रतीयते ॥ ननु
कथं निर्मूलं प्रतीयते ॥ तत्राह इदमिति ॥७॥ ज्ञानविज्ञानयोर्नैपुणं निष्ठा सूर्यवत्संग्रा
सक्तः ॥८॥ एतन्निष्ठाशास्त्रोपायमाह प्रत्यक्षेणेति ॥ यदाद्यन्तवत् तेन तदसदिति ज्ञात्वा निःसंगो
विचरेत् ॥ आद्यन्तवत्त्वं प्रमाणानि प्रत्यक्षेणोपचयापचयानुमानेन सावयवत्वेन तु रूपेण ॥ पृथिव्यादि

आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः ॥ त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ॥६॥ त
स्मान्न ह्यात्मनोऽन्यस्मादन्यो भावो निरूपितः ॥ निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि
२ ॥ इदं गुणमयं विद्धि त्रिविधं मायया कृतं ॥७॥ एतद्विद्वान्मदुदितं ज्ञाननैपुणं ॥ न
निन्दति न च स्तौति लोके चरति सूर्यवत् ॥८॥ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा
आद्यन्तवदसज्ज्ञात्वा निःसंगो विचरेदिह ॥९॥ उद्धव उवाच ॥ नैवात्मनो न देहस्य सं
सृतिर्द्रष्टृदृश्ययोः ॥ अनात्मस्वदृशोरीश कस्य स्यादुपलभ्यते ॥१०॥ आत्माव्ययोऽगुणः शु
द्धः स्वयंज्योतिरनावृतः ॥ अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः ॥११॥

निगमेन प्रश्नमत्तमाकाशादि आत्मसंविदा स्वानुभावेन सर्वं दृश्यमाद्यन्तवत् ॥ असत्त्वेति ज्ञा
त्वा ॥९॥ ननु यद्यात्मविदां सर्वं दृश्यमसदिति उच्यते ॥ तर्ह्यात्मा स्वप्रकाशो देहादिर्हेतुर्जडमि
त्युक्ते स्यात् ॥ तथा च संसारप्रतिभासो न घटते इति ॥ चोदयति नैवेति ॥ अनात्मस्वदृशोर्जडाज्ञ
योरेव देहेश्वरद्रष्टृदृश्ययोर्मध्ये द्वयोरपि न तत्रोपलभ्यत इति ॥१०॥ एतत्प्रपञ्चयति आत्मे

नविज्ञा

श्री
भा॰ पं॰
टी॰
१८९

मतेनतथाप्युभयोरेवमविविक्त एव संसारावलंबनमित्याह ॥ पंचभिः यावदिति सन्निकर्षणं
संबंधः नन्वसंगस्य कुतः संबंधस्तत्राह ॥ अविवेकिन अज्ञानतस्तु तत्संबंध इति ॥ नन्वस्य प्रकाशस्य
कथमज्ञानं तत्र ॥ संसारः तत्राह ॥ अपार्थोपि केवलं फलवान् ॥ फलस्फूर्तिर्नेतु नन्वतो लोमथ्यैः
५५ ॥ नन्वसतो देहादेः कुतः संसारस्फूर्तिः तत्र नमपि ॥ तत्राह ॥ अर्थेऽसतीति ॥ असन्नात्मनः ॥ ५६ ॥ न
त्वकार्येविनध्यानतो विषयस्फूर्तिर्नैवास्तु का स्यापि दुर्वारत्वेन मोक्षप्रसंगः स्यात्तत्राह ॥ यथाहीति

श्रीभगवानुवाच ॥ यावद्देहेंद्रियप्राणैरात्मनः सन्निकर्षणम् ॥ संसारः फलवांस्ताव
दपार्थोप्यविवेकिनः ॥ ५५ ॥ अर्थेह्यविद्यमानेपि संसृतिर्न निवर्तते ॥ ध्यायतो विषया
नस्य स्वप्नेनर्थागमो यथा ॥ ५६ ॥ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत ॥ स एव प्रति
बुद्धस्य न वै मोहाय कल्पते ॥ ५७ ॥ शोकमोहभयक्रोधलोभहर्षस्पृहादयः ॥ अहंकार
स्य दृश्यंते जन्ममृत्युश्च नात्मनः ॥ ५८ ॥ देहेंद्रियप्राणमनोभिमानी जीवोंतरात्मा गुण
कर्ममूर्तिः ॥ सूत्रं महानित्युरुधेव गीतः संसार आधावति कालतंत्रः ॥ ५९ ॥

ति ॥ प्रस्वापः स्वप्नः बह्वनर्थान् ॥ बिभर्ति पुष्णातीति तथा ॥ ५७ ॥ अहंकारलक्षणे देहादिः
सन्निकर्ष एव संसारावलंबनमित्यन्वयव्यतिरेकाभ्यां दर्शयति ॥ शोकमोहादीनेषामदर्शनात्
अहंसत्वेति वद्धेन तस्य सर्वानि प्रतीत्य भावात् ऽहं प्रपन्नात् ॥ सुखादीनां कृशत्वादिवद्दृष्टधर्म
त्वानुपपत्तेरिति भावः ॥ ५८ ॥ ननु यद्यहंकारस्य संसारस्तर्हि मुक्तिरपि तस्यैवेति ॥ मुक्ताव हं
कारावशेषः प्रसज्येत तत्राह ॥ देहेंद्रियाभिमानो यस्य स आत्मैव तेषामंतर्दृत्तो जीवः ॥ अ

तदेवमहंकारकृतं बंधमुपपाद्येदानीं ज्ञानेन तन्निवृत्तौ मुक्तिरित्याह ॥ अमलमिति ॥ वस्तुतोऽम-
लं सूक्ष्मं अज्ञानतत्त्ववक्रभावरूपेणरूपितं ॥ प्रकाशितमैंद्रजालिकतुल्यमिति वा ॥ किं तदाऽहमत
आदीनां द्वंद्वः ॥ यदा मनआदिषु क्रियते तिकर्माहंकरणमनुपासनया निशितेन ज्ञानखड्‌-
गेन छिन्नात् ॥ ९ ॥ तदेव ज्ञानस्वरूपसाधनफलैर्निरूपयति ॥ ज्ञानमिति ॥ विवेको ज्ञानं ॥ तत्र सा-
धनान्याह ॥ निगमो वेदस्तपः स्वधर्मः प्रत्यक्षः स्वानुभवः ॥ अनुमानं तर्कः फलमाह ॥ आद्यंतयो-
रमलमेतद्रूपरूपितं मनोवचःप्राणशरीरकर्म ॥ ज्ञानासिनोपासनया शितेन च्छि-
त्वा मुनिर्गां विचरत्यतृष्णः ॥ १० ॥ ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं ॥
आद्यंतयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये ॥ ११ ॥ यथा नभो वा घनलाबुभृगाणां
रीनागैर्वस्तुगुणैर्न सज्जते ॥ तथाक्षरं सत्त्वरजस्तमोमलैरहंमतेः संसृतिहेतुभिः परं ॥ १२ ॥
दृश्यजगतो मध्येऽपि तदेव केवलं न तु जगदिति (यथा हिरण्यमस्तकं पुरस्तात्पश्चाच्च सर्वे
किं तत् ॥ कालः कलयति प्रकाशयतीति यः ॥ तथा हेतुः कारणं च यत्तदेव परं तदक्षरं भवति ॥ यद-
स्य विश्वस्य कारणं प्रकाशकं च ब्रह्म तदात्मकमेवेतत्र तत्र प्राप्तिमेवं निश्चयफलमुक्त्वा निगमादि-
साधनैर्जीयते यो विवेकः तज्ज्ञानमिति ॥ १० ॥ तत्र नानाभेदव्यवहारालंबनस्यापि विश्वस्य का-
रणमात्रात्मकत्वे सदृष्टांतमाह यथेति ॥ स्वकृतं स्वस्य कुंडलादिरूपेण विरचितं यद्धिरण्यं कीदृशं हि-
रण्मयस्य कुंडलादेः पुरस्तात्पश्चाच्च मध्ये च दृष्टांतिकं कुंडलमित्यादिना व्यपदेशैर्दृश्यं ।

तदेवं कार्यस्य कारणमात्रात्मकतामुक्त्वा प्रकाश्यस्य प्रकाशात्मकतामाह ॥ विज्ञानमिति । इन्द्रियव-
स्त्वयकारस्य प्रत्ययवानः छेदोन्तरो येन जाग्रदादिष्ववस्थास्वयद्विज्ञानं मनः ॥ तदवस्थाकारणं
चयत्रयणत्रयं यत्र कार्यमस्ति मनेकाहंकृत्यपि देवमेवं गुणत्रयकार्यं मनेति विश्वं जगदेतद्येन व्येण
भासमानं ज्ञानमात्रेण समन्वयेन भवति येनानुगतं प्रकाशते इत्यर्थः ॥ तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभातीति ॥ तथा चक्षुषश्चक्षुरुत श्रोत्रं मनसो येन मनो विदुरित्यादिश्रुतेः

विज्ञानमेतत्त्रियवस्तुमं गागुणत्रयं कारणकार्यकर्तृ ॥ समन्वयेन व्यतिरेकतस्तु ये
नैव तत्त्वेण तदेव सत्त्वम् ॥ २० ॥ न यत्स्यात्स्फुरणं यदस्य प्रशान्तमध्ये च तत्र व्यपदेशमात्रे ।
भूतं प्रसिद्धं च परेण यत्स्यान्न तदेव तत्स्यादिति मे मनीषा ॥ २१ ॥

ननु विशेषविज्ञानव्यतिरेके सानन्तर्यं तामेवोपलभामहे ॥ तत्राह व्यतिरेकतस्त्विति समाध्यादौ येय
स्तिन तदेव सत्त्वमिति ॥ २० ॥ पूर्वकालत्रयेष्वव्यभिचारिणः सत्त्वमुक्त्वाव्यभिचारिणोऽसत्त्वसत्यता ।
माह ॥ नयदिति ॥ मध्ये च तत्र स्थित्यां कालेपि किं तु व्यपदेशमात्रे उत्तो यत्नो यद्भूतपरेणाद्यस्येन भूतं जगत्
प्रसिद्धं प्रकाशितं च यत्नं ॥ तदेव कारणप्रकाशकं तावन्मात्रं स्यात्त्रस्थागिति ॥ मम मनीषा बु-
द्धिर्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेः कारणप्रकाशः

यदिरेकेणा कार्यस्य कारणप्रकाश्यकमाह इतिभावः

१

पर्वे सामान्यत ॥ कारणप्रकाशकाभ्यामभेदमुत्पाद्य अस्त्वनेन तदुभयविवेकपूर्वकं प्रपंचस्यत्र स्यामे
दमाह ॥ अविद्यमानरज्जनि यो यं वै विकारिको विकारसमूहः ॥ सएषप्रागविद्यमानो राजसः सर्गः ॥ र
नोह्यारोपणाद्यस्य कार्यभूतस्यार्थः ॥ अवभासते पि ब्रह्मप्रकाशप्रभुस्यार्थः ॥ ब्रह्मतत्त्वस्य यं स्वतः सिद्धं तत
कार्यमित्यर्थः ॥ ज्योतिश्च प्रकाशकमित्यर्थः ॥ अतः कारणादिन्द्रियाणि चार्थास्तन्मात्राणि च
आत्मामनश्च देवानामप्युपलक्षणं विकाराः पंचभूतानि पर्वविचित्रे ब्रह्मण्येव भाती ॥ २१ ॥ उपसंहरति निग
मनपः प्रत्यक्षेतिह्यानुमानैः स्फुटं यथा भवति ॥ तथा ब्रह्मविवेकहेतुभिः ॥ तथापरस्से ह्यादरपवा
अविद्यमानोप्यवभासते यो वैकारिको राजससर्ग एषः ॥ अद्यस्तु यं ज्योतिरतो विभाति ब्रह्मेन्द्रिया
र्थात्मविकारचित्रं ॥ २२ ॥ एवं स्फुटं ब्रह्मविवेकहेतुभिः परापवादेन विशारदेन ॥ छित्वात्मसं
देहमुपारमेत सानंततुष्टोऽखिलकामुकेभ्यः ॥ २३ ॥ नात्मा वपुः पार्थिवमिन्द्रियाणि देवा ह्य
सुर्वायुर्जलं हुताशः ॥ मनोऽन्नमात्रं धिषणा च सत्त्वमहंकृतिः खं क्षितिरर्थसाम्यम् ॥ २४ ॥
हेतुभ्रान्त्वनिरासेन च कीदृशेन विशारदेन निपुणेन गुरुणा निमित्तभूतेनेति वा आत्मविषयं
संदेहं छित्वा सानंततुष्टः सन्नखिलेभ्यः कामुकेभ्य इन्द्रियादिभ्य उपारमेत निःसंगो भवेत् ॥ २५ ॥
एतमेवापवादं प्रपंचयति ॥ वपुरात्मा न भवति पार्थिवत्वात् ॥ घटवत् ॥ इन्द्रियाणि तदधिष्ठातारो दे
वाः असुर्मनः धिषणा बुद्धिः सत्त्वं चित्तमहंकृतिरित्येते आत्मा न भवंति ॥ कुतो ऽन्नमात्रमन्नाप
हृभ्यत्वाच्छरीरवत् वायुर्जलं च हुताशस्तेजः खं क्षितिरपि पंचभूतानि अर्थाः शब्दादयः सा
म्यमव्यक्तं प्रकृतिश्चात्मानो जडत्वात् ॥ घटवदिति यद्वादिशब्देनानुमानान्तराणीह विनानि ॥ न

यथा इंद्रियाणि श्रोत्रादीनि नात्मानः तैजसत्वात् प्रदीपवत् मनोऽन्नमयत्वात् प्राणोपि वायुरूपत्वात् बाह्यवायुवत्
दिग्वादि २५

श्री
भा· प·
टी·
१२७

एवं विकज्ञानतो मुक्तसत्वेन्द्रियादिकृतो गुणदोषसंबंधरूपस्तमाह ॥ समादिनेतिति ॥ मत्कविवि
क्तथात्मनः समसत्वविविक्तथा मसत्त्वरूपेण न तस्य प्रकाशकस्य प्रकाश्यगुणदोषान्न भवेतीति ॥ अ
विद्यातेनोक्तं ॥ प्रसंगतस्तत्वेनावस्थितस्य न केपि गुणदोषा इत्याकाशदृष्टान्तेनाह ॥ यथेति
वाय्वग्न्यादीनां घोषणदहनक्लेदनरजोधूमस्त्रवादिभिर्गतागतैराधिभिः स्वगुणैः शीतो
ष्णादिभिर्वा ॥ एवं मतः अहंकारात्परमत्तरं समस्तिदेह न भिन्नेऽमृते ॥ यद्वा अहंकारस्य समस्तिदेह न
समादिभिः कः कर्मगुणानभियोगप्रवेश्याविविक्ततयात्मनः ॥ विलिप्यमानेनापि किं न
इषणाद्वेन तपनेविंशामेरवः किं ॥ २५ ॥ यथा नभोवाघनलाबुभङ्गयोगैर्नागानैर्वहन्गुणैः
नेसज्जते ॥ तथात्त रसत्त्वरजस्तमोमलैरहंमतेः समस्तिदेहभिः एव ॥ २६ ॥ तथापि सङ्गः प
रिवर्जनीयो गुणेषु माया रचितेषु तावत् ॥ मद्भक्तियोगेन दृढेन यावद्रजोनिरस्येत मनः
कषायः ॥ २७ ॥ यथामयोसाधुचिकित्सितो नृणां पुनः पुनः संतुदति प्ररोहन् एवं मनोप
क्वकषायकर्म कुयोगिनं विध्यति सर्वसंगलम् ॥ २८ ॥
मिति ॥ २९ ॥ मुक्तवदसम्यग्ज्ञानी यस्ये माचरेदित्याह द्वाभ्यां ॥ तथापीति ॥ गुणेषु विषयेषु
रजोरागो मनसः कषायस्तन्निरासनमाह ॥ २७ ॥ एतदेव दृष्टान्तेनोपपादयति ॥ यथे
ति ॥ नृणामामयो रोगः असाधु असम्यक् यथा भवति ॥ तथा ऽपक्वकषाय ॥ कर्माद्यथाकषाया
न् रागादयस्तन्मूलानि कर्माणि च यस्मिंस्तदनपवर्तनं सर्वसंगास्त्वेषु पुत्रादिषु सज्जमानं मनः कुयो
गिनमसम्यग्ज्ञानिनं विध्यति विभ्रंशयति ॥ २८ ॥ ननु कथं विहितविषयसंगो यदि योगभ्रंशः ।

मत्रुष्यमलैर्वेधुशिष्यादिहेषे लिप्त दोरूपस्ष्टेः प्रेमितेत्तया वच्यति यस्मात्तदोषेणापि ये.
पदेतेनेत्म तुष्यादिदेहेदिविभ्रयो जन्मांतरेनतत्कर्मविलाये ॥३१॥ ननु विदुषामपि सर्वेषा
कर्मतुष्टयविहारमिति पुनः संसारः स्यादत आह ॥ करोतीति ॥ लिप्यतोयोसौ जन्नदेहपत्यो
नेनाहिकमकरोतिक्रियते ॥ विक्रियतेति कर्मस्तोपुष्याद्यपियामोनोत्यर्थः केनापि सं
स्कारादिनाचोदित ॥ मनविदांस्वमकृतोदेहेस्थितोपितत्कर्मणा न विक्रियतेनिरहं
कारित्वादुर्षविषादादिभिः संसारंनप्राप्नोति ॥३२॥ किंवान्नानावदेहिककर्मभिर्वि
कृयोतिनोयुविदुनासंतराधर्मत्रुष्यमुनैलिप्तदशापस्ष्टेः ॥ नेषाकृनाभ्या
सवलेनमुपोपुजंतियोगेनववकर्मनेत्र ॥३१॥ करोतिकर्मक्रियतेचर्जनं
केनाप्यसोचोदितआतिपातात ॥ नमत्रविदाम्रकृतोस्थितोपितिह
रस्तं लसस्वातुममतां ॥३२॥ तिष्ठन्नमासीनमुत्तवजंतेषापानुशदतनम
दनमंत्र ॥ स्वभावमनन्यकिमपीहमानमामानमात्तस्पमानिर्नवेद ॥३३॥
यदिसपपपनमदिदियार्थेत्नानातुमानेनविरुद्धमन्यत ॥ नमन्यतेवस्त
कारशोकायतोदेह ॥ नयामनीषीस्वमयोन्यायतिरोदयानम ॥३४॥ मय्यसोनयपपती
त्यादृतिष्ठन्नमिति ॥ उक्तनेसूत्रयतेस्वभावस्पामममस्यदपिदर्शनादिर्देहमानंकुर्वेनमा
त्मानंदेह ॥३५॥ नन्विंद्रियवतः सर्वेषांकयमदर्शनंसंभवति ॥ तत्राहयदिसेति यद्यपि
प्रसन्नोविदिवेत्वानामिंद्रियाणामर्थेपपपति ॥ नत्यापिनानात्यात्मिप्यात्स्वमवदिम
नुमानेनविरुद्धंवाधितंमतं ॥ अस्याद्यामसुख्यतिदिक्रंमनीषीवस्तुतयानमन्यतेहापा
रम्यायमवदेहसंस्कारमावेणात्स्वमविषयस्फुरंतमपतपवस्वयमेवतिरोभवनेयथा

भा
ए.टी
२१

नदेवमात्मानविक्रियतेइत्युक्तंननन्वेतदनुपपन्नंबद्धावस्थयात्मनोमानत्वात्॥शुद्धावस्थ
याचगृह्यमाणत्वात्॥नहिद्वौहृद्येवचात्तेनद्वौहिभावत्यागात्तद्दृष्टीभावेनगृह्यमाणत्वा
विक्रियतेतत्राह॥बंधावस्थायांगुणैःकर्मभिश्चविचित्रमात्मानंकार्यदेहेंद्रियादिलक्षणं॥आ
त्मत्वेनाध्यासेनविविक्तंगृहीतमासीत्तदेवपुनर्ज्ञानेनविविक्तंतेन॥आत्मातनकेनापिरूपेण
गृह्यतेनापिमुच्यते।यभावःशुक्तेः क्रियाफलत्वेनावदात्मनोविकारः॥तस्मात्सर्वात्मनोपिता
त्मनमात्रनिवृत्तिरूपत्वात्तात्मसंस्पर्शित्वंबंधमोक्षयोरतोनविकारइति॥२३॥एतदेव
दृष्टांतेनस्पष्टयति॥यद्यपि॥नत्वेवमेवसहृदादिभिर्विधत्तेकरोतिमेसमीक्षाआ

एवंगृहीतंगुणकर्मविचित्रमज्ञानमात्मन्यविविक्तमंग॥निव
र्ततेतत्त्वनरीक्ष्यैवनगृह्यतेनापिविसृज्यआत्मा॥२३॥य
थाहिभानोरुदयेनचक्षुषांतमोविहन्यान्नतुसद्विधत्ते॥ए
वसमीक्षानिपुणासतीमेहन्यात्तमिस्रंपुरुषस्यबुद्धेः॥२४॥

त्मविद्या॥२४॥आत्मनोनिर्विकारत्वंप्रपंचयति॥एषइत्यनेनापरोक्षतयानित्यमा
मस्यात्मनःप्राप्तिंवारयति॥स्वयंज्योतिरित्यनेनाज्ञानमलापकरणलक्षणांविहे
तिंवारयति॥अनंतमत्तमितिअप्रमेयइति॥ज्ञानलक्षणातिपायाधानेनसंस्कारमहा
नुभूतिरितिदेशकालपरिच्छेदानुभावेनानिवृह्वद्धिविपरिणामापक्षयनाशाव
स्वयंज्योतिष्ट्वादेहेतःसकलानुभूतिविनिपक्षोद्वितीयइतिविकारहेतोरन्यस्याभा
वात्तकोपिविकारइतिदर्शयति॥नत्वेभ्रूतिविषयस्यकथंज्योतिष्ट्वादितमाहवच
सांविरामस्यगोचरेननिवृत्तौसत्यां॥तथाचश्रुतिःयतोवाचोनिवर्तंतेअप्राप्यमनसा

तथा च श्रुतिः केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः केनेषितां वाचमि
मां वदंति चक्षुः श्रोत्रं क उ देवो युनक्ति श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुष
श्चक्षुरिति ॥ २५ ॥ प्रदितो यस्तु मया दर्शितो भेदः स्याद्वा तत्त्वतमात्र ॥ एतावानिति ॥ केवलेत्य
भिन्ने आत्मानं आत्मनि विकल्पयति यत ॥ एतावान्मत्सकाशात् मनसः समो हो भ्रमोऽयं तं
त्वमात्मानमनंते विना यस्य विकल्पस्य सावलंबमात्मयो नास्ति ॥ एवं तो भ्रमस्य वस्तु किंचि
न ॥ नेह नानास्ति किंचन ॥ इंद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश इत्या
दिश्रुतेरित्यर्थः ॥ २६ ॥ केचिन्मनः प्रमत्ता दिग्वतीनप्रपंचस्य बाधायोगाद्द्वैतं त्यक्तो

प्रपंचस्य पूंस्तोति रत्नोप्रमेयो महाद्भुतिः सकलावभूतिः ॥ एकोदितीयो वब
वा
संविरामये नेषितानास वस्त्ररति ॥ २७ ॥ एतावानात्मसमोहो यदविकल्पस्तु के
वले ॥ आत्मन्यनंते स्वमात्मानमवलंबो न युक्त हि ॥ २८ ॥ यत्रात्मा स्मृतिभिर्यो सं प्रपंच
वर्गो समबाधितं ॥ अर्थेनाप्यर्थवादो यद्यप्यद्विनमानिनाम ॥ २९ ॥ ॥

वक्तव्यर्थीकृतं प्रविपादनप्रवत्वेनार्थवादत्वान् द्वैतं सत्यमिति मन्यते तन्नत्वतम
त्यादृश्यादेः तनार्थ्यमिति ॥ यदिति ॥ नानाकृतिभिः नामरूपोपलक्षितं प्रपंचमनात्म
केहि पदैतेयनदबाधितमिति पद्विनमानिना ॥ अथवयमेव पद्विना इमभिमानव
तावेदांते स्वयमर्थवाद इति प्रतीतेः ॥ ननु त्वविदां यतोप्यर्थेनापि विनाप्य न्ना
प्रतीति ॥ तथाहि न तावद्विधिरेकवाक्यत्व ॥ तेषामस्तिपरतोर्थवादत्वे स्यात्तद्वाक्यत्वे
भोक्तृ परमानंदरूपात्मप्रतिपादने कमेविधिपिविषयतां भजेन्न चावधिर्द्व ॥ द्वैतस
नामरूपात्मकतात्पर्यन्नासंचवर्णितत्मकत्वात्स्वमवहित्याय उमानेशौ वारंभ

मनो

एतद्विधिश्रुत्यापिततवादिति ९०

तदेवं ज्ञानयोगं सपरिकरं निरूप्येदानीं तद्विघ्नस्य विघ्नप्रतीकारमाह योगिनश्चेति त्रिभिः ॥ यो
गं युंजतः कायेऽप्युत्पद्यते देवो मनैः उपसर्गो रोगाद्युपद्रवैः अभिभूयते विधिः प्रतीकारः ॥ ४५ ॥ यो
गधारणया सोमसूर्यधारणया संतापशैत्यादीनाम नैवो धृधारणान्वितेर्वातादि ॥ योगास्त
पोमन्त्रौषधैः पापग्रहसर्पादिकृतान् ॥ ४६ ॥ मम ध्यानादिभिः कामादीन् ॥ योगेश्वरानुद्धहन्या
दस्मानादीन् नहस्यात् ॥ ४७ ॥ अन्ये च देहसिध्यर्थं से वै नमस्त्वं कुर्वेति ॥ नहू बयंति ॥ केचिन्नन
दैतेरमेष्ठ्रोपायैर्देहमेवस्तकल्पं जरारोगादिवर्जितं वयसि नाहारेण स्थिरं च कुर्वन्ति ॥ अदंद

योगिनोपकयोगस्य युंजतः कायउत्थितैः ॥ उपसर्गो विहन्येत तत्रायं विहितो विधिः
॥ ४५ ॥ योगधारणया कांश्चिदासनैर्धारणान्वितैः ॥ तपोमन्त्रौषधैः कांश्चिदुपसर्गान्विनिर्द
हेत् ॥ कांश्चिन्ममानुध्यानेन नामसंकीर्तनादिभिः ॥ योगेश्वरानुवृत्त्या वा हन्यादशुभदा
ञ्छनैः ॥ ४६ ॥ केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं ॥ विधाय विविधोपायैरथ
युंजन्ति सिद्धये ॥ ४७ ॥ न हि तत्कुशलादृत्यं तदायासो ह्यपार्थकः ॥ अन्तवत्त्वाच्छरीर
स्य फलस्येव वनस्पतेः ॥ ४८ ॥ योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात् ॥ तच्छ्रद्द
ध्यान्न मतिमान्योगमुत्सृज्य मत्परः ॥ ४९ ॥
परकायप्रवेशादिसिद्धये ॥ न महारणहृपयोगं
युंजति ॥ नवज्ञाननिष्ठारूपं ॥ ४५ ॥ कुशलैः प्राज्ञैरादरणीयं न भवति ॥ वनस्पतिर्वदा
लो वस्त्याधिशारीरं तत्फलवन्नश्वरं इत्यर्थः ॥ ४८ ॥ नत्तुक्ष्चिन्तमा ध्येगात्वेनापि प्राणा
यामादियोगेऽक्रियमाणे जरारोगाद्यभावो हश्यते ॥ सत्यं ॥ तथापि समाधिशून्यस्य
न तत्रसक्तेत्याह योगमिति ॥ तत्ता देहसिद्धिं न श्रद्दध्यात् ॥ न विश्वसेत् ॥ ४९ ॥ तदेवं वि
घ्नप्रतीकारैर्योगं कुर्याद्वित्युक्तं मत्कारणस्यात् न विघ्नयं कापीत्याह ॥ ५० ॥

योगचर्यामिति॥ विचरन्नाचरन्नत एवानुमत्तः॥ अनुमत्तः तिर्यक्समः सदा मत्तादिविज्ञः॥ साचमदपा
श्रयस्य निवर्त्तते॥ अतो नरायैर्विहन्यतः॥ सानंदस्वरूपो भवतीति॥४४॥ समाहृतस्य योगेन समस्तोप-
विषयस्या॥ मत्त्वेम्मुस्यन्नतमो भक्तिं सुक्तो पुनरुपादिशत्॥ ४५॥ इति श्रीभागवतभा॰ मेका॰ षोष्टाविशः
२८॥ कृतविंशोत्तयः पूर्वं विस्तरेणानिरूपितः भक्तियोगस्तमेवाद्य सभक्तायसमासतः॥१॥ अतिल्लेश
मिवालक्ष्य योगे संगोक्तसंपदि॥ सुलोपायं पृतः कृष्णं सुद्धवः परिपृच्छति॥ अनात्मनः अवशीकृत
मनसः॥ अजसा अयासेन यथा सिद्धेत्॥ तत्तथा जसा अबोधं यथा तथ मे ब्रूहि॥१॥ सुदुष्करतामप
योगचर्यामिमां योगी विचरन्मदपाश्रयः॥ नानरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः॥४४॥ इ
ति श्रीभागवते महापुराणे एकादशस्कंधे परमार्थवर्णनं नामाष्टाविंशोध्यायः॥२८॥ उद्धव उवा
च॥ सुदुष्करामिमां मन्ये योगचर्यामनात्मनः॥ यथांजसा पुमान्सिद्ध्येत्तन्मे ब्रूह्यंजसाच्युत॥१
प्रायशः पुंडरीकाक्ष युंजंतो योगिनो मनः॥ विषीदंत्यसमाधानान्मनोनिग्रहकर्षिताः॥२
अथात आनंददुघं पदांबुजं हंसाः श्रयेरन्नरविंदलोचन॥ सुखं नु विश्वेश्वर योगकर्मभिस्त्वन्मा
ययामी विहता न मानिनः॥३॥ यतिश्चायशाद्रुति॥ मनोयुंजतो गरकृतः॥ विषीदंति क्लिश्य
ति कुतो समाधानात्॥ चतुराः केचनानंददुघं समस्तानंदपरिपूरकं तव पदांबुजमेव सुखं यथा भ
वति॥ तथा तु निश्चितं श्रयेत्॥ मेवं ते॥ अमी त्वन्मायया विहताः॥ केपि योगकर्मभिः मानिनः॥ संतो
न श्रयंते यदामी तद्वहेतः त्वन्मायया न विहतः अतएव योगकर्मभिः॥ कृतामानिनो न भवंति
अस्येतत्त्वन्मायया मोहिताः संतो वयं योगज्ञा वयं कर्मकुशला इति केवलं गर्विता भवंति न तु

श्री॰
भा॰ प॰
टी॰
१११

ऽनन्यशरणेषु दासेषु तवात्मसात्त्वं तदधीनत्वं ॥ यद्यथा नंदगोपीबलिप्रभृतिषु पतत् किं चित्रं नाश्चर्यं
मित्यर्थः ॥ यतो यो भवान् श्रीरामरूपेण सह मृगैर्वानरैः सह सख्यादिकं सख्यमिति यावद्रोचयत्स्वयं कृतवान्
कथंभूतः ईश्वराणां ब्रह्मादीनां यानि श्रीमंति किरीटानि तेषां तटाग्राणि तैः पीडितविलुठितेन पादः
पीठं यस्य सन् तथाभूतोपि सन् ॥४॥ अतस्त्वां परित्यज्य को नाम संश्रयेदित्याह तं त्वेति ॥ तमेवंभूतं त्वां को नु
विसृजेत ॥ कथंभूतः स्वकृतवित् ॥ बलिप्रह्लादादिषु तथा कृतमनुजानन् ॥ यद्वा स्वस्मिन्नेवानर्थ्या
मितया कृतं नमस्कारं विद्वान् ॥ तदेवाह ॥ अखिलात्मदयितेश्वरमखिलस्य जगत आत्मा चेन दयिता च ॥ आत्म

किं चित्रमच्युत तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्त्वं ॥ योरोचयत्सह मृगैः स्वय
मीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः ॥४॥ तं त्वाखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं
स्वकृतविद्विसृजेत को नु ॥ को वा भजेत्किमपि विस्मृतयेनुभूत्यै किं वा भवेन्न तव पादरजोजु
षां नः ॥५॥ (त्वा देवदयितं श्रेष्ठं सम्मेव्यं ईश्वरत्वादेव अपरं ईश्वरमादेवं प्रभजनीयं ॥ किंचाश्रितानां स
र्वार्थदं ॥ तर्हि किंफलोद्देशेन ॥ अहं सेव्यः नहि नहि किमप्यस्ति कृष्टं स्वर्गादि नयाद्दत्तमपि को वा भजे
त्सेवेत ॥ कथंभूतं तत् यत्केवलं भूत्यै ऐंद्रियभोगाय ॥ अनु अनंतरमेव तद्विस्मृतये भवति ॥ यद्वा नन्व
सेविकं देवतांतरं ॥ धर्मज्ञानादि साधनं वा भूत्यै ऐश्वर्याय संसारस्य विस्मृतये मोक्षाय वा को न भजेत्
कोपि ॥ ननु न तत्साधनैर्विना भोगमोक्षादिफलं कथं स्यादित्यत आह ॥ किं वेति ॥ तत्कं वा वैः साधनैः सप
त्तिः पुरुषार्थचतुष्टये ॥ तथा विना तदास्मीति न रोचनादायगणाअयद्द इति ॥५॥ आत्मानमन्यजनवा
नीक्रमः कृतोपकारस्य तथ्यात्मनिवेदनेनैव निष्कृतिर्नान्यथेत्याह ॥ नैवेति ॥ ॥ ≈ ॥ ≡ ॥

प्रपचितिं प्रत्युपकारमात्मनः उपमितिं याचन्ते॥ कवयो ब्रह्मविदोऽपि नैव प्राप्नुवन्ति यतः त्वत्कृतमुप
कारं स्मरन्तः ऋद्धमुदः उपचितपरमानंदाः उपकारमेवाहुः॥ यो भवान्॥ बहिराचार्यवपुषा अन्तश्चैत्तरू
पेणाशुभं विषयवासनां विधुन्वन् निरस्यन् स्वगतिं॥ निजरूपं प्रकटयति॥ तस्मात्त्वदृणमेव मे नोद्धरति जगत्क्रीडनकं क्रीडोपकरणं यस्य सः॥ ननु जगत्सृष्ट्यादिना ब्रह्मेशादयः क्रीडंति॥ तत्राह॥ स्वशक्ति
भिः सत्त्वादिभिर्गृहीतं मूर्तित्रयं येन सः॥ सप्रेमप्रेमसहितं मनोहरं स्मितं यस्य सः सप्रेमया तत्या
तेनोपयन्त्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरन्तः॥ योऽन्तर्बहिस्तनुभृता
मशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति॥ ६॥ शुक उवाच॥ इत्युद्धवेनात्यनुरक्त
चेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेममनोहर
स्मितः॥ ७॥ श्रीभगवानुवाच॥ हन्त ते कथयिष्यामि मम धर्मान् सुमंगलान्॥ यान् श्रद्धयाचरन्
मर्त्यो मृत्युं जयति दुर्जयं॥ ८॥ कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन्॥ मय्यर्पितमनश्चि
त्तो मद्धर्मात्ममनोरतिः॥ ९॥ देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान्॥ देवासुरमनु
ष्येषु मद्भक्ताचरितानि च॥ १०॥ पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान्॥ कारयेद्गीतनृत्
यादिभिर्वा॥ ७॥ हन्तेति सहर्षसंबोधनं सुमंगलान् स्वरूपान्॥ सुसंस्मार्य दुर्जयमन्यैरुपायैः॥
धर्मानेवाह॥ कुर्यादिति त्रयोदशभिः शनैः स्मरन्॥ ध्यानकैः असंरंभतः कुर्यादित्याह॥ मय्यर्पितम
नश्चित्ते संकल्पविकल्पसाधनात्मके येनान्तःपव समर्पितवान्मम नमनसोः रतिर्यस्य सः॥ ९॥ पु
ण्यदेशाल्लक्षणमद्भक्तैरिति॥ देवादिषु येये मद्भक्तास्तेषामाचरितानि कर्माणि चाश्रयेत॥ १०॥

एतं गाभक्तिमाह ॥ मामिति त्रिभिः ॥ सर्वभूतेष्वात्मनि चात्मानमीश्वरं स्थितं मां ईक्षेत ॥ कथमेवं वक्ष्यमाण
वैषम्यहितत्वाह ॥ बहिरंतः पूर्णमित्यर्थः ॥ तत्कृतममताचरणं तदपि कृतः यथा खमसंगमप्यदित्यर्थः
१२ ॥ हे महाद्युते इति प्रान्तः अनेन प्रकारेण केवलं ज्ञानं दृष्टिमाश्रितः सन् ॥ सर्वाणि भूतानि मं
द्भावेन मन्यमानः ॥ सभाजयन्पूजितो मत इत्युत्तरेणान्वयः ॥ १३ ॥ ननु तमायमेव पकरूपेण सभाजन
मयोग्यमेव स्यात् स्वपश्वात्मातिक्रमादित्याशंक्य तामेव ज्ञानदृष्टिं प्रपंचयति ब्राह्मण इति विषमे
ष्वपि समदृक् समभावेन परूपत्वेन ममैव चतुर्थी दर्शयति ॥ ब्राह्मणे पुक्कसे स्तेने ज्ञानिनो वैषम्य पुक्क

मामेव सर्वभूतेषु बहिरंतरपावृतम् ॥ ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥ १२ ॥ इति सर्वाणि
भूतानि मद्भावेन महाद्युते ॥ सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः ॥ १३ ॥ ब्राह्मणे पुक्कसे स्तेने ब्र
ह्मण्येऽर्के स्फुलिंगके ॥ अक्रूरे क्रूरके चैव समदृक्पंडितो मतः ॥ १४ ॥ नरेष्वभीक्ष्णं मद्भावं पुंसो भाव
यतोऽचिरात् ॥ स्पर्धासूयातिरस्काराः साहंकारा वियंति हि ॥ १५ ॥ विसृज्य स्मयमानान्स्वान्दृशं व्रीडां च
दैहिकीं ॥ प्रणमेद्दंडवद्भूमावाश्वचंडालगोखरं ॥ १६ ॥

सोऽयं ज्ञाननिविशेषः स्तेने ब्रह्मण्ये दाहरिणोश्च
घ्रस्वादाहरिणा ब्रह्मणेपि वा ब्राह्मणेभ्यो दानरीतिकर्मतः अर्के विस्फुलिंगे इति गुणतः ॥ अक्रूरे शांते क्रूरे च
निम्नभावतः ॥ १४ ॥ नरेष्वभीक्ष्णं दृष्टिं कुर्वतः सद्यः फलविशेषमाह नरेष्विति स्पर्धासूयादयः
तस्मिन्नहंकारश्चेति निश्चितं वियंति नश्यंति ॥ १५ ॥ अतो नतयामीश्वरदृष्ट्या सर्वान्प्रणमेदित्याह विस
ृज्येति ॥ स्मयमानान् हसतः स्वान्स्वीयान् तथा दैहिकीं दृशं व्रीडां च अहं उत्तमः सन्कथं नीचं नमामीति दृष्टिं तथा दृष्ट्या यो
व्रीडा लज्जा तां च विसृज्य श्वचंडालादीनभिव्याप्य प्रणमेत् ॥ १६ ॥

२४

एवं पंचभिः श्लोकैरुक्तायाः ॥ समदृष्टेरुपायमाह द्वाभ्यां यावदिति ॥१७॥ तस्यैवं कुर्वतः पुंसः सर्वं ब्रह्मात्मकमेव भवति ॥ कुत आत्ममनीषया सर्वत्रेश्वरदृष्ट्या या विद्या तया ॥ ततः परितो ब्रह्मैव पश्यन्सर्वतः क्रियामात्रादुपरमेत ॥१८॥ किमयमेवोपायोऽस्ति वान्योऽपीत्यपेक्षायां सन्निवहतः समीचीनस्त्वयमेवेत्याह ॥१९॥ अयं हीति ॥ भगवद्धर्मलक्षणोपायस्य समीचीनत्वमेवोपपादयति द्वाभ्यां ॥ न हीति ॥ अंग हे उद्धव अनाशिषो निष्कामस्य मद्धर्मस्योपक्रमे सति ॥ अण्वपि ईषदपि वै

यावत्सर्वेषु भूतेषु मद्भावो नोपजायते ॥ तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः ॥१७॥
सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया ॥ परिपश्यन्नुपरमेत्सर्वतो मुक्तसंशयः ॥१८॥
अयं हि सर्वकल्पानां सध्रीचीनो मतो मम ॥ मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः ॥१९॥
न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि ॥ मया व्यवसितः सम्यङ्निर्गुणत्वादनाशिषः ॥२०॥
यो यो मयि परे धर्मः कल्प्यते निष्फलाय चेत् ॥ तदायासो निरर्थः स्याद्भयादेरिव सत्तम ॥२१॥
एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणां ॥ यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतम् ॥२२॥

गुणादिभिर्नाशो नास्त्येव यतो मयैव निर्गुणत्वादयं धर्मः सम्यग्व्यवसितो न तु मतवादिमुखेन केनचित् ॥२०॥ किंच यो य इति ॥ अयमर्थः किं बहुना यं धर्मं स्वनश्वरमिति यतो लौकिकोऽपि यो यो निरर्थ आयासः ॥ सोऽपि मयि परे निष्फलाय चेत्कल्प्यते निष्कामतयार्पितस्तर्हि धर्म एव स्यात् निरर्थायासे दृष्टान्तः यथा भयशोकादिहेतोः ॥ पलायनाक्रन्दनादिर्न्यासस्तद्वत् २१ अतो मद्भजनमेव बुद्धेर्विवेकस्य मनीषाया आत्मनः फलमित्याह ॥ एषेति तामेव दर्शयति

महाप्रकरणार्थमुपसंहरति ॥ एषतेभि ॥ २४ ॥ किंचाज्ञानाविज्ञाने ॥ यएतदनुसंध्यानंक
थनपठनश्रवणपरायणामप्यनेदेवफलंभवतीत्याहचतुर्भिः सविविक्तमिति मयासाव
विविक्तदमोक्षरेमेनदाश्व्यानमपियोधारयेत् ॥ अनुसंदध्यात् ॥ सब्रह्मगुह्यंवेदेपिरहस्यं ।
२५ ॥ सुपुष्कलंयथाभवति ॥ तेभ्याश्वमदायस्वसंप्रदद्दातीतितथातस्सज्ञानोपदेष्टुः २६
यएतेमभिहितः कृत्स्नोब्रह्मवादस्यसंग्रहः समासव्यासविधिनादेवानामपिदुर्गमः
२३ ॥ अभीक्ष्णशस्तेगदितंज्ञानंविस्पष्टयुक्तिमत् ॥ एतद्विज्ञायमुच्येतपुरुषोनष्टसं
शयः ॥ २४ ॥ सविविक्तंतवप्रश्नंमयैतदपिधारयेत् ॥ सनातनंब्रह्मगुह्यंपरंब्रह्माधि
गच्छति ॥ २५ ॥ यएतन्ममभक्तेषुसंप्रदद्यात्सुपुष्कलं ॥ तस्याहंब्रह्मदायस्यददाम्या
त्मानमात्मनः ॥ २६ ॥ यएतत्समधीयेतपवित्रंपरमंशुचि ॥ सपूयेताहरहर्मांज्ञान
दीपेनदर्शयन् ॥ २७ ॥ यएतच्छ्रद्धयानित्यमव्यग्रःशृणुयान्नरः ॥ मयिभक्तिंपरांकुर्व
न्कर्मभिर्नसबध्यते ॥ २८ ॥ अप्युद्धवत्वयाब्रह्मसखेसमवधारितम् ॥ अपितेविगतो
मोहःशोकश्चासौमनोभवः ॥ २९ ॥ नैतत्त्वयादाम्भिकायनास्ति
कायशठायच ॥ अशुश्रूषोरभक्तायदुर्विनीतायदीयताम् ॥ एतैर्दोषैर्विहीनायब्रह्म
समधीयेत ॥ उच्चैःपठेत्परमंशुचिश्रवणेषामपिशोधकंस्वयेनशोधयेत् ॥ २८ ॥ समप्रा
तानुत्सको ॥ पुनरुपदेशमात्माश्वायेनरष्टुछति ॥ अपीतिअपिकिं ॥ २९ ॥ उपधारितंसा
फमाफलंप्याह ॥ नैतदिति ॥ अन्नहष्टेनमाह ॥ दाम्भिकायवञ्चकाय ॥ ३० ॥ शुश्रूषणायपि

भा॰
प॰ टी॰
१२९

किंचयद्यपित्वमसन्निधानाद्देवगतस्तथाप्यनुकंपिता ॥ भवता विज्ञानमयः प्रदीपस्त्वत्समर्पितः स्व
माययावृतस्ततः पुनः समर्पितः प्रतस्तवकृतज्ञः ॥ यस्त्वयाह्यतमेवं यदुभ्रातानिरुक्तोनामवदीयं
पादमूलंहित्वान्यच्छरणंसमीपाद्याद्वा श्रयेत ॥ ३८ ॥ किंचदाशार्हादिषु तव यायः समायया स्नेहपाशः
प्रसारितः सत्वयैवात्मनत्मज्ञानशास्त्रेण वृक्णः छिन्नः ॥ ३९ ॥ एवंयद्यपि तथा बहुकृतं तथाप्यनी
शमर्पितो मे भवतानुकंपिताः इत्याययविज्ञानमयः प्रदीपः ॥ हित्वाहं तत्तवपादमूलं कोन्य
त्समीयाच्छरणंत्वदीयम् ॥ ३८ ॥ वृक्णाश्चमे सुदृढः स्नेहपाशो दाशार्हवृष्ण्यन्धकसात्वतेषु ॥ प्र
सारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोधहेतिना ॥ ३९ ॥ नमोस्तु ते महायोगिन्प्र
पन्नमनुशाधि माम् ॥ यथा त्वच्चरणाम्भोजे रतिः स्यादनपायिनी ॥ ४० ॥ श्रीभगवान् ॥ गच्छोद्धव
मयादिष्टो बदर्याख्यं ममाश्रमम् ॥ तत्र मत्पादतीर्थोदे स्नानोपस्पर्शनैः शुचिः ॥ ४१ ॥ ईक्षयालक
नंदाया विधूताशेषकल्मषः ॥ वसानो वल्कलान्यंग वन्यभुक्सुखनिःस्पृहः ॥ ४२ ॥ तितिक्षु
र्द्वंद्वमात्राणां सुशीलः संयतेंद्रियः ॥ शांतः समाहितधिया ज्ञानविज्ञानसंयुतः ॥ ४३ ॥ मत्तो
नुशिक्षितं यत्ते विविक्तमनुभावयन् ॥ मय्यावेशितवाक्चित्तो मद्धर्मनिरतो भव ॥ ४४ ॥ अतिव्र
ज्यार्थं ये रत्याहनमरति ॥ ग्रनुष्यापि ग्रनुशी अगतीस्तिस्रो मामेष्यसि ततः परं ॥ ४५ ॥
ल्लय ग्रनुसीत्तयग्रनुशासनीय माह ॥ यथेति मुक्तावचनपायिनी ॥ ४० ॥ तद्गमको मामित्यं गीत्क
मतत्यापि मयादिष्टो लोकसंग्रहार्थमेतावत्कविरुपाद ॥ गच्छेत्यादि दिष्टो नियुक्तः ॥ ४१ ॥ स्नानादिः प्र
वैमे वमत्पादतीर्थोदकभूतायामलकनंदाया गंगायाईक्षयावसानः परिदधानः ॥ ४२ ॥ द्वंद्वमा

पतज्ज्ञानेन च पुमान्॥ कृतार्थो भवतीत्याह नैतदिति॥ अत्र दृष्टान्तमाह पीत्वेति पीयूषं स्वादु॥३२॥ न
वमृतेति बहूनि त्वेयानि तत्फलसाधनानि संसन्ति अभक्तानां॥ भक्तस्य तु सर्वमहमेवेत्यतो मदेकपा
रायणो भवेत्याह ज्ञाने इति॥ ज्ञानादौ यावान्यमोदिलक्षणश्चतुर्विधोर्थः तावान्सर्वोपि नेहमेव॥ न च ज्ञा
नेमोक्षः कर्मणि विहिते धर्मः स्वाभाविके तु कामः योगे त्वणिमादिसिद्धयः वार्तायां कृष्यादावर्थः
दण्डनीतावैश्वर्यमिति॥ सिद्धैश्वर्ययोरपि कामान्तर्गतत्वाच्चतुर्विध॥३३॥ ज्ञानेऽत्यातुआह मर्त्यइ
नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्यते॥ पीत्वा पीयूषममृतं पातव्यं नावशिष्यते॥३२॥ ज्ञा
ने कर्मणि योगे च वार्तायां दण्डधारणे॥ यावानर्थो नृणां तात तावांस्तेऽहं चतुर्विधः॥३३॥ मर्त्यो
यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे॥ तदामृतत्वं प्रतिपद्यमानो मयात्मभू
याय च कल्पते वै॥३४॥ श्रीशुक उवाच॥ स एवमादर्शितयोगमार्गस्तदोत्तमश्लोकवचो
निशम्य॥ बद्धाञ्जलिः प्रीत्युपरुद्धकण्ठो न किंचिदूचेऽश्रुपरिप्लुताक्षः॥३५॥ विष्टभ्य चित्तं
प्रणयावघूर्णं धैर्येण राजन्बहुमन्यमानः॥ कृताञ्जलिः प्राह यदुप्रवीरं शीर्ष्णा स्पृशंस्त
च्चरणारविन्दं॥३६॥ उद्धव उवाच॥ विद्रावितो मोहमहान्धकारो य आश्रितो मे तव सन्निधा
नि॥ यदा त्यक्तसमस्तकर्मा सन्मे निवेदितात्मा भवति॥ तदासौ मे विचिकीर्षितः विशिष्टं कर्तुमि
ष्टो भवति॥ ततश्चामृतत्वं मोक्षं प्रतिपद्यमानो मयात्मभूयाय मदैक्याय मदैकाशमत्समाने
श्वर्याय वेति यावत्॥ कल्पते योग्यो भवति वै ध्रुवम्॥३४॥ आदर्शितो योगमार्गो यस्मै सः॥३५॥
प्रणयावघूर्णं द्रुमितं चित्तं धैर्येण विष्टभ्य बहुमन्यमानः आत्मानं कृतार्थं मन्यमानः॥३६॥

हरिमेधसा संसारं हरति मेधा यस्य तेन श्रीकृष्णेन अनुग्रहं दर्शयतोपि ॥ अद्वन्द्वः द्वन्द्वविनिर्मुक्तोपि उ
पक्रमे निर्गमनसमये ॥४५॥ किंच सुदुस्त्यजः स्नेहो यस्मिन् ॥ तेन वियोगात् कातरो भीतः अत
एव तं परिहातुमशक्नुवन् ॥ आतुरो विह्वलः सन् कृच्छ्रं कष्टं यथा यौ प्राप ॥ ततश्च भर्तुः पादुके तेन
दत्ते पादुके मूर्ध्नि बिभ्रत् ॥ अतिनिर्वेदं रूपयन् ॥ तदा तु यातः पुनः पुनर्नमस्कृत्य ययौ ॥ अत्र वद
न्तोऽनुगतं मन्त्रः पादविस्मरणं तमइत्यादिरती यस्तु योपक्रमो ह्यारेण बदरिकाश्रमं गच्छ
न् भगवतः प्रभासयात्रासु उपक्रमस्थाने रुद्धतोऽनुगतः सन् ॥ उपसंहृतनिजकुलं भगवंत

शुक उवाच ॥ स एवमुक्तो हरिमेधसोद्धवः प्रदक्षिणं तं परिसृत्य पादयोः ॥ शिरो निधा
याश्रुकलाभिरार्द्रधीर्न्यषिंचदद्वन्द्वपरोप्युपक्रमे ॥४५॥ सुदुस्त्यजस्नेहवियोगकातरो
न शक्नुवंस्तं परिहातुमातुरम् ॥ कृच्छ्रं ययौ मूर्धनि भर्तृपादुके बिभ्रन्नमस्कृत्य ययौ
पुनः पुनः ॥ ततस्तमंतर्हृदि सन्निवेश्य गतो महाभागवतो विशालां यथोपदिष्टां जग
देकबंधुना ततः समास्थाय हरेरगाद्गतिम् ॥४७॥ य एतदानंदसमुद्रसंभृतं ज्ञानामृ
तं भागवताय भाषितं ॥ कृष्णेन योगेश्वरसेवितांघ्रिणा सच्छ्रद्धयासेव्य जगद्विमुच्यते

मेकांतेऽदृष्ट्वा तत्कालयामेन मैत्रेयेण सह पुनः कृपया भगवतोपदिष्टं तत्त्वमाकलय्य तद्वा
यथा यावित्तिरुद्धवश्रम ॥४६॥ विशालां बदरिकाश्रमं गतः सन् हरेर्गतिं गमगात् ॥ कथंभूतां ते
नैव जगदेकबंधुना यथोपदिष्टां तदा स्वतन्त्रं प्रतिपद्यमानो मया त्वं भूयाय चकृत्यमेने नेत्र
तिष्ठन्गतोसि सोमामेष्यसि ॥ ततः परमिमेव शुक्र प्रकारा ॥४८॥ आनंदसमुद्रो भगवद्रू
किमाऽतंत्त्वसि संभृतमेकीकृतं ॥ एतद्यः सच्छ्रद्धया आसेव्य रेषदपि सेवितावर्तंते स विमुच्य

ते इति किंवक्तव्यं तत्सगतोनगादमिविद्यक्तेऽस्मर्थः ४७

पूर्वंहिकृतोपदेशोज्ञानाद्वहंपरमात्मतिभवभयमिति ॥ भवःसंसारःअपवनरागोरागादिनिमित्तंतद्भ
यंनिहतानाचभस्मवर्गाणांवयथायोगमपहतंयोमत्तेवद्धपन्नडे ॥ उद्धृतवान् ॥ तदेवाह वे
दसारमेकंकिंततज्ञानविज्ञानहृमंव ॥ तत्सारंप्रेष्ठंचभगवता ॥ भगोपयासुष्णमेकोपपत्रे
वामतत्रपूपहृतति ॥ यथासपिकृतवेदाद्वसारंगोके ॥ उदपिकृष्णंकं ॥ तद्धामभयंमत्सवगीनुया
वयत् ॥ ततत्तोस्मीति ॥ ४८ ॥ येनानुकंपितविवस्वद्धवमश्नातिरायैः ॥ तेवदेपरमातरंतंदनने
दहविताम् ॥ इतिश्रीभागवतेएकादशस्कंधेएकोनत्रिंशोध्यायः ॥ २९ ॥ त्रिंशेतुयदुपति

भवभयमपहंतज्ञानविज्ञानसारंनिगमकृदुपजन्हेभृंगवद्वेदसारं ॥ अमृतमुदधि
वश्चापाययद्भृत्यवर्गान्पुरुषमृषभमाद्यंकृष्णसंज्ञंनतोस्मि ॥ ४९ ॥ इतिश्रीभागवते
महापुराणेएकादशस्कंधेभगवदुद्धवसंवादेउद्धवस्यबदर्याश्रमप्रवेशोनामैकोन
त्रिंशोध्यायः ॥ २९ ॥ राजोवाच ॥ ततोमहाभागवतेउद्धवेनिर्गतेवनं ॥ द्वारवत्यांकि
मकरोद्भगवान्भूतभावनः ॥ १ ॥ ब्रह्मशापोपसंसृष्टेस्वकुलेयादवर्षभः ॥ प्रेयसीं
सर्वनेत्राणांतनुंसकथमत्यजत ॥ २ ॥
मेमोसूलककलतोहरिःस्वधामगंतमन्विकमं
तहारानेजेकुलम ॥ ५ ॥ शिरागायपुर्वद्धोरसुपतितिमंदिमोमुले ॥ कथावसानेतत्रेवविशे
षंपरिपृच्छति ॥ ५ ॥ ततइतित्रिभिः ब्रह्मशापोपसंसृष्टेकुलेसम्पंथमावः भगवतिनदि
शापंप्रभवति ॥ यादवनाशकरणाच्चसोपिकथंविनाशमतं किमकरोदिति ॥ त
देतद्युक्तंकथमत्यजदिति ॥ सर्वनेत्राणामितिसर्वेद्रियोपलक्षणं ॥ तम्पचयति ॥ २
॥ ॥

प्रत्याकृष्टमिति॥ यस्मिन्नरूपेलग्नेनव्रजेपरावर्तेयितमबलानशेकुः॥ यच्चकर्णांरंध्रेणप्रविष्टं नतत्तामा
त्मनिलग्नंमत्निग्विलसिवतिष्ठति॥ ततोनसरतिनतिर्गच्छति॥ यस्यश्रीःशोभासुंकीर्ण्येमातांकवीनांवा
वीरंतिमुल्लासविशेषंजनयति॥ तेषांमनेनगतस्त्वतांजनयति किंनवक्तव्यं॥ यच्चविलोक्यवित्रिलो
कंजनस्यरयोस्यिनंदृष्ट्वापुथिमत्तनास्तत्तामप्सारूप्यमीयुः प्रामाः तन्केनरूपेणात्मजनदित्यन्वयः॥ ३॥ दि
प्रत्याकृष्टंनयनमबलायत्रलग्नंनशेकुःकर्णाविष्टंनसरतिततोयत्समनामात्मलग्नं॥ यच्छ्रीः
वाचांजनयतिरतिंकीर्त्यमानंकवीनांदृष्ट्वात्रिलोकीधियगतंयच्चतत्साम्यमीयुः॥ ३॥ रुचि
स्वाय॥ दिविभुवंतरिते चमदोत्पातानमुत्थितान॥ दृष्ट्वासीतानन्धर्मायोक्तःसः प्राहयदूति
दं॥ ४॥ श्रीभगवानुवाच॥ एतेघोरामहोत्पाताहार्वत्यामकेतवः॥ मुहूर्तमपिनस्थेयमत्रनोयदुपुंग
वाः॥ ५॥ स्त्रियोबालाश्चवृद्धाश्चशंखोद्धारंव्रजंत्वितः॥ वयंप्रभासंयास्यामोयत्रप्रत्यक्सरस्वती॥ ६॥
तत्राभिषिच्यशुचयउपोष्यसुसमाहिताः॥ देवताःपूजयिष्यामःस्नपनालेपनार्हणैः॥ ७॥ ब्राह्मणा
स्तुमहाभागान्कृतस्वस्त्ययनावयं॥ गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः॥ ८॥ विधिरेषह्यरि
ष्टघ्नोमंगलायनमुत्तमं॥ देवद्विजगवांपूजाभूतेषुपरमोभवः॥ ९॥ विस्मृर्यपरिवेशादीन् भुविभू
कंपादीन्॥ अंतरिक्षेदिग्दाहादीन्॥ महोत्पातान्स्वयमेवोत्पादितत्वादपिदूष्प्रतीकारान्॥ ४॥ यमस्यकेत
वोध्वजाइवमृत्युसूचकाअत्रक्षणं नोस्माभिः॥ ५॥ प्रत्यक्पश्चिमवाहिनी॥ ६॥ अभिषिच्यस्नात्वा॥ ७॥ ब्राह्म
णाश्रयेःकृतशांतिकाःसंतोगवादिभिःपूजयिष्यामः॥ ८॥ विधिःप्रतीकारःमंगलायनंच॥ किंचदे

२॥

मधुद्विषो वाक्यमाकर्ण्य तथेत्यभिनंद्य उत्तीर्य समुद्रं ॥११॥ सर्वश्रेयोपबृंहितमित्यत्र संधिरार्षः भगव
ता उक्तैरपि सर्वैः श्रेयोभिः सहितं चक्रुः ॥१२॥ पीयत इति पानं मैरेयकं मदिराविशेषं मधुस्वरं दिष्टेन
दैवेन विभ्रंशिता धियः ॥ नदस्य द्रवतस्तस्याने तद्भवितमिति भावः यस्य द्रवैः रसैः ॥१३॥ कृष्णमायावि
मूढानामिति मुख्यो हेतुः संघर्षः कलहः ॥१४॥ ततो युयुधुरित्याह ॥१५॥ पतत्प इतस्ततश्चलंत्यः पताका येषु तैः

इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः ॥ तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः ॥ तस्मिन्भगव
तादिष्टं यदुदेवेन यादवाः ॥ चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितं ॥१२॥ ततस्तस्मिन्महापानं
पपुर्मैरेयकं मधु ॥ दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः ॥१३॥ महापानाभिमत्तानां वीरा
णां दृप्तचेतसां ॥ कृष्णमायाविमूढानां संघर्षः सुमहानभूत् ॥१४॥ युयुधुः क्रोधसंरब्धा वे
लायामाततायिनः ॥ धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः ॥१५॥ पतत्पताकै रथकुंजरादि
भिः खरोष्ट्रगोभिर्महिषैर्नरैरपि ॥ मिथः समेत्याश्वतरैः सुदुर्मदा न्यहन् शरैर्दद्भिरिव द्विपा वने
प्रद्युम्नसांबौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी ॥ सुभद्रसंग्रामजितौ सुदारुणौ गदौ सु
मित्रासुरथौ समीयतुः ॥१७॥ अन्ये च ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः ॥ अन्यो
न्यमासाद्य मदांधकारिता जघ्नुर्मुकुंदेन विमोहिता भृशं ॥१८॥ दाशार्हवृष्ण्यंधकभोजसात्वता म

रथादिभिर्मिथः समेत्य मदत्यक्त्वा निजत्वर्थः ॥ नद्भिर्दंतैः द्विपा ॥१६॥ मिथः समेत्य त्यक्तसख्यपूर्वैः श्वशुरज्ञात्यादिव
तर्भिः गदौ श्रीकृष्णसहभ्रातेकः ॥ पुत्रश्चापरस्तौ सुमित्रासुरथाविति द्वयोर्मात्रा सुरथानामावाकि
तः ॥१८॥ मदांधेन मदेन मनसा बलात्कारिता ॥१९॥ दाशार्हादयो नव नानापृथपाः अर्बुदा माथुराः शूरसेनाश्च तन्नदे

भात्यभिख्यातिमिरावादिशब्दानां सम्प्रति योगिवद्विज्ञातव्यास्ततो मात्रलाघवाद्विशेषं ॥ मित्रैः सुमित्रास्ताश्च
हत्वा हतवंतः ॥ १९ ॥ धनुर्धरधनुः भुजङ्गमः ॥ २० ॥ पश्यन्तो लोकसङ्घाः सन्तो भूताः तेन श्रीकृष्णमपि ॥ २१ ॥ प
त्नीकं प्रतिपद्य ॥ २२ ॥ परकाम्युष्टिरूपो परिवाबुद्धयमसर्वार्थनिमित्तः कोपः कुले सन्तत्यं नित्यो ॥ २३ ॥ यो
पुत्राश्चयथान्यत्नीभिर्भ्रात्रीभिश्च स्वस्तीयदौहित्रपित्र्यमातुलैः ॥ मित्रैरामित्रैः सुहृद्भिः सुहृदि
तीतिस्नेहज्ञातयपवसूद्भाः ॥ २४ ॥ शरे भुद्दीयमाने भुमन्यमाने भुथ न्वस्य ॥ शास्त्रे भुतीयमाने भु
पुष्टिमिर्जन्कुबेरकाः ॥ २० ॥ तावन्नकल्पाद्यभवन्सर्वा विज्ञानुष्टितामहताः ॥ नत्रु हि पस्त कृसेन
वार्यमभगास्तुतं चते ॥ २१ ॥ प्रत्यनीकं मन्यमाना बलभद्रं चमोहिताः हतकृतार्थयारान्न त्वाप
न्नाश्रातताथिनः ॥ २२ ॥ प्रस्थितावपि संहृष्टा वुधयमकुरुनंदन ॥ परकाम्युष्टिपरिवाश्चरंतोनत्र
तत्पुपि ॥ २३ ॥ ब्रह्मशापोपसृष्टानां कृष्णमायाहतात्मनां ॥ सर्वार्थक्रोधः तयं तिस्मैवे नवो
त्रिर्ययावनं ॥ २४ ॥ एवं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः ॥ अवतारितो भुवो भार इति मेनेवशे
षितः ॥ २५ ॥ रामः समुद्रवेलायां योगमास्थाय पौरुषं ॥ तत्याज लोकं मानुष्यं संयोज्यात्मान
मात्मनि ॥ २६ ॥ रामनिर्याणमालोक्य भगवान्देवकीसुतः ॥ निषसाद धरोपस्थे तूष्णीमासा
द्य पिप्पलं ॥ २७ ॥ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया ॥ दिशो वितिमिराः कुर्वन्विधूम इव
पावकः ॥ २८ ॥ श्रीवत्साङ्कं घनश्यामं तप्तहाटकवर्चसा ॥ कौशेयाम्बरयुग्मेन परिवीतं सुमङ्गलं
योरां परमपुरुषध्यानं लब्धप्राणमेवाह ॥ संयोज्येति मानुषलोकं भलोकं मनुष्यरूपतां वा ॥ २९ ॥ यो
स्य महतेलभ्राजिष्णु रूपं ॥ तदेवानुवर्णयति श्रीवत्साङ्कमिति चतुर्भिः सुन्दरस्मितं वक्त्रं यस्मिंस्तत्‌॥

श्री·भा·
प·टी·
१२९

वनमालयापरीतांसं गानियमितस्वन॥ तिग्मायुधैश्चपरीतांगं पंकजारुणं वामपादं दक्षिणोरौ कृत्वा आसीनं रूपं बिभ्रत॥२२॥ जरानामकश्चिल्लुब्धको मृगबुद्ध्या मृगास्यमिवाकारो यस्य चरणं॥२३॥२४॥ ब्रह्मशापकृतमेव न त्वात्तवापराध इति चेदत आह यस्येति वात्मयोगारचितं स्वाधीनमायारचितं॥ विरिंचप्रमुखा न यान्ति हृद्गत

कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः॥ हारनूपुरमुद्राभिः कौस्तुभेन विराजितं॥ वनमालापरीतांसम् तिग्मश्रीनिजायुधैः॥ कृत्वोरौ दक्षिणे पादमासीनं पंकजारुणं॥२२॥ मुसलावशेषायःखंडकृतेषुर्लुब्धको जरा॥ मृगास्याकारं तच्चरणं विव्याध मृगशंकया॥२३॥ चतुर्भुजं तं पुरुषं दृष्ट्वा स कृतकिल्बिषः॥ भीतः पपात शिरसा पादयोरसुरद्विषः॥२४॥ अजानता कृतमिदं पापेन मधुसूदन॥ क्षंतुमर्हसि पापस्य उत्तमश्लोक मेऽनघ॥२५॥ यस्यानुस्मरणं नृणामज्ञानध्वांतनाशनम्॥ वदंति तस्य ते विष्णो मयासाधु कृतं प्रभो॥२६॥ तन्माशु जहि वैकुंठ पाप्मानं मृगलुब्धकं॥ यथा पुनरहं त्वेवं न कुर्यां सदतिक्रमम्॥२७॥ यस्यात्मयोगरचितं न विदुर्विरिंचरुद्रादयोऽस्य तनयाः पतयो गिरां ये॥ त्वन्मायया पिहितदृष्टय एतदंजः॥ किं तस्य ते वयमसद्गतयो गृणीमः॥२८॥ श्रीभगवानुवाच॥ मा भैर्जरे त्वमुत्तिष्ठ काम एष कृतो हि मे॥ याहि त्वं मदनुज्ञातः स्वर्गं सुकृतिनां पदम्॥२९॥ ॥ ॥

यस्य ये चान्ये गिरां पतयो वेदद्रष्टारः तेऽपि न विदुः तस्य ते विचित्रमायस्य॥ एतद्ब्रह्मशापादिरूपं जनसामस्कृत यः पापयोनयो वयं किं गृणीमः कथं वर्णयामः अतस्त्वदासत्तो आशुमां जहीति भावः॥२८॥ ॥२९॥

(१२९)

पद्दलकगुपाधिधर्मीः स्थौल्यादयो मेन वस्तुतः संतीति ॥ औपाधिकत्वेपि सम्यत्वं किं न स्यादित्याह ॥ स्था
ल्याख्यिनानायामेन स्थ्यवर्तिनः क्षीरस्य तापमलस्य तापात्मेरलावद्धिर्भोगस्मृतत्स्नहभं सचर
थिः पाकः न चात्र किं चिन्निष्या प्यवेदेहादिभिः सन्निकर्षोनस्संबंधात् तन्निमित्तासस्तिः गुरुषस्सभ
वति अस्य वः मात्राः भ्राधायो मनः भूत्रोधात् ॥ उपाधिधर्मो उद्वृते नः तत्पाहि ॥ निदाबादि नादे हेन
मेदं द्वियाणां तापः ततः मात्र स्यततो मनसद्भेवयथा यथमत्र ॥ यद्वकस्यस्यसमावो ध्रुवं इति
नत्राहरत्यत्वेति ॥२१॥ अध्रुवत्वेपि यदा योनृपतिः सअज्ञानां शास्ता गोमा च ॥ यदहं शास्ता आदेः क्षिता
पिपि हृयेषद्ध्विनित्याह ॥ यो मुनस्य किंकरः सपिष्टन पिनष्टि निष्फलं नकरोति ॥ स्त्वत्राय
स्यात्स्वधिता पामयसो भिता पत्नस्नापनं स्तुलगर्भं रथिः ॥ ह्रेहे द्वियात्साश यस्तिनि कुर्व
तेनसहृतिः गुरुषस्तात्रु रोधात ॥२२॥ या स्त्ववभिमानस्त्वयाति मेजानोपः किं करोत्येतेन्नपिन
ष्टि पिष्ट ॥ स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघं ॥२३॥ तन्मे भवान्नरदेवा
भिमानमदेन तुच्छीकृतसत्तमस्य ॥ कृषीष्ट मैत्रीदृशमार्तबन्धो यथा तरे सदवध्यानमंहः
॥२४॥ नविक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि ॥ महद्विमानात्स्वकृता
द्धि मादृङ् नङ्क्ष्यत्यदूरादपि शूलपाणिः ॥२५॥ इति श्री पंचमस्कंधे दशमोऽध्यायः ॥१०॥
नयनमेपि शास्तरीश्वरात्तासमाप्नेनैव सफलत्वात्तदाह ॥ स्वधर्ममिमम च्युतस्याराधनं कुर्वन्
यस्मादघौघं जहाति ॥२३॥ यस्मादेवं मम तवडकं विपरीतं प्रतिभाति ॥ तत्तस्मान्नरदेवाभिमानमदे
न तुच्छीकृतास्तिरस्कृताः सन्तमाभवादृशा येन तस्य मे मैत्रीदृशात्तंबन्धो रहुगणो हर्षेण कृपां करोतु
सतामवध्यानं येन प्रायात् तरिष्यामि ॥२४॥ ननु मम। वज्ञाकृतविकारा भावात् ॥ कृतं पापं तत्राह
नेति यद्यपि नवविक्रियानास्ति ॥ विश्वसुहृत्सखस्य सर्वदेहसाम्येन स्यात्तथापि देहेषु वि
गताभिमानस्य तथापि महतामवमानात्माहृशो विनश्यति ॥ अहं शूलपाणिरपि विनश्यति

भा॰
पं॰टी॰
२४

पकारं दृष्टेऽयं संदृष्टो रह्मणागमहीभृता ॥ उपादिधान्यरं ज्ञानं संयोगी नि निगद्यते ॥ एको विद्वानवि
ह्वानपि तेको विद्वान्वादाउ हृह णिकालनत्स्यान्वादानेव वदसि ॥ एषोऽन्तः यसंन विद्धांम
र्वेत्तोन भवसि ॥ कृतो हि यस्मात् ॥ यद्वाभिध्यादि लोकिकस्यैव हानं त सत्स्मात् ॥ न नेन
रयत्तं न विचारेण सहनं वदसि ॥ किं न विचारं संवदसि ॥ एतान सत्सु ॥ १ ॥ वेदिको पिकसंयवहा
रो नैव सत्स्य इत्याह ॥ नस्यैव ति ॥ इरवो गाहीः नरहसबोधिनो मेधाय ज्ञा नवा विना नोविला रः न हि
वधा स विद्यास ॥ उत्स्यपिकविज्ञस्मिनेषु विलसितेषु तत्त्वं वा ऽनुतिश्चित नत्र वकाशि ॥ न प्रका

ब्राह्मण उवाच ॥ एको विद्वान्को विद्वान्वादाना न वदस्य यो नाति विद्वान् व विद्वः
न स्म रयो हि यवहारं सनेन तत्त्वमयो न तद्वामनन्ति ॥ १ ॥ नस्यैव राजन्गुरु
गाहं मेधवि तानविद्यारुविरभिनेषु ॥ न वेदवादेषु दितं न वाहं सं प्रमाण
मुद्दो वेव कालिसाधु ॥ २ ॥ न नस्मातत्स्यहेणाच साक्षाद्वीपकोऽपिवा
वः संमासन ॥ स्वमेनिरुक्त्या गरहमेधि हिलो स्थ्न न च स्यहेयानुमिनं स्वयस्मात् ॥ ३

शाने ॥ नया व ष्कानि नेह नानानाशिकिंचनेत्याहि ॥ गुद्धो हि स्मा हि मूत्यः साधुः रागादि मृत्यस्व
मायेणेति ॥ ईश्वरार्पितकर्मणां परमार्थफलत्वाभिप्रायेणेक ॥ नन्वष्कानवेदानामपि
गुणं कर्मस्य हुतेः कथमसत्यत्वानगाह ॥ नेति ॥ २ ॥ सांता यथावत्तत्त्वं नानायवरोयस्मा
पिवेदानवाच सम्यगासन ॥ व मकु सर्वमेधा निरुक्ति स्या मन्महेष्टाने न रहस्यत्वादि हेतना
स्वयमेव हेयत्वेनानुमितं यस्मात् ॥ ३ ॥ एवंभयं च स्वसम्यत्वेन इकेनिराकृत्य स्वसारस्वा
पिनडकां सत्यतानिराकरणेन स्वमनो निमित्तनामाहयावदिमादिनायावदृश्यायसमाति

२५

मनोधर्मवद्दृश्यत्वादिभिर्गौरत्ववद्देहधर्मीकृतं भवति तावन्मनोनिरंकुशं स्यात् ॥ ७ इत्यत्र कृपालं धर्मे श्रव
रमधर्मे वा आत्मनोऽस्ति ॥ केचित्तु नोभिन्नी नेद्रियैः आकृतिभिः कर्मेद्रियैश्च तत्र अपमीय मेवासना
युक्तं ॥ नदेवानेकदेहादि विविधं करोतीत्याह सद्भूति ॥ ४ ॥ तन्मात्मनाह विशेषणात्वेनतत्त्वनर
सर्वैः ॥ वासनायुक्तं आत्मनोपाधित्वादात्मा ः नोविषयैरूपरक्तोनुविद्धः अतोगुणमयत्वादहंगुणो
दितस्तत्र आत्मसमानः ॥ अतएव विकृतः कामादिपरिणामवान् ॥ घोरत्वान्मायोरत्वाकलामूल
नेद्रियद्रूपासद्गुणः इत्यादिभिः सहद्रव्यरूपभेदैर्देवतिर्यगादिरूपं बिभर्ति ॥ अतएव हि दृश्य
स्य एव निवृत्ति रूपत्वं च शरीरे सविशेषैः देहभेदैस्तत्त्वनोति ॥ नामभिर्विभ्रमत्वे फलोपदेशो भावत्वा
याव मनोरजसा दृश्यमानत्वेन वानमसा वा नुरुद्ध ॥ चेतोभिराकृतिभिरातनोति निरंकु
शाकृपालवेन देवा ॥ ४ ॥ तथा सन्नात्मा विषयोपरक्तो गुणप्रवाहो विकृतः घोरत्वात्मा वि
भक्तस्वरूपनामभिरूपभेदमनेन देहिष्वेव गुरेतन्नोति ॥ ॥ दुःखं सुखं व्यतिरिक्तं च तीव्रकालो
पपन्नं फलमाव्यनक्ति ॥ आलिंग्य मायारचितान्तरात्मा स्वदेहिनं संसृतिचक्रकूटः ॥ ६ ॥
तथा तत्र व्यवहारं सदाविःस्वरूपसाक्षी भवति स्थूलसूक्ष्मः तस्मान्मनोलिंगमदोवदंति
गुणैः फलं च तद्धेतुरूपं करोतीत्याह ॥ ॥ दुःखं सुखं व्यतिरिक्तं च मोहं तीव्रं तु निवारे कालसामेफ
लसवत्वेनोभिव्यनक्ति स्यनेतितद्गुनरः कथं स्तनेतीत्याह ॥ स्वदेहिनमालिंग्य ॥ आलिंगनेकार
णमाह ॥ मायया रचितमन्तरात्मा जीवो यस्याधिः उपाधिता माह संसृतिचक्रे कूटयतीति तथा
तथा यामकूटस्थ ॥ एवं भूयं मनोनिबंधनः संसारो जीवे फलतीत्याह तावानिति ॥ ७ ॥ आ
विःप्रकाशमानः सदा तेजेन ससाक्षी रूपो भवति ॥ स्थूलसूक्ष्मः नाथत्वमहम्मनसः स
सारहेतनवरूप संहरन ॥ मोक्षस्थापितदेव कारणमित्याह ॥ तस्मादिति ॥ अतो मनः लिंगका
रणं गुणत्वेन गुणाभिमानितत्त्वेगुणानं तत्त्वाहि मनेतदेव परमवरं च तत्त्व ॥ ७ ॥

भा॰
टी॰
४९

कथमेकमेव विलक्षणयोः कारणं अत्र स्वाभेदादित्याह ॥ गुणेति ॥ नैर्गुण्यं निर्गुणत्वं ॥ अयोर
तिकान्स्मिन्नदृष्टान्तेन स्फुटयति ॥ यथेति ॥ अम्बरात्तु सूनन्तथैवं पदं स्रजमास्रवरश्च पमहा
भूतानामत्वेव ॥ ८ ॥ अन्यत्राप्यदाहृतीर्दर्शयति ॥ एकादशाहृतयश्चासन् ॥ प्राकृतयः क्रिया
कारः पंचविधपञ्चतालाकाराः पंचअभिमानश्चेति ॥ ९ ॥ देवीरभूमीः विषयान् ॥ विषयाने
वाह ॥ गंधादयः पंचज्ञानेन्द्रियद्वारा गृह्यमाणानां ॥ विषयाः आहुतिः रूपेषु वः प्राहः विसर्गाद
यः पंच ॥ कर्मेन्द्रियद्वारा कर्मकारकाणां विषयाः रतिः संभोगः अतिगृतिः ॥ १० ॥ अस्या
भि ॥ मानविषयत्वप्रकारमाह ॥ एकादशाहुरस्तीति कियताइति स्वीकरणं ॥ अयमर्थः पारी

गुणानुरक्तं व्यसनाय जन्तोः क्षेमाय नैर्गुण्यमथो मनः स्यात ॥ यथाप्रदीपो घृतवर्तिम
श्रन्शिखाः सधूमा भजति ह्यन्यदा स्वं ॥ ९ ॥ पदेन याशगणकर्मजुवद्धेहीनीमेनः अप
तेन्यतंत्रे ॥ एकादशासन्मनसो हि हैतयश्चाकृतयः पंचविधाभिमानः ॥ १० ॥ मा
त्राणि कर्माणि पुरं च तासां वदन्ति हैकादश वीर भूमीः ॥ गंधाकृतिस्पर्शरसश्रवां
सि विसर्गरत्यर्त्यभिजल्पशिल्पाः ॥ ११ ॥ एकादशंस्वीकरणं ममेति शय्यामहं द्वा
दशमेकमाहुः ॥ द्रव्यस्वभावाशयकर्मकालैरेकाद
शमभिमानस्यनन्त्येयत्तयागेथा

दिबुद्धिविषयः ॥ नापि कार्येन यावित्सर्गादिवन् ॥ किं तर्हि ममेति ॥ भोग्यायतनत्वेन स्वीकार्यंत
या विषय इति एके तु विवेकिनामेव शरीरं ममत्वाभिमानविषयः ॥ नतु मूढानां अतो मत्र
टहृष्टा ॥ अहं अहंकारं द्वादशं शाहुरस्तनरमाहुः ॥ तस्य च शरीरमेव शय्यास्वेदादशविषया
माहुः ॥ नव हि जीवो हंकारे शरीरे ॥ यतः श्रुतिशाय्यनाम्रहबद्ध्यते ॥ तासां च तीनाम

CC-0 Shri Krishna Museum. An eGangotri-Vaidika Bharata Initiative

सूक्ष्मवाकायसंभाषितनय ॥१९॥ एकैकराशिस्तर्द्दशाहं हृषः सप्तगणास्ततो मासिमासमुपासते इत्यन्वयः ॥१९
सूर्यस्तुतिः कोशादयं सगणसूर्यस्तरेयथाभवतितथा ॥२०॥ इति पंचमस्कंधे काया मेकविंशोध्यायः ॥२१॥
द्वाविंशेसोमशुक्रादेः स्थानमाहोत्तरोत्तरं तन्मध्ये सारेणष्टानिष्टेनयान्तरं ॥१॥ राशीनामभिमु

तथावालखिल्याऋषयोंगुष्ठपर्वमात्राः षष्टिसहस्राणिपुरतः सूर्यं सूक्तवाकायनियुक्ताः संस्तुवंति ॥१८॥ तथान्येचऋषयोगंधर्वाप्सरसोनागाग्रामण्योयातुधानादेवाइत्येकैकशोगणाः सप्तचतुर्दशमासिमासिभगवंतंसूर्यमात्मानंनानानामानं पृथङ्नानानामानः पृथक्कर्मभिर्द्वंद्वशउपासते ॥१९॥ तथान्तरेसार्धनवकोटियोजनपरिमंडलंभूवलयस्य क्षणेनसगव्यूत्युत्तरंद्विसहस्रयोजनानि सभुंक्ते ॥२०॥ इतिश्रीपंचमस्कंधेज्योतिश्चक्रसूर्यरथमंडलवर्णनंनामैकविंशोध्यायः ॥२१॥
राजोवाच ॥ यदेतद्भगवतआदित्यस्यमेरुंध्रुवंचप्रदक्षिणेनपरिक्रामतोराशीनामभिमुखं चप्रचलितंचाप्रदक्षिणंभगवतोपवर्णितममुष्यवयंकथमनुमिमीमहीति ॥१॥ सहोवाच ॥
यथाकुलालचक्रेणभ्रमतासहभ्रमतांतदाश्रयाणांपिपीलिकादीनांगतिरन्यैवप्रदेशांतरेष्वप्युपलभ्यमानत्वात् ॥ एवंनक्षत्रराशिभिरुपलक्षितेनकालचक्रेणध्रुवंमेरुंचप्रदक्षिणेन परिधावतासहपरिधावमानानांतदाश्रयाणांसूर्यादीनांग्रहाणांगतिरन्यैवनक्षत्रांतरे राश्यंतरेचोपलभ्यमानत्वात् ॥२॥

तमती

एवमप्रदक्षिणंचउपवर्णितंसमेतंचलनं दक्षिणेनकरोति
लिवहनाअमुष्यवयंकथमनुमिमीमहि एतत्कथयेत्तास्यामोविरुद्धत्वादित्यर्थः ॥१॥ चक्रवशात्स्व
तंत्रगतिद्वयमविरुद्धमितिपरिहारार्थः ॥२॥ ॥

श्री॰भा॰ पं॰ टी॰

तेन कालनियमेन कर्मणां विशुद्धेः साक्षुरादयस्तिथिमिश्रहूतमाप्तानंतं विभज्य विनिहितायमानः विन-
कोमाराः यथोपजोषं यथाकर्मभोगं स्वतनुगतास्तरीमोसादीन् ॥३॥ वर्णाश्रमाचारानुवर्तिनः पुरुषा
स्तथा ग्राम्याः तैः कर्मभिः इंद्रादिरूपेयो गाविनानेस्मध्यानादिभिरेतर्यामिरूपं पूजयंते ॥४॥ सएव स
गम्यमासादिरूपवदादिकारणमित्याह ॥ सएष लोकानामात्मा यावापृथिव्योरंतेर्ण मध्ये यन्नभोव
लयमेनमिहेतस्य मध्ये यत्कालचक्रं ॥ तद्गतः राशिभिर्मासादिभिः संज्ञाभेदैश्चैवराशिसंज्ञाभ्यावा
दृमासान्तो ॥ मासमाह ॥ पक्षद्वयं मासस्तु तिथ्यान्द्रेण मानेन सपादं महान्तत्र द्वयं सौरेण दिवानक्तं

सएष भगवानादिपुरुषएव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशु-
द्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य मधुवसंतादिषु ऋतुषु
यथोपजोषमृतुगुणान् विदधाति ॥५॥ तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानु-
पथा उच्चावचैः ॥ कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजन्तोऽञ्जसा श्रेयः समधिगच्छन्ति
अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगतो द्वादश
मासान् भुंक्ते राशिसंज्ञान् संवत्सरावयवान्मासः पक्षद्वयं दिवा नक्तं चेति सपादर्क्षद्वयमु-
पदिशन्ति ॥ यावता षष्ठमंशं भुञ्जीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः ६ अथ च
यावतार्धेन नभोवीथ्यां प्रचरति तं कालमयनमाचक्षते ॥७॥ अथ च यावन्नभोमण्डलं सह
द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन सह भुञ्जीत तं कालं संवत्सरं परिवत्सरमिडावत्सरमनु-

वत्सरं होरात्रमिति विभेण षष्ठमंशं राशिद्वयं ॥९॥ मंडलाभ्यां सह भुंजीत सह इसूर्यः यदा शुक्लप्रति-
पदि संक्रांतिर्भवति तदारभ्य चांद्रयोर्मासयोर्युगपद्भुक्तो भवति स संवत्सरः ततः सौरमानेन
वर्षे षट् दिनानि वर्धन्ते चांद्रमानेन च षट् ह्रसन्ति ततो द्वादशादिन व्यवधानाद्भयोर्वर्षयोः प्रथमं
द्वाभ्यां भवति ॥ एवं पंचवर्षाणि गच्छन्ति तन्मध्ये द्वौ मलमासौ भवतः पुनः षष्ठः संवत्सरो भवति तदे

प्रथमे यावन्तः ततः सहस्रशः ततः कोटिशः स्युः ते न मिथः स्युर्नैव स्वतः किंतु क्षेत्रज्ञतः परमेश्वरात्
तस्य चानन्तशक्तित्वात् ॥ अनेनास्य सृष्टिसामर्थ्यं यद्वा तासां मिथ्यात्वमनेनोक्तं ॥ कोटिशो भवंत्य-
नन्ताः क्षेत्रज्ञत एव स्युः ॥ न स्वत एव सत्तालाभेन न तु मिथो न च स्वत इति यदा क्षेत्रज्ञो जीवस्तस्मा-
त्स्युः तस्याविकारित्वान्न मिथः इतरेतराश्रयापत्तेर्न स्वतः आत्माश्रयत्वापत्तेः अतो मिथ्याभू-
तान्येवेति । तदेव श्लोकद्वयेनाह गुणकर्मानुरूपं मनोवृत्तीः ॥ अथ तन्नियन्तृकं ॥ तत्स्वरूपं विविनक्ति अम-
दात्तेवृत्तयस्तन्नियन्तृकं तदेव तत्त्वमाह ॥ क्षेत्रज्ञ इति ॥ जीवस्य जीवोपाधेः अविशुद्धकर्तुर्मन-
सः नित्याः प्रवाहरूपेणाविच्छिन्नाः जाग्रत्स्वप्नयोराविर्भूताः सुषुप्ति क्वापि सूक्ष्मभौ तिरोभूताः

सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः ॥ क्षेत्रज्ञ एता मनसो विभूती
जीवस्य मायारचितस्य नित्याः ॥ आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशु-
द्धकर्तुः ॥११॥ क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः ॥ नारायणो भगवा-
न्वासुदेवः स्वमाययात्मन्यवधीयमानः ॥१२॥ यथानिलः स्थावरजंगमानामात्मस्वरूपेण
निविष्ट ईशेत् ॥ एवं परो भगवान्वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥१३॥

प्रपश्यति ॥ एवं स्वाश्रयस्तामी क्षेत्रज्ञस्यात्मनस्तत्त्वमभिमर्थः क्षेत्रज्ञो हि द्विविधः त्वंपदार्थो जीवः तत्पदा-
र्थ ईश्वरश्च ॥ तत्राद्यो निरूपितः इदानीं तत्पदार्थं ईश्वरं निरूपयति ॥ क्षे ॥ क्षेत्रज्ञ आत्मा व्यापी पुरा-
णो नवो नित्यं कारणात्मा सन् पुरुषः पूर्णः साक्षादपरोक्षः स च स्वयंज्योतिः ॥ न तु ज्ञानस्य विषयत्वेना-
पि यत्नेनैवापरोक्षः ॥ अजो जन्मादिशून्यः परेषां ब्रह्मादीनामपीशः नारं जीवसमूहः सोऽयनं
यस्य इति यतः ॥ भगवानैश्वर्यादिषड्गुणवान् वासुदेवः सर्वभूतानामाश्रयः स्वाधीनया मायया
आत्मनि जीवे च अवधीयमानः अवस्थाप्यमानः कर्मकर्तृप्रयोगः तन्नियंतृत्वेन वर्तमान इत्यम्

तदेवमात्मनः सूक्ष्मत्वं संसारस्य च मिथ्यात्वं प्रदर्श्य तदानीं न निवृत्तिमाह ॥ न यावदेतां वयुनोदयेन ज्ञा
नोदयेन मायां यावन्न विधूय आत्मतत्त्वं न वेद तावदिह भ्रमति ॥ यावच्च विषयाञ्जरं मन एव वा न
पहेयमिति न वेद ॥ तावत्त्रिवेदाभावात्मतिभ्रमस्येवेत्याह न येति ॥१६॥ आत्मनो लिंगमुपाधिभूतं
मनः संसारतापानामावपनं क्षेत्रं यावन्न वेद तावत् भ्रमतीत्यन्वयः ॥ तापावपनत्वे हेतुः य

न यावदेतां तनुभृन्नरेंद्र विधूय मायां वयुनोदयेन ॥ वि
मुक्तसंगो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥१६॥
न यावदेतन्मन आत्मलिंगं संसारतापावपनं जनस्य ॥ य
च्छोकमोहामयरागलोभवैरानुबंधं ममतां विधत्ते ॥१७॥
भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः ॥ गु
रोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषं
१८ इति श्रीभागवते महापुराणे पंचमस्कंधे ब्राह्म
णरहूगणसंवादे एकादशोऽध्यायः ॥ ११ ॥

ममतः शोकाद्यनुबंधं ममतां च विधत्ते ॥१७॥ मनस्तमात्मनः भ्रातृव्यं शत्रुं अदभ्रवीर्यं महाप्रभावं उपे
क्षितं संप्रवृद्धं स्वयं व्यलीकं मिथ्याभूतं तेनात्ममोषमात्मानं मुष्णातीति तथा ॥ गुरोर्हरेश्चरणोपास
नमेवास्त्रं यस्य तथाभूतः सन् ॥ जहि नाशय ॥१८॥ ॥ इति श्रीभागवते भावा
र्थदीपिकायां पंचमस्कंधे एकादशोऽध्यायः ॥११॥

हारइबोकुनराहढः संदेहेनमहीभर्त्ता॥ सयोगीसर्वसंदेहानपानुदइतितीर्थेन॥ ९॥ कारणमीघकनसे
वलोकसरत्नणापौविग्रहोदेहोयस्य॥ स्वरूपेणपरमानंदप्रकाशेनतुच्छीकृतोविग्रहोयेन हे अव
धूतयोगेश्वरद्विजबंधोर्लिंगेनवेषेणनिगूढोनित्यानुभवोयेनतस्मैनमः॥ ९॥ विशेषतः प्रहृ
ष्टोहाक्रममभिनंदति॥ ज्वरामयार्त्तस्ययथागदंसत्वाजुञ्जरादमौषधंपथ्यंवानिदाघे
नदग्धस्यसंतप्तस्य॥ हिमांभः शीतलमुदकंगमोदकंवातव्याहेब्रह्मन्॥ कुत्सितेदेहेयोमानः
अहंकारः सएवाहिस्तेनविशेषेणादष्टादृष्टिर्विवेकलक्षणायस्यतस्यमेतवदेववचः॥ अमृत

रहूगणउवाच॥ नमोनमः कारणविग्रहायस्वरूपतुच्छीकृतविग्रहाय॥ नमोवधूत
द्विजबंधुलिंगनिगूढनित्यानुभवायतुभ्यं॥ १॥ ज्वरामयार्त्तस्ययथागदंसन्निदाघदग्धस्य
यथाहिमांभः॥ कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन्वचस्तेमृतमौषधंमे॥ २॥ तस्माद्भवंतंम
मसंशयार्थंप्रक्ष्यामिपश्चादधुनासुबोधं॥ अध्यात्मयोगग्रथितंतवोक्तमाख्याहिकौतू
हलचेतसोमे॥ ३॥ यदाहयोगेश्वरदृश्यमानंक्रियाफलंसद्व्यवहारमूलं॥ नसंजसातत्त्व
विमर्शनायभवानमुष्मिन्भ्रमतेमनोमे ४

तत्समौषधं॥ २॥ ममसंशयार्थंविषयमर्थंप
ध्यात्मताभिग्रथनात्तावत्तदुक्तंवचः॥ अध्यात्मयोगेनग्रथितंत्वदौघंयत्पूर्वंभवतासेवेत्याख्या
हिकौतूहलयुक्तंचेतोयस्यतस्यमम॥ ३॥ तद्यदाहितेष्वक्रमविग्रलक्ष्मीमादिनाभारवा
हनादिक्रियायाः॥ तत्फलेच॥ अमादिप्रमत्वादिभिर्दृश्यमानेसत्॥ अबाधितमपिव्यव
हारमात्रमूलंपदार्थतः॥ अबाधितस्यव्यवहारस्यमूलंकारणमपि॥ नसंजसातत्त्वविम
र्शनायतत्त्वमितिभवान्॥ यदाह॥ अमुष्मिन्नर्थेमेमनोभ्रमति॥ ४॥ ॥

भा०
पं०
३१

अथवा यदि त्वमसि हमित्याह ॥ हे पार्थिव ॥ यः पार्थिवो विकारः स एव कस्य हेतोः कस्मात्त्रिकार
णात्स्थितो वहति च यं भारं वाहकादिजनो नाम प्रसिद्धः यत्त्वं न वलं तिसपायाण्णादिरिति सेना
वा नैव भेदः नस्य च जनरत्वान्न भवः अमसत्र किंच ॥ भवेदेवं यदि स्यात्तस्या प्रयोजितॄप्येन तथे
नरत्वि ॥ अथ व पव व्यतिरेकेणास्मासु हस्तावपविनोत्ति तु पणादि ता शायेनाह ॥ तस्यापि
हद्यो विकारस्यापि ॥ अथ यो आपि उमयं पवित्रुल्याह यः ॥ उरसः स्थलोस्थार्थः ॥ ५ ॥ शिबिका
याम स्थवयवी नास्ति न स्थपिनाप्लिनदाह ॥ सौवीरराजन्नरपदे योनाम यस्य स पार्थिवो

श्रीब्राह्मण उवाच ॥ अयं जनो नाम बलात्स्थितोऽयं पार्थिवः पार्थिवं कस्य हेतोः ॥ तस्मा
पि वाश्रो रथित्वरूपस्य जातामरूमधोरष्णियोधरा सा ॥ ९ ॥ अस्मेस्थिदाबीशिविकावप
सो सौवीरराजेनपदे शस्त्रास्ते ॥ यस्मिन्भवान्तद्वनिना भिमानो राजास्मि सिंधुस्थि
तिरुमेदोषः ॥ १० ॥ योआनि मोत्तमपिकव्हदीनालिख्यानि महद्दनि रतुपद्वोषि ॥ जन
स्यैनामास्मि विकल्यमानोत्पत्नोभुसेद्वह संभासहह ॥ ११ ॥ यदासितानेवं च रोचवस्य
विरामविष्टप्रभवं च निम ॥ ततामसोन्व श्रुवहारमलं तिरुप्यता संचिक्रियया कुम

विकारमास्ते राजेति संधिः आर्षः यस्मिन्भवान्विहताभिमानः सिंधुस्तु राज्ञासीति इमे दे
नाधः सन् ॥ १२ ॥ योआत्वि ह्या निरदहत्त्विहृसपो वर्जसे ॥ अतो निषेधे वयो मासीति सान्तमा
नो महतो मे भावनयाम संघनाशुष्क ॥ १३ ॥ नचोत्तदोजनावयवभावः स्वे स्वांव यवानां भवे
दितिवाच्यं तेषामपि निश्चितः रूपणाद्यिनाशायेनाह ॥ यदेति ॥ नित्यानाशम प्रभवत्रु मतिं
विदामविघ्नः ननदासिनेरस्य विकारस्याभावान्नामसाद्यम्यद्वहारस्य मलकारण

न हि क्षितिः सत्या तस्मात्तत्राह ॥ एवं क्षितिशब्दस्यापि वृत्तं वर्तनं अर्थं विनैव निरुक्तं पदादितियाहस्म
वृत्तं यस्मिन् ॥ तदपि मिथ्यात्वेन निरुक्तमित्यर्थः ॥ कुतः असन्निधानात् परमाणुषु कारणभूते
षु निधानाल्लयात् ॥ अतः परमाणुव्यतिरेकेण क्षितिर्नास्तीत्यर्थः परमाणवस्तर्हि सत्याः सन्तु त
त्राह ॥ ते मनसा कार्यानुपपत्त्यादिभिः कल्पिताः कल्पनाबीजमाह ॥ येषां समूहेन विशेषः सं
तेषां समूहः दृष्टिदृश्यालंबनमित्यर्थः ॥ अवयविनो निरस्तत्वात्समूहग्रहणं ॥ तथापि समाः स
न्ति विषयाः स्वयं वस्तु ॥ भगवन्मायया विलसितत्वादज्ञानेन कल्पिताः ॥ ९ ॥ एवमन्यदपि कृश
त्वादिधर्मकं वस्त्वपनीतं ॥ द्वितीयपदे तेषु भेदादिना उपलक्षितया तथा मायया कृतमवेहि

एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात्परमाणवो ये ॥ अविद्यया मनसा कल्पितास्ते ये
षां समूहेन कृतो विशेषः ॥ ९ ॥ एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत्
द्रव्यस्वभावाशयकालकर्मनाम्नाजयावेहि कृतं द्वितीयं ॥ १० ॥ ज्ञानं विशुद्धं परमार्थमेक
मनन्तरं त्वबहिर्ब्रह्म सत्यं ॥ प्रत्यक्प्रशान्तं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदन्ति ॥ ११ ॥

तत्र हेतुर्बोद्धृत्वे स्थूलेन तत्प्रतियोगि ॥ अणुः बृहत्त्वोः दृश्यं उपादानात् ॥ असत्कार्यं सत्कार्यं जीवं चे
तनं ॥ अजीवं जडं तर्हि किं सत्यं तदाह ॥ ११ ॥ ज्ञानं सत्यं वाह्यादिकल्पनं भावत्वेनेति परमा
र्थम् ॥ इति ज्ञानस्य व्यवच्छेदार्थानि षट् विशेषणानि विशुद्धं ॥ तत्त्वाविषयकं एकं तत्त्वनानात्वरूपं अ
नन्तरं त्वबहिः आभ्यन्तरम् ॥ तत्तद्विपरीतं ॥ ब्रह्म पूरितं पूर्णं तत्र परिच्छिन्नं घटादि तत्त्वं वि
षयाकारं ॥ प्रशान्तं निर्विकारं ॥ तदेव स्वरूपं सत्यं न समाधिस्थकं कीदृशं तत्र ॥ येषां परि
णामेन भगवच्छब्दः संज्ञा यस्य ॥ तद्वासुदेवं वदन्ति ॥ ११ ॥ ॥

॥ ॥ ॥

पतत्वात्मज्ञानं महत्सेवां विना न भवतीत्याह ॥ हे रहूगण एतज्ज्ञानं तपसा पुरुषो न याति ॥ इज्यया
वैदिककर्मणा निर्वपणात् ॥ अन्नादिसंविभागेन दानेन गृहाद्वा तन्निमित्तपरोपकारेण छंद
पपत्तिकं वाक्यमेवासिः खड्गः तेन संछिन्नः अतएवात्मनि मे मन उभयत्रापि ईश्वरस्यात्मत्वे जीव
पारतंत्र्ये जीवपारतंत्र्ये च संप्रधावति॥ सम्यक् प्रविशति॥ एवं चाविलक्षणावबोधरूपस्यात्म
नः कथमविद्यया बंधः अतो वा तन्निवृत्तिरिति संशयः॥ उभयत्रेति॥ बंधमोक्षयोश्चेत्यर्थः॥१५॥

भा
तृती
२९

रूपं लिंगं शीलं समाचारः स्वभावः प्रागदृष्टं ततो विकर्षणं विभागात् ॥१९॥ वितानानि विस्तारान् । नै
ष्कर्म्यस्य ज्ञानस्य तंत्रं उपायस्य च सांख्यस्य पंथा मार्गस्तेन वेत्तव्यः ॥२०॥ पाखंडमार्गाणां पंथानाः प्रवृत्तिः तद्वै
वैषम्यं ॥२१॥ निमित्तानि उपायान् ॥ परस्पराविरोधेन ॥२२॥ ग्रहादीनां कालचक्रेण संस्थितिः ॥२३॥ येन मा
र्गेण संतुष्येत ॥ येषामिति यावत् दानां ॥ अनापृष्टमिति ॥ अपृष्टमपि मद्योग्यं वक्तव्यमिति भावः ॥२६॥

वर्णाश्रमविभागश्च रूपशीलस्वभावतः ॥ ऋषीणां जन्मकर्माणि वेदस्य च विकर्षणं ॥१९॥
यज्ञस्य च वितानानि योगस्य च पथः प्रभोः ॥ नैष्कर्म्यस्य च सांख्यस्य तंत्रं वा भगवत्स्मृतं ॥२०॥
पाखंडपथवैषम्यं प्रतिलोमनिवेशनं ॥ जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः ॥२१॥
धर्मार्थकाममोक्षाणां निमित्तान्यविरोधतः ॥ वार्तायां दंडनीतेश्च श्रुतस्य च विधिं पृथक् ॥२२॥
श्राद्धस्य च विधिं ब्रह्मन् पितॄणां सर्गमेव च ॥ ग्रहनक्षत्रताराणां कालावयवसंस्थितिं ॥२३॥
दानस्य तपसो वापि यच्चेष्टापूर्तयोः फलं ॥ प्रवासस्थस्य यो धर्मो यश्च पुंस उतापदि ॥२४॥
येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः ॥ संप्रसीदति वा येषामेतदाख्याहि चानघ ॥२५॥
अनुव्रतानां शिष्याणां पुत्राणां च द्विजोत्तम ॥ अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः ॥२६॥
तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः ॥ तत्रेमं क उपासीरन् क उ स्विदनुशेरते ॥२७॥ पु
रुषस्य च संस्थानं स्वरूपं वा परस्य च ॥ ज्ञानं च नैगमं यत्तद्गुरुशिष्यप्रयोजनं ॥२८॥ नि
मित्तानि च तस्येह प्रोक्तान्यनघसूरिभिः ॥ स्वतो ज्ञानं कुतः पुंसां भक्तिर्वैराग्यमेव च ॥२९॥

प्रतिसंक्रमः प्रलयः तत्र प्रलये इमं परमेश्वरं शयानं राजानमिव चामरग्राहिणः के वा अनुशेरते
शयानमनुशयते ॥२७॥ पुरुषस्य संस्थानं जीवस्य तत्त्वं परमेश्वरस्य स्वरूपं ॥ येन ज्ञानेन तयोरेकोन
घाज्ञानं च नैगमं वेदोपनिषदं ॥२८॥ यानि सूरिभिः प्रोक्तानि तस्य ज्ञानस्य साधनानि निमित्तानि च
शेषं ॥ एतद्विनापि तस्य भगवती स्यादहमिति ॥२९॥

२९

दृष्ट इति ॥ विकारैरिंद्रियादिभिः सहितानित्युत्तरं पूर्वोक्तं ॥ २२ ॥ येनाजनेनस्थूलं सविशेषं सूक्ष्मं च माया ॥ यस्मि
न् विनाने विदितं न किंचि ॥ यच्चेति ॥ तस्मिन् विश्वं सर्वे लोकाः सविकाराः समं सं कोचेन ॥ २३ ॥ प्राणादयः पंच
नागादयः पंचेति एवं दशविधः प्राणः इंद्रियाणि अर्थाश्च इंद्रियाणि चेति षडक्तिः ॥ तद्वत् नाल
तंप्राणापान सहितः सर्वोपरि हृदक त्वात् ॥ प्राणसमनस्साहित्यं ॥ एवं त्रिधा त्रिविधः प्राणं तत्ये त्वितं तंतत्
तं सविभक्तीः च याणि विसर्गशाहवाक्याः ॥ २४ ॥ एवं यथा च देवे विश्वं तते आत्मा ॥ २४ ॥ एवमेतत्त्र

स्वष्ट्वाये महदादीनि सविकाराणि उत्क्रमात् ॥ तेभ्यो विशानसहस्यन्तसत्त्वप्राविशादिदं ॥
यमाहुस्तान्नमहस्यसहस्राक्षमहवाक्षकं ॥ यत्र विश्वं सर्वे लोकाः सविकाः संस्थाः सते ॥ २५ ॥ अ
स्मिन् दशविधः प्राणः सेंद्रियार्थेंद्रियसहितः ॥ तथैविनोपनेतावणां तद्दिमृतीवह स्वं नं ॥ २६
यत्र तु वैश्वपौर्वे च नरोभिः सहगोचनेः ॥ प्रजाविविधाः तन्त्यश्रासन्याभिरिहेनतं ॥ २७
प्रजापतीनां सप्ततिस्त्रिरूपेकान्यजापतीन ॥ संगोष्ठ्याः पुत्रसर्गोऽस्य मनस्तत्वेन सापिया
त ॥ २७ ॥ एते धामसपिवेंशास्त्रचवधात्र चरितानि च ॥ अयर्थयत्रयेलोकाः समेषिंधामना सते
२८ ॥ तेषां संख्या प्रमाणं च भूलोकस्य च वर्णाय ॥ निषेध्याश्चदेवानां सरीसृपपतत्रिणां
चरतं सगोसंस्थं रंगागर्भे स्वेदद्विजोद्भिदां ॥ २९ ॥ गुणावतारैर्विश्वस्य सर्गस्थित्यन्तयाश्रयं

दृष्टोऽसौ येयो भगवान् किलेति ॥ परीक्षितस्सोतररनयाविदुरस्यैत्रेयसंवादः प्रस्तावितः अतस्ता
नेव विदुर एनं क्रतायप्रश्नानारभ्यावत्समाप्तिः प्रजापतीनां पतिः ब्रह्मेस्यादीनां वर्णयेति वक्त
माणेनान्वयः ॥ विज्ञापयेत्प्रत्यस्यत ॥ सर्गान्वविधान ॥ अत्र सर्गोऽस्त्र इत्यन ॥ ३० ॥ हस्तियापाप्या
त्मनसंख्यासंनिवेशं ॥ २८ ॥ सर्गाणां संयमं देवे विभागं गर्भे स्वेदद्विजोद्भिदां ॥ गाभीनराष्ट्रजाः ॥

स्कंधः श्री विष्णु सहस्र सौ १८

सेरा मुख्यांगकायां सेरद्विनाः उद्विष्टवेयां २८ सर्गाणां सौकर्ष्यत्कृतं २९

भा
टी
२०

त्वमेव विधिस्त्वं सीयमाश्रुयं वासुदेवसंज्ञं परमानंदरूपं ध्यानपथेनानुभूयवर्त्तमानं यं तं सर्वोत्क
र्षेणाभूतं यं तं प्रपन्नस्तं ग्रनुप्रवेक्षितेनेत्रांबुजसुकुले किं विडंनीलयं तेह कृपावलोकेन सन
कुमारादीनामभ्युदयार्थं ॥ ४ ॥ श्रुतीनां विशेषणं सार्धेन तत्प्रमाउदकेनार्हतीति ॥ श्रीभागवत
श्रवणार्थं सत्यलोकात्पातालेऽभ्यवतरन्तो निरंतरं गंगामार्गमयतपदावनीर्णा युनिभावः ॥ चरणा
वपथोयेनेयस्मिन्न्योयेनडु पस्थशांतोनमंतः कथंभूतेनतदाह ॥ यत्र यं प्रेमसहितं यथा भवमेवं

त्वमेव विधिस्त्वं वर्द्धमानयं तं यं वासुदेवाभिधमामनेति ॥ प्रथमदृष्टानां वृत्तकोशामीष
इन्नीलयं तं विबुधोदयाय ॥ ४ ॥ तथैव सुरादैः स्वजनाकलापैरुपस्थितात्मशरणो यथा
नं ॥ पयंघदर्चं यस्येह राजकन्याः सप्रेमनानावलिभिर्विराधाः ॥ ५ ॥ सुहृद्गणो नोवदसाम
रागसर्वलनसद्दैतास्तु कृतानितज्ञाः ॥ किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणा
सहस्रं ॥ ६ ॥ श्लोके किलैतद्भगवत्समेतेनन्निवृत्तिधर्माभिरतायनेन ॥ सनत्कुमाराय स
वाहहह सांख्याय नायागवहृतव्रताय ॥ ७ ॥ सांख्यायनः पारमहंस्यमुख्यो विवक्ष
माणोभगवद्विभूतीः ॥ जगाद सोऽस्मद्गुरवेऽन्विताय पराशराया थ हहस्पतेश्च ॥ ८ ॥

तातोपहार्दैः रजयंति वराघीः पतिकामाः ॥ ५ ॥ कृतानि कर्माणि गदृणंतः केनाङ्गरागेणस्व
लंति पदानि यस्मिन् ॥ तेन तच्च चसानानि जानंतीति तथाः सहस्रमेव साहस्रं किरीटानां
साहस्रं येमणिप्रवेकाः रत्नोत्तमाः तैः प्रद्योतितमुद्दामफणानां सहस्रं यस्य तेयूहकंत्रि
तिहर्षेणान्वयः ॥ ६ ॥ तेनसंकर्षणेन सनत्कुमाराय प्रोक्तं ॥ ७ ॥ पारमहंस्यधर्मेमुख्यः वि
वतमाणाइत्यात्मनेपदं ॥ वेदेशाप्स्य वचेहमयपरित्वात् ॥ अन्विताया नुगताय ८

२०

पन्नानेव प्राप्तं ॥ येमिवनाश्रितास्तत्पत्वादिनानयमेतान्मे पद्मयोनेः कृतं ॥४१॥ तत्वोपदेशेन जी-
वाभयप्रदानस्य ॥४२॥ पुराणकल्पं प्रकाशयतीति पुराणकल्पोऽनुभूतितार्थः आपृष्टः पुरा-
णकल्पो येन मुनिप्रधानः सः ॥४३॥ इति श्रीभावार्थदीपिकायां तृतीये सप्तमः ॥७॥ अष्टमे सम्प्रद-
स्थानाभेत्तनलपायिन ॥ नमनानानन्ताब्जेविम्भवपत्तानोपपदिश्यं ॥१॥ श्रोनारमभिनंदति स-

एतान्मे पृच्छतः प्रश्नान्हरेः कर्मविवित्सया ॥ ब्रूहि मेऽज्ञस्य मित्रत्वादजया नष्टचक्षुषः ॥४१॥
सर्वे वेदाश्च यज्ञाश्च तपो दानानि चानघ ॥ जीवाभयप्रदानस्य न कुर्वीरन्कलामपि ॥४२॥
शुक उवाच ॥ स इत्थमापृष्टपुराणकल्पः कुरुप्रधानेन मुनिप्रधानः ॥ प्रवृद्धहर्षो भग-
वत्कथायां संचोदितस्तं प्रहसन्निवाह ॥४३॥ इति श्रीभागवते तृतीयस्कंधे सप्तमोऽध्यायः
॥७॥ मैत्रेय उ० ॥ सत्सेवनीयो बत पूरुवंशो यल्लोकपालो भगवत्प्रधानः ॥ बभूविथेहा-
जितकीर्तिमालां पदे पदे नूतनयस्यभीक्ष्णं ॥१॥ सोऽहं नृणां क्षुल्लसुखाय दुःखं महद्
गतानां विरमाय तस्य ॥ प्रवर्तये भागवतं पुराणं यदाह साक्षाद्भगवानृषिभ्यः ॥२॥
आसीनमुर्व्यां भगवंतमाद्यं संकर्षणं देवमकुंठसत्वं ॥ विवित्सवस्तत्वमतः परस्य
कुमारमुख्या मुनयोऽन्वपृच्छन् ॥३॥

तांमेविविनयोगपः ॥ बताहो पयस्मात् ॥ इहास्मिन्वंशे ब-
भूविथ जातोऽसि कथंभूतः भगवानेव प्रधानभूतो यस्य सः अत्र हेतुः प्रतिक्षणं नूतन-
यसि नवीनां करोषि ॥१॥ अल्पसुखाय महद्दुःखं प्राप्तानां तस्य दुःखस्य विरमाय प्रवर्तये
प्रारभे ॥२॥ कोऽसौ भगवान् ॥ किं च ऋषिभ्य आह ॥ कथं च त्वया प्राप्तमित्यपेक्षायामाह
आसीनमिति सप्तभिः उर्व्यां पातालतले अकुंठसत्वं अप्रतिहतज्ञानं ॥ अतः संकर्षणात्परस्य

५१

भा
स्टी
३८

सतवीयानर्थः पद्मकोशः सद्युदतिष्ठत्॥ कर्माणि लीनानि जीवादृष्टानि प्रतिबोधयति यः कालस्तेन स्रा
स्नाश्रीविसयोनिधस्य॥१४॥ तल्लोकात्मकं पद्मं सर्वान्॥ गुणान्॥ जीवभोग्यान्॥ अवभासयतीति
नयानत्॥ यस्माज्जातं स एव विसः उद्गतिसंबोधने प्रावीविशत्॥ एकर्षणाल्लमयाक्तिरेवातर्योमि
तयाविवेश॥ तस्मिन्विलग्नाग्रपिष्टिते पद्मे विधाता ब्रह्माभूत्॥ कथंभूतः स्वयमेव वेदमयो नत्व
ध्ययनेन प्राप्तवेदः कोसौ अत्र ह पितरत्वेन यं स्वयंभुवं वदन्ति॥ सः प्राक्कल्पान्ते नारायणेन सह
निद्रयैकीभूत आसीत्॥ तस्मिंस्त्वप्रबुद्धे तेनैव पाद्मे कल्पे पद्मद्वारेणाभिव्यक्तिंयाम सूक्ष्मार्थः १५

सपद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधनेन॥ स्वरोचिषा तत्स
लिलं विशालं विद्योतयन्नर्क इवात्मयोनिः॥१४॥ तल्लोकपद्मं स उ एव वि
ष्णुः प्रावीविशत्सर्वगुणावभासं॥ तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं
स्म वदन्ति सोभूत्॥१५॥ तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोक
मपश्यमानः॥ परिक्रमन्व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेनुदिशं मुखानि
॥१६॥ तस्माद्युगान्तश्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरूढम्॥ उ
पाश्रितः कंजमु लोकतत्त्वं नात्मानमद्धाविददादिदेवः॥१७॥

सचतस्मिन्कल्पे चतुर्मुखोभूदित्याह॥ तस्यामिति परिक्रमन्॥ तत्रस्थ एव ग्रीवां चालयन्॥ लोक
निरीक्षमाणो व्योम्नि विवृत्ते विचलिते नेत्रे यस्य॥१६॥ तस्य च श्रीनारायणेनाप्यासनयैवाविर्भूतत्वान्न किं
यापाते लोककर्तृत्वेन स्वतः इति वृत्तं प्रथमं तत्सविमोहमाह॥ तस्मात्सलिलाद्विरूढमुद्भूतं कं
नमपाश्रितोपि॥ साकल्येन तत्कं न लोकतत्त्वं चात्मानं च साक्षात्तज्ज्ञातवान्॥ उविस्मयेकथ्या
भूतात्॥ युगान्तश्वसनः प्रलयवायुः तेनावघूर्णितं तत्र प्रकंपितं यज्जलं तस्मादूर्मिचक्रं यस्मिन्नुप

२
३८

पुलस्त्येनोक्तः इत्येवमाख्यायिका ॥ पितरं शान्तमभिवितं कृत्वा पराशरो रात्तसवधयज्ञतो वसिष्ठवच
नाद्विरतः ततः पुलस्त्येन स्वसंततिरक्षणात् हृष्टेन वरो दत्तः पुराणप्रवक्ता भविष्यसीति ॥९॥ तदेवं सं
कर्षणोक्तं प्रदाय मह्यं तिं मद्दर्यविभूतिकथनाय प्रश्नोद्भवं क्रमाह ॥ उदाप्लुतमेकार्णवोदके नि
मग्नं यत् ॥ यदाप्रमीलितदृक् प्रतिरोहितविक्रियेव श्रीनारायणो नेत्रे निमीलितवानित्यर्थः
मायाविनोदपरिस्पन्दस्वात्मरतो स्वरूपानंद एव रतो न त्वत्र अत एव निरीहः निष्क्रियः सन् ९

प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यं । सोऽहं तवैतत्कथयामि वत्स श्र
द्धालवे नित्यमनुव्रताय ॥९॥ उदाप्लुतं विश्वमिदं तदासीद्यन्निद्रयामीलितदृग्न्यमील
यत् ॥ अहीन्द्रतल्पेऽधिशयान एकः कृतक्षणः स्वात्मरतौ निरीहः ॥१०॥ सोऽन्तःशरीरेऽर्पितभू
तसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः ॥ उवास तस्मिन्सलिले पदे स्वे यथानलो दारु
णि रुद्धवीर्यः ॥११॥ चतुर्युगानां च सहस्रमप्सु स्वपन्स्वयोदीरितया स्वशक्त्या ॥ कालाख्यया
सादितकर्मतंत्रो लोकानपीतान्ददृशे स्वदेहे ॥१२॥ तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरन्त
र्गतोऽर्थो रजसा तनीयान् ॥ गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत नाभिदेशात् ॥१३

कालशक्ते ह्रदीरणं पुनः सृष्ट्यर्थं स्वसमये प्रबोधनार्थं स्वपदे अधिष्ठाने वह्निः तं समावेष्टितो य
थानल इति ॥११॥ स्वयाविच्छक्त्या सहस्रं तं मानमेव योगनिद्रया स्वपन् ॥ एवमेव प्रबोधनार्थे
नियुक्तया स्वकालशक्त्या आसादितं प्रापितं कर्मतंत्रं क्रियाकलापो यस्य सः अपीतान् ॥ ली
नान् ददर्श ॥१२॥ लोकसृष्ट्यर्थं सूक्ष्मेऽभिनिविष्टा दृष्टिर्यस्य कालानुसारिणा रजोगुणेन
विद्धः ॥ संक्षोभितः सन् तनीयान् अतिसूक्ष्मोऽर्थः सूष्यन् प्रसोष्यन् ॥ उद्भिद्य नाभिदेशाद्ब
हिर्निर्गतः ॥१३॥

पुरुषायुषा संवत्सरशतेन कालेनाभिप्रवृत्तः सन्निष्पन्नो योगः तेन विरूढ उत्पन्नो बोधो यस्य
सर्वं विचिन्वन्नपि नापश्यत्॥ तत्स्वयमेवान्तर्हृदये अवभातमपश्यत्॥२२॥ यदपश्यत्तद्दर्शयति
मृणालेति नवभिः॥ नवस्वप्यपश्यदित्यस्यैवानुषङ्गः मृणालवद्गौरश्चासावायतश्च शेषस्तस्य भो-
गो देहः स एव पर्यङ्कस्तस्मिन्॥ ऊर्ध्वस्थिते पर्यङ्के फणानामयुतमातपत्रैरायुताः सर्वतो पुरुषस्योपरि ये मूर्धानस्तेषां
रत्नानि किरीटस्थानि तेषां द्युभिः प्रभाभिः हतं तथाभूते युगान्ततोये॥२३॥ कथंभूतं पुरुषं हरितोपला-
द्रेः मरकतशिलामयपर्वतस्य प्रेक्षां शोभां क्षिपन्तं स्वलावण्यातिशयेन तिरस्कुर्वन्तं संध्याभ्र-

कालेन सोऽजः पुरुषायुषाभिप्रवृत्तयोगेन विरूढबोधः॥ स्वयं तद-
न्तर्हृदयेऽवभातमपश्यतापश्यत यन्न पूर्वम्॥२२॥ मृणालगौरायत-
शेषभोगपर्यङ्क एकं पुरुषं शयानम्॥ फणातपत्रायुतमूर्धरत्न-
द्युभिर्हतध्वान्तयुगान्ततोये॥२३॥ प्रेक्षां क्षिपन्तं हरितोपलाद्रेः सं-
ध्याभ्रनीवेरुरुरुक्ममूर्ध्नः॥ रत्नोदधारौषधिसौमनस्यवनस्रजो
वेणुभुजाङ्घ्रिपाङ्घ्रेः॥२४॥

नीवीपरिधानं यस्य तस्य स्वशोभां पीताम्बरेणाक्षिपन्तं॥ उरुरुक्ममूर्ध्नः
अनेकस्वर्णशिखरस्य सतस्तस्य स्वकिरीटैः रत्नानि च उदधाराश्च॥ औषधयश्च सौमनस्यानि च पु-
ष्पसमूहाः सुमनस एव वा तेषां वनस्रजः वनमाला यस्य वेणवो वंशा भुजा यस्य॥ अङ्घ्रिपा ए-
वाङ्घ्रयो यस्य॥ स चासौ च तस्यायमर्थः यदि तस्मिन्माला इव स्थिता भवन्ति॥ वेणव
स्वभुजा इव॥ हस्ताः पादा इव॥ न रहितस्य प्रभो॥ स्वीयरत्नमुक्तातुलसीपुष्पदामभिः भुजैरे

प्रविष्टस्तस्य वितर्कमाह ॥ योसावहमब्जपृष्ठे एषकः अनन्यदेकमेवैतदब्जं कुतो वा जातं यथैतद
धिष्ठितं तेनाधस्तात्सता वर्तमानेन नु निश्चितं भाव्यं स इत्थमुद्वीक्ष्य तत्र रेणौ नवपः ॥ तथा च
श्रुतिः सोपश्यत्पुष्करपर्णे तिष्ठन्सोमन्यत अस्ति वै तद्यस्मिन्निदमधितिष्ठतीति ॥ १८ ॥ तस्य व
वरिष्ठं खस्य महत्त्वात् महतापि कालेन तदप्राप्तिमाह स इत्थं इति द्वाभ्यां ॥ तस्याब्जस्य पद्मनालं ॥ तस्य ना
डीभिरंतश्छिद्रैः तस्य खरस्य नालस्य पद्मस्य यन्नालं तस्य नाभिमधिष्ठानं विचिन्वन्नर्वाग्गतो

क एष योसावहमब्जपृष्ठे एतत्कुतो वाब्जमनन्यदप्सु ॥ अस्ति ह्यधस्तादिह किंचनैतदधि
ष्ठितं यत्र सता नु भाव्यम् ॥ १८ ॥ स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरंतर्जलमाविवेश
नार्वाग्गतस्तत्खरनालनालनाभिं विचिन्वंस्तदविंदताजः ॥ १९ ॥ तमस्यपारे विदु
रात्मसर्गं विचिन्वतोभूत्सुमहांस्त्रिनेमिः यो देहभाजां भयमीरयाणः परिक्षिणो
त्यायुरजस्य हेतिः ॥ २० ॥ ततो निवृत्तोप्रतिलब्धकामः स्वधिष्ण्यमासाद्य पुनः स दे
वः । शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोगः ॥ २१ ॥

पितत्तदद्याविंदत ॥ १९ ॥ आत्मसर्गस्य कारणं ॥ त्रिनेमिः कालः अजस्य विष्णोर्हेतिः सुदर्शन
रूपं शस्त्रं देहभाजां नराणां भयमुत्पादयन् विनिःशेषं वत्सरशतमविक्रान्तमिति सुक्रमवति ॥ २०
अतो भृगत्वात्तस्यात्ममार्गं वेनेदृष्ट्वा निवृत्त्याह द्वाभ्यां ॥ ततः अन्वेषणान्निवृत्तः अप्रतिलब्धः
कामो मनोरथो येन स्वधिष्ण्यं पद्मं जितेन श्वासेन निवृत्तं चित्तं यस्य अत एवारूढं
प्राप्तिकं समाधियोगेन तथाभूतः सन् ॥ न्यषीदत् ॥ उपविवेश ॥ २१ ॥

महार्घवंदनहृतदूपकेणनिरूपयितुं तं विशिनष्टि पराध्यैति श्रेष्ठानि केयूराणि अंगदानि मणिप्र
वेकाः मणिश्रेष्ठाः तैः पर्यस्ता व्याप्ता दोर्दंडा एव सहस्रं शाखा यस्य चंदनवृक्षोपि केयूरादि
तैः फलपुष्पादिभिर्व्याप्तशाखो भवति अव्यक्तं प्रधानं मूलं अधोभागो यस्य वृक्षोप्यव्यक्तं वृक्षमूलं य
स्य तत् भूमाभिव्यक्तिरूपत्वात् वृक्षस्यापि मूलं न व्यक्तं भुवनात्मकं अंघ्रिपेंद्रं अहींद्रस्यानंतस्य भो
गैः फणैर्देहावयवैर्वा अधिवीताः संवेष्टिताः वल्शाः स्कंधा यस्य वनस्पतेः शाखा वल्शा इति
श्रुतेः सोपि सर्पैः वेष्टितो भवति २४ पुनस्तमेव पर्वतरूपेण निरूपितुमपि विशेष
णानैः पुनर्निरूपयति भगवानेव महीधरः चराचराणामोकः स्थानं सोपि तथा अहींद्रस्य बंधुः

पराध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखं अव्यक्तमूलं भु
वनांघ्रिपेंद्रमहींद्रभोगैरधिवीतवल्शं २४ चराचरौको भगवन्म

हीध्रमहींद्रबंधुं सलिलोपगूढं किरीटसाहस्रहिरण्यशृंगमाविर्भव
त्कौस्तुभरत्नगर्भं २५ निवीतमाम्नायमधुव्रतश्रिया स्वकीर्ति
मय्या वनमालया हरिं सूर्येंदुवाय्वग्न्यगमं त्रिधामभिः परिक्रम
त्प्राधनिकैर्दुरासदम् २६

सलिलेनोपगूढमावृतं पर्वतोपि मैनाकादिस्तथा किरीटसाहस्रमे
व हिरण्यशृंगाणि यस्य सोपि मेर्वादिस्तथा यथा पर्वतस्य मध्ये किंचिद्रत्नमाविर्भवति तथास्या
विर्भवत्स्पष्टदृश्यमानं कौस्तुभरत्नं गर्भे मूर्तिमध्ये यस्य तं २५ किंच वनमालया निवीतं कंठलं
बितायां आम्नाया वेदा एव मधुव्रता भ्रमरास्तैः श्रीर्यस्यास्तया हरिमिति पर्वतादिरूपं परयन् ह
रिं स्तौति स्तौतवानित्यर्थः सूर्यादिभिरगम्यमगम्यरूपं सर्वव्यापारैराकलयितुमशक्यमित्य
र्थः किंच त्रिधामभिः त्रिलोकेषु धामस्फूर्तिर्येषां तैः रत्नराशिपरिक्रामद्भिः प्रधने संग्रामस्तन्मयैर्जनैः

किं चायामतो दैर्घ्येण विस्तरतश्च स्वमानदेहेन मीयतेऽनेनेति मानं स्वप्रमा शोभना आत्मा स्वमानोऽतिरू
पमो देहः तेन ॥ यद्वा स्वस्य प्रमानः अपरिच्छिन्नः तेन यद्वा ॥ ताभ्यां स्वाङ्गरूपप्रमाणेन लोकत्रयसंग्र
हो यस्मिंस्तथा विचित्राणि नानाविधानि दिव्यान्यपूर्वाणि च आभरणान्यंशुकानि च तेषां कृता
श्रीः शोभा येन तेन देहेन विशिष्टः ॥ एवं सन्नपवातिरम्यत्वेनेति ॥ आश्रितवेषः स्वीकृतनालंकारो दे
हो यस्य तं मया दृष्टं ॥ यद्वा केन मे तां तिष्ठन्तमित्यपेक्षायामेवंभूतेन देहेनेति संबन्धः ॥२४॥ स्वाभि
लषितफलाय विविक्तैर्मार्गैरभ्यर्चतां पुंसां कामदुघं मङ्घ्रिपद्मं प्रदर्शयन्तं वि

आयामतो विस्तरतः स्वमानदेहेन लोकत्रयसंग्रहेण ॥ विचित्रदिव्याभरणांशुकानां कृ
तश्रियापाश्रितवेषदेहः ॥२५॥ पुंसां स्वकामाय विविक्तमार्गैरभ्यर्चतां कामदुघाङ्घ्रिपद्मं
प्रदर्शयन्तं कृपया नखेन्दुमयूखभिन्नाङ्गुलिचारुपत्रं ॥२६॥ मुखेन लोकार्तिहरस्मितेन
परिस्फुरत्कुण्डलमण्डितेन ॥ शोणायितेनाधरबिम्बभासा प्रत्यर्हयन्तं सुनसेन सुभ्र्वा ॥२७॥
कदम्बकिञ्जल्कपिशङ्गवाससा स्वलंकृतं मेखलया नितम्बे ॥ हारेण चानन्तधनेन वत्स श्री
वत्सवक्षःस्थलवल्लभेन ॥२८॥

विद्रुमस्य प्रसमर्पयन्तं ॥ नखा एव इन्दवः तेषां मयूखा रश्मयः
तैर्भिन्नाः संभिन्ना अङ्गुलय एव चारूणि पत्राणि यस्य तत् ॥२६॥ लोकार्तिहरं स्मितं यस्मिंस्तेन
परिस्फुरत्कुण्डलाभ्यां मण्डितेन अधरबिम्बदीप्त्या शोणवदाचरितेन शोभननासासुभ्रुणेन सुभ्रू
शोभननासासुभ्रुणेन याभ्यां वा चमत्कारं प्रत्यर्हयन्तं पूजकान्प्रति पूजयन्तं सम्मानयन्तं ॥२७॥ कदम्बकिञ्ज
ल्कवत्पिशङ्गं यद्वाससा तेन मेखलया च नितम्बे स्वलंकृतं हे वत्स श्रीवत्सयुक्तं यद्वक्षःस्थलं तस्य
वल्लभेन वत्सनवैर्मणिहारेण स्वलंकृतमित्यर्थः ॥२८॥ ॥

ततः किमत आह ॥ भक्त्येति त्रिभिः ॥ मम रचना या सृष्ट्यादिलीला तस्या अनुचिंतया या भक्तिस्तया ऐंद्रिया
त्सुखाज्जातविरागः सन् दृष्टश्रुतमात्रेहिकामुष्मिकात् ॥ ततो यत्तः उद्युक्तः सन् ॥ चित्तस्य ग्रहणे यतिष्य
ति ऋजुभिः भक्तिप्रधानत्वात् सुगमैः ॥ तदेव प्रकृतेर्गुणानामसेवया ॥ ज्ञानादिभिश्चायं जीवः इहै
व देहे मामेव रुंधे प्राप्नोति काचिदिति कासिदित्यर्थः ॥ उचिता योग्या न त्वापि मम स्त्रियाः कीदृशी गो

भक्त्या पुमान्ज्ञातविराग ऐंद्रियाद्दृष्टश्रुतान्मद्रचनानुचिंतया ॥ चित्तस्य यत्तो ग्रहणे योगयु
क्तो यतिष्यते ऋजुभिर्योगमार्गैः ॥२६॥ असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृंभिते
न योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहावरुंधे ॥२७॥ देवहूतिरुवाच ॥ काचित्त्वय्यु
चिता भक्तिः कीदृशी मम गोचरा ॥ यया पदं ते निर्वाणमंजसान्वाश्नवा अहं ॥२८॥ यो योगो भग
वद्बाणो निर्वाणात्मंस्त्वयोदितः ॥ कीदृशः कति चांगानि यतस्तत्त्वावबोधनं ॥२९॥ तदेतन्मे
विजानीहि यथाहं मंदधीर्हरे ॥ सुखं बुद्ध्येय दुर्बोधं योषा भवदनुग्रहात् ॥३०॥ मैत्रेय उवाच
विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः ॥ तत्त्वाम्नायं यत्प्रवदंति सांख्यं
प्रोवाच वै भक्तिवितानयोगम् ॥३१॥

वैराग्योत्पन्नं निर्वाणं मोक्षात्मकं तव पदं स्वरूपं अन्वाश्नवै
अहं न परमेव सर्वात्मना प्राप्स्यामि ॥ अंजसा चित्ति पाठे अहं वितिसंबंधः ॥२८॥ भगवद्बाणः यो भगवं
तं लक्ष्मीकरोतीत्यर्थः ॥ यतो यस्मा योगात् ॥२९॥ विजानीहि विशेषेण ज्ञापय सुखमनायासेन ॥३०॥
इत्थं मातुरर्थं प्रयोजनं विदित्वा जातस्नेहः तत्र हेतुः यत्र यस्यां तन्वा देहेनाविर्भूतः तत्त्वाम्नायं त
दुक्तं यत्र यस्मिन् ॥ किं तद् यत्सांख्यं प्रवदंति तत्प्रोवाच भक्तिवितानं च योगं च ॥३१॥

यथा च विना संयमे शुद्ध्यार्थसिद्धिस्तद्दर्शयति ॥ अहमिति त्रिभिः ॥ मलैर्वीतं विरहितं यदा शुद्धं मनो भवति
मनःशुद्धेरुपक्रमाह ॥ अदुःखमिति ॥ १६ ॥ निरंतरं निर्भेदं अणिमानं सूक्ष्मं अखंडितं अपरिछिन्नं ॥ १७ ॥
हतौजसं क्षीणबलां ॥ १८ ॥ मनःशुद्धौ च भक्तिरेवांतरंगसाधनमित्याह न युज्येति ॥ १९ ॥ अथ सर्वस्यापि स
संगो मूलमित्याह ॥ प्रसंगमिति ॥ अपावृतं निरावरणं ॥ २० ॥ साधूनां लक्षणमाह ॥ तितिक्षव इति चत

अहंममाभिमानोत्थैः कामलोभादिभिर्मलैः ॥ वीतं यदा मनः शुद्धमदुःखमसुखं समं ॥ १६ ॥
तदा पुरुष आत्मानं केवलं प्रकृतेः परं ॥ निरंतरं स्वयंज्योतिरणिमानमखंडितं ॥ १७ ॥ ज्ञान
वैराग्ययुक्तेन भक्तियुक्तेन चात्मना ॥ परिपश्यत्युदासीनं प्रकृतिं च हतौजसं ॥ १८ ॥ न युज्यमा
नया भक्त्या भगवत्यखिलात्मनि ॥ सदृशोस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये ॥ १९ ॥ प्रसं
गमजरं पाशमात्मनः कवयो विदुः ॥ स एव साधुषु कृतो मोक्षद्वारमपावृतं ॥ २० ॥ तितिक्षि
वः कारुणिकाः सुहृदः सर्वदेहिनां ॥ अजातशत्रवः शांताः साधवः साधुभूषणाः ॥ २१ ॥ मय्य
नन्येन भावेन भक्तिं कुर्वंति ये दृढां ॥ मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबांधवाः ॥ २२ ॥ मदा
श्रयाः कथा मृष्टाः शृण्वंति कथयंति च ॥ तपंति विविधास्तापा नैतान्मद्गतचेतसः ॥ २३ ॥ त ए
ते साधवः साध्वि सर्वसंगविवर्जिताः ॥ संगस्तेष्वथ ते प्रार्थ्यः संगदोषहरा हि ते ॥ २४ ॥ सतां प्रसं
गान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः ॥ तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रति

भिः साधवः शास्त्रवर्तिनः साधुस्वभावं तदेव भूषणं येषां ॥ २१ ॥ एतान् तापा आध्यात्मिकादयो न त
पंति न व्यथयंति अतो मद्गते चेतो येषां तान् ॥ हेता मैर्नाभिस्पृष्टेन ते साधवश्चेत्यर्थः ॥ सत्संगस्य भा
लं गतानुपपादयति ॥ २४ ॥ वीर्यस्य सम्यग्वेदनं यासु ताः वीर्यसंविदः हृत्कर्णयोः रसायनाः सुखदाः
तासां जोषणात्सेवनात् ॥ अपवर्गो विद्यानिवृत्तिः वर्त्म यस्मिन् हरौ श्रद्धा ततो रतिः ततो भक्तिर

योगमार्गिकं मन्त्रवास्पष्टमुत्पादयते पुनः॥ उक्तानुवादपूर्वकं कापिलं योगमुच्यते॥ कपिल इति त्रिभिः तत्त्वानां संख्याता गणकः सांख्यप्रवर्तक इत्यर्थः अत एव स्वयं जातः आत्मप्रज्ञप्तये आत्मतत्त्वज्ञापनाय॥१॥ वर्ष्मणमध्ये व कर्मणः हृष्टस्यात्मस्येत्यर्थः॥ सर्वयोगिनां मध्ये वरिम्णः वरस्य भावो वरिमा भविर प्रथानेयं ति हैशः वरिष्ठस्येत्यर्थः यद्वा वरीयस्त्वादित्यर्थः विश्रुतौ कीर्तौ श्रुतवन्द्रियाणि भूरिश्रलन तृप्यन्ति॥ श्रुतेन श्रवणेन दीप्तं तिष्ठतीति तन्नत्र्यतत्तस्य॥ यद्वा भूरिव

शौनक उवाच॥ कपिलस्तत्त्वसंख्याता भगवानात्ममायया॥ जातः स्वयमजः साक्षादात्मप्रज्ञप्तये नृणां॥१॥ न ह्यस्य वर्ष्मणः पुंसां वरिम्णः सर्वयोगिनां॥ विश्रुतौ श्रुतदेवस्य भूरि तृप्यन्ति मेऽसवः॥२॥ यद्यद्विधत्ते भगवान्स्वच्छन्दात्मात्ममायया॥ तानि मे श्रद्दधानस्य कीर्तन्यान्यनुकीर्तय॥३॥ सूत उवाच॥ द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्तथा॥ प्राहेदं विदुरं प्रीत आन्वीक्षिक्यां प्रचोदितः॥४॥ मैत्रेय उवाच॥ पितरि प्रस्थितेऽरण्यं मातुः प्रियचिकीर्षया॥ तस्मिन्बिन्दुसरेऽवात्सीद्भगवान्कपिलः किल॥५॥ तमासीनमकर्माणं तत्त्वमार्गाग्रदर्शनं॥ स्वसुतं देवहूत्याह धातुः संस्मरती वचः॥६॥

दुष्पाः श्रुतो देवो येन तस्यापि मे असवस्तृप्तिसंबन्ध सानां छेदे नेब्रपा आत्मा देहो यस्य सः॥ यद्यत्कर्म विधत्ते तानि तानि कर्माणि कीर्तनार्हाणि अनुकीर्तय॥३॥ यथा त्वं मां प्रचोदयसि॥४॥ एवं प्रचोदितः सन्॥ तस्मात्क्रमानुसारेणान्वीक्षिक्यामात्मविद्यायां॥ बिन्दुसरे॥ बिन्दुसरसि॥५॥ तत्त्वमार्गस्याग्रं पारं दर्शयतीति तथा पद्ममानविते गर्भे प्रविष्ट इत्यादि धातुर्वचः॥६॥

असतामिंद्रियाणां तर्षणात् तृष्णाहितया अभिलाषात् निर्विण्णा अंधं तमसि येन संभाव्यमानेन स्थैर्येमाणेन ॥७॥ पारं
गमयतीति पारगं त्वमेव अस्य चक्षुर्मे यालब्धं त्वदनुग्रहात् जन्मनामंते भाव्यसंति ॥८॥ तत्त्वं पश्यतीति चक्षुर
ति स भगवांस्त्वं तद्रूपं उदितः सूर्य इव यथा ॥९॥ अपाकृष्टुमपनेतुं कोसौ संमोहस्तमाह ॥ एतस्मिन्देहादौ देह
यैव योजितो योहं ममेत्यसद्ग्रहः आग्रहो द्वितीय इति ग्राह्यत्वात्कार्यादि गादि ग्रहणार्थं ॥१०॥ प्रकृतेः पु

निर्विण्णा नितरां भूमन्नसदिंद्रियतर्षणात् ॥ येन संभाव्यमानेन प्रपन्नांधं तमः प्रभो ॥७॥ तस्य त्वं
तमसोंधस्य दुष्पारस्याद्य पारगं ॥ सच्चक्षुर्जन्मनामंते लब्धं मे त्वदनुग्रहात् ॥८॥ य आद्यो भग
वान्पुंसामीश्वरो वै भवान्किल ॥ लोकस्य तमसांधस्य चक्षुः सूर्य इवोदितः ॥९॥ अथ मे देव सं
मोहमपाक्रष्टुं त्वमर्हसि ॥ योवग्रहोहं ममेतीत्येतस्मिन्योजितस्त्वया ॥१०॥ तं त्वा गताहं शर
णं शरण्यं स्वभृत्यसंसारतरोः कुठारं ॥ जिज्ञासयाहं प्रकृतेः पूरुषस्य नमामि सद्धर्मविदां व
रिष्ठं ॥११॥ मैत्रेय उवाच ॥ इति स्वमातुर्निरवद्यमीप्सितं निशम्य पुंसामपवर्गवर्धनं ॥ धियाभि
नंद्यात्मवतां सतां गतिर्बभाष ईषत्स्मितशोभिताननः ॥१२॥ श्रीभगवानुवाच ॥ योग आध्या
त्मिकः पुंसां मतो निःश्रेयसाय मे ॥ अत्यंतोपरतिर्यत्र दुःखस्य च सुखस्य च ॥१३॥ तमिमं ते प्र
वक्ष्यामि यमवोचं पुरानघे ॥ ऋषीणां श्रोतुकामानां योगं सर्वांगनैपुणं ॥१४॥ चेतः खल्व
स्य बंधाय मुक्तये चात्मनो मतं ॥ गुणेषु सक्तं बंधाय रतं वा पुंसि मुक्तये ॥१५॥

हे वरस्य तितृप्ता सर्वाभ्यामहं शरणं गतास्मि ॥ नमामि त्वं यः कुठारं छेत्तारं ॥११॥ अपवर्गं वर्धयतीति अपवर्गवर्धनं मो
क्षवर्धकं ॥ ईषत्स्मितेन शोभितमाननं यस्य ॥१२॥ आध्यात्मिक आत्मनि दृष्टः ॥ यत्र यस्मिन् ॥१३॥
सर्वांगनैपुणं चित्तसंयमादिनैपुण्यं ॥ चित्तसंयमाधीनमिति दर्शयन्नाह चेत इति ॥१४॥ अस्या
त्मनो जीवस्य गुणेषु विषयेषु पुंसि परमेश्वरे वा बंधाय मोक्षार्थं ॥ १५ ॥ ॥

सन्यासानुतां प्रार्थयते॥ अभिप्रच्छेयत्किंचिदभिप्रच्छामीत्यर्थः॥ तथा शुद्धरूपेणावतीर्णां निनिर्हतालि
स्मरणानिर्दैवादिरूपाश्रितयस्य सः आत्मकामस्त्वाहं पवित्रजनतां सन्यासिनां पदवीमार्गमाश्रितः सन्नत्वां
पुनः स्मरन्विचरिष्यामि॥ २४॥ अहं तावत्त्वानोपदेशार्थेव तत्रूहेव तीर्णः अतस्त्ववरूहेव सतोपिशुक्ति
त्वलभेव॥ यद्यद्व स्यंगंतव्यमेवेत्याशङ्क्य तथापि मामेवानुस्मरन्॥ गच्छेत्याशयेनाह॥ स येति बहिः स
न्मे लौकिके वैदिके च लौकिके च कृत्ये स्वात्मस्य प्रामाण्यमभिदर्शयति॥ यद्यस्मात्तेभ्यं त्वव युष्मो भवे
ध्यामीत्यवोचे॥ अथात एतत्स्मतेय्यथा भवति तथा मयाज्ञ निजन्मस्वीकृते॥ २५॥ तुरा शयालिंगाते

अथाभिप्रच्छेद्यपतिं मन्नानोत्वयावतीर्णो न उत्तमकामः॥ पवित्रजनपदवीमाश्रितोहं च विष्ये
तोहृदि पुनन्विशोकः॥ २४॥ श्रीभगवानुवाच॥ मयाशोकेहिलोकस्य प्रमाणं तस्य लौकिके॥ अ
याजनि मयात भ्यंयद्वो वस्तं तत्र ते॥ २५॥ एतन्मे जन्म लोके स्मिन्मुमुक्षूणां दुराशयात्॥ प्र
संख्यानाय तत्वानां संमतायात्मदर्शने॥ २६॥ एष आत्मपथोव्यक्तो नष्टः कालेन भूयसा॥ तं प्र
वर्तयितुं देहमिमं विद्धि मया भृतं॥ २७॥ गच्छ कामं मयापृष्टो मयि संन्यस्तकर्मणा॥ जित्वा स
दुर्जयं मृत्युममृतत्वाय मां भज॥ २८॥ मामात्मानं स्वयं ज्योतिः सर्वभूतगुहाशयं॥ आत्मन्येवात्म
नावीक्ष्य विशोकोभयमृच्छसि॥ २९॥

मुमुक्षूणां मुनीनामात्मदर्शने सम्मताय तत्त्वानां प्रसंख्यानाय देहो
मत इत्यर्थः॥ २६॥ पूर्वं सिद्ध एव नेदानीमपूर्वं वस्त्वत्र नीयते इत्याह॥ एष इति॥ अव्यक्तः सूक्ष्मः
कामं यथेच्छं॥ २८॥ आपृष्टोनुज्ञातः पदार्थयत्वा संगंतं मां च दृष्ट्वान्॥ तथा स्यादवस्थातेमयापि स्वमा
पृष्टत्यर्थः॥ मयि संन्यस्तेन समर्पितेन कर्मणा॥ विद्ययात्मस्मृति त्वा विद्यया स्मृतममृतत्वं इति श्रु
तेः॥ २८॥ तत्र मां परमात्मानमात्मनि स्वस्मिन्नात्मना मनसा वीक्ष्य मानः अभयं मोक्षमाप्स्यसि॥

मातुर्देवहूत्यै शमनीं उक्तलक्षणां भयं तरिष्यति परमानंदं प्राप्स्यतीति च कारस्यार्थः ॥४०॥ समुदितः सम्यगुक्तः सन्नतं प्रदक्षिणीकृत्य ॥४१॥ मुनीनां व्रतं मौनमहिंसालक्षणं ॥४२॥ सदसतः परं यद्ब्रह्म तस्मिन्युंजानो गुणावभासे निर्गुणे एकभक्त्याऽव्यभिचारिण्या भक्त्याऽनुभाविते अपरोक्षीकृते ॥४३॥ अतो देहादिष्वहंकारादिरहितः ॥ प्रत्यक्प्रवणनिर्द्वंद्वः शीतोष्णलाघवाकुलः समदृग्भेदाग्राहकः किंच स्वदृक् स्वमेव पश्यन् प्रत्यक्प्रवणा प्रशांता विक्षेपरहिता धीर्यस्य ॥४४॥ तदेवंविधिः कस्मिन्नोपायेनेत्याह त्रिभिः परमेश्व

मात्र आध्यात्मिकीं विद्यां शमनीं सर्वकर्मणां ॥ वितरिष्ये यया चासौ भयं चातितरिष्यति ॥४०॥
मैत्रेय उ० ॥ एवं समुदितस्तेन कपिलेन प्रजापतिः ॥ दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ॥४१॥
व्रतं स आस्थितो मौनमात्मैकशरणो मुनिः ॥ निःसंगो व्यचरत्क्षोणीमनग्निरनिकेतनः ॥४२॥
मनो ब्रह्मणि युंजानो यत्तत्सदसतः परे ॥ गुणावभासे विगुण एकभक्त्यानुभाविते ॥४३॥
निरहंकृतिर्निर्ममश्च निर्द्वंद्वः समदृक्स्वदृक् ॥ प्रत्यक्प्रशांतधीर्धीरः प्रशांतोर्मिरिवोदधिः ॥४४॥
वासुदेवे भगवति सर्वज्ञे प्रत्यगात्मनि ॥ परेण भक्तिभावेन लब्धात्मा मुक्तबंधनः ॥४५॥
आत्मानं सर्वभूतेषु भगवंतमवस्थितं ॥ अपश्यत्सर्वभूतानि भगवत्यपि चात्मनि ॥४६॥
इच्छाद्वेषविहीनेन सर्वत्र समचेतसा ॥ भगवद्भक्तियोगेन प्राप्ता भागवती गतिः ॥४७॥ इति तृतीये चतुर्विंशः ॥ २४

रपदं प्राप्तमित्याह ॥ वासुदेव इति त्रिभिः प्रतीचो जीवस्यात्मनि लब्ध आत्मा चित्तं येन यतः मुक्तं बंधनं मनसा तेन यस्य ॥४५॥ लब्धात्मतामेवाह ॥ आत्मानमिति ॥ तदेवं तेन भागवती गतिः प्राप्ता पापहता न रेस पवर्गतिं प्राप महतीति ॥४७॥ इति श्रीभागवते तृतीये चतुर्विंशः ॥२४॥ पंचविंशे जन्मान्तरपेशे बंधविमोचने ॥ प्राहवाह परं भक्तिलक्षणं कपिलः सतः ॥ कपिलेनार्पिता माता वैराग्यभा

पुरुषस्तातादीश्वरःस्वात्मा॥वेदाहमितिशेवधिंनिधिंसर्वार्थीष्टदं॥१६॥देवहूतिंप्रत्याहत्रिभिःज्ञानंशास्त्रो
क्तंविज्ञानमपरोक्षंचतेएवयोगउपायस्तेनकर्मणांजटाःमूलानिवासनास्ताउद्धरन्॥उत्पाटयिष्यन्॥प
द्ममुद्रायुक्तंपदांबुजंयस्य॥१७॥हेमानविअविद्यास्वरूपास्तानंसंशयात्माविक्षेपात्मानानितन्मयंनवत्स्व
यंग्रंथि॥१८॥सुसंमतःसुष्ठुजितःसन्नगंताप्राप्स्यति॥कुमारैःसहेतिशेषःसहनारदसहितःचमरी

वेदाहमाद्यंपुरुषमवतीर्णंस्वमायया॥भूतानांशेवधिंदेहंबिभ्राणंकपिलंमुने॥१६॥ज्ञा
नविज्ञानयोगेनकर्मणामुद्धरन्जटा॥हिरण्यकेशःपद्माक्षःपद्ममुद्रापदांबुजः॥१७॥एषमा
नवितेगर्भंप्रविष्टःकैटभार्दनः॥अविद्यासंशयग्रंथिंछित्वागांविचरिष्यति॥१८॥अयंसिद्ध
गणाधीशःसांख्याचार्यैःसुसंमतः॥लोकेकपिलइत्याख्यांगंताते कीर्तिवर्धनः॥१९॥मैत्रेयउ०
तावाश्वास्यजगत्स्रष्टाकुमारैःसहनारदः॥हंसोहंसेनयानेनत्रिधामपरमंययौ॥२०॥गतेश
तधृतौक्षत्तःकर्दमस्तेनचोदितः॥यथोदितंस्वदुहितॄःप्रादाद्विश्वसृजांततः॥२१॥मरीच
येकलांप्रादादनसूयामथात्रये॥श्रद्धामंगिरसेयच्छत्पुलस्त्यायहविर्भुवं॥२२॥पुलहा
यगतिंयुक्तांक्रतवेचक्रियांसतीं॥ख्यातिंचभृगवेयच्छद्वसिष्ठायाप्यरुंधतीं॥२३॥अथर्व
णेददाच्छांतिंययायज्ञोवितन्यते॥विप्रर्षभान्कृतोद्वाहान्सदारान्समलालयत्॥२४॥तत
स्तऋषयःक्षत्तःकृतदारानिमंत्र्यतं॥प्रातिष्ठन्नंदिमापन्नाःस्वंस्वमाश्रममंडलम्॥२५॥

मरीच्यादीन्विवाहार्थमवस्थाप्य॥नैष्ठिकैस्तैःपंचभिःसहितोहंसोब्रह्माययौत्रिधामत्रिविष्टपं
धामस्वर्गःतस्यपरंश्रेष्ठंसत्यलोकंशतधृतौब्रह्मणि॥युक्तांयोगपाममयच्छद्ददात्॥२३॥वि
तन्यतेसम्यक्क्रियतेअथर्वणायदेवतामिमर्थःसमलालयत्संतोषितवान्॥२४॥निमंत्र्या

सच पुनिस्त्रिगुणं विसृष्टं विकिरेदिति ॥२६॥ पापच्यमानानां भृशं दह्यमानानां निरये संसारे स्वीयैरमंग-
लैः पापैः ॥२७॥ कृतं सर्वा देवताः प्रसन्ना इति ज्ञातं फलस्य लाभादित्याह द्वाभ्यां ॥ बहुजन्मसु विपक्वे-
न रूढेन सम्यग्योगो भक्तियोगस्तस्मिन् ॥ समाधिरैकाग्र्यं तेन शून्यागारेषु यस्य तव पदं ॥२८॥ हेल-
नमवज्ञा तामवगणय्य गणयित्वा ॥ इविनमेव तनैव तदित्याह ॥ यः स्वानां भक्तानां पक्षं पुष्णा-
तीति तथा सः ॥ एतद्द्वयं च यतिद्वाभ्यां ॥२९॥ स्वयमेवावतीर्णोसि स्ववाक्यं तत्वगुह्योभविष्यामीति
यत्तत्सत्यं कर्तुं तान्नैतान्नसाधनसाध्यं च चिकीर्षुः सन् यानि तव लौकिकानि च तत्र जातिरूपा-

स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभं ॥ विविक्त उपसंगम्य प्रणम्य समभाषत ॥२६॥ अहो पा-
पच्यमानानां निरये स्वैरमंगलैः ॥ कालेन भूयसा नूनं प्रसीदंतीह देवताः ॥२७॥ बहुजन्मवि-
पक्वेन सम्यग्योगसमाधिना ॥ द्रष्टुं यतंते यतयः शून्यागारेषु यत्पदं ॥२८॥ स एव भगवानद्य
हेलनं न गणयन्नः ॥ गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः ॥२९॥ स्वीयं वाक्यमृतं क-
र्तुमवतीर्णोसि मे गृहे ॥ चिकीर्षुर्भगवान्ज्ञानं भक्तानां मानवर्द्धनः ॥३०॥ तान्येव तेभिरूपाणि
रूपाणि भगवंस्तव ॥ यानि यानि च रोचंते स्वजनानामरूपिणः ॥३१॥ त्वां सूरिभिस्तत्वबुभुत्सया-
द्धा सदाभिवादार्हणपादपीठं ॥ ऐश्वर्यवैराग्ययशोवबोधवीर्यश्रिया पूर्तमहं प्रपद्ये ॥३२॥
परं प्रधानं पुरुषं महांतं कालं कविं त्रिवृतं लोकपालं ॥ आत्मानुभूत्यानुगतप्रपंचं स्वच्छंदश-
क्तिं कपिलं प्रपद्ये ॥

णि तान्येव तेभिरूपाणि योग्यानि यानि च स्वजनानां रोचंते मनुष्यसरूपाणि तान्यपि ते रोचंते इत्यर्थः
अरूपिणः प्राकृतरूपरहितस्य ॥३१॥ अभिवादार्हे पादपीठं यस्य ऐश्वर्यादिभिः पूर्णं पूर्णं ॥३२॥ ऐश्वर्या-
दिकं विवृणोत्याह ॥ परं परमेश्वरं तत्र हेतुः स्वच्छंदः स्वाधीनाः शक्तयो यस्य तमेवाह ॥ प्रधानं प्रकृति-
रूपं पुरुषं तदधिष्ठातारं महांतं महत्तत्त्वरूपं कालं तेषां क्षोभकं त्रिवृतं ॥ अहंकाररूपं लोकात्मकं त-
मालात्मकं च ॥ तदेवमाप्याद्यप्रयोनादिरूपताप्रकाशितत्वानि प्रपंचं च तमाह ॥ आत्मानुभूत्या चिद-

सिद्धनमस्तुयोऽवंतीत्याह ॥ इंद्रियार्थेष्विति चतुर्भिः ॥ मे मया परं भावं तत्त्वमविदित्वेति ॥५४॥ असत्संगः कु
थमभयाय स्यात्तत्राह संगइति अधिया अज्ञानेन ॥५५॥ स्वभावः प्रवृत्तं यस्य कर्म धर्मार्थं न कल्पते य
र्मोऽभिमत्त्वेन भवेत् ॥ न चापि निष्कामधर्मद्वारा विरागाय न कल्पते ॥ न तद्वापि च तीर्थपदस्य हरेः से
वार्थं न पर्यवस्यति स मृतः ॥५६॥ न मुमुक्षेय मोक्तुमिच्छां न कृतवत्यस्मि ॥५७॥ इति श्री भावार्थदीपि

इंद्रियार्थेषु सज्जंत्या प्रसंगस्त्वयि मे कृतः ॥ अजानंत्या परं भावं तथाप्यस्त्वभयाय मे ॥५४॥ सं
गो यः संसृतेर्हेतुरसत्सु विहितोऽधिया ॥ स एव साधुषु कृतो निःसंगत्वाय कल्पते ॥५५॥ ने
ह यत्कर्म धर्माय न विरागाय कल्पते ॥ न तीर्थपदसेवायै जीवन्नपि मृतो हि सः ॥५६॥ सा
हं भगवतो नूनं वंचिता मायया दृढं ॥ यत्त्वां विमुक्तिदं प्राप्य न मुमुक्षेय बंधनात् ॥५७॥ इ
इति श्री भागवते तृतीये त्रयोविंशो ॥२३॥ मैत्रेय ॥ निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः ॥ दया
लोः शालिनीमाह शुक्लाभिव्याहृतं स्मरन् ॥१॥ कर्दम उ ॥ मा खिदो राजपुत्रीत्थमात्मानं प्रत्यनिं
दिते भगवांस्तेऽक्षरो गर्भमदूरात्संप्रपत्स्यते ॥२॥ धृतव्रतासि भद्रं ते दमेन नियमेन च ॥ त
पोद्रविणदानैश्च श्रद्धया चेश्वरं भज ॥३॥ स त्वयाराधितः शुक्लो वितन्वन्मामकं यशः ॥ छे
त्ता ते हृदयग्रंथिमौदर्यो ब्रह्मभावनः ॥४

कायां तृतीयस्कंधे त्रयोविंशः ॥२३॥ चतुर्विंशे ततो जन्म
कपिलस्याह तत्पितुः ॥ प्रव्रज्यां तन्मतज्ञाप्य प्रणयं च विमोचनं ॥१॥ शालिनीं श्लाघ्यां शुक्लेनाभिव्या
हृतं ॥ सदाह त्वां प्राप्य कलयेत्यादि ॥१॥ इत्थं मा खिदः खेदं माकार्षीः आत्मानं प्रति अहं भाग्यहीनेति ॥
अक्षरोऽविनाशी ॥२॥ दमेन इंद्रियसंयमेन स्वधर्मेण ॥ तपोभिर्द्रविणदानादिभिश्च ॥३॥ हृदयग्रंथिं वि

श्रद्धाय विश्वस्य ॥५॥ बहुतिथे बहुतरे काले तिक्रांते ॥६॥ घनाघनाः मेघाः एकं पदं वर्षंतो मेघाः गायंति स्म नृत्यं-
ति स्म ॥७॥ अपवर्जिता मुक्ताः ॥८॥ परिश्रितं परिवेष्टितं ॥९॥ आगत्य किं कृतवान् तदाह ॥ भगवंतमिति
द्वाभ्यां ॥ सत्त्वांशेन संख्यानं प्रसिद्धं ॥ तस्य सांख्यस्य विज्ञप्त्यै विशेषेण ज्ञापनाय भगवंतं जातं विद्वान्

मैत्रेय उवाच ॥ देवहूत्यपि संदेशं गौरवेण प्रजापतेः ॥ सम्यक् श्रद्धाय पुरुषं कूटस्थमभजद्गुरुं ॥५॥
तस्यां बहुतिथे काले भगवान्मधुसूदनः ॥ कार्दमं वीर्यमापन्नो जज्ञेऽग्निरिव दारुणि ॥६॥ अवा-
दयंस्तदा व्योम्नि वादित्राणि घनाघनाः ॥ गायंति तं स्म गंधर्वा नृत्यंत्यप्सरसो मुदा ॥७॥ पेतुः सुम-
नसो दिव्याः खेचरैरपवर्जिताः ॥ प्रसेदुश्च दिशः सर्वा अंभांसि च मनांसि च ॥८॥ तत्कर्दमाश्र-
मपदं सरस्वत्या परिश्रितं ॥ स्वयंभूः साकमृषिभिर्मरीच्यादिभिरभ्ययात् ॥९॥ भगवंतं परं ब्र-
ह्म सत्त्वेनांशेन शत्रुहन् ॥ तत्त्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् ॥१०॥ सभाजयन्विशु-
द्धेन चेतसा तच्चिकीर्षितं ॥ प्रहृष्यमाणैरसुभिः कर्दमं चेदमभ्यधात् ॥११॥ ब्रह्मोवाच ॥ त्व-
या मेऽपचितिस्तात कल्पिता निर्व्यलीकतः ॥ यन्मे संजगृहे वाक्यं भवान्मानद मानयन् ॥१२॥ एता-
वत्येव शुश्रूषा कार्या पितरि पुत्रकैः ॥ बाढमित्यनुमन्येत गौरवेण गुरोर्वचः ॥१३॥ इमा
दुहितरः सभ्य तव वत्स सुमध्यमाः ॥ सर्गमेतं प्रभावैः स्वैर्बृंहयिष्यंत्यनेकधा ॥१४॥ अत-
स्त्वमृषिमुख्येभ्यो यथाशीलं यथारुचि ॥ आत्मजाः परिदेह्यद्य विस्तृणीहि यशो भुवि ॥१५॥

अतो विश्वस्य स्वराट् स्वतःसिद्धज्ञानः ॥१०॥ तस्य चिकीर्षितं सभाजयन् ॥ प्रहृष्यमाणैरसुभिरिंद्रियैरुप-
लक्षितः कर्दमं चेदमभ्यधादिति द्वयोरन्वयः चकाराद्देवहूतिं वा ॥११॥ तत्र त्वयेति पंचभिः कर्दमं प्र-
त्याह ॥ अपचितिः पूजा कृता यद्यस्मात् निष्कपटं सम्यक् गृहीतवान् च ॥१२॥ अनुमन्येतेति यत् ॥ ए-
तावत्येव ॥१३॥ अनेकधा प्रभावैर्वैशेषैर्बृंहयिष्यंति वर्धयिष्यंति ॥१४॥ ऋषिमुख्येभ्यो मरीच्यादिभ्यः

तेनविमानेनाष्टलोकपालानांविहारोयस्मिन्॥ कुलाचलेंद्रेमेरौतस्यद्रोणीषुदरीषुअनंगसस
ख्योमारुतः शीतलसुगंधमंदानिलः तेनसौभगंसौभाग्यंसौंदर्यंयासुसिद्धैर्नुतः स्तुतः सन्॥ द्युध
निर्गंगातस्याः पातेनशिवः स्वनोयासुतासुरेमे॥ ललनावरूथोस्त्रीरत्नसमूहवान्॥४१॥ वैस्रंभका
दिषुदेवोद्यानेषुमानसेचसरसिरतः प्रीतः सन्॥ अत्यशेत अतिक्रम्यस्थितः॥४३॥ उद्दामचेतसांधी

तेनाष्टलोकपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु॥ सिद्धैर्नुतोद्युधुनि
पातशिवस्वनासुरेमेचिरंधनदवल्ललनावरूथी॥४१॥ वैस्रंभकेसुरसनेनंदनेपुष्पभ
द्रके॥ मानसेचैत्ररथ्येचसरेमेरामयारतः॥४२॥ भ्राजिष्णुनाविमानेनकामगेनमहीयसा
वैमानिकानत्यशेतचरंल्लोकान्यथानिलः॥४३॥ किंदुरापादनंतेषांपुंसामुद्दामचेतसां॥ यै
राश्रितस्तीर्थपदश्चरणोव्यसनात्ययः॥४४॥ प्रेक्षयित्वाभुवोगोलंपत्न्यैयावान्स्वसंस्थया॥
बह्वाश्चर्यंमहायोगीस्वाश्रमायन्यवर्तत॥४५॥ विभज्यनवधात्मानंमानवींसुरतोत्सुकां॥
रामांनिरमयन्रेमेवर्षपूगान्मुहूर्तवत्॥४६॥ तस्मिन्विमानउत्कृष्टांशय्यांरतिकरींश्रिता
नचाबुध्यततंकालंपत्यापीच्येनसंगता॥४७॥ एवंयोगानुभावेनदंपत्योरममाणयोः॥
शतंव्यतीयुः शरदः कामलालसयोर्मनाक्॥४८॥

राणांव्यसनंसंसारलक्षणंतस्यात्ययोयस्मात्॥४४॥
प्रेक्षयित्वादर्शयित्वागोलंमंडलंस्वसंस्थयापादद्वीपवर्षादिरचनयायावान्॥ तावंतंबह्वा
श्चर्यंयस्मिंस्त॥४५॥ विभज्यनवधानवप्रभेदेनात्मानंकृत्वा॥४६॥ शरदः संवत्सराः
मनाक् ईषदिवव्यतीयुः॥४८॥

भा
स्की.
४४

ग्रात्मना स्वदेहार्थं रूपेणातिष्ठीत्याभावयन्॥ तथा सति सद्यः संभवेदिति नोधा नवधा सर्वे संकल्प
वदिति तस्याबहूपस्य संकल्पं ज्ञानविमर्षः॥ विभुस्तथा कर्तुं समर्थः स्वग्रात्मविदिति च॥४३॥ तस्मा
मनासक्तत्वात्स्त्रियो नाना इति भावः। प्रमास्तोयिके शुके स्त्रीभवत्यधिके स्त्रिपद्रतिसह्नतैः ग्रतो
तेन रमेव सद्यः एकस्मिन्नेवाह्नि विवाहूणि सर्वाण्यंगानि यासां॥४४॥ सत्वे जिह्वे न मालम्ब्य वित
र्कासूयमानावहिः॥ अतस्तविक्लवेन व्याकुलेन विहूयतां संतप्यमानेन हृदा॥ उवाचेमं तवेणा
वयः॥४५॥ तव्वाप्तवमणायः तेभ्योः शोभायमतेन पदेन भुवं लिखंती तिष्ठेन चिंतालखं एा

तस्यामाधत्त रेतस्तां भावयन्नात्मनात्मवित्॥ नोधा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः॥
४६॥ अतः सा सुषुवे सद्यो देवहूतिः स्त्रियः प्रजाः॥ सर्वास्ताश्चारुसर्वांग्यो लोहितोत्पलगंधयः॥
४७॥ पतिं सा प्रव्रजिष्यंतं तदालोक्योशती सती॥ स्मयमाना विक्लवेन हृदयेन विदूयता॥४८॥
लिखंत्यधोमुखी भूमिं पदा नखमणिश्रिया॥ उवाच ललितां वाचं निरुध्याश्रुकलां शनैः॥४९
सर्वं तद्भगवान्मह्यमुपोवाह प्रतिश्रुतं॥ अथापि मे प्रपन्नाया अभयं दातुमर्हसि॥५०॥ ब्र
ह्मन्दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः॥ कश्चित्स्यान्मे विशोकाय त्वयि प्रव्रजिते वनं॥५१
एतावतालं कालेन व्यतिक्रांतेन मे प्रभो॥ इंद्रियार्थप्रसंगेन परित्यक्तपरात्मनः॥५२॥

५०॥ उपोवाह संपादितवान्॥ अभयमिति भाविनो देस्मात्॥ संसाराद्भयं तथेन निवर्तते यस्यार्थं
५१॥ तद्देहं मे निवेदयति॥ तत्र्यं तव दुहितृभिः स्वयमेवात्मनः समायोग्याः पतयो विमृग्या इ
ति॥ दैन्यं घामेसंसारभयं पुरस्कृत्याह॥ कश्चिदिति विशोकाय ज्ञानोपदेशाय यद्वाभिः स्वएा
तथा करणात्कं विक्लवं त्वदवस्याने नव्रह्मविस्मरं कश्चित्किंस्यादित्यर्थः॥५१॥ विषयानुभ
वकिंवह्मविषयेति चेन्नाह॥ एतावतालं हृदयेनेपरित्यक्तः परमात्मा यया तस्या मम॥५२॥

स२

८५

अस्मिन्ह्रदे बिंदुसरसि प्राक्तद्धापि धियो रहः शुक्लेन विष्णुना कृतमानंदबिंदुनिपातनेन यापकं प्रापकं ॥२३॥
समादाय हृत्स्वसरजं मलिनं ॥२४॥ शबलो विवर्णो स्तनो यस्मिन् ॥ ततः सरस्वत्याः शिवानि जलानि
आशये यस्मिन् ॥ शिवाजलाशया जलचरा यस्मिन्निति वा ॥२५॥ सा तत्र निमग्ना सती विस्मयं
ददर्शेत्याह ॥ सांतः सरसीति द्वाभ्यां ॥ उत्पलगंधयः ॥२६॥ स्त्रियः प्रोचुः वयं कर्मकरीः परिचारि

निमग्नास्मिन्हृदे भीरु विमानमिदमारुह ॥ इदं शुक्लकृतं तीर्थमाशिषां यापकं नृणां ॥२३॥
सा तद्भर्तुः समादाय वचः कुवलयेक्षणा ॥ सरजं बिभ्रती वासो वेणीभूतांश्च मूर्धजान् ॥२४॥
अंगं च मलपंकेन संछन्नं शबलस्तनं ॥ आविवेश सरस्वत्याः सरः शिवजलाशयं ॥२५॥
सांतः सरसि वेश्मस्थाः शतानि दश कन्यकाः ॥ सर्वाः किशोरवयसो ददर्शोत्पलगंधयः ॥२६॥
तां दृष्ट्वा सहसोत्थाय प्रोचुः प्रांजलयः स्त्रियः ॥ वयं कर्मकरीस्तुभ्यं शाधि नः करवाम किं ॥२७॥
स्नानेन तां महार्हेण स्नापयित्वा मनस्विनीं ॥ दुकूले निर्मले नूत्ने ददुरस्यै च मानदाः ॥२८॥
भूषणानि परार्ध्यानि वरीयांसि द्युमंति च ॥ अन्नं सर्वगुणोपेतं पानं चैवामृतासवं ॥२९॥
अथादर्शे स्वमात्मानं स्रग्विणं विरजांबरं ॥ विरजं कृतस्वस्त्ययनं कन्याभिर्बहुमानितं ॥३०॥
स्नातं कृतशिरःस्नानं सर्वाभरणभूषितं ॥ निष्कग्रीवं वलयिनं कूजत्कांचननूपुरं ॥३१॥

काः वयं ॥ स्नानात्पूर्वं यत्तत्स्नानेन स्नानयोग्येन तैलादिना ॥२८॥ परार्ध्यानि उत्कृष्टानि वरीयां
सि तव ॥ प्रियाणि दीप्तिमंति च ॥ पानं पेयं अमृतं स्वादु आसवं मादकं ॥२९॥ आदर्शे स्वमात्मानं द
दर्शेति शेषः ॥ आत्मानं विशिनष्टि चतुर्भिः कृतं स्वस्त्ययनं मंगलं यस्य पुंस्त्वमात्मशब्दः समानाधि
करणात् ॥३०॥ विरजमित्यस्य प्रपंचः स्नातमुद्वर्तितं लालितं कृतं शिरःस्नानमभ्यंगो येन ॥ भूषितं बने

भा० तृ० स्कं० टीका

भा
रती
८२

बहूनि रत्नानि पुरस्स्यांतयान्हवकेन मंगलद्रव्येणाऊंऊमादिना॥ तरकं विस्मयकारो॥ त्वकं मंगलद्रव्ये
श्रीवाभरणादंतुयोरिति॥१५॥ लद्दनासमुवाचवल्लषेति च नानावैकृवचनानि॥ पतेर्लेसक्षोभमानेषु
लिपस्याः॥ कपभजेनवत्वषाश्लतोमनोहरं स्त्रियं प्रयांगनेत्रगतोयस्य॥ पमकोशेनस्पर्धनरति
पमकोषास्तु नेतेन॥१६॥ दृष्टाव पदापतिं ससारतं तदाप्रासोनवैवस्वयमप्यास्ते॥१७॥ आत्मानं नि
पाम्पदृष्टानावतस्यपोगमातिंयोगप्रभावं दृष्टा सप्राप॥१८॥ समुनिर्विवाहात् प्राप्य दात्मनोरूपंत

थोरोपामैथस्यपाकांश्याकोंतयाबहुरत्नया॥ हारेणचमहार्हेणारूपकेनविभूषितं॥१९॥
लद्दनासमुवाश्वतां स्त्रियपांगेनवल्लषा॥ पमकोपास्यानीलेरलकैस्सलसन्मुखं॥२०॥
पदासससारस्वभमस्षीणादृषितंपतिं॥ नवैवास्तिसहस्त्रीभिर्ध्यासेसप्रजापतिः॥२१॥
भर्तुः पुरस्ताद्दासानेस्त्रीसहस्त्वहतेनदा॥ निषाम्पतयोगगतिं संशयंप्रसपद्यत॥२२॥ स
तांहृतमलस्नानां विभ्राजंतीमहर्ववत्॥ आत्मनोविभ्रतीरूपं संवीतरुचिरस्त्रनी॥२३॥
विद्याधरीसहस्त्रेणसेव्यमानांसुवाससं॥ जातभावोविमानंतमारोहयदरिंदमः॥२४॥
तस्मिन्नलुप्तमहिमाप्रियपानुरक्तोविद्याधरीभिरुपवीर्णवपुर्विमाने बभ्राजउत्कच
कुमुद्गणवानपीच्यस्ताराभिरावृतउडुवोडुपतिर्नभस्थः॥२५॥

देवयुनर्विभ्रतीसंवीतोयाहृतोहृविरोलतोयस्याः पादांतवेतरूपविशेषणं॥२६॥ शोभनेवाससो
यस्याःजातोभावः प्रेमयस्यहे अमित्रहन्॥ जितकाम॥२७॥ तस्मिन्विमानेमुनिर्वभ्राजतलुमोम
हिमास्यातंयेयस्य॥ उपवीर्णंसुप्रभूषितंवपुर्यस्यविकसितकुमुद्गणवान्॥ अपीच्योतिसुंदरः॥ उ
डुवेंद्रुरववसुकिंनभस्थविमाने॥ ताराइवताःस्त्रियःकमुदानीवनासांनेत्राणि॥ रतिरेवपम॥२८

८२

वतेतिहर्षे द्विजवृषभ द्विजश्रेष्ठ हे भर्तस्त्वयि एतत्सर्वं राद्धं सिद्धमेव तत्तदहमवैमि जानामि किंतु यत्ते त्वया
समयोभिहितः स तावद्भूयात्॥ सकृदिति गर्भसंभवमात्रपर्यंतं तु अर्थः॥ यस्माद्गरीयसि श्रेष्ठे हे भर्तः
विहेतभूते स्त्रीणां प्रसवो गुणः महांल्लाभः समास पादेन गरीयसि यस्मिन्यो स तिसतीनां यतो गुणप्रसवं
गुरु विस्तारो भवति॥ अतः पुत्रोत्पत्तिमागमगुणविस्तारे जाते पश्चात्तदुत्कं सर्वं भवत्विति भावः॥ ९॥ अं
गसंगार्थं च मयप्रममिति कर्तव्यतां संपादयेत्याह॥ हे ईशात्र अंगसंगे इति कृत्यं साधनं यथोपदेशं का

देवहूतिरुवाच॥ राद्धं बत द्विजवृषैतदमोघयोगमायाधिपे त्वयि विभो तदवैमि भर्तः॥ यस्ते
अभ्यधायि समयः सकृदंगसंगो भूयाद्गरीयसि गुणः प्रसवः सतीनां॥ ९॥ तत्रेतिकृत्यमुपशि
क्ष यथोपदेशं येनैष मे कर्शितोतिरिरंसयात्मा सिद्ध्येत ते कृतमनोभवधर्षिताया दीनस्त
दीश भवनं सदृशं विचक्ष्व॥ १०॥ मैत्रेय उवाच॥ प्रियायाः प्रियमन्विच्छन् कर्दमो योगमास्थि
तः॥ विमानं कामगं क्षत्तस्तर्ह्येवाविरचीकरत्॥ ११॥ सर्वकामदुघं दिव्यं सर्वरत्नसमन्वि
तं॥ सर्वर्द्ध्युपचयोदर्कं मणिस्तंभैरुपस्कृत

मध्यमास्थातुसारेण उपशिक्ष संजानीहि उपकल्पये
नर्थः॥ येन साधनेनाभ्यंगभोजनपानादिना अतीव रंतुमिच्छया कर्षितो दीनस्त्वम मे मम आत्मा दे
हः सिद्ध्येत्॥ रति समर्थो भवेत्॥ कथंभूतायाः॥ तेन त्वयैव कृतं दोभितो यो मनोभवः तेन धर्षि
तायाः॥ तत्तनोः गृहं पंभवनं च विचक्ष्व वितर्कय विचारयेति यावत्॥ १०॥ तर्हि तत्क्षणमेवाविरची
करत्॥ आविर्भावयामास बभूवेत्यर्थः॥ ११॥ तदेव विशिनष्टि सर्वकामदुघमिति नवभिः सर्वैः श्रृंग
ारादिभिः समन्वितं सर्वर्द्धीनां सर्वसंपदां उपचयः स्यादुदर्कः उत्तरोत्तराभिवृद्धिर्यस्मिन्नुपस्कृतं

भी
टी
८८

उपकरणं पविकरः पट्टिकाप्रस्तविस्तारवस्त्रविशेषाः पताकाविस्तृतास्ताभिः ॥ ४४ ॥ विचित्राणि माल्यानि पुष्पाणि यासु ताभिः स्रग्भिः ॥ ४५ ॥ उपर्युपरि विरचितमदैः सुदृढ़स्थिरस्थूणाभिः कीर्तितकमनीयपर्यङ्कादिभिः शोभितं ॥ ४६ ॥ हाराः स्फटिकहारैर्विद्रुममणिमयवेदिकाद्वारे ... तथाभातयो भिन्नवत्स्वचित्रकपाटद्वारं ॥ इन्द्रनीलमयेषु स्फटिकवेदेषु प्रासादाग्रभागेषु

दिव्योपस्करणेयेन सर्वकालसुखावहं ॥ पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतं ॥ ४७ ॥ स्रग्भिर्विचित्रमाल्याभिर्मञ्जुसिञ्जत्षडङ्घ्रिभिः ॥ दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितं ॥ ४८ ॥ उपर्युपरि विन्यस्तनिलयेषु पृथक्पृथक् ॥ क्लृप्तैः कशिपुभिः कान्तं पर्यङ्कव्यजनासनैः ॥ ४९ ॥ तत्र तत्र विनिक्षिप्तनानाशिल्पोपशोभितं ॥ महामरकतस्थल्या जुष्टं विद्रुमवेदिभिः ॥ ५० ॥ द्वाःसु विद्रुमदेहल्या भातं वज्रकपाटमत् ॥ शिखरेष्विन्द्रनीलेषु हेमकुम्भैरधिश्रितं ॥ ५१ ॥ चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः ॥ जुष्टं विचित्रवैतानैर्महार्हैर्हेमतोरणैः ॥ ५२ ॥ हंसपारावतव्रातैस्तत्र तत्र निकूजितं ॥ कृत्रिमान्मन्यमानैः स्वानधिरुह्याधिरुह्य च ॥ ५३ ॥ विहारस्थानविश्रामसंवेशप्राङ्गणाजिरैः ॥ यथोपजोषं रचितैर्विस्मापनमिवात्मनः ॥ ५४ ॥ ईदृग्गृहं तत्पश्यन्तीं नातिप्रीतेन चेतसा ॥ सर्वभूताशयाभिज्ञः प्रावोचत्कर्दमः स्वयं

॥ ५५ ॥ चक्षुष्मत्पद्मरागाग्र्यैः पद्मरागाग्र्यैः पद्मरागश्रेष्ठैः चक्षुष्मद्दिव्यैः पद्मरागाग्र्यैः विचित्रैर्वैतानैर्वितानसमूहैः ॥ ५२ ॥ कृत्रिमानपि हंसादीन् स्वान्समानजातीयान्मन्यमानैः तत्र तत्राधिरुह्याधिरुह्य निकूजितं ॥ ५३ ॥ विहारस्थानं क्रीडाप्रदेशाः विश्रामः शयनगृहं संवेशः उपभोगस्थानं प्राङ्गणं गृहाद्बहिः अजिरं प्राकाराद्बहिः यथोपजोषं यथासुखं आत्मनः स्वस्यापि वि

नोऽपि विस्मयजनकमिव ... ४४

दिव्याः स्वांतविद्याः मानुषाः शास्त्रप्रभवाः भौतिकाः भौमोत्पाद्विप्रभवाः वैयासेविदुर ॥ ३८ ॥ नस्पृशन्ति ना
तिशायमाह ॥ यद्रूति ॥ न्वर्णसाधारणायमान ॥ ३९ ॥ नस्पृशन्तदपत्नेदेवहूतिः ॥ नस्पादयेप्रभावे ॥ ४ ॥ इ
ति श्रीभावार्थदीपिकायां तृतीये द्वाविंशः ॥ २२ ॥ त्रयोविंशेनयोयोगनिर्मितेसर्वसंपदि ॥ विमानेका
मगेविज्ञातयोरतिरुदीर्यते ॥ १ ॥ प्रस्थितेगमनेकृतेसति ॥ १ ॥ दंभेकपटं अवेनिषिद्धाचरणेने

शारीरमानसादिव्यावैयासेयेचमानुषाः ॥ भौतिकाश्चकथंक्लेशाबाधंतेहरिसंश्रयं ॥ ३८ ॥
यः पृष्टोमुनिभिः प्राह धर्मान्नानाविधान्शुभान् ॥ नृणांवर्णाश्रमाणांचसर्वभूतहितः सदा ॥
एतत्तेआदिराजस्यमनोश्चरितमद्भुतं ॥ वर्णितंवर्णनीयस्यतदपत्योदयंशृणु ॥ ३९ ॥ इ
ति श्रीभागवते तृतीयस्कंधे द्वाविंशः ॥ २२ ॥ मैत्रेयउवाच ॥ पितृभ्यांप्रस्थितेसाध्वीपतिमिंगि
तकोविदा ॥ नित्यंपर्यचरत्प्रीत्याभवानीवभवंप्रभुं ॥ १ ॥ विश्रंभेणात्मशौचेनगौरवेणदमे
नच ॥ शुश्रूषयासौहृदेनवाचामधुरयाचभोः ॥ २ ॥ विसृज्यकामंदंभंचद्वेषंलोभमघंमदं ॥
अप्रमत्तोद्यतानित्यंतेजीयांसमतोषयत् ॥ ३ ॥ सवैदेवर्षिवर्यस्तांमानवींसमनुव्रतां ॥ दैवा
द्गरीयसः पत्युराशासानांमहाशिषः ॥ ४ ॥ कालेनभूयसाक्षामांकर्शितांव्रतचर्यया ॥ प्रेम
गद्गदयावाचापीडितः कृपयाब्रवीत् ॥ ५ ॥ तुष्टोहमद्यतवमानविमानदायाः शुश्रूषयाप
रमयापरयाचभक्त्या ॥ योदेहिनामयमतीवसुहृत्स्वदेहोनावेक्षितः समुचितः क्षपितुंमद
र्थे ॥ ६ ॥

नीयांसमतितेजस्विनं ॥ ४ ॥ दैवाद्गरीयसः दैवादपिगुरुतरात् ॥ दैवमप्यन्यथाकर्तुंस
मर्थादित्यर्थः ॥ ४ ॥ व्रतचर्ययाकर्शितांअतएवभूयसाकालेनातिक्षामामित्यर्थः ॥ ५ ॥ सुहृत्प्रि
यः मदर्थेत्वयापितेनावेक्षितः नगणितः समुचितः स्वात्मोपि ॥ मत्सेवासक्तयोपेक्षितइत्यर्थः

तपश्चसमाधिश्चविद्याचउपासनातासुयश्चात्मयोगःचित्तैकाग्र्यंतेनविजिताःआसाभगवत्प्रसादा
दिव्याभोगाःतानेवतेअवरुद्धान्॥तथापिवशीकृतान्॥प्रपश्यतेदिव्यांदृष्टिंवितरामियथाह
ष्टाद्रक्ष्यसि॥७॥अन्येपुनर्भोगाःकिंनकिमपिप्रतितुच्छाइत्यर्थः॥तत्रहेतुः भगवतउरुक्रमस्य
याभ्रूःतस्याउद्विजृम्भःवक्रीभावःतेनविभ्रंशिताअर्थरचनामनोरथायेषु॥निजधर्मेणयाति

येमेस्वधर्मनिरतस्यतपःसमाधिविद्यात्मयोगविजिताभगवत्प्र
सादाः॥तानेवतेमदनुसेवनयावरुद्धान्दृष्टिंप्रपश्यवितराम्यभ
यानशोकान्॥७॥अन्येपुनर्भगवतोभ्रुवउद्विजृम्भविस्रंसितार्थर
चनाःकिमुरुक्रमस्य॥सिद्धासिभुंक्ष्वविभवान्निजधर्मदोहान्दिव्या
न्नरैर्दुरधिगान्नृपविक्रियाभिः॥८॥एवंब्रुवाणमबलाखिलयोग
मायाविद्याविचक्षणमवेक्ष्यगताधिरासीत्॥संप्रश्रयप्रणय
विह्वलयागिरेषद्व्रीडावलोकविलसद्धसिताननाह॥९॥

व्रतेन॥दुरधिगान्नरैरितरैर्यतोऽतान्दुरधिगान्॥नृपावयमितियाविक्रियास्तब्धतयाविहृतयत्ना
भिः॥८॥अखिलयोगमायाचविद्याच॥तत्तदुपासनातासुनिचक्षणंनिपुणमेवंब्रुवाणंपति
मवेक्ष्यगताधिर्निवृत्तमानसाजाता॥संप्रश्रयोविनयःप्रणयःप्रेमताभ्यांविह्वलागद्गदातयागि
राईषद्व्रीडासहितोयोऽवलोकस्तेनविलसद्धसितमाननंयस्याःसाआहजगाद॥९॥

भा॰
पंटी॰
६२

यथावद्भुक्त्वा ॥ ४४ ॥ कथंभूता संस्था सकलानां जीवनिकायानां धाम स्थानमाश्रयभूतं वपुः
४५ ॥ इति श्रीभागवते महापुराणे भावार्थदीपिकायां पंचमस्कंधे षड्विंशोऽध्यायः ॥ २६ ॥ पंच

श्रुत्वा स्थूलं यथा सूक्ष्मं रूपं भगवतो यतिः । स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति ॥ ४४ ॥ भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था । गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम ॥ ४५ ॥ इति श्री भागवते महापुराणे अष्टादशसाहस्र्यां संहितायां पंचमस्कंधे नरकवर्णनो नाम षड्विंशोऽध्यायः ॥ २६ ॥ पंचमस्कंधः समाप्तः ॥

मस्कंधसंवेद्यपदभावार्थदीपनैः । प्रीयतां परमानंदनंदनो हरिर्बालभाषितैः ॥ ॥ ॥ ॥ ॥ ॥

६२

चारुहासिअंगवलयेविलसिताश्चतेविभ्रमाश्चविपुलाश्चपवलाश्चसभगाश्चहविराश्चभुजाश्चवर
नेतसंभासेभुग्रगहचेदनकंकुमानोपकपवाउलेपः तेनावलिप्तमानाः तेषामभिमर्शनेनोम
स्थितेनहृदयेमकरध्वजस्यावेशोनरूविरंचललितंवाससितेयासांताः तस्यानुरागेणमदेनचश्रुति
नेवतन॥ मदेनविधूर्तिनेवश्याईपदरूलोककरुणावलोकयुक्तेनयस्येयस्मिन॥ नवदनारवि
देविलोकपति॥१॥ श्रमसर्वौः सहने॥ रोषः क्रोधः उपसंहृतस्तपोवैगोपेन॥२॥ उपासनाद्यमारे
यसेवनानागरजकमार्धमुग्धाविभ्रमाभासानाश्चावेगवलयविलसितविभ्रमादविपुलथव
लसभगासविरभुजगजनितस्तोमसुरुचदनकंकुमपंकाउलेपेनावलिप्तमानाहृदयस्थि
मदनोमस्थितेनहृदयमकरध्वजस्यावेशातिविरललितंवसितानासांदनुरागमदश्रुतिनमदवि
घूर्णितालोककरुणावलोकनयनवदनारविंदसश्रीकंकलविलोकपति॥१॥ सपद्मभ
गोवानन्दनेनतेनगणानवश्याद्विदेवउपसंहृतामर्षरोषवेगालोकानान्यस्यश्रासे॥२॥
धाय्यमानः स्वरास्तेषामहारधवैयाधश्रुतितीवनवरतमदश्रुतिनविकलवि
हललोचनः सललितमुखरिकामतेनाप्याप्रमानः स्वपार्षदविबुधयूथपतीनः
पतिन्हानरागनवूनलसिकामोदमधासेवनमाद्यत्मधुकरवानमधुरगीतंश्रियंवे
नयन्तीसांवनमालानीलवासाएककुंडललोकहलककेशितनभगसदभ्रूनेभगवान्मा
सराद्रिमिधायमानस्त्रिमत्मानः अनवरतमदेनघूर्णितस्त्रासोविकृतविह्वललोचनस्वललिते
नमुखरिकामतेनवूवनाम्नतेमस्वपार्षदविबुधयूथपतीनांपतीश्चाप्याप्रमानः स्वविबन नी
लेवाससीयस्यएककुंडलयस्यककुदिदहृतनः स्वलः सभगाश्च संदश्चभुजोपेनउदारली
लायस्यसः नपविन्हानोरागः कांतिर्यस्याः तस्यानवतुलसिकामोदमधासेवनहरमिमधु

पंचविंशेनंतोदेवस्यादादृशोऽस्य संस्थितिं । संजिहीर्षोरिदं काले यद्धरुद्रसमुद्भवः ॥ १ ॥ कोऽसावनंतस्सा
त्वतीयाः सात्वतास्तेन निष्ठाः वर्त्तंते ये पासते यं संकर्षणमित्याचक्षते ॥ तथाव्याख्यानं हेतुः द्रष्टृदर्शन
योरहंप्रत्ययोः संमुकर्षणमेकीकरणं येन ॥ तत्कृतः अहमित्यभिमानो लक्षणं चिह्नमधिष्ठा
नं यस्य ॥ अहंकाराधिष्ठानेनेह यत्संकर्षणमतः संकर्षणं तमाह ॥ अनंतत्वमाह ॥ यस्येदमिति ॥ य

शुक उ० ॥ तस्य मूलदेशे त्रिंशद्योजनसहस्रांतर आस्ते ॥ या वै कला भगवतस्तामसी समा
ख्याताऽनंत इति सात्वतीया द्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानलक्षणं यं संकर्षण
मित्याचक्षते ॥ १ ॥ यस्येदं क्षितिमंडलं भगवतोऽनंतमूर्तेः ॥ सहस्रशिरस एकस्मिन्नेव
शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥ २ ॥ यस्य ह वा इदं कालेनोपसंजिहीर्षतो
ऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेण सांकर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रि
शिखं शूलमुत्तंभयन्नुदतिष्ठत् ॥ ३ ॥ यस्यांघ्रिकमलयुगलारुणविशदनखमणिषं
डमंडलेष्वहिपतयः सह सात्वतर्षभैरेकांतभक्तियोगेनावनमंतः स्ववदनानि परि
स्फुरत्कुंडलप्रभामंडितगंडस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु वि
लोकयंति ॥ ४

भुवनानां सत्प्य भगवाननंतत्वमुत्तरेणाह ॥ यस्य ॥ ३ ॥ तामसत्वमाह ॥ यस्येदं वि
श्वमुपसंहर्तुमिच्छतः अमर्षेण विरचिते ॥ अमर्षेण भ्रुवोरनयोरंतरेण ॥ उद्भवति ॥ उत्तंभयन्
तद्भगवत्त्वमाह ॥ यस्यांघ्रिकमलयुगलेऽरुणा विशदा नखा मणय इव तेषां षंडः समू
हः तस्य मंडले भूपतिः स्फुरंतीनां कुंडलानां प्रभया ॥ मंडितानि ॥ गंडस्थलानि येषां तानि ॥ ४ ॥

किं च ॥ आलोलात्मस्य कृपया वपुर्धारणं न तु जननं वा ॥ तत्र मौदार्यमेवातिविचित्रमित्याह ॥ यस्य नाम यदि
पतितो महापातक्यपि अनुकीर्तयेत ॥ सद्य एव हन्ति किं वक्तव्यं ॥ यतो मुमुक्षवेव सर्वेण अशेषं अंहः
सद्यो हन्ति ॥ कथमनुकीर्तयेदन्यतः श्रुतं वा ॥ अकस्मादार्तो वा भवन् ॥ प्रलंभनाद्वा परिहासात्
तस्मात्तमेवाश्रयेदित्यर्थः ॥ ११ ॥ गिर्यादिसहितं भूगोलं सत्त्वानि प्राणिनः सहस्रजिह्वोपि को गणयेत ॥ १२

यन्नाम श्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलंभनाद्वा ॥ हंत्यंहः सपदि नृणा
मशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥ ११ ॥ मूर्द्धन्यर्पितमणुवत्सहस्रमूर्ध्नो भूगोल
सगिरिसरित्समुद्रसत्वं ॥ आनंत्यादनिमितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत्स
हस्रजिह्वः ॥ १२ ॥ एवंप्रभावो भगवाननंतो दुरंतवीर्योरुगुणानुभावः ॥ मूले रसायाः स्थित
आत्मतंत्रो यो लीलया क्ष्मां स्थितये बिभर्ति ॥ १३ ॥ एता ह्येवेह नृभिरुपगंतव्या गतयो यथा
कर्मविनिर्मिता यथोपदेशमनुवर्णिताः कामान्कामयमानैः ॥ १४ ॥ एतावतीर्हि राजन्पुं
सः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किम
न्यत्कथयामेति ॥ १५ ॥ इति पंचमे विंशः २५

दुरंतवीर्येत्वलं यस्य उरवो गुणाश्च अनुभावश्च
यस्य स च स च ॥ रसायाः भूमेः मूले स्थितस्तिष्ठति ॥ आत्मतंत्रः आत्माधारः ॥ १३ ॥ उक्तलोकविभा
गस्योपयोगं वदन्नुपसंहरति एता इति एता ह्येवेह कामान्कामयमानैर्नृभिरुपगंतव्या इत्यन्वयः ॥ १४
न तत्स्वप्रपंचः ॥ एतावत्यः विपाकगतयः फलभूता गतयः ता व्याचख्ये व्याख्यातवानस्मि ॥ १५ ॥

मेश्लोकयामास वर्णयामास ॥ ७ ॥ यस्मिन् जगत् अस्थात् आदिदेवेन बोधगुणाय यस्मै तथा कस्मात् स्वकार्यसम
र्थो आसन ॥ यस्मिन् तद्रूपं ध्रुवं अनन्तं महत्तं च अनादि ॥ तद्वेदेतः यदेकमेव सत ॥ आत्मन ॥ आ
त्मनि नानाकार्यमपंचमधात ॥ तस्य च स्वरूपस्य वर्त्म तत्वज्ञतः कथमुहवेद्दृनवेदैवेत्यर्थः ॥ ४
नहि कथमसौ मुमुक्षुभिः सेव्यते ॥ तत्राह स्मृतिमिति ॥ यद्वेदस्वरसदिभाति ॥ स्कंनोस्माकंभ

यथयथयवमनुष्कृतोध्यायमानो मुमुक्षूणाम नादिकालकर्मवासनाग्रथितमविद्यामयं
हृदयग्रंथिं सन्तरां जत्तमोमयमेनहृदयंगतं आमुनिर्भिनत्ति ॥ तस्मात् भावं भगवान्न्या
यं ध्रुवो नारदः सहृतं ब्रुवणास भापांव्रसणाः संश्लोकयामास ॥ ८ ॥ इमति स्थितिल
यहेतवो स्यकस्मात् सत्वायाः प्रकृतिगुणाय होतदासन् ॥ यद्रूपं ध्रुवमकृतं यदेकमा
त्मन्नानाधात्कथंनु हवेदत्मस्य वर्त्म ॥ ९ ॥ स्मृतिः नः पुरुकृपया बभार सत्वं संशुद्धं सदस
दिदं विभाति यत्र ॥ यल्लीलां मृगपतिरादेदेनवद्यामादातुं स्वजनमनो स्मुदारवीर्यः ॥ १०

ज्ञानां बहुकृपया सशुद्धं सत्वं मूर्तिं बभार ॥ स्वजनानां मनांस्यादातुं वशीकर्तुं कृतां यस्य
लीलां मृगपतिः सिंह आददे अशिक्षत यतः उदाराणि वीर्याणि यस्य ॥ तस्मात् स्मृत्युर्त्वः
कमाप्नुये दितितरेणान्वयः ॥ यद्वा कृपयेव च हेतुः यद्यस्मात् स्वजनानां मनांस्यादातुं लीला
मादत्ते मृगपतिः सिंहोदारवीर्यः ॥ यद्वा मृगपतिरिति मृगाः कामप्रदाः तेषां पतिः श्रेयः

मत्तो नरेशाष्टाविंशतिमाह ॥ किंचेति ॥ १ ॥ पापभेदेन नरककारकयातनाभेदं प्रपंचयति ॥ यत्त्विम
हिता ॥ यास्यमानः पीड्यमानः पकदैवनदैव ॥ पुरुषं पतिं वंचयित्वा ॥ २ ॥ यत्तत्क्रीस्मरहमिति ॥ ३

तत्र हैके नरकानेकविंशतिं गणयंति ॥ अथ तांस्ते राजन्नामरूपलक्षणतोनुक्रमिष्या
मः तामिस्रोंधतामिस्रो रौरवो महारौरवः कुंभीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमंधकू
पः कृमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकंटकशाल्मली वैतरणी पूयोदः प्राणरोधो वि
शसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति ॥ किंच ॥ क्षारकर्दमो रक्षोगण
भोजनः शूलप्रोतो दंदशूकोवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशति
नरका विविधयातनाभूमयः ॥ ७ ॥ तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि
कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते ॥ अनशना
नुपानदंडताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानो जंतुर्यत्र कश्मलमासादित एकदैव
मूर्छामुपयाति तामिस्रप्राये ॥ ८ ॥ एवमेवांधतामिस्रे यस्तु वंचयित्वा पुरुषं दारादी
नुपभुंक्ते ॥ यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भ
वति ॥ यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादंधतामिस्रं तमुपदिशंति ॥ ९ ॥ यस्त्विह
वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुंबमेवानुदिनं प्रपुष्णाति ॥ स त
दिह ॥ विहाय स्वयमेव तदशुभेन रौरवे निपतति ॥ १० ॥

हंधतामिस्रमेतिमत्वा स्वं च कुटुंबमेव पुष्णाति ॥ तेनाशुभेन ॥ ३ ॥ ॥ ॥

धतामिस्रो

ष्टिं शेषु नरो यस्मान्नरकस्थितिरुच्यते ॥ पापिनो यत्र दह्यन्ते यमदूतैर्यथायथं ॥ ५ ॥ तेषां भोगस्त्वत्र ८
वाच्य वाच्यविसदृशाः पातिभोगा वै विमुक्ते नदेतन्नरकेति प्रह्वति ॥ महर्षे इति ॥ कर्मणः समानेवेषि
अदृष्टा वै विमागस्य वै विममिति यदिह वति त्रिगुणत्वादिति ॥ सात्त्विका अदृष्टाः कर्तुः सात्त्विके
राजसा तामसाश्चेति तामस्याः दुःखितत्वमुक्तं च ॥ तत्रापि तामसांअदृष्टानां नारकत्वमाह
राजोवाच ॥ महर्षे यन्तद्वै विप्र लोकस्य कथयामिति ॥ ऋषिरुवाच ॥ त्रिगुणत्वात्कर्तुः अदृष्टा कर्मणा
नवः दृष्टविधाः सर्वांपव सवेस्य नारमेन भवति ॥ १ ॥ अथेदानीं पतिपिडलतणस्याधर्म
मतृहेवकर्तुः अदृष्टा वै साष्टयापाकमेफले विसदृशो भवति ॥ यासु नायविद्याहकनका
मानानामस्तिरिणामलत्तणः एतयः सहस्रशः अहमानां लावालां पायुर्येणात्तुव्यणियिच्याय
राज्ञोवाच ॥ नरकाणां मम भगवन् ॥ किं देशविशेषा अथवा वहिः त्रिलोक्या अहो स्विदन्तरा
लइति ॥ २ ॥ ऋषिरुवाच ॥ अन्तराल एव त्रिजगत्यास्तद्दिशि दक्षिणस्यामधस्ताद्भूमेरुपरि
ष्टाज्जलाद्यस्यामग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिनाश
त्याय वाशिषआ शासानानि वसन्ति ॥ ३ ॥ यत्र ह वाव भगवान्पितृराजो वैवस्वतः स्वविष
यं प्रापितेषु स्वपुरुषैर्जन्तुषु संपरेतेषु यथाकर्मावद्यं दोषमेवानुल्लङ्घितभगवच्छास
नः सगणो दमं धारयति ४
नं सर्वेषामितर्धः प्रतिषिद्धं प्रतिषेधः स एव लक्षणं यस्य ॥ तत्र ह्येके नरकानेकविंशतिं गणयन्ति
मेषाकर्तुः अदृष्टावैलाष्टयपनमसलारतस्मात् नन्वापि कारणादपीपचार ॥ अनाद्यविद्याकृ
नतयद्वाद्विजोयद्गूपंतिरस्येति ॥ अस्माकंतन्निवर्तयेत्यर्थः ॥ २२ ॥ आत्मगोप्यमन्वयेवरक्षणीयं ॥ द्विजोत्तमा
नांकुलंयदिहरसूनृतेनमोमानवरक्षिनासत्त ॥ नयद्दीप्रयोगः वृषः श्रेष्ठः हेदेवपंथावेदमार्गोनक्ष्यतिना

धर्मस्यतेभगवतस्त्रियुगत्रिभिःस्वैःपद्भिश्चराचरमिदंद्विजदेवतार्थं ॥ नूनंभृ
तंतदभिघातिरजस्तमश्चसत्वेननोवरदयातनुवानिरस्य ॥ २२ ॥ नत्वंद्विजोत्त
मकुलंयदिहात्मगोपंगोप्तावृषःस्वर्हणेनससूनृतेन ॥ तर्ह्येवनंक्ष्यतिशिवस्त
वदेवपंथालोकोग्रहीष्यदृषभस्यहितत्प्रमाणं ॥ २३ ॥ तत्तेनभीष्टमिवसत्वनि
धेर्विधित्सोःक्षेमंजनायनिजशक्तिभिरुद्धृतारेः ॥ नैतावतात्र्यधिपतेर्बतविश्व
भर्तुस्तेजःक्षतंत्ववनतस्यसतेविनोदः ॥ २४ ॥ ॥

शेयास्यति ॥ ऋषभस्यश्रेष्ठस्यहियस्मात् ॥ तदनंहणमसूनृतंचाग्रहीष्यत् ॥ तदुक्तंगीतासु ॥ यद्यदा
चरतिश्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणंकुरुतेलोकस्तदनुवर्ततेइति ॥ २३ ॥ नक्ष्यतीतिचेन्नत्वाकु
नहेदमार्गनाशनमिवेतिलोकोक्तिः ॥ तथाचोक्तं ॥ यदायदाहिधर्मस्येतिसत्वनिधित्वाज्जनायहेम
विधानमिच्छोः अतएवनिजशक्तिभिर्दानादिभिरुद्धृतादिनयधर्मप्रतिपदस्य ॥ अतस्तवब्रह्मकुलेवन
तिरुक्तैव नतुमहत्तोमेपूर्वनतिस्तेजोहानिकरीतत्राहुः ॥ एतावतात्र्यधिपतेर्ब्राह्मणप्रयोजनेनावन
तस्यनमनेनतवनतस्यवतेजःप्रभावःनक्षतंक्षीणं ॥ यतःसनमनादिस्तेविनोदः ब्राह्मणपरिसंस्था

विजयंदेव ५२

यंवैविभूतिः लक्ष्मीः अनुवेलमवसरेऽवसरे उपयाति सेवते ।। धृतः पादरेणुर्यस्याः धन्यैः सुकृतिभिरर्पितं ।
यदंघ्रौ तुलस्या नवं दाम माला तद्धाम स्थानं यस्य तस्य मधुव्रतपतेः ।। भ्रमरमुख्यस्य लोकं स्थानं मंघ्रिकाम
मानापि कामयाना इव ।। २१ ।। विविक्तरुचिभिर्विशुद्धैः परिचरणैः अनुवर्तमानां सेवमानामपि ध्यानान्याद्रि
यत नातिवाढ्रितवान् ।। स एवं भूतत्वं स्वयं भाव ।। स्वयं नामाति लंपटतया लक्ष्मीस्त्वां सेवते कथं ।। एवं
द्विसामेने अहिंसायाहीमधवतः चवलस्य सत्त्वचिगता यानलस्यासपरिवातो निष्फलः सन्नूरमते
अतो साधिलावण्यमत्यधिकं स्यात् ।। ततो हंवत सिध्यितापि योगिजनादिबहुसेवकसंग्रहं मे गोकुला

यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः ।। धन्यार्पि
तांघ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामयाना ।। २१ ।। यस्तां विवि
क्तचरितैरनुवर्तमानां नात्याद्रियत्परमभागवतप्रसंगः ।। स त्वं द्विजानुपथपु
ण्यरजःपुनीतः श्रीवत्सलक्ष्म किमगा भगभाजनस्त्वम् ।। २२ ।।

यि तत्तस्या सहसा पत्न्येनापि वरणो सेविष्यामीति ।। तदेवमन्यो तत्केनानुवर्तमानामपि तां त्वं नातीवा
द्रियसे यतः परमभागवतेष्वेव प्रकृष्टसंगवान् ।। स एव परमसौभाग्यनिधिस्त्वमतो ब्राह्मणप्रसादा
त् ।। मां श्रीर्न विजहातीत्यलभ्यभावत्वेन निर्देशो न समंजस इति ।। किंच स्वत एव त्वं भगभाजनः ।। भजनी
यानां गुणानामाश्रयः परमशुद्धमूर्तिस्त्वं ।। द्विजानामनुपथं पथि लग्नं यत्पुण्यरजः ।। तया श्रीवत्सलक्ष्म
च ।। किं पुनीतः पवित्रीकृतः किमगाः प्राप्तवानतो उपमेयगाः प्रापः भूषणत्वेन स्वीकृतवानसि ।। अतो यत्सेवया
वरणापयपवित्ररेणुमित्यादिवचनं लोकसंग्रहमात्रमितरर्थः ।। धर्ममूर्तैस्तनवेदस्य चितमेवेमाहुः

भा
टी
४९

यद्यपि सकलभाग्यपि न पार्थनीयास्त्याह ॥ ताभिरप्यिभिरलेलवास्तभिः तत्क्षाभिः न च तत्रभजन न
सवेपं संशोकनीयमित्याह भगवद्भक्तिव्यतिरेकेण फलं न रहितं विनाभजनतं स्वपरस्यापि स्व
मेवविधनं गुहाशयत्वादेहेतकीभक्तिं नानन ॥४९॥ अतः कोनाम पुराकथानां शर्वेहतानां मध्ये

तस्मिन्नसनेसकलाशिषांप्रभौ किं दुर्लभं ताभिरलेलवास्तभिः ॥ अनन्यभक्त्याभजतां गुहाशयः
स्वयं विधत्ते स्वगतिं परः परः ॥४८॥ को नाम लोके पुरुषार्थसारवित्पुराकथानां भगवत्कथा
सुधां ॥ आपीय कर्णाञ्जलिभिर्भवापहामहो विरज्येत विना नरेतरम् ॥४९॥ इति श्रीभागवते वि
दुरमैत्रेयसंवादे वराहप्रादुर्भावे त्रयोदशोऽध्यायः ॥१३॥ शुक उ० ॥ निशम्य कौषारवि
णोपवर्णितां हरेः कथां कारणसूकरात्मनः ॥ पुनः स पप्रच्छ तमुद्यताञ्जलिर्न चातितृप्तो
विदुरो धृतव्रतः ॥ १ ॥ विदुर उवाच ॥ तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना ॥ आदिदै
त्यो हिरण्याक्षो हत इत्यनुशुश्रुम ॥ २ ॥ तस्य चोद्धरतः क्षौणीं स्वदंष्ट्राग्रेण लीलया ॥ दै
त्यराजस्य च ब्रह्मन्कस्माद्धेतोरभून्मृधः ॥ ३ ॥

कथंचिदापीय विरज्येत ॥ विरमेत् नरे
तरं पशुं विना ॥४९॥ ॥ इति श्रीभागवतभावार्थदीपिकायां तृतीयस्कन्धे त्रयोदशोऽध्यायः ॥ १३
चतुर्दशे निदानं तद्दैत्ययोः कथ्यते ॥ संध्यायां कश्यपाद्गर्भसंभवः कामतो दितेः ॥ १ ॥
तेनैव येन भूमिरुद्धृता ॥ अनुशुश्रुम ॥ तस्माद्धेतोः मृधः युद्धं ॥ ३ ॥

५१

इदं च तव यानिद्दक्षरं कृतमित्याहुः कुरुति॥ हे प्रभो न च न या कृतं भुवउद्द्विवर्हणशुद्दर्शनं॥ न वरत्नं कं
अदृष्टपीतसहस्रपेन॥ अथ च सर्वेदिनयोः॥ नवि पुनरुरसौ विस्मयो न भवति॥ यतो विश्वे सर्वे विस्मयावसि
न॥ कृतो यो भवान्॥ अति विस्मयमत्यद्भुतमिदं विश्वक्रियाविशेषणं वा सहजे सहवान्॥ ४४॥ विस्मयं
दर्शयंतः प्रार्थयंतो विधुन्वते निद्राभ्यां॥ सटानां शिखाभिरग्रैरुद्धूताः उद्घलिताः ये शिवाग्रेषु विंदवः
तैः सिंचमाना वयं पवित्रीकृताः॥ ४३॥ न च कर्मणां पारं यत् पश्यते अवलोकयति तस्मात् नमिक्षतीमर्थः

कं अदृष्टपीतान्यतमस्तव प्रभो रसांगतायाभुवउद्द्विवर्हणं॥ न विस्मयो सो त्वयि विश्वविस्मये
यो माययेदं ससृजे इति विस्मयं॥ ४४॥ विधुन्वता वेदमयं निजं वपुर्जनस्तपः सत्यनिवासिनो
वयं॥ सटाशिखोद्धूतशिवांबुविंदुभिर्विमृज्यमाना भृशमीश पाविताः॥ ४५॥ स वै वत भ्रष्ट
मतिस्तवैष ते यः कर्मणां पारमपारकर्मणः॥ यद्योगमाया गुणयोगमोहितं विश्वं सम
स्तं भगवन् विधेहि शं॥ ४६॥ मेघे॥ इत्थं उपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः॥ सलिले स
खुराक्रांत उपाधत्तावितावनिं॥ ४७॥ स इत्थं भगवानुर्वीं विष्वक्सेनः प्रजापतिः॥ रसाया ली
ले यो नाम स्वस्य यो हरिः॥ ४८॥ य एवमेतां हरिमेधसो हरेः कथां सुभद्रां कथनीयमा
यिनः॥ शृण्वीत भक्त्या श्रवयेत वोशतीं जनार्दनोस्याशु हृदि प्रसीदति॥ ४९॥

यस्तु तव योगमाया यया योगगुणैः सह योगमाया यया योगगुणैः सह योगस्तेन मोहितं॥ अतो विश्वस्य
मंगलं विधेहि॥ यथा त्वामुवितिमानेन यत् किंत्वावाभजतेन तथा उगदत्तार्णत्यर्थः॥ ४६॥ उपस्थीयमा
मानः स्तूयमानः सखुराक्रांतं यनि॥ जले पि धारणया तया थानं स्थापयति॥ अविता रक्षकः॥ ४७॥
कथनीयां विमायावंति चरित्रं यस्य॥ श्रवयेत् इति कृत्स्नमायेउशतीं कमनीयां हृदि प्रसी
दति स मनसि संतच्यतीमत्यर्थः॥ ४८॥

एवमासितिद्वाभ्यां ॥ कार्यस्त्वमनंतरितचित्तभिर्बहुभावणावर्ण्यते ॥ इनोतिपीड्यन्तिविक्रमश्रोर्थमा
विभ्रांश्चरंभोकदली ॥ ४ ॥ श्यामाशुक्लोसर्वतोप्यनन्तकसम्यक्करोत ॥ ९ ॥ भर्त्तरिश्रामबहुमानानां स्त्रीणामा
विघातेवाप्नोति ॥ यज्ञयाप्यवहर्वेण ॥ नजायायायादिजायानंयदसौजायतेपुनरितिश्रुतेः ११ नो
स्त्रीकंपितानोस्मान ॥ श्रद्धेनस्थकाथकृ ॥ अयंभावः ॥ अयोदशाभ्नामप्पस्माकं त्वयिभावसाम्ये

दितिरुवाच ॥ एवमांनस्कृतेविद्धन्काममग्रानुयायासनः ॥ इनोतिदीनांविक्रमस्वंश्चमिवम
नेगज्ञः ॥ ९ ॥ नद्भवान्दशमानानांपासपत्नीनांसस्वद्धिभिः ॥ प्रजावतीनांभद्रंतेमद्यापुंक्ताम
नुग्रहं ॥ १० ॥ भर्त्तर्यामोह्नमानानांलोकानाविशाप्नेयशः ॥ पतिर्भवद्विधोयासांप्रजयानन्तुजा
यते ॥ ११ ॥ पुरापितानोभगवान्दक्षोद्दुहितृवत्सलः ॥ कंवृणीतवरंवत्साइत्यपृच्छतनःपृ
थक् ॥ १२ ॥ सविदित्वात्मजानांनोभावंसंतानभावनः ॥ त्रयोदशाददत्तासांयास्तेशीलमनु
व्रताः ॥ १३ ॥ अथमेकुरुकल्याणकामंकंजविलोचन ॥ आर्त्तोपसर्पणंभूमन्नमोघंहिमहीय
सि ॥ १४ ॥ इतितांवीरमारीचःकृपणांबहुभाषिणीं ॥ प्रत्याहानुनयन्वाचावृष्णहद्यानंगकश्म
लां ॥ १५ ॥ एषतेहंविधास्यामिप्रियंभीरुयदिच्छसि ॥ तस्याःकामंनकःकुर्यात्सिद्धिस्त्रैवर्गिकी
यतः ॥ १६ ॥ सर्वाश्रमानुपादायस्वाश्रमेणकलत्रवान् ॥ व्यसनार्णवमत्येतिजलयानैर्यथा

वैषम्यावस्यामनुचिन्तमिति ॥ १४ ॥ मोहंनभवतिमहीयसिवाहशेमहत्तमे ॥ १५ णांवम् ॥ १७
ग्रहहानंगेनकश्मलेमोहोयस्याःसासंध्याकालवेचनायभार्याप्रशंसा ॥ एषइतिपंचभिः ॥ १९
यतःयस्याःसकाशात् ॥ १६ ॥ सर्वाश्रमानुपादायेतितानप्यन्यादिदानेनकृच्छ्रनस्तारयन् ॥ स्व

साधु त्वे देवः यद्यस्मात्त्वं हरेरेवतारकथां पृच्छसीति मृत्योः पाशं विशातयति विमोचयतीति त-
था॥४॥ तदेव दर्शयति॥ ययेति॥ उत्तानपादः पुत्रो ध्रुवः मुनिना नारदेन॥ अर्भकः पंचव-
र्षः ... भिर्विमानमानीतं॥ तदा स देहं ... स्यादिति मत्वा मत्वावास-
... देहं न तत्याज॥ किं तर्हि मृत्योर्मूर्ध्नि पदं दत्वा विमानमारुह्य विस्मयदमारूढः वसतिहि
परीत्य ... द्विजैः ... हिरण्मयमिति॥५॥ तयोः स-

मैत्रेय उवाच॥ साधु वीर त्वया पृष्टमवतारकथां हरेः॥ यत्त्वं पृच्छसि मर्त्यानां मृत्युपाशविशात-
नीं॥४॥ ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः॥ मृत्योः कृत्वैव मूर्ध्न्यंघ्रिमारुरोह हरेः पदं
॥५॥ अथात्राप्यितिहासोयं श्रुतो मे वर्णितः पुरा॥ ब्रह्मणा देवदेवेन देवानामनुपृच्छतां॥६॥ दि-
तिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिं॥ अपत्यकामा चकमे संध्यायां हृच्छयार्दिता॥७॥ इ-
ष्ट्वाग्निजिह्वं पयसा पुरुषं यजुषां पतिं॥ निम्लोचत्यर्क आसीनमग्न्यागारे समाहितम॥८॥

यामेहैतं वक्ष्यमितिहासं प्रस्तौति॥ अथेति॥ अनुपृच्छतां देवानां ब्रह्मणा वर्णित इतिहासो मया श्रुत-
द॥ देवस्य प्रस्तावाय प्रथमं हिरण्याक्षहिरण्यकशिपूत्पत्तिप्रसंगमाह॥ दितिरित्यादिना याव-
दध्यायपरिसमाप्ति॥ मरीचेः पुत्रं॥ हृच्छयः कामः तेनार्दिता॥ अतः संध्यायामेव कामितवती॥७॥
तदपत्य ... समाहितं॥ अग्निर्जिह्वा यस्य॥ यजुषां यज्ञानां पतिं पुरुषं प्रीणयित्वा ...
... भाषिणीमिति वक्ष्यति॥८॥ ॥

छंदांसि गायत्र्यादीनि ।। यत्तां गम्भजलछंद पाय तुवादेन भगवदवयवत्वेनाभिधीयते ।। बर्हिः प्राहेदीर्घ
भावस्यार्थः ।। दृशि चक्षुषि चाज्यं होमद्रव्यादिकमं चतुर्दश ।।३४।। स्रुक्तुंडइति तुंडे स्रुगासीत् स्रुवो नासिकयोः
इडाभक्षणपात्रं चमसाः ग्रहाश्च सोमपात्राणि ।। प्राशित्रं ब्रह्मभागपात्रं ग्रसने नेति ग्रसनेन भ
क्षणं तदेवाग्निहोत्रं चर्वणं भक्षणं ।।३५।। दीक्षादीत्यादीक्षाणि यथेष्टिः अनुजन्म अवतारेवारम्भाभिव्यक्तिः ।। उपसद
इष्टित्रयरूपाः शिरोधरं ग्रीवा प्रायणीयादीष्टीनेन ऐष्टिः ।। उदयनीया समाप्तेष्टिः ।। तथ प्रवर्ग्य
प्रवर्ग्यो महावीरः अस्मत्सदा सर्वैकियतेन सभ्योहोमरहितोऽग्निः ।। आवसथ्यं औपासनाग्निः

छंदांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वंघ्रिषु चातुर्होत्रम् ।। स्रुक्तुंड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरं
ध्रे ।। प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम् ।।३६।। दीक्षानुजन्मोपसदः
शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः ।। जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चि
तयोऽसवो हि ते ।।३७।। सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव धातवः ।। स
त्राणि सर्वाणि शरीरसंधिस्त्वं सर्वयज्ञक्रतुरिष्टिबंधनः ।।३८।।

नयोर्हृदैकेन नव कतनूपस्य
ग्रीवेशिरः ।। चितयः इष्टकाचयनानि पंचप्रसवः प्राणाः ।।३७।। प्रातःसवनादीन्यवस्थितिः ।। आस
नेखात्यादयवस्थाः ।। अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्यामश्च इति स
मसंस्थाविभेदाः ।। तमांसादि सप्त धातवः ।। सत्राणि द्वादशाहादीनि बहुयागसंघातरूपाणि
असोमाः यज्ञाः सोमाः क्रतवः तद्रूपस्त्वं ।। इष्टिर्यजनं तत्र ज्ञानं तेन देवबंधनं यस्य सः ।। इष्टयो
ऽसावेव यदि करंकीर्तयंतः प्रणमंति ।। ३८ ।। ।।

नमो नमस्त इति ॥ अखिलमंत्रादिरूपाय क्रियात्मने सामान्यापाररूपाय ॥ किंच वैराग्ययुक्तकर्माभ्या
सेन शुद्धिः ततो भक्तिः ततः आत्मजयः चित्तस्थैर्यं तेनानुभावितं साक्षात्कृतं यज्ज्ञानं तस्मै ॥ एवंभू
तज्ञानप्रदाय गुरवे च ॥३९॥ हे भूधर सभूधरा सपर्वता भूः वनान्निःसरतो गजेंद्रस्य दंताद्रं तेन
दंष्ट्राग्रे ॥ त्वया धृता भूः विराजत इत्यर्थः ॥ भूमंडलेन तव रूपं विराजत इत्यर्थः ॥ त्रयीति ॥ अथ त्रयीमयं ते रदे

नमो नमस्तेऽखिलमंत्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने ॥ वैराग्यभक्त्या
त्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः ॥३९॥ दंष्ट्राग्रकोट्या भग
वंस्त्वया धृता विराजते भूधर भूः सभूधरा ॥ यथा वनान्निःसरतो दता धृ
ता मतंगजेंद्रस्य सपत्रपद्मिनी ॥४०॥ त्रयीमयं रूपमिदं च सौकरं भूमंड
लेनाथ दता धृतेन ते ॥ चकास्ति शृंगोढघनेन भूयसा कुलाचलेंद्रस्य य
थैव विभ्रमः ॥४१॥ संस्थापयैनां जगतां सतस्थुषां लोकाय पत्नीमसि मा
तरं पिता ॥ विधेम चास्यै नमसा सह त्वया यस्यां स्वतेजोऽग्निमिवारणावधाः ॥४२॥

यं दंष्ट्रं तेन दंष्ट्राग्रेण धृतेन भूमंडलेन च कास्ति शोभते ॥ शृंगेण उढो धृतो घनो येन तस्य कुलाचलेंद्रस्य भूयसा इति महा
ता ॥ विभ्रमो विलासः ॥४१॥ लोकाय आवस्थानाय एतेषां पत्नीं जगतां मातरं ॥ यतस्त्वं पितासि ॥ एवंभू
ता ॥ तत्र स्थिताः संतः त्वया पित्रा सह ॥ अस्यै मात्रे नमसा विधेम नमनं करवाम ॥ नमस्का
रेण परिचरेमेति वा ॥ स्वतेजः धारणशक्तिं याज्ञिकाः मंथनतोऽग्निमरणाविवाधत्त इति हि

उद्वृतः तिमिङ्गिलः पुच्छेन ॥ खचरं आकाशचारी कठोरः कठिनः सटाः स्कंधवालान् ॥ खरशृंगतीक्ष्ण
शृंगो मत्स्यः सा नक्र ॥ यस्य खुरैः राहतानि ग्रस्तानि येन ॥ सितदंष्ट्रः अतिशुक्लदंष्ट्रः ॥ ईक्षा नि
रीक्षणमेवालोको यस्य तदा प्रकाशेन तरा भावान् ॥ बभासे शोभते ॥ महीध्रः पृथिव्याः उद्धर्ता ॥ २० ॥
क्रोडापदेशः वराहरूपमास्थाय मध्वरांगोपि यज्ञविग्रहो घ्राणेन विनिघ्नन् ॥ रुषाण्णः क्रोधान्वितः विप्रान्
उदीक्ष्य पुच्छेन जलमाविशत ॥ २१ ॥ तदा नीलं नभ समुद्रं ध्वनि [illegible] समुद्र उदन्वान् समुद्रः ॥ आर्त
इव स्तनयन् शब्दं कुर्वन् ॥ भो यज्ञेश्वर मां पाहि ॥ मामव रक्षेव ब्रुवाणः ॥ आर्तेन साक्ष्यमाह ॥ उ

उत्क्षिप्तवालः खचरः कठोरः सटा विधुन्वन् खररोमशत्वक् ॥ खुराहताभ्रः सितदंष्ट्र ईक्षा
ज्योतिर्बभासे भगवान्महीध्रः ॥ २० ॥ घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्क्रोडापदेशः स्वयमध्व
रांगः ॥ करालदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान्गृणतोऽविशत्कं ॥ २१ ॥ स वज्रकूटांगनिपा
तवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् ॥ उत्सृष्टदीर्घोर्मिभुजैरिवार्तश्चुक्रोश यज्ञेश्वर पा
हि मेति ॥ २२ ॥ खुरैः क्षुरप्रैर्दरयंस्तदाप उत्पारपारं त्रिपरू रसायां ॥ ददर्श गां तत्र सुषुप्सु
रग्रे यां जीवधानीं स्वयमभ्यधत्त ॥ २३ ॥

स्वदंष्ट्राग्रेण [illegible] दीर्घा [illegible] विधि
घः प्राणं ते वेदवः वज्रकूटो वज्रमयः पर्वतः तद्वदंगं यस्य भगवतः तस्य निपातवेगेन विशीर्णा कु
क्षिर्यस्य ॥ २२ ॥ तदा रसायां रसातले गां पृथ्वीं ददर्श कः त्रिपरूः त्रीणि पर्वाणि सवनात्मकानि यस्य वो
गीयस्य यज्ञमूर्तिर्विलोक्य ॥ किं कुर्वन् ॥ खुरैः क्षुरप्रायैः दरयन् तदा आपः तत्स्पृष्टाः अयः पाटयन् ॥ कथं उत्पा
रपारं [illegible] पारं यथा भवति तथा विदारयन् ॥ कथं भूतां गां अग्रे
प्रलयसमये ॥ तत्र तां सुषुप्सुः शिशयिषुः सन् ॥ जीवधानीं [illegible] सर्वजीवाधारभूतां यां स्व

रसायाः सकाशादुत्थितः सन् ॥ रुरुचे ॥ सम्यगरोचत शोभत ॥ तत्रापि ॥ प्रेमसिंधावद्भुतसमाग कृते ॥ ध्यानेपतितश्चेत् ॥ तस्य सहस्राक्षो विक्रमोयस्मात् ॥ दैत्यं सुनाभचक्रेण हत्वा संदीपितस्त्रै ग्रामस्वर्भस्य ॥ यद्यमस्यविद्यमाने ॥ किमित्यपरिभवं सहस्वेति ॥ सुनाभेन संदीपितस्त्रीग्रमन्युः सभगवांस्त्विंद्रोगजेलीलयाजघान ॥ ३१ ॥ गजेंद्रोनगातीक्रीडयाविद्रावयन् ॥ गैरिकयायथा ग्र

स्वदंष्ट्रयोद्धृत्यमहींनिमग्नां सउत्थितः संरुरुचेरसायाः ॥ तत्रापिदैत्यं गदयापतंतं सुनाभसंदीपिततीव्रमन्युः ॥ ३२ ॥ जघानरुंधानमसह्यविक्रमं सलीलयेभंमृगराडिवांभसि ॥ तद्रक्तपंकांकितगंडतुंडोयथागजेंद्रोजगतींविभिंदन् ॥ ३३ ॥ तमालनीलंसितदंतकोट्याक्ष्मामुत्क्षिपंतंगजलीलयांग ॥ प्रज्ञायबद्धांजलयोनुवाकैर्विरिंचिमुख्याउपतस्थुरीशं ॥ ३३ ॥ ऋषयऊचुः ॥ जितंजितंतेजितयज्ञभावनत्रयींतनुंस्वांपरिधुन्वतेनमः ॥ यद्रोमगर्तेषुनिलिल्युरध्वरास्तस्मैनमःकारणसूकरायते ॥ ३४ ॥

हृणांडरक्तेनांकोभवति ॥ तथातस्यक्रमेणपंकः तेनांकितौगंडौतुंडंचयस्यसतथा वान्नैतिसूर्वैणोवात्वयः ॥ ३२ ॥ प्रज्ञायबद्धांजलयोनुवाकोवैदिकंसूक्तंतेनस्तुवंतोवाकौलकृत्तुः ॥ ३३ ॥ भो अजित ते तव या जितंजितमितिसंभ्रमेवीप्सायतेभोअनेग्राक्रियतेरतितथा ॥ त्रयीवेदत्रयीनिलिल्युःलीन भवाः ॥ कारणंपृथिव्युद्धारणंतेनसूकराय ॥ यज्ञात्मकतांप्रपंचयंतःस्तुवंति ॥ रूपमित्यादिवत्नर्भिः

अपविन्निः ह्निनारदस्तेन ग्रातेतिशोभः ॥ सनकाद्यो न कुर्वंति ॥ वयंकिमितिकरिष्यामहस्मेवंभूतो गतो
मंत्ररोधेभ्यः ॥ १ ॥ गांपाप्समपाधिपालयेसमर्थः शुहृद्वंद्वरवि ॥ १२ ॥ प्रजापालकस्तेन हृष्टोभविष्यति ॥ १३ ॥
यत्नलिनः यत्नमतिः अपगतोर्थो यस्मात्केवलं प्रमादेवेसमर्थः ॥ यद्यस्मादात्मैवस्वयेनाहृतं ॥
तस्मिन्नष्टेस्वार्थसेवासिद्धिः सर्वात्मनाच्युतस्य ॥ १४ ॥ वर्त्तेयवर्त्तिष्ये अमीवसूदनपावना

पन्नावमात्मजैर्वीरकार्यो यत्पचिन्तिर्गुरौ ॥ शांताम्ममनैश्वेतसादरंगतमस्सरैः ॥ १६ ॥ स
न्नमस्सामयज्ञानिसहस्त्रात्मानोगुरौ ॥ उत्पाद्य ज्ञानधर्मेणगोपुत्रैः पुरुषपुत्र ॥ १७ ॥
परंपुरुषं पुराणं महद्रूपास्मज्ञरत्नपान्नप ॥ भगवांस्तेप्रजाभर्त्ता हृषीकेशोनुग्रहीष्यति ॥ १८ ॥
येषानन्त्रष्टोभगवान्पत्तलिंगोजनार्दनं ॥ तेषाम्श्रमोसपायोयपदामानाहतः स्वयं ॥ १९ ॥
मत्रह ॥ आदेशोहं भगवतोवर्त्तेयामीवसूदन ॥ स्थानेविहावजानीहि प्रजानांममचप्रभो ॥ २० ॥
ध ॥ यदोकः सर्वसत्वानांमहीमग्नामहांमसि ॥ अस्याउद्धरणेयत्नोदेवदेव्याविधीयतां ॥ २१ ॥
मैत्रेयउ ॥ परमेष्टीचपामध्येतथासन्नामवेत्तगां ॥ कथमेनांसमुन्नेष्यइतिदध्योधियाचिरं ॥
२२ ॥ सृजतोमेक्षितिर्वार्भिः प्लाव्यमानारसांगता ॥ अथात्रकिमनुष्टेयमस्माभिः सर्गयोजितैः ॥
२३ ॥ यस्याहंहृदयादासंसईशोविदधातमे ॥ इत्यभिध्यायतोनासाविवरात्सहसानघ ॥ व
राहतोकोनिरगादंगुष्टपरिमाणतः ॥ २४ ॥

शान ॥ अनुजानीहि अन्नस्थानममितिअनुज्ञातांदे
दि ॥ १४ ॥ महीचेत ॥ अतआह ॥ यदोकःस्थानंसामहीहेदेव अस्यादेव्याः ॥ १५ ॥ एवंपानेहृतेपि
पुनरकं ॥ इयंवोद्भूतानामपांमध्येसन्नामवसन्नां निमग्नांसमुन्नेष्ये ॥ उद्धरिष्यामि ॥ १६ ॥ चिंतामे
वाह ॥ सृजतः वार्भिरद्भिः ॥ रसां रसातलमीश्वरेणासर्गेनियुक्तैः ॥ १७ ॥ मेत्रउष्टेयं ॥ सएवविद
धातु ॥ संपादयतु ॥ वराहतोकः ॥ सूक्ष्मोवराहः ॥ १८ ॥

कर्तिपंकम
ग्गसिंधुसुती
र्थकीर्तिरधो
दाजः १

भा
स्की
५९

खस्थः आकाशे स्थितः सन् ॥१९॥ चित्रधा अनेकधा ॥२०॥ पूर्वमंगुष्ठाग्रप्रमाणो दृष्टः गंडशिला
स्थूलपाषाणः तत्समः ॥२२॥ यज्ञो विस्तः ॥ निजरूपतिरोधानेन मे मनः खेदयन् ॥ इति मीमांसमान
समतः ॥ जगर्जे अगर्जत् गिरीन्द्रतुल्यः ॥२३॥ गर्जनप्रयोजनमाह ॥ ब्रह्माणमिति ॥२४॥ घर्घरितं
तज्ज्ञात्वा करणाध्वनिं अनिश्चयेन यः स्वखेदः तं क्षपयितुं शीलं तमपयिसनाशकं ॥ ते इति पुनरु

तस्याभिपश्यतः खस्थः क्षणेन किल भारत ॥ गजमात्रः प्रववृधे तदद्भुतमभून्महत् ॥१९॥
मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह ॥ दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा ॥२०॥
किमेतत्सौकरव्याजं सत्त्वं दिव्यमवस्थितं ॥ अहो बताश्चर्यमिदं नासाया मे विनिःसृतं ॥२१॥
दृष्टोऽङ्गुष्ठशिरोमात्रः क्षणाद्गंडशिलासमः ॥ अपि स्विद्भगवानेष यज्ञो मे खेदयन्मनः ॥२२॥
इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः ॥ भगवान्यज्ञपुरुषो जगर्जागेन्द्रसन्निभः ॥२३॥
ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान् ॥ स्वगर्जितेन ककुभः प्रतिस्वनयता विभुः ॥२४॥
निशम्य ते घुर्घुरितं स्वखेदक्षयिष्णु मायामयसूकरस्य ॥ जनस्तपःसत्यनिवासिनस्ते त्रिभिः पवित्रैर्मुनयोऽगृणन्स्म ॥२५॥
तेषां सतां वेदवितानमूर्तिर्ब्रह्मावधार्यात्मगुणानुवादं ॥ विनद्य भूयो विबुधोदयाय गजेन्द्रलीलो जलमाविवेश ॥२६॥

लिः प्रसिद्धिख्यापनार्थी
त्रिभिः पवित्रैः ऋग्यजुःसाममन्त्रैरस्तुवन् ॥२५॥ वेदैर्वितानं यस्य तन्मूर्तिर्यस्य सः ॥ अत एवात्मा
नो गुणाननुवदंतीति तथा ॥ तत्तेषां ब्रह्म उक्तवावितं वेदमवधार्य ज्ञात्वा ॥ कथंभूतं सत्त्वा
विवेशोत्सुकपेत्या घामाहृदाभ्याम् ॥२६॥

५९

ऋषीणां मित्रावरुणा ॥ ४८ ॥ युक्तकृतस्य यतो चित्तं कर्षतः प्रतपवकस्यवस्तृणः इदं हि यामृतमिमा
मर्यो ल्कर्षा कायमथाप्यभिचक्षते ॥ ४९ ॥ यासीत्साम महिष्यासीत् ॥ प्रजा वभूविरे हहिं यामाः ५४

ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतं ॥ ज्ञात्वा तद्धृदये भूयश्चिंतयामास कौरव ॥ ४९ ॥
अहो अद्भुतमेतन्मे व्यापृतस्यापि नित्यदा ॥ न ह्येधंते प्रजा नूनं दैवमत्र विघातकं ॥ ५० ॥
एवं युक्तकृतस्तस्य दैवं चावेक्षतस्तदा ॥ कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते ॥ ५१ ॥
ताभ्यां रूपविभागाभ्यां मिथुनं समपद्यत ॥ यस्तु तत्र पुमान्सोभून्मनुः स्वायंभुवः स्वराट् ॥
॥ ५२ ॥ स्त्री यासीच्छतरूपाख्या महिष्यस्य महात्मनः ॥ तदा मिथुनधर्मेण प्रजा ह्येधांबभूविरे
॥ ५३ ॥ स चापि शतरूपायां पंचापत्यान्यजीजनत् ॥ प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत
॥ ५४ ॥ आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम ॥ आकूतिं रुचये प्रादात्कर्दमाय तु मध्यमां ॥ ५५ ॥
दक्षायादात्प्रसूतिं च यत आपूरितं जगत् ॥ इति श्रीतृतीयस्कंधे द्वादशः ॥ १२ ॥ शुक ॥ निशम्य
वाचं वदतो मुनेः पुण्यतमां नृप ॥ भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः ॥ १ ॥ विदुर उ०
स वै स्वायंभुवः सम्राट् प्रियः पुत्रः स्वयंभुवः ॥ प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने ॥ २

तदेवाह स चापीति ॥ ५५ ॥ यतः यासां संसेसतिभिः ॥ ५५ ॥ इति तृतीये द्वादशः ॥ १ ॥ त्रयोदशे मिस्त्वा
यामनो राकसिकास्ततो ॥ धरामुद्धरन्ने सूकर तान्कोजहे मायाजदेनम् ॥ १ ॥ स्वायंभुवः पुत्रं तदेहांपा

भा
टी
५५

विष्वक्सेनो हरिर्देवाश्रयो यस्य ॥२॥ अत तस्य चरितं श्रोतुमिच्छामि ॥ स्थविरेष्वस्मोपसिल्लसत्पुंसो
ऽत्र तस्मै यमेवार्थः ईरितः स्तुतः न तु येषां हृदयेषु स्थितो योगो भागवतानां गुणानुश्रवणं ॥४॥ सद
स्वर्णी यं श्रीहरिः सत्यसंवरणाद्य पथीयते तत्पालि श्री हरेः भीत्वा यस्तो व्रजलोमप्रसारयती
नथ्यः तमप्यवद् । अप्यभाषत । प्रणीयमानः तेन प्रवर्त्यमानः ॥५॥ त्वमेवैकः पिता सर्वेषां

चरितं तस्य राजर्षेरादिराजस्य सत्तम ॥ ब्रूहि मे श्रद्दधानाय विष्वक्सेनाश्रयो ह्यसौ ॥२
ऽत्र तस्य पुंसां स्थविरस्य मस्तनं जन सा तत्त्वेऽभिरीरितो यथाः ॥ तन्नहन्यमाणानुश्रवणं श्रुङ्केद
पादारविन्दं हृदयेषु येषां ॥ मुकुं ॥ इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्षस्य चरणोपधा
नं ॥ प्रहृष्टरोमा भगवत्कथायां प्रणीयमानो मुनिरभ्यचष्ट ॥५॥ मैत्रेय ॥ यदा स्व भाषं
यासाकं जातः सार्धं भुवो मनुः ॥ प्राञ्जलिः प्रणतः प्रेष्ठं देवदार्भमभाषत ॥६॥ त्वमेकः सर्व
भूतानां जन्मकृद्वृत्तिदः पिता ॥ अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत् ॥७॥ तदिह ये
ह्रिन मस्त्वंकं न स्वीयाप्नात्मवार्तिकः ॥ यत्कृत्वेह यशो विष्वगमुत्र च भवेद्धृतिः ॥८॥ ब्रह्मो
प्रीतस्त्वभ्यमहं तात स्वस्ति स्तात् द्विती यदि ॥ यन्निर्व्यलीकेन हृदा मे आत्मना पित
मृ ॥९॥

यतो जन्मकृद्वृत्तिदः पोषकश्च त्वमेव ॥ अतस्तव यद्यप्यस्मापेक्षा नास्ति ॥ अथाप्यस्माकं ते—
शुश्रूषा केन कर्मणा भवेत् न हि ये हीनस्तरेणान्वयः ॥७॥ हे ईड्य आत्मशक्तिभ्रमलक्केशकर्म
स्तमध्ये केन कर्मणा भवेत् न हि ये हि ॥ इदं कर्तव्यमिति कथय यत्कृत्वा यस्मिन्कृते सति ॥ विष
कारितः ॥८॥ वां पृथुवाभ्यां स्वस्ति भद्रं स्तात् ॥ भूयात् नयत तो मां शाधि प्रभुशिक्षितयेति आत्मना स्वय

श्री

प्राच्यतो मुखैः स्थापत्यं विश्वकर्मशास्त्रं ।।३८।। कर्मतंत्रक्रममाह ।। षोडश्यु[illegible]विति । पुरीषी चयनं अग्नि
ष्टुत् ।। अग्निष्टोमः ।।४०।। विद्येति । यो वेदेयत्तसेस्वरस्नानादिः परमामतेति स्मृतेः ।। दानमिति । दया । भ
साभयप्रदानमकुलानोहेति षोडशमीमिति वचनात् ।। एवं च ।। तपः शौचं दया सत्यमिति पादाः कृते
कृता इति प्रथमस्कन्धोक्तेरविरोधः ।।४१।। सावित्रं ब्रह्मचर्यं उपनयनादारभ्य गायत्रीमधीयानस्य
त्रिरात्रं प्राजापत्यं व्रतमाचरतः संवत्सरं ब्राह्मं वेदग्रहणान्तं बृहन्नैष्ठिकं ।। वार्ता । अनिषिद्धकृष्यादि
वृत्तिः संचयो याजनादिवृत्तिः शालीनमयाचितवृत्तिः शिलोञ्छनं पतितकणवृत्तिः ।। एकवच

आयुर्वेदं धनुर्वेदं गांधर्वं वेदमात्मनः ।। स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ।।३८
इतिहासपुराणानि पंचमं वेदमीश्वरः ।। सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ।।३९
षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ ।। आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवं ।।४०
विद्या दानं तपः सत्यं धर्मस्येति पदानि च ।। आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः ।।४१
सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा ।। वार्ता संचय शालीन शिलोञ्छ इति वै गृहे ।।४२
वैखानसा वालखिल्यौडुम्बराः फेनपा वने ।। न्यासे कुटीचकः पूर्वं बहूदो हंसनिष्क्रियौ ।।४३

नमार्थं पश्येतागरहेहनयइति ।। यदा शिलोञ्छ इति द्वे द्वे के समसी ।। एवं वृत्तिभेदे सति गृहे नाः
तभवंतीत्यर्थः ।।४२।। वने स्थिताश्चत्वारः न च वैखानसा अकृष्टपच्यवृत्तयः वालखिल्याः नवे
लब्धे पूर्वसंचितान्नत्यागिनः ।। औडुम्बराः प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति ।। तत आहृतैः
फलादिभिर्जीवंतः ।। फेनपाः स्वयं पतितैः फलादिभिर्जीवंतः ।। कुटीचकाः स्वाश्रमकर्मप्रधानाः
बहूदः कर्मोपसर्जनी ज्ञानप्रधानः ।। हंसो ज्ञानाभ्यासनिष्ठः । निष्क्रियः प्राप्ततत्त्वः एतेषां
वै यथोत्तरं श्रैष्ठ्यः मावादीनां क्रमेणोत्पत्तिमाह ।।४४।।

भा
टी
४४

आन्वीक्षिकीति ॥ आन्वीक्षिक्याद्या मोक्षधर्मकामार्थविद्याः ॥ भूर्भुवः स्वरिति व्यस्तास्तिस्रः समस्ता च
तुर्थी ॥ यथाहाश्वलायनः एवं व्याहृतयः प्रोक्ता व्यस्ताः समस्ता इति ॥ यद्वा महः इति चतुर्थी ॥ तथा च
श्रुतिः भूर्भुवः स्वरिति वा ॥ एतास्तिस्रो व्याहृतयः ॥ तासामु ह स्मैतां चतुर्थीं माहाचमस्यः प्रवेदयते मह
इतीति दह्रतः हृदयाकाशात् ॥ ४४ ॥ स्नुतः स्नायुतः अनुष्टुबुत्पन्ना वा नीति प्रकृतेः ॥ ४५ ॥ महाक
ल्पे ब्रह्मा याज्ञवल्क्यरूपो भवदिति ... देवे दर्शयन् ॥ वर्णानामुत्पत्तिमाह ॥ स्पर्श इति सार्धेन ॥ स्प
र्शाः कादिवर्गपंचके स्वरः अकारादिः ॥ ४६ ॥ ऊष्माणं शषसह चतुष्कं ॥ अन्तस्था यरलवाः सप्त

आन्वीक्षिकी त्रयी वार्ता दंडनीतिस्तथैव च ॥ एवं व्याहृतयश्चासन्प्रणवो ह्यस्य दह्रतः
४४ ॥ तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः ॥ त्रिष्टुम्मांसात्स्नुतोऽनुष्टुब्जगत्यस्थ्नः
प्रजापतेः ॥ ४५ ॥ मज्जायाः पंक्तिरुत्पन्ना बृहती प्राणतोऽभवत् ॥ स्पर्शस्तस्याभवज्जीवः स्वरो दे
ह उदाहृतः ॥ ४६ ॥ ऊष्माणमिन्द्रियाण्याहुरन्तस्था बलमात्मनः ॥ स्वराः सप्त विहारेण भव
न्ति स्म प्रजापतेः ॥ ४७ ॥ शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मनः परः ॥ ब्रह्मावभाति वित
तो नानाशक्त्युपबृंहितः ॥ ४८ ॥ ततोऽपरामुपादाय स सर्गाय मनो दधे ॥ ४९ ॥

स्वराः षड्जादयः विहारेण क्रीडया ॥ ४७ ॥ अत एव शब्दब्रह्मत्वात् ॥ ब्रह्मणः परमेश्वरस्येति संप्रका
शनेत्याह ॥ व्यक्ता वैखरी ॥ अव्यक्तः प्रणवः तदात्मनस्तस्य ब्रह्मणः परः परमेश्वर आभातिकी
दृशः ब्रह्मस्वरूपविशिष्टः तथा व्यक्तात्मनो ब्रह्मरूपो विततो वभाति ॥ व्यक्तात्मनो नानाशक्त्युपबृं
हितत्वं दृष्टान्तरूपो वभाति ॥ यद्वा एवं विसृष्टाः सतीनीहारं तमोऽभवत् ॥ ततोऽपरामनिबद्धकामा
सक्तां तनुं याह्यब्रह्मा तत्र स्त्रस्य सदा सैव ॥ तत्रैव तनुग्रहणे कारणमाह ॥ ४९ ॥

ह

५५

सत्वं बलमाहकृतिं नीललोहितनामस्वभावः तीव्रमानेन ॥ १५ ॥ रुद्राणां यूथानि दृष्ट्वा ॥ १६ ॥ सृष्टा सृजति ॥

स्मादिष्टः सद्रुद्रगणान् भगवान्नीललोहितः ॥ सत्वाहकृतिस्वभावेन ससर्जात्मसमाः प्रजाः ॥ १७ ॥
रुद्राणां रुद्रसृष्टानां समंताद् ग्रसतां जगत् ॥ निशम्यासंख्यशो यूथान् प्रजापतिरशंकत ॥ १८ ॥
अलं प्रजाभिः सृष्टाभिरीदृशीभिः सुरोत्तम ॥ मया सह दहंतीभिर्दिशश्चक्षुर्भिरुल्बणैः ॥ १९ ॥
तप आतिष्ठ भद्रं ते सर्वभूतसुखावहं ॥ तपसैव यथापूर्वं स्रष्टा विश्वमिदं भवान् ॥ २० ॥ त
पसैव परं ज्योतिर्भगवंतमधोक्षजं ॥ सर्वभूतगुहावासमंजसा विंदते पुमान् ॥ २१ ॥ मैत्रेय उ॰
एवमात्मभुवादिष्टः परिक्रम्य गिरांपतिं ॥ बाढमित्यमुमामंत्र्य विवेश तपसे वनं ॥ २२ ॥
अथाभिध्यायतः सर्गं दश पुत्राः प्रजज्ञिरे ॥ भगवच्छक्तियुक्तस्य लोकसंतानहेतवः ॥ २३ ॥
मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः ॥ २४ ॥
उत्संगान्नारदो जज्ञे दक्षोंगुष्ठात् स्वयंभुवः ॥ प्राणाद्वसिष्ठः संजातो भृगुस्त्वचि करात्क्रतुः ॥ २५ ॥
पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोरृषिः ॥ अंगिरा मुखतोक्ष्णोत्रिर्मरीचिर्मनसोभव
त् ॥ २६ ॥ धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयं ॥ अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयंकरः ॥
२७ ॥ हृदि कामो भ्रुवः क्रोधो लोभश्चाधरदच्छदात् ॥ आस्याद्वाक् सिंधवो मेढ्रान्निर्ऋतिः पायोरघा
श्रयः ॥ छायायाः कर्दमो जज्ञे देवहूत्याः पतिः प्रभुः ॥ मनसो देहतश्चेदं जज्ञे विश्वकृतो जगत् ॥ २८

अधरदच्छदात् ॥ अधरोष्ठात् ॥ २९ ॥ देहांतरेण कृते सर्गं वक्ति ॥ न देहत्यागे कारणमाह वाचमित्या

भा
रदी
४२

वा तैरे स्त्र कृतं तेषां गच्छे कामं ॥ १ ॥ ते जीयमाना मतितेन नसिनो नमपि स्मृ लोकं समकीर्तिदं न भवति ॥ येषां तेजी
य स्माह तं ॥ १ ॥ तन्वं तन्तु ॥ १ ॥ कथं त्वत्वा मोक्षमभिध्यायतः स एव ब्रह्मणः चतुः संख्या ग्रस्तान्व खात् स
म वेतान्स्त्र स्मगतान् ॥ १ ॥ चातुर्होत्रं होत्रादीनां च तन्त्राणां कर्म ॥ कर्मतत्त्वं यज्ञविस्तारः ॥ उपवेदैर्यो वेदम्

वा चं रहितं तं रेन तीसवयं भूर्ह वतीमनः ॥ अकामां च कमेत्ततः सकाम इतितः स्मृतं ॥ १८ ॥
तमधर्मं कृतमति विलोकयित रेस्वता ॥ मरीचिश्च ख्यातृतनयो विसंभात्मबोधयन ॥ १९
नैतत्स्वं वेदन्तं तवयेन करिष्यति वापरे ॥ यत्वं तु हितं रेगच्छेर निरस्यांगतेमयुः ॥ २० ॥ ते
नोय सामपियेतन्न स स्लोकं नगहृतो ॥ यहृतमनुतिष्ठन्वै लोकः तेमायकल्पते ॥ २१ ॥
नसे नमो भगवते परं देवेन रोचिषा ॥ प्रणम्य ध्यायं नयामास सधमैपावमर्हति ॥ २२ ॥ स्व
स्यं गत्वतः पुत्रान्स्तोत्र ह्या प्रजापतीन ॥ प्रजापतिपतिस्त्वं नमामनक्षी टितस्तदा ॥ २३ ॥
तां दृष्टिपोजगत् वीरं तं नी हा देव हिं तस्तमः ॥ कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात्
कथं स्रक्ष्याम्यहं लोकान्समवेतान्यथा पुरा ॥ चातुर्होत्रं कर्मतंत्रमुपवेदनयैः सह ॥ २४
धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः ॥ विदुर ॥ स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृज
त् ॥ यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन ॥ मैत्रेय उ ॥ ऋग्यजुःसामाथर्वाख्यान्वेदान्पूर्वादिभि
र्मुखैः ॥ शास्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात् ॥ २५ ॥ सह ॥ आयुर्वेदं धनुर्वेदं गान्धर्वं वेदमात्मनः

व ॥ २६ ॥ स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ॥ इतिहासपुराणानि पञ्चमं वेदमीश्वरः ॥ सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ॥ २७ ॥ षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ ॥ आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवम् ॥ २८ ॥ विद्या दानं तपः सत्यं धर्मस्येति पदानि च ॥ आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः ॥ २९

विकारैः षोडशभिर्युक्तैः अष्टप्रकृतिसंयुक्तैः सहितः तदारब्धत्वार्थः ॥ अयमंडकोशो यत्र प्रविष्टः ॥ परमा-
णुवल्लक्ष्यतेऽस्त्वन्तरेणान्वयः कीदृशः अंतः पंचाशत्कोटियोजनविस्तृतः बहिश्च विशेषादिभिः पृथिव्या-
दिभिः सप्तभिरावृतः ॥ कीदृशैः अंडकोशः प्रमाणाद्दशगुणमुत्तरोत्तराधिकं येषु तैः ॥ न केवलमय-
मेक एव अपि तु ॥ अन्येऽपि लक्ष्यंते ॥ सर्वेषां कारणानां कारणं धाम स्वरूपं ॥४२॥ इति श्रीभागवते तृतीये
एकादशः ॥११॥ द्वादशेऽत्र क्रमप्राप्तादिमनः सर्गसमृद्ध्यनात् ॥ कायद्वैधेन यौनस्य मनुसर्गोऽनुवर्ण्यते ॥ अथ
इति ॥ ब्रह्मा स्रष्टेत्युक्तं तत्र प्रथमं अविद्यावृत्तीः ससर्ज ॥ तत्र तमो नाम स्वरूपाप्रकाशः मोहो देहाद्यहंबु-

विकारैः सहितो युक्तैर्विशेषादिभिरावृतः ॥ अंडकोशो बहिरयं पंचाशत्कोटिविस्तृतः ॥४०॥
दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ॥ लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यंडराशयः ॥४१॥
तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् ॥ विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ॥४२॥
इति श्रीभागवते महापुराणे तृतीयस्कंधे एकादशोऽध्यायः ॥११॥ मैत्रेय उवाच ॥ इति ते व-
र्णितः क्षत्तः कालाख्यः परमात्मनः ॥ महिमा वेदगर्भोऽथ यथास्राक्षीन्निबोध मे ॥१॥ सस-
र्जाग्रेंऽधतामिस्रमथतामिस्रमादिकृत् ॥ महामोहं च मोहं च तमश्चाज्ञानवृत्तयः ॥२॥

द्धिः महामोहो भोगे देहाद्यहंबुद्धिः महामोहो भोगेच्छा तामिस्रः तत्प्रतिघाते क्रोधः ॥ अंधतामिस्रः
तत्राशेऽहमेव मृत इति बुद्धिः ॥ उक्तं च वैष्णवे ॥ तमोऽविवेको मोहः स्यादंतःकरणविभ्रमः ॥ म-
हामोहस्तु विज्ञेयो ग्राम्यभोगसुखैषणा ॥ मरणं ह्यंधतामिस्रं तामिस्रं क्रोध उच्यते ॥ अविद्यां पं-
चपर्वैषा प्रादुर्भूता महात्मन इति ॥ पातंजलेऽप्येता एवोक्ताः ॥ अविद्यास्मितारागद्वेषाभिनिवे-
शाः पंच क्लेशाः इति ॥ श्रीविष्णुस्वामिप्रोक्ता वा अज्ञानविपर्यासभेदभयशोकाः ॥ तदुक्तं स्वादृश-
स्य विपर्यासेत्यादि ॥२॥

न बहु अमन्यत नाभ्यनंदत ॥ यद्यपि प्रतिकल्पं सनकादिसृष्टिर्नास्ति ॥ तथापि ब्राह्मसर्गत्वादिहोक्ता ते
वक्ष्यमाणास्तु अन्ये सर्गादयः प्रतिकल्पं भवंति ॥ सनकादयस्तु ब्राह्मकल्प एव जाता वर्तंते ॥ ४ ॥

दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बहु अमन्यत ॥ भगवद्ध्यानपूतेन मनसान्यां ततोऽसृजत ॥ ३ ॥
सनकं च सनंदं च सनातनमथात्मभूः ॥ सनत्कुमारं च मुनीन्निष्क्रियानूर्ध्वरेतसः ॥ ४ ॥ ता
न्बभाषे स्वभूः पुत्रान्प्रजाः सृजत पुत्रकाः ॥ तन्नैच्छन्मोक्षधर्माणो वासुदेवपरायणाः ॥ ५ ॥
सोऽवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः ॥ क्रोधं दुर्विषहं जातं नियंतुमुपचक्रमे ॥ ६ ॥ धि
या निगृह्यमाणोऽपि भ्रुवोर्मध्यात्प्रजापतेः ॥ सद्योऽजायत तन्मन्युः कुमारो नीललोहितः ॥ ७ ॥
स वै रुरोद देवानां पूर्वजो भगवान्भवः ॥ नामानि कुरु मे धातः स्थानानि च जगद्गुरो ॥ ८ ॥
इति तस्य वचः पाद्मो भगवान्परिपालयन् ॥ अभ्यधाद्भद्रया वाचा मा रोदीस्तत्करोमि ते ॥ ९ ॥
यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः ॥ ततस्त्वामभिधास्यंति नाम्ना रुद्र इति प्रजाः ॥ १० ॥
हृदिंद्रियाण्यसुर्व्योम वायुरग्निर्जलं मही ॥ सूर्यश्चंद्रस्तपश्चैव स्थानान्यग्रे कृतानि ते ॥ ११ ॥
मन्युर्मनुर्महिनसो महाञ्छिव ऋतध्वजः ॥ उग्ररेता भवः कालो वामदेवो धृतव्रतः ॥ १२ ॥ धी
र्वृत्तिरुशनोमा च नियुत्सर्पिरिलांबिका ॥ इरावती सुधा दीक्षा रुद्राण्यो रुद्र ते स्त्रियः ॥ १३ ॥
गृहाणैतानि नामानि स्थानानि च सयोषणः ॥ एभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः ॥ १४ ॥

स्वभूः ब्रह्मा ॥ ५ ॥ अवध्यातः अवज्ञातः प्रत्याख्यातमनुशासनं यैः स चासौ मन्युश्च तन्मन्युः ॥ ७ ॥ बालक
वत् ॥ १० ॥ अग्रे पूर्वमेव मया कृतानि ॥ ११ ॥ सयोषणः सस्त्रीकः एभिः स्थानैर्नामभिश्चोपलक्षितः ॥ १४ ॥

त्रैलोक्यं वर्त्तयतीति तथा २५ स्वमूर्तिभिर्मन्वंतरावतारैर्मन्वादिभिश्चांशभूतैः आविष्कृतपौरुषः सन् विश्वं रक्षति रात्रिगतां स्थितिमाह पंचभिः २६ तमस्तोमात्रां कालेनांगप्रतिसंरुद्धः अस्माद्वा विक्रमो येन अनुगतमनुप्रविष्टमशेषं यस्मिन् तदैव तूष्णीमास्ते २७ अपिधीयंते अंतर्धीयंते तिरोहिता भवंतीत्यर्थः कथं निर्मुक्तौ रहितौ शशिभास्करौ यस्यां

एष दैनंदिनः सर्गो ब्राह्मस्त्रैलोक्यवर्त्तनः तिर्यङ्नृपितृदेवानां संभवो यत्र कर्मभिः २५
मन्वंतरेषु भगवान्बिभ्रत्सत्त्वं स्वमूर्तिभिः मन्वादिभिरिदं विश्वमवत्युदितपौरुषः २६
तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः कालेनानुगताशेष आस्ते तूष्णीं दिनात्यये २७
तमेवान्वपिधीयंते लोका भूरादयस्त्रयः निशायामनुवृत्तायां निर्मुक्तशशिभास्करे २८
त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना यांत्यूष्मणा महर्लोकाज्जनं भृग्वादयोर्दिताः २९
तावत्त्रिभुवनं सद्यः कल्पांतैधितसिंधवः प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः ३०
अंतः स तस्मिन्सलिल आस्तेनंतासनो हरिः योगनिद्रानिमीलाक्षः स्तूयमानो जनालयैः ३१

यां भवतितथा २८ भगवच्छक्तिरूपो यः संकर्षणस्तस्याग्निस्तेनोष्मणा अर्दिताः संतो जनलोकं यांति २९ कल्पांतेनैधिताः सिंधवः समुद्रा उत्कटाटोपः येषां ते च ते चंडवातेरिता ऊर्मय[श्च] ३० जनलोकमालयो येषां महर्लोकाद्गतानामन्येषां च तैः ३१

॥

त्रिस्कं ३

एवंविधैरहोरात्रैर्वर्षशतं सर्वेषां प्राणिनां ॥ आयुः परममधिकं ॥ अस्य ब्रह्मणो यदायुस्तदप्यपक्षी
णमिवेति लोकोत्तरं गतप्रायमित्यर्थः ॥ तदेवाह यदिति ॥ ३३ ॥ पूर्वस्य परार्धस्यादावितिस्त्रिभिर्वल्प
कथनमात्रं यदिति ॥ ३४ ॥ अयं तु द्वितीयस्यादौ कथितः तदेवं कालेन निमित्तेन ॥ सत्त्वानामायुः परि
माणमुक्त्वा कालपरिच्छेदरहितं तत्त्वमाह ॥ कालोयमिति पंचभिः ॥ ३७ ॥ उपचर्यते केवलेन तत्त्वेन

एवंविधैरहोरात्रैः कालगत्योपलक्षितैः ॥ अपक्षीणमिवास्यापि परमायुर्वयःशतं ॥ ३२
यदर्धमायुषस्तस्य परार्धमभिधीयते ॥ पूर्वः परार्धोपक्रांतो ह्यपरोद्य प्रवर्तते ॥ ३३ ॥ पू
र्वस्यादौ परार्धस्य ब्राह्मो नाम महानभूत ॥ कल्पो यत्राभवद्ब्रह्मा शब्दब्रह्मेति यं विदुः ॥ ३४ ॥
तस्यैव चांते कल्पोभूद्यं पाद्ममभिचक्षते ॥ यद्धरेर्नाभिसरस आसील्लोकसरोरुहं ॥ ३५ ॥
अयं तु कथितः कल्पो द्वितीयस्यापि भारत ॥ वाराह इति विख्यातो यत्रासीच्छूकरो हरिः ॥ ३६
कालोयं द्विपरार्धाख्यो निमेष उपचर्यते ॥ अव्याकृतस्यानंतस्य अनादेर्जगदात्मनः ॥ ३७ ॥
कालोयं परमाण्वादिर्द्विपरार्धांत ईश्वरः ॥ नैवेशितुं प्रभुर्भूम्न ईश्वरो धाममानिनाम ॥ ३८

पि वृत्तेण गुणेनैतत्सेमाह ॥ अव्याकृतस्य जीवोपाधि भूतस्य ॥ अत एवानंतस्यानादेश्च जगदा
दात्मनो जगत्कारणस्य ॥ तत्परिच्छेदे कालस्यासामर्थ्यं दर्शिताह ॥ ३८ ॥ कालोयमीश्वरः समर्थो
पि भूम्नः परिहरणस्येशितुः नैव प्रभुः समर्थः ॥ यतो धाममानिनां देहगेहाद्यभिमानिनामेवेश्व
रः भूम्न इत्यत्र कं ॥ तत्स्वरूपं च यत्राह ॥ ३० ॥

संवत्सरादिभेदश्च सौरबार्हस्पत्यसावनचांद्रनाक्षत्रमासभेदेन द्रष्टव्यं केचित्तु एवमाहुः यदा सू
र्यपक्षयोरंति प्रतिपदि संक्रांतिर्भवति तदा सौरचांद्रमासयोर्युगपदुपक्रमो भवति ॥ स संवत्सरः ततः सौ
रमानेन वर्षे वर्षे दिनानि वर्धन्ते ॥ चांद्रमानेन षड् दिनानि ह्रसंतीति ॥ द्वादशाधिकव्यवधानाद्द्वि
तीयस्य पक्षस्याद्यो भवति ॥ एवमेवं व्यवधानांतरेण पंचवर्षांतर्गतके तिथिमध्ये द्वौ मलमासौ
भवतः पुनः संवत्सरः प्रवृत्तो भवतीत्येवंभूतः कालात्मा नित्यमप्रमत्तैः पूजनीय इत्याह यद
ति ॥ १४ ॥ तस्मै कार्यमेकुर्यादि ॥ नदिष्वयो बीजादीनां शक्तिं कालरूपया स्वशक्त्या बहुधा उ

संवत्सरः परिवत्सर इडावत्सर एव च ॥ अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते ॥ १४ ॥ यः
सृज्यशक्तिमुरुधोच्छ्वसयन् स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः ॥ कालाख्यया
गुणमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत वत्सरपंचकाय ॥ १५ ॥ विदुर उवाच ॥ पितृदेव
मनुष्याणामायुः परमिदं स्मृतम् ॥ परेषां गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः ॥ १६ ॥
भगवान्वेद कालस्य गतिं भगवतो ननु ॥ विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा ॥ १७ ॥

च्छ्वसयन् ॥ कार्योन्मुखीं कुर्वन् दिवि अंतरिक्षे कोऽसौ भूतभेदः सूर्य इत्यर्थः ॥ महाभूतविशेषः ॥
...तनो मे दक्षत्रुपीस्यः किमर्थं धावति ॥ पुंसः पुरुषस्य भ्रमाय भ्रमनिवृत्तये मोहनिवृत्तये
मोहनिवृत्तये इत्यर्थः ॥ आयुरादिक्षयेन विषयासक्तिनिवर्तयन्नित्यर्थः ॥ सकामानां तु गुण
मयं स्वर्गादिफलं क्रतुभिर्वितन्वन् विस्तारयन् ॥ तस्मै वत्सरपंचकप्रवर्तकाय इत्यादि ॥ १५ ॥ इदं स्व
मानेन वर्षशतं गणितमायुर्मानं प्रसिद्धं कल्पांतरस्थानेतर इति कल्पं त्रैलोक्यांतःस्थानां सतः वि

द्वादशभिर्वर्षसहस्रैरित्युत्तरश्लोकसामर्थ्याल्लातं तेष्ववधीयते एवं द्विगुणिते तस्यावधानं संध्यानं ॥ संध्यांशःत
स्मिन्हि ते कृतयुगे चत्वारि सहस्राणि संध्यायोस्त्वारि शतानि ॥ एवं त्रेतादिष्वपि योज्यं ॥ युगस्या
दौ संध्यांः ते संध्यांशाः उक्तानि शतानि तयोर्यत्तरेण मध्ये युगं तस्य विशेषमाह ॥ यत्रेति गवालेवादिध
मे विशेषोपचयविधीयते इत्यर्थः ॥ साधारणधर्मस्तु संध्यायोरप्यस्त्येव ॥ २० ॥ चतुष्पात्स हणः चैता
दिषु पादेन पादेन व्येति ह्रसति ॥ पादेन पादेन वर्धमानेनाधर्मेण हेतुनापन्न स्वस्वरूपकथनमात्रे

मैत्रेय उवाच ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं ॥ दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपित-
म ॥ १८ ॥ चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं ॥ संख्यातानि सहस्राणि द्विगुणानि शतानि
च ॥ १९ ॥ संध्यासंध्यांशयोरन्तर्यः कालः शतसंख्ययोः ॥ तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते ॥ २० ॥
धर्मश्चतुष्पान्मनुजान्कृते समनुवर्तते ॥ स एवान्येष्वधर्मेण व्येति पादेन वर्धता ॥ २१ ॥ त्रि
लोक्या युगसाहस्रं बहिराब्रह्मणो दिनं ॥ तावत्येव निशा तात यन्निमीलति विश्वसृक् ॥ २२ ॥
निशावसान आरब्धो लोककल्पोऽनुवर्तते ॥ यावद्दिनं भगवतो मनून्भुंजंश्चतुर्दश ॥ २३ ॥ स्वं
स्वं कालं मनुर्भुंक्ते साधिकां ह्येकसप्ततिं ॥ मन्वन्तरेषु मनवस्तद्वंश्या ऋषयः सुराः ॥ भवन्ति चै-
व युगपत्सुरेशाश्चानु ये च तान्

तायार्थेन तु धर्मसंकोचनार्थं ॥ २१ ॥ त्रिलोक्या बहिर्महर्लोकम
भ्यति ब्रह्मलोकमभिव्याप्य वर्तमानं युगसहस्रमेकं दिनं ॥ यद्यस्यां विश्वसृक् ब्रह्मा निमीलति स्वपिति त
द्दिनस्थितिमाह ॥ निशावसान इति सार्धैस्त्रिभिः ॥ २३ ॥ चतुर्दश मनून्भुंजन्पालयन् ॥ व्याप्नु
वन्निमध्ये ॥ २३ ॥ किंचिदधिकां युगानामेकसप्ततिं मनुर्भुंक्ते शाहद्वीपालकाः क्रमेणाभवन्ति ॥ समन

स्तुति ॥ चरमस्त्वरमो यः परमाणुः तस्यैव सतः कार्यमात्रस्य स्वरूपावच्छिन्नस्य परिणामं तदवस्थामस्
थं कैवल्यमैक्यं स परममहान् तु शेषत्वेन परमाणुप्रतियोगित्वात् ॥ न तु नानाविशेषवान् ॥ परस्पर
भिन्नस्य सर्वपदार्थैः कथमेकत्वमत आह ॥ अविशेषः विशेषविवक्षारहितः निरन्तरो भेदविव
क्षारहितश्च ॥ सर्वोपि प्रपंचः परममहानित्यर्थः ॥ २ ॥ यथा स्थूलसूक्ष्मत्वाभ्यां पदार्थः एवं कालो
प्यनुमितो विद्वद्भिः चकारात् मध्यमावस्थाप्यनुमेया ॥ संस्थानं परमाण्वाद्यवस्था ॥ तस्य भुक्तिर्व्या
प्तिः तया भगवानिति हरेः शक्तिः स्वतोऽव्यक्तः व्यक्तं भुंक्ते व्याप्नोति परिच्छिन्नतिरूतिन व्याप्ति विभुः
उत्पत्त्यादिभिर्लतः एतदेव प्रपंचयति ॥ सदित्यादिना ॥ ३ ॥ सतः प्रपंचस्य परमाणुता परमाण्ववस्था

सत एव पदार्थस्य स्वरूपावस्थितस्य यत् ॥ कैवल्यं परममहानविशेषो निरंतरः ॥ २ ॥ ए
वं कालोप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम ॥ संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः
३ ॥ स कालः परमाणुर्वै यो भुंक्ते परमाणुतां ॥ सतोऽविशेषभुग्यस्तु स कालः परमो महान्
४ ॥ अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रयः स्मृतः ॥ जालार्करश्म्यवगतः खमेवानुपतन्नगात् ५

यो भुंक्ते स कालः परमाणुः तस्यैवाविशेषं साकल्यं यो भुंक्ते स परममहान् ॥ अयमर्थः ग्रहर्क्ष
ताराचक्रस्थसूर्यादिना ॥ पर्यस्य पर्यटने ॥ तत्र सूर्यो यावता परमाणुदेशमतिक्रामति ता
वान्कालः परमाणुः यावता वा द्वादशराश्यात्मकं सर्वं भुवनकोशमतिक्रामति स परममहा
न् ॥ संवत्सरात्मकः कालः तस्यैवाहः पादयुगमन्वंतरादिभेदेन ॥ द्विपरार्धांतत्वमिति ॥ तथा च
पंचमे स्कंधे सूर्यस्यैव कालादिविभागवत्स्मृति ॥ इदानीं द्व्यणुकादिलक्षणः एवं केवलं मध्यमकालाव
स्थानुपपत्तिमाह अणुरिति ॥ ५ ॥ द्वौ परमाणू अणुः स्यात् त्रयोणवस्त्रसरेणुः स तु प्रत्यक्ष इत्याह
जालार्केति ॥ गवाक्षमध्ये प्रविष्टैरर्करश्मिभिरवगतः कोसौ योनि लघुत्वेन खमेवानुपतन् ॥ अगात्

प्राप्तं भागास्त्वरितं रूपाय स्मिन्स वेदः ॥ ९ ॥ तैस्त्रिभिर्वेधैर्लवः तैर्निमेषास्त्रयः क्षणः पंचक्षणाः काष्ठा पंचदश
वलघु ॥ ९ ॥ नाडिकाः षट्सप्तवा प्रहरः सप्त वा मोपि ॥ दिनस्य रात्रेश्च तुर्थो भागः ह्रासे वृद्धे
समसंध्यासंध्यांशमुहूर्ते दृष्टविनिनिस्तानव ॥ नवापि नियमाख्यो वा प्रहरः प्रमहेत इह नाना नाम
पि वमद्यासत्वात ॥ नाडिकाया उन्मानमाह ॥ ॥ उन्मीयते ते नेनेमन्मानं पात्रं षट्पलताम्रविरचितं
पंचगुंजो माषः तैश्चतुर्भिश्चतुरंगुलायामशलाकारूपेण विरचितैः कृतं मूलच्छिद्रं येन यावता ॥ प्र

त्रसरेणुत्रिकं भुंक्ते यः स कालस्त्रुटिः स्मृतः ॥ शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः ॥ ५ ॥
निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः ॥ क्षणान्पंच विदुः काष्ठां लघु ता दश पंच च ॥ ६ ॥
लघूनि वै समाम्नाता दश पंच च नाडिका ॥ ते द्वे मुहूर्तः प्रहरः षड्यामः सप्त वा नृणाम् ॥ ७ ॥ द्वा
दशार्धपलोन्मानं चतुर्भिश्चतुरंगुलैः ॥ स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुते ॥ ८ ॥ या
माश्चत्वारश्चत्वारो मर्त्यानामहनी उभे ॥ पक्षः पंचदशाहानि शुक्लः कृष्णश्च मानद ॥ ९ ॥ त
योः समुच्चयो मासः पितॄणां तदहर्निशं ॥ द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ॥ १० ॥ अ
यने चाहनी प्राहुर्वत्सरो द्वादश स्मृतः ॥ संवत्सरशतं नॄणां परमायुर्निरूपिते ॥ ११ ॥ ग्रह
र्क्षताराचक्रस्थः परमाण्वादिना जगत् ॥ संवत्सरावसानेन पर्येत्यनिमिषो विभुः ॥ १२ ॥

स्य परिमितं जलं प्रविशति ॥ तेन च सलतं निमग्नं भवति ॥ तावान्कालो नाडिका ॥ अत्र पलच्छिद्र
योरा धिको षणीत्रेनिमज्जेत ॥ प्रलम्बे च विलंबे नेति पलशलाकयोर्नियमः ॥ ८ ॥ अहनी अहोरात्रे
पक्षमासाद्यनंतरं दिवीमंस्यात्तद्रेशणान्वयः ॥ १० ॥ देवानामहोरात्रे प्राहुर्द्वादशमासाः अनेन क्रमेण अ
सौ सूर्यो निमिषः पर्येतीत्याह ॥ १२ ॥ ग्रहाश्चंद्रादयः नक्षत्राण्यश्विन्यादीनि ताराश्च तानि तद
नाणि तदुपलक्षितं यत्कालचक्रं ॥ तत्रस्थितः अनिमिषः कालात्मा विभुरीश्वरः सूर्यः जगत् ॥ दा

द्विविधामेवासंसारे रहति ॥ ननु हरेः लीलायद्वारं यमिति ॥ तमप्याह सर्गो इयात्मनो माया रजसि वृत्तिरूप

मिति ॥ अस्मिन्पक्षे प्रवृद्धिकृतत्वं इति प्रथमांतमनन्वयानकृतत्वमर्थः ॥ मुख्यमिवप्रथमं कृतेः मुख्यस

र्गः तस्थुषां स्थावराणां षड्विधत्वमेवाह ॥१८॥ ये पुष्पं विनाफलंति ॥ ते वनस्पतयः औषधयः फलपा

कांताः लताः आरोहणापेक्षाः त्वक्सारा वेणवादयः लता एव काठिन्येन आरोहणापेक्षा वीरुधः ये पुष्पैः

फलंति ते द्रुमाः तेषां साधारणं लक्षणमाह ॥ ऊर्ध्वं स्रोत आहारसंचारो येषां ते तमःप्राया अव्यक्तचेत

नाः अंतःस्पर्शमेव जानंति नान्यत ॥ तदपि तत्र वेदनवहिर्विशेषिणः अवबस्थितपरिणामाद्भेदे

रजोभाजो भगवतो लीलेयं हरिमेधसः ॥ सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः ॥१६॥

वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमाः ॥ उत्स्रोतसस्तमःप्राया अंतःस्पर्शा विशेषिणः ॥

१७ ॥ तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः ॥ अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः ॥१८॥

गौरजो महिषः कृष्णः सूकरो गवयो रुरुः ॥ द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ॥१९॥

खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ॥ एते चैकशफाः क्षत्तः शृणु पंचनखान्पशून् ॥२०॥

श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ ॥ सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः ॥२१॥

कंकगृध्रबकश्येनभासभल्लूकबर्हिणः ॥ हंससारसचक्राह्वकाकोलूकादयः खगाः ॥२२॥

कर्मेदं वनतः तिर्यक्स्रोतसां सर्गमाह ॥ तिरश्चामिति सप्ताविंशतिभेदः तिरश्चां लक्षणं अवि

दः श्वस्तनादिज्ञानशून्याः भूरितमसः आहारादिमात्रनिष्ठाः घ्राणेनैव इष्टमर्थं जानंति ॥ हृद्यवे

दिनः दीर्घानुसंधानशून्याः तथा च श्रुतिः अथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानं न

विज्ञातं पश्यंति ॥ न विदुः श्वस्तनं न लोकालोकाविति ॥ अष्टाविंशतिभेदानेवाह ॥२३॥ गवादयः ष

ड्लुताः द्विखुराः नव खरादयः एकशफाः षट् ॥२४॥ श्वादयो गोधांताः पंचनखाः द्वादश ॥ एवमे

ते भूचराः समविंशतिः मकरादयः जलचराः कंकादयः खगाः अत्र चरैनैकीकृत्य गृहीताः

भा०
त० टी०
३५

कालिनां च प्रायश्चमेते हेवांतभावः ॥२४॥ अर्वाक्स्रोतः स्रोतस्त्वाहारः संचारो यस्य सोऽर्वाक्स्रोताः इस्वंतं
प्राधान्येन स्मर्गों लक्षणीयं रजोधिके येतुते मयो वैकृता एवं नको सारव दुःखात्मकाः देवसर्गश्च वैकृत
इत्यष्टविधः वैकारिकस्तु देवसर्गः प्राकृत एवं सव प्रोक्तः अयं तत्तत्तोऽसृत्तत्त्वाहंकृतः देवसर्गता
नदेन मतस्य ॥ सनत्कुमारादीनां सर्गस्तु प्राकृतो वैकृतश्च देवेनेन मनुष्येन च सस्पृत इत्यर्थः वै
कृतस्तु देवसर्गोऽष्टविधः ॥ अष्टविधत्वादयस्तु योभेदाः गंधर्वाप्सरसप्रकः यक्षरक्षांस्येकः भूतप्रेत
पिशाचाख्यकः सिद्धचारणविद्याधराख्यकः किंनरादयएकः आदिशब्दात् किंपुरुषाश्वमुखादयः ॥
तत्र विशेषाय वेसहष्टम विष्णुति ॥२॥ इति श्रीधरस्वामीये ॥१०॥ ततएकादशे कालः परमाण्वादिलक्ष

अर्वाक्स्रोतस्तु नवमः तत्रैकविधो नृणां ॥ रजोधिकाः कर्मपराः दुःखे च सुखमानिनः ॥२५॥
वैकृतास्त्रय एवैते देवसर्गश्च सत्तम ॥ वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः ॥२६॥ देव
सर्गश्चाष्टविधो विबुधाः पितरोऽसुराः ॥ गंधर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः ॥२७॥ भू
तप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः ॥ दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः ॥२८॥
अतः परं प्रवक्ष्यामि वंशान्मन्वंतराणि च ॥ एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः ॥२९॥
सृजत्यमोघसंकल्प आत्मैवात्मानमात्मना ॥३०॥ ॥ इति तृतीयस्कंधे दशमः ॥१०॥ मैत्रेय उ० ॥ चरमः

लेः शुद्धमनंतरादिभ्यः कृत्स्नमानादिविरूप्यते ॥ तदेवं सामान्यतः कालस्योपलक्षणाभूतं गुणव्यति
करेदशाविधेपति दृष्टोदानीतस्य विशेषपति इस्वपीनंतरिक्षे एवलक्षयति द्वाभ्यां सतः कार्य
स्य विशेषाणामंशानां यश्चरमः अंत्योऽयं सांशो नास्ति अनेकः कार्यावस्थानमप्राप्तः असंयुतः
समुदायावस्थां वाप्राप्तः अतएव सदा कार्यसमुदायावस्थयोरप्यगमेष्यस्ति ॥ सपरमाणुर्विज्ञेयः
किं तत्र प्रमाणमत आह ॥ यतो येभ्यः समुदितेभ्यः नृणां च बहुत्वेन ॥ ऐक्यभ्रमः अवयवविशुद्धिः
तथा वषंच मे अवयवविनाकरणे वसति ॥ घटादिसमस्तेनैकतो विशेषप्रकृति कार्यो तु यदप्रस्तु इति

एतावांस्त्रिलोकीरूपः जीवलोकस्य॥ जीवानां भोगस्थानस्य प्रसंगस्य॥ लोकसंस्थाभेदो रचना
विशेषः उक्तः न तु परमेष्ठिनोपि जीवत्वाविशेषात् तस्य लोकस्यापि किमिति प्रसंगे हृष्टिः न भवति
न यतः॥ त्रिय यस्मात् निमित्तस्य निष्कामस्य धर्मस्य विपाकः फलरूपोसौ॥ उपलक्षणमेतत्सत्यलोक
स्य महर्लोकप्रभृतिलोकानां तद्वासिनां च त्रैलोक्यस्य काम्यकर्मफलत्वात्प्रतिकल्पमुत्पत्तिविना
शौ भवतः॥ महः प्रभृतीनां उपासनासमुच्चितनिष्कामधर्मफलत्वात् द्विपरार्ध्यपर्यंतं न नाशः न
स्थानावततः पंचमाध्येष्यमुक्तिरिति भावः कालभेदेन लोकसृष्टिभेदं श्रुत्वा तमेव कालं नि
रूपयितुं पृच्छति॥ ९॥ यत्कालाख्यं लक्षणं स्वरूपं॥ आत्थ अब्रवीः कथं कालः कल्प्यते॥ किंवा त

एतावान्जीवलोकस्य संस्थाभेदः समाहृतः॥ धर्मस्य ह्यनिमित्तस्य विपाकः परमेष्ठ्यसौ। ९
॥ विदुर उवाच॥ यथात्थ बहुरूपस्य हरेरद्भुतकर्मणः॥ कालाख्यं लक्षणं ब्रह्मन्यथा वर्णय
नः प्रभो॥ १०॥ मैत्रेय उवाच॥ गुणव्यतिकराकारो निर्विशेषोप्रतिष्ठितः॥ पुरुषस्तदुपादा
नमात्मानं लीलयासृजत ११

स्य सत्यलोकस्य लक्षणं स्वरूपमिति॥ यथावद्वर्णयेत्यर्थः॥ तत्र समासा
ततः कालस्यात्र स्वरूपमुच्यते॥ उत्तराध्याये तु विशेषः॥ १०॥ गुणानां व्यतिकरो महदादिः प
रिणामः तेनैव क्रियते यः स काल इति शेषः वत्सते चैकादशे॥ गुणव्यतिकरः कालः स्वभावः स
त्त्वमेव चेति॥ स च तत्त्वनिर्विशेषः अप्रतिष्ठितः क्वाप्यपर्यवसितः आद्यंतशून्य इत्यर्थः॥ एतदेव द
र्शयितुमीश्वरः सृष्ट्यादिना निमित्तभूतेन करोतीत्याह॥ पुरुष इति॥ उपाधीयते निमित्तत
या सीकियते तदुपादानं स कालउपादानं निमित्तं यस्मिं तत्तमात्मानमेव विश्वरूपेणासृज
त॥ स्वव्यतिरेकेणासृज्यस्याभावात्॥ एतच्च तत्त्वकथनमात्रं कालेन निमित्तेन वा सृजति
सेनाव देववि विवतिन॥ स्वव्यतिरिक्तसृज्याभावदर्शयत्कालस्यसृष्टिनिमित्ततो दर्शयति॥ ११

भा॰
टी॰
२

विस्नमायया संस्थितं संभवं ब्रह्मतन्मात्रं सद्विस्मीश्वरेण कर्त्रा कालेन निमित्तेन परिछिन्नं ॥ पृथक्का
का सितेन अव्यक्ता मूर्तिः स्वरूपं यस्येति ॥ स्वतो निर्विशेषस्येदर्शितं ॥ यथेति इदानीं दृष्टा यितं तत्का
ध विश्वप्रवाहस्यापि नित्यत्वमाह ॥१२॥ यथेदानीमस्ति तथाग्रे पूर्वमप्यासीत् ॥ पश्चादपि भविष्यति
एवं सामान्यतः कालं निरूप्य विशेषतो निरूपयिष्यन् ॥ तन्निमित्तस्य सर्गस्य सर्वकालानेव भेदानन्
वदन्नित्यसर्गं रचयति ॥ पश्च प्राकृता वैकृतास्त्रयोदश मः ॥ तन्निमित्तमेव त्रिविधं प्रलयमप्याह ॥१३॥ कालेनै
व केवलेन नित्यः प्रलयः द्रव्येण संकर्षणाग्न्यादिना नैमित्तिकः गुणैः स्वस्वकार्यं उपसंहृत्य प्राकृति

विश्वं वै ब्रह्मतन्मात्रं संस्थितं विस्नमायया ॥ ईश्वरेण परिछिन्नं कालेनाव्यक्तमू-
र्तिना ॥११॥ यथेदानीं तथाग्रे च पश्चादप्येतदीदृशं ॥ सर्गो नवविधस्तस्य प्राकृ-
तो वैकृतस्तु यः ॥१२॥ कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः ॥ आद्यस्तु महतः
सर्गो गुणवैषम्यमात्मनः ॥१३॥ द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः ॥ भू-
तसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान् ॥१४॥ चतुर्थ ऐंद्रियः सर्गो यस्तु ज्ञान-
क्रियात्मकः ॥ वैकारिको देवसर्गः पंचमो यन्मयं मनः ॥१५॥ षष्ठस्तु तमसः स-
र्गो यस्त्वबुद्धिकृतः प्रभो ॥ षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु ॥१६॥

कः तानेव सर्गान् प्रपंचयति ॥ आद्यस्त्वित्यादिना यावदध्यायसमाप्ति महतो लक्षणं ॥ आत्मनो हरेः
सकाशात् गुणानां वैषम्यमिति ॥१४॥ अहमः अहंकारस्य लक्षणं यत्रेति द्रव्यादयो वक्ष्यमाणा ह्व
यः सर्गः तन्मात्रो भूतसर्गः भूतसूक्ष्मसर्ग इत्यर्थः द्रव्यशक्तित्वात् ॥ महाभूतोत्पादकं ज्ञानकर्मे-
न्द्रियात्मकस्तु चतुर्थः तमसस्तु पंचमः सर्गः अविद्यायां अबुद्धिः जीवानामावरणविक्षेपकृतो
करोतीमप्रबुद्धिकृत ॥ तस्यैमेमतः शृणु ॥ प्रसंगेनाध्यात्मनामाह ॥१०॥

३२

अहंकारोपाधीनां जीवानां आत्मा अतः प्रेयसामपि प्रियाणामपि मध्ये प्रेष्ठः प्रियतमः सन् यत्कृते यदर्थमन्ये त्वेहत्तार्थ एव || तथापि मम त्रियाप्येषु हि किं करिष्यतीत्याह || सर्वेति || ४३ || आत्मा निरवद्यं त्वमिदं त्रैलोक्यं याः मय्यनुशेरते || ताः प्रजाः सृजेत्यन्वयः केनात्मनात्मनिरपेक्षेण ज्ञापकापेक्षा भावमाह || सर्ववेदमयेनेति || आत्मा अहं योनिः कारणं यस्येति || ज्ञानक्रियाशक्तिमत्त्वाय

अहमात्मात्मनां धातः प्रेष्ठः सन्प्रेयसामपि || अतो मयि रतिं कुर्याद्देहादिर्यत्कृते प्रियः || ४२ || सर्ववेदमयेनेदमात्मनात्मात्मयोनिना || प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते || ४३ || मैत्रेय उवाच || तस्मा एवं जगत्स्रष्ट्रे प्रधानपुरुषेश्वरः || व्यज्येदं स्वेन रूपेण कंजनाभस्तिरोदधे || ४४ || इति श्रीभागवते महापुराणे तृतीयस्कंधे नवमोऽध्यायः || ९ || विदुर उवाच || अंतर्हिते भगवति ब्रह्मा लोकपितामहः || प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः || २ || ये च मे भगवन्पृष्टास्त्वय्यर्था बहुवित्तम || तान्वदस्वानुपूर्व्येण छिंधि नः सर्वसंशयान् || ३ ||

स्वपति || यथा सर्वमिति || तत्रात्माभ्यासोऽस्तीत्युक्तं मय्यनुशेरत इति || स्थितानामभिव्यक्तिमात्रमेव कर्त्तव्यमित्यनायासत्वमप्युक्तं || ४३ || इदं स्वस्वं रूपं प्रकाश्य पद्मनाभः श्रीमन्नारायणरूपेण तिरोदधे अदृश्यो बभूव || ४४ || इति श्रीभागवते भावार्थदीपिकायां तृतीयस्कंधे नवमोऽध्यायः || ९ || दशमे कालसंख्यानं प्रति वक्तुं तदुद्भवं प्राकृतादिविभागेन सर्गस्तत्र दशोच्यते || १ || मे मया || वदस्व वद || कथयस्वेति वा || २ ||

संचोदितः प्रार्थितः हृदिस्थानेवाह ॥ नतुतेपृष्टास्तेनविस्मृताइत्यर्थः ॥३॥ आत्मनिश्रीनारायणे । आत्मानंमनआवेश्य ॥४॥ अब्जसंभवोब्रह्मायदधिष्ठायस्थितः कर्तरिक्तः तत्पद्मंअंभश्चविलोक्य कंपितमेतत्पद्मंमंभश्च ॥ तेनप्रलयकालेनकृतंवीर्यंयस्यतेनवायुनाकंपितमित्यादित्रयेणान्वयः ॥५॥ विवृद्धंविज्ञानंबलंचयस्यसन्यपात्सर्वंपीतवान् ॥६॥ पुष्करंपद्मंप्राक्लीनान्कल्पितास्मिस्रक्ष्यामि ॥७॥ भगवतास्वयंकरणीयेकर्मणिचोदितोनियुक्तःसन् ॥ तदापद्मकोशंप्रवि

सूतउवाच ॥ एवंसंचोदितस्तेनक्षत्राकौषारवोमुनिः ॥ प्रीतःप्रत्याहतान्प्रश्नान्हृदिस्थानथ भार्गव ॥३॥ मैत्रेयउवाच ॥ विरिंचोपितथाचक्रेदिव्यंवर्षशतंतपः ॥ आत्मन्यात्मानमावेश्य यदाहभगवानजः ॥४॥ तद्विलोक्याब्जसंभूतोवायुनायदधिष्ठितः ॥ पद्मंमंभश्चतत्काल कृतवीर्येणकंपितम् ॥५॥ तपसाह्येधमानेनविद्ययाचात्मसंस्थया ॥ विवृद्धविज्ञानबलो न्यपाद्वायुंसहांभसा ॥६॥ तद्विलोक्यवियद्व्यापिपुष्करंयदधिष्ठितं ॥ अनेनलोकान्प्राग्ली नान्कल्पितास्मीत्यचिंतयत् ॥७॥ पद्मकोशंतदाविश्यभगवत्कर्मचोदितः ॥ एकंव्यभांक्षीद् रुधात्रिधाभाव्यंद्विसप्तधा ॥८॥

श्य ॥ तमेकमेवत्रिधा ॥ लोकत्रयरूपेणव्यभांक्षीद्विभागंकृतवान् एकेनकमलमुकुलेनकथंलोकत्रयसृष्टिरितिसंभावनांवारयितुं ॥ तस्यविशालतामाह द्विसप्तधाचतुर्दशलोकरूपेण ॥ उरुधाततोपिबहुप्रकारेणभाव्यंभावयितुंयोग्यम् ॥ अतोनैतत्त्रिलोकीकरणंचित्रमित्यर्थः ॥ त्रिलोकीरूपेणैवविभागरेतमाह ॥ ॥

स्वसंभवो यस्मात्तं तपःप्रभृतिभिः॥ विद्या उपासना समाधिरैकाग्र्यं तैर्निशाम्य दृष्ट्वा यथाशक्ति स्तुत्वा खिन्नवद्विरराम॥ आत्मनो लोकसंस्थानविज्ञाने परिखिद्यतो ब्रह्मणोऽभिप्रेतमन्वीक्ष्य तमाहेति द्वयोरन्वयः॥ तेन कल्पव्यतिकराम्भसा विषण्णचेतसं कश्मलं मोहं शमयन्निवेति॥ समस्तमोहशमनं द्योतयति॥ २६॥ हे वेदगर्भ तन्द्रीं विषादकृतमालस्यं मा गाः तेनैव मे हृषीकेशस्य प्रसादाद्दिग्वपुषः॥ तदग्रे पूर्वमेव संपादितं॥ तर्हि कथमहं न जानामीत्यत आह॥ ३०॥ भूय इति भक्ति

मैत्रेय उवाच॥ स्वसंभवं निशाम्यैवं तपोविद्यासमाधिभिः॥ यावन्मनोवचः स्तुत्वा विरराम स खिन्नवत्॥ २७॥ अथाभिप्रेतमन्वीक्ष्य ब्रह्मणो मधुसूदनः॥ लोकसंस्थानविज्ञान आत्मनः परिखिद्यतः॥ २८॥ विषण्णचेतसं तेन कल्पव्यतिकराम्भसा॥ तमाहागाधया वाचा कश्मलं शमयन्निव॥ २९॥ श्रीभगवानुवाच॥ मा वेदगर्भ गास्तन्द्रीं सर्ग उद्यममावह॥ तन्मयापादितं ह्यग्रे यन्मां प्रार्थयते भवान्॥ ३०॥ भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयां॥ ताभ्यामन्तर्हृदि ब्रह्मन् लोकान्द्रक्ष्यस्यपावृतान्॥ ३१॥ तत आत्मनि लोके च भक्तियुक्तः समाहितः॥ द्रष्टासि मां ततं ब्रह्मन् मयि लोकांस्त्वमात्मनः॥ ३२॥ यदा तु सर्वभूतेषु दारुष्वग्निमिव स्थितं॥ प्रति॥ चक्षीत मां लोको जह्यात्तर्ह्येव कश्मलं॥ ३३॥ यदा रहितमात्मानं भूतेन्द्रियगुणा-

शयैः॥ स्वरूपेण मयोपेतं पश्यन् स्वाराज्यमृच्छति॥ ३४

गुणः सन्नाहितस्त्वं सन् आत्मनि स्वस्मिन् लो

के च मां ततं व्याप्य स्थितं द्रष्टासि द्रक्ष्यसि॥ आत्मनो जीवांशस्य सर्वं ब्रह्म मे दर्शनेन मोहो निवर्तत इत्याह॥ ३४॥ यदा पश्यति वर्तेत यथैव॥ तथा च मिथ्याज्ञाननिवृत्तौ शुद्धमेवेत्याह॥ यदेति॥ ३५॥ भूतादिभिर्विरहितमात्मानं शुद्धं जीवं यदा स्वरूपेण स्वस्वरूपेण भूतेनमया तन्मयेनोपेतं॥ एकीभूतं पश्यन् भवति॥ तदा स्वाराज्यं मोक्षं प्राप्नोति॥ ३३॥ ॥

भा
टी
२९

यतो वर्षीयान् ॥ इदं ततः अप्यधिको ऽस्तीत्यर्थः ॥ अनुग्रहमेवाह ऋषिमिति त्रिभिः ॥ २९ ॥ यद्यतः ते
मनो मयि निबद्धं ॥ ३० ॥ यद्यस्मादज्ञैर्निर्दुर्विज्ञेयो ऽपि सन्नादिभिः आत्मनाहंकारेण च युक्तं वा मन्यसे ॥ ३१ ॥
तत्र तव नालेन मार्गेण पुष्करस्य मूलमधि जलं सलिले विचिन्वतः मयि विचिकित्सायां भवि
तव मया स्वात्मा येन न वहे स्वपने ऽपि नो ऽस्ति नास्तीति संदेहे सति आत्मा स्वस्वरूपमेव मयान्तर्बहिरेव न
देहादिरहितः ॥ ३३ ॥ अंग हे ब्रह्मन् ॥ यच्चकर्थ कृतवानसि ॥ मत्कथैवाभ्युदयः तेनांकितं तत्र एवं तथा

नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः ॥ नात्मावसीदत्यस्मिंस्ते वर्षीयान्म
दनुग्रहः ॥ २९ ॥ ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजो गुणः ॥ यन्मनो मयि नि
बद्धं प्रजाः संसृजतो ऽपि ते ॥ ३० ॥ ज्ञातो ऽहं भवता त्वद्य दुर्विज्ञेयो ऽपि देहिनाम् ॥ नालेन स
लिले मूलं पुष्करस्य विचिन्वतः ॥ ३१ ॥ यच्चकर्थाङ्ग मत्स्तोत्रं मत्कथाभ्युदयाङ्कितम् ॥
यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ॥ प्रीतो ऽहमस्तु भद्रं ते लोकानां विजयेच्छया
यदस्तौषीर्गुणमयं निर्गुणं मानुवर्णयन् ॥ ३५ ॥ य एतेन पुमान्नित्यं स्तुत्वा स्तोत्रेण मां भजे
त् ॥ तस्याशु संप्रसीदेयं सर्वकामवरेश्वरः ॥ ३६ ॥ पूर्तेन तपसा यज्ञैर्दानै
र्योगसमाधिना ॥ राद्धं निःश्रेयसं पुंसां मत्प्रीतिस्तत्त्वविन्मतम् ॥ ३७ ॥ यन्मां त्वं मन्यसे
ऽयुक्तं भूतेन्द्रियगुणात्मभिः ॥ ३२ ॥ तस्मै मद्विचिकित्सायामात्मा मे दर्शितो ऽबहिः

भाक्तं मयि मनो निर्बंधः मत्स्तोत्रं मद्रूपस्य हृदि दर्शनं मत्स्तुतिः तपो निष्ठा चेति युक्तं ॥ स एव स
र्वं मदनुग्रहः गुणमयत्वेन प्रतीयमानमपि निर्गुणमेवानुवर्णयन् तव प्रीतः इति किंच
सर्वमित्याह ॥ यद्गति ॥ ३६ ॥ न च मत्प्रीतेरभ्यधिकं किंचिदस्तीत्याह पूर्त्तादिभिः राद्धं सिद्धं निः
श्रेयसं फलं तन्मत्प्रीतिरेवेति तत्त्वविदां मतं ॥ अतएव तमाह ॥ ३७ ॥

२५

भा
टी
११

अवबोधरसोदयेन चित्शक्त्याविर्भावेन सदा निवृत्तं तमो यस्मात्तस्य तव यद्रूपं तदेव स्वातंत्र्येण सता
मुपासकानामनुग्रहाय॥ गृहीतमाविष्कृतमवतारशतानां मत्स्याद्यात्मकस्य यदेकं बीजं मूलं त
त्तदर्शनार्थं गुणावतारबीजत्वं दर्शयति यन्नाभीति॥ २॥ हे परम अविद्धवर्चः अनावृतप्रकाश अ
तएवाविकल्पं निर्भेदं मतएवानंदं मतएवानंदमात्रमेवं भूतं यद्भवतः स्वरूपं तत्॥ अतो रूपान्तर
भिन्नं न पश्यामि॥ किंतु॥ इदमेव तत्॥ अतः कारणत्वेन तव इदं रूपमुपाश्रितोऽस्मि यो रूपान्ता
दर्शीत्याह॥ एकमुपास्येष्वश्रेष्ठमेयतः विश्वसृजं॥ अतएवाविश्वं॥ विश्वस्मादन्यत्॥ किं च भूतेन्द्रि

रूपं यदेतदवबोधरसोदयेन शश्वन्निवृत्ततमसः सदनुग्रहाय॥ आदौ गृहीतमवतारश
तैकबीजं यन्नाभिपद्मभवनादहमाविरासं॥ २॥ नातः परं परम यद्भवतः स्वरूपमानंदमा
त्रमविकल्पमविद्धवर्चः॥ पश्यामि विश्वसृजमेकमविश्वमात्मन् भूतेन्द्रियात्मकमदस्त उ
पाश्रितोस्मि॥ ३॥ तद्वा इदं भुवनमंगल मंगलाय ध्याने स्म नो दर्शितं त उपासकानां॥ तस्मै न
मो भगवतेऽनुविधेम तुभ्यं योऽनादृतो नरकभाग्भिरसत्प्रसंगैः॥ ४॥ ॥

नरयार्हेलं पुरुषोत्तमं ॥ ब्रह्मादयोऽतसिंहस्य शंकयाकुलचेतसः ॥ आरादेवाः स्तुवन्ति स्म दशश्लोकैः पृथक् पृथक् ॥४०॥ अनंताय अनंतं प्रसादयितुं ॥ नतोस्मि अनंताय दुरंताः शक्तयो यस्य तस्मै ततः विचित्राणि वीर्याणि प्रभावा यस्य ॥ नन्विं किमर्थं पवित्राणि शोधकानि कर्माणि यस्य विचित्रवीर्यमेवाह ॥ विश्वस्येति संदधते सम्यक् कुर्वते ॥ एवमपि ॥ अव्ययात्मने ॥ अप्रच्युतस्वरूपाय ॥४१॥ रुद्रस्तु तत्कोपकालाभिज्ञो ना

सूर्मिवदांजलिपुटा आसीनं तीव्रतेजसं ॥ ईडिरे नरशार्दूलं नातिदूरचराः पृथक् ॥४१॥ ब्रह्मोवाच ॥ नतोस्म्यनंताय दुरंतशक्तये विचित्रवीर्याय पवित्रकर्मणे ॥ विश्वस्य सर्गस्थिति संयमान्गुणैः ॥ स्वलीलया संदधतेऽव्ययात्मने ॥४२॥ रुद्र उवाच ॥ कोपकालो युगांतस्ते हतोयमसुरोल्पकः ॥ तत्सुतं पाह्युपसृतं भक्तवत्सलः ॥४३॥

भक्तं ते

यं कोपावसरे इति तं प्रार्थयते ॥ सहस्रयुगांत एव कोपस्य कालः कोपायेमं अयमित्याह ॥ अल्पकः अत्यल्पः अतः कोपानिहत्वा मज्जादं माहिंसीरित्याह तत्सुतमिति यद्वा ॥ अकालेप्ययं कोपोस्य भक्तस्य रक्षणार्थमिति चेत् ॥ तर्हि इदानीं कोपं त्यक्त्वा इमं पाहीत्यर्थः ॥४३॥ ॥

रामायनमः ॥

ड्रा सदंशान्नु मसाकं॥ सर्वाणि च निजानि चक्रादीनि रत्नराणि वज्रादीनि तत एव आयुधप्रवेकाश खोन मसाः
नैर्विद्राविताः देत्यदानवा येन तद्रूपमीसं समानस्यायतः॥ सस्तुमिप्यतन्रिति पूर्वेणान्वयः॥२३॥ तदावि
र्भावप्रयोजनी विमर्शी सर्वकेतेन महदेत्यस्य पुत्रमाह सप्तभिः॥ श्येणाम ह्ममायाविना हरिणामे
वमृते वधः सत्य हेतः सरतः चिंतितः तथाप्य तेन समुधते नन किंचित्स्यादित्येवं ध्रुवन भ्यपतदि
त्यन्वयः॥२४॥ तदासो महदेनरसिंहस्योनसि दीप्तोपतितः सन॥ प्रलन्नितः प्रहस्नोमृत॥ सत्व याम
ड्रासदंसर्वनिजेनरायुधप्रवेक विद्रावितदेत्यदानवम्॥ प्रायेणामे यं हरिणोक्तमायिना वधः
स्मृतोनेनसमुघनेतकिं॥२३॥ एवं ब्रुवंस्तभ्यपतद्गदायुधोनदन्नृसिंहंप्रतिदैत्यकुंजरः॥ प्र
लन्नितोग्नौपतितः पतंगमो यथान्नसिंहौजसिसोसुरस्तदा॥२४॥ ननदिचित्रं खलु सत्वधा
मनि स्वतेजसा योनुपुरा पिबत्तमः॥२५॥ ततोभिपद्याभ्यहनन्महासुरो रुषान्नसिंहं गद
योरुवेगया तं विक्रमंतं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाग्रहीत्॥२६॥ सतस्यह
स्तात्कलितस्तदासुरो विक्रीडितो यद्वदहिर्गरुत्मतः॥ असाध्वमन्यंत हतौकसोमरा घनच्छदा
तिसन्नप्रकाशेहरौपतितस्यतमो मयस्यग्रदर्शितं ततश्चिचित्रं न भवति॥ तत्रदेवः॥ योहरिः भुवाहस्ता
दोमलय कालीनं तमः तुग्रहोग्रपिबत॥ तस्मिन्॥२५॥ रविक्रमंतं तनस्ततः प्रहरंतं॥२६॥ हस्तात्
उत्कलितः निस्ततः तदाममरा देवाः सर्वेधिस्थपाः असाध्वमन्यंत हतानि उकांसि स्थानानि
येषांतेन ह्रियाच तच्छदा मेघांतरिताः संतः॥२७॥ ॥

श्री भा. स. ७

यद्धस्तान्मुक्तः तं नृहरिं स्ववीर्यशंकितं मन्यमानः खड्गचर्मणी प्रगृह्य ॥ पुनस्तमासज्जत आश्लिष्यत्
युद्धे नृत्यन् वा ॥२७॥ श्येनस्येव वेगो यस्य तं ॥ शतचंद्रवर्त्मभिः खड्गचर्ममार्गैः ॥ छिद्रं यथा न भवत्येवमुपर्य-
धश्च चरंतं अट्टहासं कृत्वा ॥ खरं तीक्ष्णं उत्स्वनेन महाशब्देनोल्बणं भयंकरं ॥ तद्भयेन दैत्येन्द्रेणाच्छादिते निमी-
लिते अक्षिणी यस्य ॥२८॥ ग्रहणेनातुरं ॥ व्यालः सर्पो यथाखुं मूषकं ॥ विदारणे हेतुः ॥ अहिंसा-
नुरुद्रवन्निर्विषकावंत ॥ स्फुरंतं निःसरंतं ग्रहणेनातुरं विविशं ॥ द्वेषेण महद्युद्धं तत्स्फुरंकेन कु-

तं मन्यमानो निजवीर्यशंकितं यद्धस्तमुक्तो नृहरिं महासुरः ॥ पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगे-
न जितश्रमो मृधे ॥२७॥ तं श्येनवेगं शतचंद्रवर्त्मभिश्चरंतमच्छिद्रमुपर्यधो हरिः ॥ कृत्वाट्टहासं खरमुत्स्व-
नोल्बणं निमीलिताक्षं जगृहे महाजवः ॥२८॥ विष्वक्स्फुरंतं ग्रहणातुरं हरिर्व्यालो यथाखुं कुलिशा-
क्षतत्वचं ॥ द्वार्यूरुमापात्य ददार लीलया नखैर्यथाहिं गरुडो महाविषं ॥२९॥ संरंभदुष्प्रेक्ष्यकराल-
लोचनो व्यात्ताननांतं विलिहन्स्वजिह्वया ॥ असृग्लवाक्तारुणकेसराननो यथांत्रमाली द्विपहत्य-
या हरिः ॥३०॥ नखांकुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् ॥ अजीहनत्तान्सहसा नखशस्त्रपा-
णिभिर्दोर्दंडयूथोऽनुपथान्स

लिशेनाक्षता त्वक् यस्य ॥ द्वारि सभायाः नांतर्बहिः ऊरुं ऊरौ निपात्य तमसुमो
न वा बहिः ॥ नखैर्न वा शस्त्रैरस्त्रैर्वा ॥ एवं दिवा न रात्रौ यथाविधि दानवाय दत्तमिति द्रष्टव्यं ॥२९॥ दैत्यवधमुत्कान
ग्रहणवधमाह द्वाभ्यां ॥ संरंभेण दुष्प्रेक्ष्याणि करालानि लोचनानि यस्य ॥ असृग्लवैर्भक्ष्यसलवैर्बिंदुभिः आरक्ताः
केसराः ग्रंथवाल्काः केसराः आननं च यस्य सः ॥ करिवधप्रदर्शनमात्रेण वधेन हरिः सिंहो यथा ॥३०॥ एवं

भगवांस्तदा हृष्यत हृष्यो बभूव ॥ किमर्थं निजभृत्येन शंख्लादेन यद्भाषितं तत्सत्यं कर्तुं ॥ तत्सत्यं विधातुं स्वं
वेनत्याप्तिं विलेषु भूतेषु सात्मनो व्याप्तिं च सत्यां कर्तुं स्तंभे ऽदृश्यत ॥ नात्किमर्थं भो निर्केषु च भावेषु च मदं
स्तच ॥ भगवानास्ति इति निजभृत्येन भाषितं तत्सत्यं कर्तुं ॥ तथा अद्भुतं ॥ देत्यघातकं मांतवा रूपमुद्
हन् दृश्यत ॥ नात्किमर्थं निभृत्यैः सनकादिभिः शापानंतरमनुतप्तैर्जयविजयाभ्यां ऋषिभिः शापमोक्षो भवतिति
तत्सत्यं कर्तुं ॥ तथा अद्भुतं च स्वस्वरूपं न ज्ञात्वा चाद्भुतरूपमुद्वहन् नच नरमृगाकारेन मनुष्याकारं दहन्स
भायामध्येदृश्यत ॥ नात्किमर्थं निजभृत्येन हिरण्यकशिपुना ब्रह्माणं ॥ यत्पितिमाषिते ॥ भूतेभ्य स्त्व

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ॥ अदृश्यतात्यद्भुतरूपमुद्वहन्
स्तंभे सभायां न मृगं न मानुषं ॥ १८ ॥

द्विहृष्टेभ्यो हृस्वमीभून्मम प्रभो इति ॥ तथा नांतर्बहिर्दिवा निनक्तं नैश्चेति

च ब्रह्मणा च निजभृत्येन तथास्त्विति यद्भाषितं ॥ तत्सत्यं कर्तुं न दिवा नरात्रौ हृष्टे भूतेन च नरो वा मृगो वा
नच शस्त्रास्त्रैर्न हि ॥ एवं ताभ्यां भाषितं तत्सत्यं कर्तुं ॥ यच्च हिरण्यकशिपुना भाषितं ॥ नूनमेत द्विरोधेन
मृत्युर्मे भवितेति ॥ तथायमकुतश्चिद्भयो मर इति तच्च नारदेन निजभृत्येनैवं प्रतिभाषितं ॥ अयं महान्
सत्त्वान् शाप्स्यति ॥ अनंतानुचर इत्यनेन सत्त्वस्य भक्तापत्यपातिं नच यद्भाषितं तत्सत्यं कर्तुमदृश्यत ॥ चकार
निजभाषितं यत् ॥ कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यतीति ॥ तथा तेषामहं समुद्धर्ता मृत्युसं-
सारसागरादित्यादि नच सत्यं कर्तुमदृश्यतेति हृष्ट[illegible] ॥ अलमतिविस्तरेण ॥ १८ ॥ ॥

श्री· भा· स· टी· ३०

स दैत्यः एवं ध्वनिं निष्क्रान्तं तदाश्चर्यं सत्त्वं प्राणिविशेषं सर्वतो विलोकयन् ॥ स्तंभस्य मध्यान्निर्गच्छन्तं ॥ नृमृगेंद्रयोर्मिश्रं रूपमहो किमेतदिति मीमांसितवानिति शेषः ॥१९॥ तस्यैवमलं भयानकं नृसिंहरूपं मीमांसमानस्याग्रतः ॥ सन्नृसिंहरूपो हरिः समुत्थितः भयानकत्वमेव दर्शयन् ॥ तद्रूपमनुवर्णयति त्रिभिः ॥ प्रतप्तं चामीकरं स्वर्णं तद्वत्पिंगानि चंडानि लोचनानि यस्मिन् ॥ सटाः सकेसराः कंठरोमाणि स्फुरद्भिः सटाकेसरैर्जृंभितं संदीप्यमानमाननं यस्मिन् ॥२०॥ करालाः स्वभावाद्दंष्ट्रा यस्मिन् ॥ करवालः खड्गः तद्वच्चलात् क्षुरान्तवत्तीक्ष्णा च जिह्वा यस्मिन् ॥ भ्रुकुटीयुक्तेन मुखेनोल्बणं ॥ स्तब्धौ ऊर्ध्वगौ कर्णौ यस्मिन् ॥ गिरिकंदरवदद्भुते व्यात्ते प्रसृते आस्यनासे च यस्मिन् ॥ हनू कपोलप्रदेशौ तयोः भेदेन विदारणेन भीषणं ॥२१॥ दिविस्पृशत् ॥ कायो यस्मिन् ॥ अल्पकालमात्रः ॥ अदीर्घा ह्रस्वा पीवरा स्थूला ग्रीवा यस्मिन् ॥ उरु विशालं वक्षःस्थलं यस्मिन् ॥ तनुत्वं ॥ अल्पं मध्यमं उदरं यस्मिन् ॥ चंद्रांशुगौरैस्तनूरुहैः लोमभिः छुरितं व्याप्तं ॥ विष्वक् सर्वतः ॥ प्रसृताः भुजा एव अनीकानि सैन्यानि तेषां शतानि यस्मिन् नखा एवायुधानि यस्मिन् ॥२२॥

स सत्त्वमेवं परितो विपश्यन् स्तंभस्य मध्यादनुनिर्जिहानं ॥ नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेंद्ररूपं ॥१९॥ मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकं ॥ प्रतप्तचामीकरचंडलोचनं स्फुरत्सटाकेसरजृंभिताननं ॥२०॥ करालदंष्ट्रं करवालचंचलक्षुरांतजिह्वं भ्रुकुटीमुखोल्बणं ॥ स्तब्धोर्ध्वकर्णं गिरिकंदराद्भुतव्यात्तास्यनासं हनुभेदभीषणं ॥२१॥ दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमं ॥ चंद्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधं ॥२२॥

८

रामानुजाय नमः २२ ॥

३०

ग्रहेशेति रुषामत्तं निघ्नन्दैत्यो हतः स्वयं ॥ आविर्भूय नृसिंहेन सब्रह्मादिभिः स्तुतः ॥ १ ॥ अंतः कृपास्तथा पूर्णो
बहिः क्रोधोन्मकसरीदंष्ट्रः स मविभावेन भञ्जनं न समभूभावयत् ॥ १ ॥ एकांतसंस्थितां अन्यत्र ... यथाय यावत् ॥ २
सवदहनमनोदधे ॥ कथम्भूतः कोपावेशेन चलद्गात्रः ... ॥ ३ ॥ स्निग्धातिरस्कृत ॥ पापेन स

श्रीनारद उवाच ॥ अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितं ॥ जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितं ॥ १ ॥
अथाचार्यसुतस्तेषां बुद्धिमेकान्तसंस्थितां ॥ आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद्यथा ॥ २ ॥ श्रुत्वा त
दप्रियं दैत्यो दुःसहं तनयानयम् ॥ कोपावेशचलद्गात्रः पुत्रं हन्तुं मनो दधे ॥ ३ ॥ क्षिप्त्वा परुषया वा
चा प्रह्लादमतदर्हणं ॥ आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ॥ ४ ॥ प्रश्रयावनतं दान्तं बद्धाञ्ज
लिमवस्थितं ॥ सर्पः पदाहत इव श्वसन्प्रकृतिदारुणः ॥ ५ ॥ हे दुर्विनीत मंदात्मन् कुलभेदकरा
धम ॥ स्तब्धं मच्छासनोद्वृत्तं नेष्ये त्वाद्य यमक्षयं ॥ ६ ॥ क्रुद्धस्य यस्य कंपंते त्रयो लोकाः सहेश्वराः तस्य मे
भीतवन्मूढ शासनं किं बलोऽत्यगाः ॥ ७ ॥ श्रीप्रह्लाद उवाच ॥ न केवलं मे भवतश्च राजन्स वै बलं बलि
नां चापरेषां ॥ परेऽवरेऽमी स्थिरजंगमा ये ब्रह्मादयो येन वशं प्रणीताः ॥ ८ ॥ स ईश्वरः काल उरुक्रमोऽसा
वोजः सहः सत्त्वबलेंद्रियात्मा ॥ स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ॥ ९ ॥
नारद उवाच ॥ इतीरितं वचः श्रुत्वा पितुर्धीमान्नरूपेयिघः ॥ प्रह्लादः प्रणतः प्राह गतभीर्जडमत्रिव ॥ १०
रोषेणातिरश्चीनेन चक्षुषा ॥ ४ ॥ मंदात्मन् ॥ अल्पबुद्धे मदाज्ञातिलंघितं त्वाम यमालयं नेष्यामि ॥ ६ ॥ अभीत
वत्किंबलेय स्मरः किंबलः ॥ ७ ॥ वशं प्रणीताः स एव ईश्वर इति ॥ उरवः क्रमाः पादविक्षेपा यस्य बहु
पराक्रम इति वा ॥ ओजः आदिरूपः सत्त्वं धैर्यं बुद्धिर्वा ॥ ९ ॥ ॥

मच्छूरवैरौ कथं ममापि समत्वबलं स्यादत आह ॥ जहीति ॥ आत्मनः स्वस्य स्वभावं त्यज यतः अजितादात्मनो मनसः ऋते विना मे विद्विषो न सन्ति ॥ किंच ॥ तद्धि तदेव हि सामस्त्येन मनसो धारणमेव समर्हणमाराधनं १०॥ मयापि शिवजयेषु सर्वे जिताः अतः साधु तेन मनोनिग्रहेणेति चेत्तत्राह दस्यूनिति एके भवादृशा मंदाः षड् पूर्वदोलुंपतः सर्वस्वहरतः षडिंद्रियलक्षणान्दस्यून्नविजित्य अजिता दशदिशः स्वयंजिता मन्यंते साधो ।

जह्यासुरं भावमिमं त्वमात्मनः समं मनो धत्स्व न संति विद्विषः ऋतेऽजितादात्मन उत्पथस्थितात्तद्धि ह्यनंतस्य महत्समर्हणम् ॥१०॥ दस्यून्पुरा षण्न विजित्य लुंपतो मन्यंत एके स्वजिता दिशो दश ॥ जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥११॥ **हिरण्यकशिपुरुवाच** ॥ व्यक्तं त्वं मर्तुकामोसि योऽतिमात्रं विकत्थसे ॥ मुमूर्षूणां हि मंदात्मन्ननु स्युर्विक्लवा गिरः ॥१२॥ यस्त्वया मंदभाग्योक्तो मदन्यो जगदीश्वरः क्वासौ यदि स सर्वत्र कस्मात्स्तंभे न दृश्यते ॥१३॥ सोहं विकत्थमानस्य शिरः कायाद्धरामि ते ॥ गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितं ॥१४॥ एवं दुरुक्तैर्मुहुरर्दयन्रुषा सुतं महाभागवतं महासुरः ॥ खड्गं प्रगृह्योत्पतितो वरासनात्स्तंभं तताडातिबलः स्वमुष्टिना ॥१५॥ स विक्रमन्पुत्रवधेप्सुरोजसा निशाम्य निर्ह्रादमपूर्वमद्भुतं ॥ अंतः सभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ॥१६॥ तदैव तस्मिन्निनदोतिभीषणो बभूव येनांडकटाहमस्फुटत् यं वै स्वधिष्ण्योपगतं त्वजाद

स्तु जिता मन्यंते साधोस्तु जितविन्न सदेहिनां समस्य आत्मनः (यः श्रुत्वा स्वधामात्ययमंग मेनिरे ॥१७॥ विदुषः स्वाज्ञानकल्पिताः परे शत्रवः कुतः स्युः ॥११॥ व्यक्तमिति म्रियते विक्लवा असंबद्धा इत्यर्थः ॥१२॥ हे मंदभाग्य यद्यसावस्ति तर्हि क्वास्ति ॥ प्रह्लाद आह सर्वत्रास्तीति हिरण्यकशिपुराह ॥ तर्हि कस्मात्स्तंभे नास्ति ॥ प्रह्लाद

यत्र दुःखेन संभिन्नं न च ग्रस्तमनंतरं अभिलाषोपपन्नं च तत्सुखं स्वर्गपदास्पदं इत्येवं लक्षणात् स्वर्गादिभोगादपि मोक्षो वा
ह्यमादृ ॥ एवं हीति । हि यस्मात् एते हेतोः क्रतुभिः कृता इति ॥ तद्यथेह कर्मजितो लोकः क्षीयते ॥ एवमेवामुत्र पुण्यजि-
तो लोकः क्षीयते इति श्रुतेश्च ॥ अत एव पुण्यतारतम्येन सातिशयाः न च निर्मलाः स्पर्द्धादिमत्त्वात् ॥ न विद्यते दृ-
ष्टं श्रुतं च दूषणं च यस्मिन् ॥ ४० ॥ किंच ॥ यदर्थं यत्संकल्प्य अतः सकाशात् ॥ विपर्यासं विपरीतं फलम् ॥ अ-

एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः ॥ तस्माददृष्टश्रुतदूषणं परं भक्त्ये-
केशं भजतात्मलब्धये ॥ ४० ॥ यदर्थं इह कर्माणि विद्वन्मान्यसकृन्नरः ॥ करोत्यतो विपर्यासममोघं विंद-
ते फलं ॥ ४१ ॥ सुखाय दुःखमोक्षाय संकल्प इह कर्मिणः ॥ सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ॥
४२ ॥ कामान्कामयते काम्यैर्यदर्थमिह पूरुषः ॥ स वै देहस्तु पारक्यो भंगुरो यात्युपैति च ॥ ४३ ॥ किमु व्य-
वहितापत्यदारागारधनादयः ॥ राज्यकोशगजामात्यभृत्याप्ता ममतास्पदाः ॥ ४४ ॥ किमेतैरात्मनस्तु-
च्छैः सह देहेन नश्वरैः ॥ अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः ॥ ४५ ॥

मोघं ध्रुवं प्राप्नोति ॥ ४१ ॥ तदेव दर्शयति ॥ सुखायेति ॥ ईहया इच्छया क्रियया वा यः पूर्वमनीहाया हेतोः सुखे-
नावृतो व्याप्तः आसीत् ॥ स ईहयाऽऽदुःखमाप्नोत्येव ॥ ४२ ॥ किंच कामान् ॥ काम्यैर्विषयैः कर्मभिर्वा पारक्यः
श्वादिभोग्यः ॥ न त्वात्मीयः भंगुरश्च ॥ ४३ ॥ किमु देहान्नव्यवहिताः ॥ अपत्यादयो ममता विषयाः पारक्याश्च निव-
क्तव्य ॥ ४४ ॥ किंवा ॥ अयं पुरुषार्थरूपः स्यात् किमेतै-
रित्याह ॥ किमेतैरिति ॥ ४५ ॥

भोगायवसराभावाच्चैतैः कउपयोगइत्याह ॥ निरूप्यतामिति ॥ प्राचीनैः कर्मभिः ॥ क्लिश्यमानस्यकर्मभिः
क्रियानर्थइतिवान्वयः ॥ ४६ ॥ ननुकर्मसुसमाप्तेषुभोगावसरः स्यादित्यत आह ॥ कर्माणीति ॥ नचेदंकर्मतत्फलदे
हादिकंचपरमार्थितइत्याह ॥ उभयंकर्मचदेहंचअविवेकतः अज्ञानेनेत्यनुवर्तते ॥ ४७ ॥ यदपाश्रयायदधीनाः ४७

निरूप्यतामिहस्वार्थः कियान्देहभृतोसुराः ॥ निषेकादिष्ववस्थासुक्लिश्यमानस्यकर्मभिः ॥ ४६ ॥ क
र्माण्यारभतेदेहीदेहेनात्मानुवर्तिना ॥ कर्मभिस्तनुतेदेहमुभयंत्वविवेकतः ॥ ४७ ॥ तस्मादर्थाश्चकामा
श्चधर्माश्चयदपाश्रयाः ॥ भजतानीहयात्मानमनीहंहरिमीश्वरं ॥ ४८ ॥ सर्वेषामपिभूतानांहरिरा
त्मेश्वरः प्रियः ॥ भूतैर्महद्भिः स्वकृतैः कृतानांजीवसंज्ञितः ॥ ४९ ॥ देवोसुरोमनुष्योवायक्षोगंधर्वए
वच ॥ भजन्मुकुंदचरणंस्वस्तिमान्स्याद्यथावयं ॥ ५० ॥ नालंद्विजत्वंदेवत्व[illegible]ऋषित्वंवासुरात्मजाः
प्रीणनायमुकुंदस्यनवृत्तंनबहुज्ञता ॥ ५१ ॥ नदानंनतपोनेज्यानशौचंनव्रतानिच ॥ प्रीयतेमलया
भक्त्याहरिरन्यद्विडंबनं ॥ ५२ ॥ ततोहरौभगवतिभक्तिंकुरुतदानवाः ॥ आत्मौपम्येनसर्वत्रसर्वभूता
त्मनीश्वरे ॥ ५३ ॥ दैतेयायक्षरक्षांसिस्त्रियः शूद्राव्रजौकसः खगाः मृगाः पापजीवाः ॥ संतिह्यच्युत
ताः ॥ ५४ ॥ एतावानेवलोकेस्मिन्पुंसः स्वार्थः परः स्मृतः ॥ एकांतभक्तिर्गोविंदेयत्सर्वत्रतदीक्षणं ॥ ५५ त

इतिश्रीभागवतेसप्तमस्कंधेसप्तमोध्यायः ॥ ७ ॥॥ ॥ रामानुजायनमः ॥ ७ ॥

जीवात्मप्राणिनांजीवमंतर्यामी ॥ ४९ ॥ असुराणामस्माकमत्रनाधिकारइत्यपिवाच्यमित्याह देवइ
तिपंचभिः ॥ अमलयानिष्कामया विडंबनंनटनमात्र ॥ ५२ ॥ अच्युततामच्युतात्मतां ॥ ५४ ॥ अध्यायद्वयोक्तमु
पसंहरति ॥ एतावानिति ॥ तदीक्षणंगोविंददृष्टात्मत्वानने ॥ ५५ ॥॥॥ ॥॥ इतिसप्तमस्कंधेसप्तमो
ध्यायः ७ ॥ रामानुजायनमः ॥ ७ ॥

प्रकरणार्थमुपसंहरति ॥ एतन्मेभिहितं ॥ यथा भक्तो भूत्वा मां परं संप्राप्नुयादिति ॥ ४८ ॥ इत्येकादश स्कंधे भावार्थदीपिकायामष्टादशोध्यायः ॥ १८ ॥ ज्ञानादेर्निर्णयः पूर्वं कृतो ज्ञानाश्रमधर्मतः ॥ एकोनविंशति तमे ज्ञानादेस्त्याग उच्यते ॥ १ ॥ तदेवं तर्केणोत्थापितोपि देहादिप्रपंचो यावदपरोक्षानुभवेन दृश्यादिविवन लीयते ॥ तावज्ज्ञानाभ्यासस्तेनास्य क्रियत इत्युक्तं ॥ अथेदानीं तदा चिंतयाति स्ततः संपद्यते मय्येतादिना ॥ यस्त्व परोक्षानुभवेन प्रपंचो लीनप्रायस्तस्य न किंचित्कृत्यमस्तीत्याह ॥ य इति ॥ विद्यानुभवस्तत्पर्यंतेन श्रुतेन

एतन्मेभिहितं साधो भवान्पृच्छति यच्च माम् ॥ यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परम् ॥ ४८ ॥ इति श्री भागवते महापुराणे एकादशस्कंधे अष्टादशोध्यायः ॥ १८ ॥ श्रीभगवानुवाच ॥ यो विद्याश्रुतसंप न्न आत्मवान्नानुमानिकः ॥ मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् ॥ १ ॥ ज्ञानिनस्त्वहमेवे ष्टः स्वार्थो हेतुश्च सम्मतः ॥ स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः ॥ २ ॥

संपन्नः ॥ अतएवात्मवान् ॥ शास्त्राभ्यासतः नानुमानिकः केवलपरोक्षज्ञानवान्न भवति ॥ अनकारणादे प्राकृष्यमाणकुलतर्कतो निर्णीतार्थ इत्यर्थः ॥ स एवं देहेनेन निवृत्तिसाधनं च मयि मायामात्रम विज्ञात्वा ज्ञानं च तत्साधनं संन्यसेत् ॥ अयमेव हि विदुषः संन्यासो नाम ॥ १ ॥ अत्र हेतुमाह ॥ ज्ञानिन इति ॥ यस्मादह मेवतस्येष्टः ॥ अपेक्षितः स्वार्थः फलं हेतुः ॥ तत्साधनं च संमतः ॥ स्वर्गोभ्युदयश्चापवर्गः संसार निवृत्तिश्च ॥ अतस्तस्य न साध्यं साधनं वा किंचि दस्तीत्यर्थः ॥ २ ॥

श्री॰
भा॰ए॰
टी॰
७५

अत्र विद्वदनुभवं प्रमाणयति ॥ ज्ञानेति ॥ ये योगं ज्ञानिनमभिनंदति ज्ञानीति ॥ यतो सौ ज्ञानेन मां धारयति ॥ तस्य ज्ञानं स्तौति ॥ तप इति ॥ अलमसमर्थं ज्ञानस्य कलया लेशेन ॥ ४ ॥ ज्ञानेन सहितं स्वमर्थं तेन यथा भवति ॥ तथा ज्ञात्वा तत्संपन्नः सन् मामेव भज ॥ अन्यत्स्वेवं मज्जेमर्थः ॥ ५ ॥ तस्य प्रथमयार्थं पूर्वेषां दृष्टांतमाह ॥ ज्ञानेति ॥ मामेव संसिद्धिं प्राप्ताः ॥ ६ ॥ तदेवं ज्ञानं संक्षेपेन उपदिशति ॥ त्वयीति त्रिविधः आध्यात्मिकादिविकारो

हि॰

ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम ॥ ज्ञानी प्रियतमोतो मे ज्ञानेनासौ बिभर्ति मां ॥ ३ ॥ तपस्तीर्थं जपो दानं पवित्राणीतराणि च ॥ नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता ॥ ४ ॥ तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ॥ ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः ॥ ५ ॥ ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि ॥ सर्वयज्ञपतिं मां वै संसिद्धिं मुनयो गमन् ॥ ६ ॥ त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायांतरापतति नाद्यपवर्गयोर्यत् ॥ जन्मादयोस्य यदमी तव तस्य किं स्युराद्यंतयोर्यदसतोस्ति तदेव मध्ये ॥ ७ ॥ रामानुजाय नमः ॥ ७ ॥

देहादिः स मायांतरापरमा

र्थीः ॥ यद्यस्मादंतरा मध्ये एवापतति ॥ रज्जौ सर्पमालादिवत् ॥ नाद्यपवर्गयोः ॥ तत्ता तावत्तेवास्ति ॥ अतो य यद्वा अस्य विकारस्यामी जन्मादयः स्युः तदा तव तदधिष्ठानभूतस्य किं न किं चिदित्यर्थः ॥ तस्यापि वस्तुतो न संगति ॥ तस्मात्सत्वादित्याह ॥ आद्यंतयोरिति ॥ असतः सर्पादेः ॥ आद्यंतयोर्यद्रज्ज्वादि तदेव मध्येपि ननु सर्पादितद्वद्वयं विवर्तेनास्तीत्यर्थः ॥ यद्वा आद्यंतयोर्यदस्ति तन्मध्येप्यस्त्येव न तस्यान्तर्जन्मादयः ॥ स स्यात् स्त्वं निर्विकारं ब्रह्मेति ॥ ७ ॥ ॥ रामानुजाय नमः ७

एतद्वक्ष्यमाणमिदं वातिगुरुसंवयववक्त ः [illegible] अस्मिन्स्वयमाविष्करोति॥ हे पुरुषाध्यक्षेत्यादिना प्रश्नादिति
पृष्टः अपवृक्तः॥२४॥ व्योमवदसंगः यतः प्रकृतेः परः स्वेच्छयोपात्तपृथग्वपुरिमितं वपुर्येन सः॥ तच्छीलव
तांः साधुं निरूपयति॥२५॥ कृपालुः परदुःखासहिष्णुः सर्वदेहिनां केषांचिदकृतद्रोहः तितिक्षुः क्षमावा
न्॥ सत्यं सारं बलं वा यस्य सः अनवद्यात्मा असूयादिरहितः सुखदुःखयोः समः यथाशक्ति सर्वेषामुपकार
कः॥२६॥ कामैरक्षुभितचित्तः दान्तः संयतबाह्येन्द्रियः मृदुः अकठिनचित्तः शुचिः सदाचारः अकिंचनः अपरिग्र

एतन्मे पुरुषाध्यक्ष लोकाध्यक्ष जगत्प्रभो॥ प्रणतायानुरक्ताय प्रपन्नाय च कथ्यतां॥२५॥ त्वं ब्रह्म परमं व्यो
म पुरुषः प्रकृतेः परः॥ अवतीर्णोऽसि भगवन्स्वेच्छोपात्तपृथग्वपुः॥२६॥ श्रीभगवानुवाच॥ कृपालु
रकृतद्रोहः तितिक्षुः सर्वदेहिनां॥ सत्यसारोऽनवद्यात्मा समः सर्वोपकारकः॥२७॥ कामैरहतधीर्दान्तो मृ
दुः शुचिरकिंचनः॥ अनीहो मितभुक्शान्तः स्थिरो मच्छरणो मुनिः॥२८॥ अप्रमत्तो गभीरात्मा धृतिमा
ञ्जितषड्गुणः॥ अमानी मानदः कल्यो मैत्रः कारुणिकः कविः॥२९॥ ॥ ॥

हः॥ अनीहो दृष्टक्रियाशून्यः मितभुक् शान्तो नियतान्तःकरणः स्थिरः स्वधर्मे मच्छरणः मदेकाश्रयः मु
निर्मननशीलः॥२८॥ अप्रमत्तः सावधानः गम्भीरात्मा निर्विकारः धृतिमान्॥ जितषड्गुणः क्षुत्पिपासे शोक
मोहौ जरामृत्यू षड्ऊर्मयः जिता येन सः अमानी न मानाकांक्षी अन्येभ्योऽपि मानदः कल्यः परबोधने
दक्षो मैत्रः अवञ्चकः कारुणिकः करुणयैव प्रवर्तमानः दृष्टलोभेन कविः सम्यग्ज्ञानी च॥२९॥ ॥

मयावेदरूपेणोद्दिष्टानपि स्वधर्मान्दोषान्संत्यज्य यो मां भजेत ॥ सोऽपि वै श्रेष्ठो सत्तमः ॥ किमज्ञात्वा ज्ञात्वा गुणवाद्दान
धर्माचरणेन सत्त्वशुद्ध्यादीन् ॥ गुणान्विपन्दोषांश्च ज्ञात्वा यज्ञात्वापि मे ध्यानविक्षेपकतया मद्भक्त्यैव सर्वं भविष्य
तीति दृढनिश्चयेनैव धर्मान्संत्यज्य श्रद्धादयोऽपि भक्तिविरुद्धा धर्मास्तान्संत्यज्य त्यक्ते ॥ किं च ज्ञात्वाज्ञात्वा यथैव माया
वान्यश्चास्मि यादृशः सच्चिदानंदरूपः ...... तं मां ज्ञात्वाप्यज्ञात्वापि यदृशोऽधवतः पुनः पुनः ज्ञात्वा ॥ एका
नभावेन तये भजंते तीमिमाधुलक्षणा सुभक्तं ॥ भक्तेर्लक्षणमाह ॥ मल्लिंगेत्यष्टभिः ॥३०॥ लिंगादि प्रतिमादी
आज्ञायैवं गुणान्दोषान्मयोदिष्टानपि स्वकान् ॥ धर्मान्संत्यज्य यः सर्वान्मां भजेत्स च सत्तमः ॥३०॥ ज्ञात्वाज्ञात्वा
यथैवं मां यावान्यश्चास्मि यादृशः ॥ भजंत्यनन्यभावेन ते मे भक्ततमा मताः ॥३१॥ मल्लिंगमद्भक्तजनदर्श
नस्पर्शनार्चनं ॥ परिचर्यास्तुतिप्रह्वगुणकर्मानुकीर्तनं ॥३२॥ मत्कथाश्रवणे श्रद्धा मदनुध्यानमेव च
सर्वलाभोपहरणं दास्येनात्मनिवेदनं ॥३३॥ गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सवं ॥ मज्जन्मकर्मक
थनं मम पर्वानुमोदनं ॥३४॥ पूजाबलिविधानं च सर्ववार्षिकपर्वसु ॥ वैदिकी तांत्रिकी दीक्षा मदीयव्र
तधारणं ॥३५॥ ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः ॥ उद्यानोपवनक्रीडपुरमंदिरकर्मणि ॥३६॥ स
मार्जनोपलेपाभ्यां सेकमंडलवर्तनैः ॥ गृहशुश्रूषणं मह्यं दासवद्यदमायया ॥३७॥ अमानित्वमदंभि
त्वं कृतस्यापरिकीर्तनं ॥ अपि दीपावलोकं मे नोपयुंज्यान्निवेदितं ॥३८॥ यद्यदिष्टतमं लोके यच्चातिप्रि
ति ॥३१॥ सर्वसलवस्तुसमर्पणं ॥३२॥ पर्वाणि जन्माष्टम्यादीनि तत्र मोदनं ॥३३॥ बलिः पूजाविधानं पूजोपहारादि
समर्पणं सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशेषतः ॥३४॥ उद्यानादिकरणे मत्प्रीत्यर्थं सोत्सहत्वं ॥
सन्निचाल्यैः संभूय मिलित्वा उद्यमः ॥ उद्यानं पुष्पप्रधानं उपवनं क्रीडास्थानं ॥३५॥ संमार्जनं रजःसोपाकरणं ॥

इदानीं भक्तिं विना नान्यत्किंचित्तोषहेतुरित्याह ॥ विप्रादिति ॥ पूर्वोक्ता धनाभिजनादयो द्विषट् द्वादश गुणा
स्तैर्युक्ताद्विप्रादपि श्वपचं वरिष्ठं मन्ये यद्वा सनत्सुजातोक्ता द्वादश धर्मादयो गुणा द्रष्टव्याः ॥ तदुक्तं धर्म
श्च सत्यं च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षानसूया ॥ यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्म
णस्येति ॥ कथंभूतात् ॥ विप्रादरविन्दनाभपादारविन्दविमुखात् ॥ कथंभूतं श्वपचं ॥ तस्मिन्नर्पितवि
हिताश्चर्पिता मनआदयो येन तं ॥ ईहितं कर्म ॥ वरिष्ठत्वे हेतुः स एवंभूतः श्वपचः सर्वं कुलं पुनाति भूरि

विप्राद्द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठं ॥ मन्ये तदर्पितमनोवचने
हितार्थप्राणं पुनाति स कुलं न तु भूरिमानः ॥ १० ॥ नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं ज
नादविदुषः करुणो वृणीते यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥

मानो गर्वो यस्य ॥ स तु विप्र आत्मानमपि न पुनाति ॥ कुतः कुलं यतो भक्तिहीनस्यैते गुणा गर्वायैव भवन्ति
न तु शुद्धये ॥ अतो हीन इति भावः ॥ ननु हरिः किं धनाद्यर्पणेन संमानेन प्राकृत इव भगवान् पूज्यते ॥ तत्राह नैवे
ति ॥ १० ॥ अयं प्रभुरीश्वरः ॥ अविदुषोऽल्पज्ञाज्जनात् ॥ मानं पूजामात्मनोऽर्थे न वृणीते नेच्छति यतो निज
लाभेनैव पूर्णः ॥ तर्हि पूजां नेच्छत्येव ॥ न तत्राह करुणः कृपालुः अतो वृणीते वा ॥ तत्र हेतुः यद्यदिति
यं यं मानं पूजां ॥ यद्यस्मात् ॥ यत्तेन धनादिना भगवते मानं विदधीत ॥ तदेवात्मने भवति ॥ नान्यथा यथा
मुखस्य तिलकादि श्रीः सा प्रतिबिंबस्य भवति ॥ न तु सा तास्यैव कर्तुं शक्यते तद्वत् ॥ ११ ॥

श्री

श्री॰भा॰
स॰ टी॰
३९

यस्मादेवं भगवान्भक्तैर्वश्य इति ॥ तस्मादहं जीवोपि विगतविक्लवः गतशंकः सन् ॥ ईश्वरस्य महि
महिमानं सर्वं यथा तेन मनीषानुसारेणानुवर्णयामि ॥ ब्रह्मानन्तोपि स्तुतिकरणे हेतुमाह ॥ ये
नैव महिम्ना अनुवर्णितेन ॥ अविद्यया संसारमनुप्रविष्टः पुमान् ॥ मुच्येत तत्सुखेन तन्नमसि ॥ शृणा
मि ॥ अन्यस्य तथा शोधकस्याभावादित्यर्थः ॥ तदेवमात्मनः स्तुतावनधिकारं परिहृत्येदानीं

तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मनो महि गृणामि यथा मनीषम् ॥ जीवोऽजयाऽ
गुणविसर्गमनुप्रविष्टः मुच्येत येन हि पुमाननुवर्णितेन ॥ २१ ॥ सर्वैर्यमी विधिकराल
वसन्त धाम्नो ब्रह्मादयो वयमिवेश न चोद्विजन्तः ॥ क्षेमाय भूतय उतात्मसुखाय चास्य
विक्रीडितं भगवतो रुचिरावतारैः ॥ २२ ॥

नं स्तुवन् ॥ कोयोपसंहारं प्रार्थयते ॥ सर्वैरिति द्वाभ्याम् ॥ भो ईश अस्मी ॥ उद्विजन्तो विभ्यतः सर्वे ब्र
ह्मादयः सन्तः मृत्युं तस्य विधिकराः त्वन्नियोगकर्त्तारो भक्ता एव ॥ नान्ये न च वयमसुरा इव वैर
भावेनैते भक्ताः किं तु श्रद्धयैव तदर्थं च विरेरावतारैर्विविधं क्रीडनं अस्य विश्वस्य क्षेमादि प्रयोजन

ॐनवमेऽस्मिन्नध्याये भीतयाचोदितो मुखबालकः ॥ कोपं प्रशामयन्नस्तौन्नृसिंहमतिभीषणम् ॥ १ ॥ उग्रोप्यनुग्र ए
वायं स्वभक्तानां नृकेसरी केसरीव स्वपोतानामन्येषामुग्रविग्रहः ॥ २ ॥ त्वया यो रामो मां भक्तानुकं
पितामह ॥ एवमिति ॥ सन्नीभिः ॥ एवं हरतएवस्थितास्तु वंतः मन्युना संरंभआवेशो यस्य तं ॥ उपगं
नाशक्नुवन् ॥ १ ॥ मद्दंष्ट्रं तं रूपं दृष्ट्वा शंकिता सतीनं नोपजगाम ॥ अद्भुतत्वे हेतुः ॥ अदृष्टेति ॥ २ ॥ ३

नारद उ० ॥ एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः ॥ नोपैतुमशकन्मन्युसंरंभं सुदुरासदं ॥ १ ॥ साक्षाच्छ्रीः
प्रेषिता देवैर्दृष्ट्वा तं महदद्भुतं ॥ अदृष्टश्रुतपूर्वत्वात्सा नोपेयाय शंकिता ॥ २ ॥ प्रह्लादं प्रेषयामास
ब्रह्मावस्थितमंतिके ॥ तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुं ॥ ३ ॥ तथेति शनकै राजन्महाभाग
वतोऽर्भकः ॥ उपेत्य भुवि कायेन ननाम विधृतांजलिः ॥ ४ ॥ स्वपादमूले पतितं तमर्भकं विलो
क्य देवः कृपया परिप्लुतः ॥ उत्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं कालाहिवित्रस्तधियां कृताभयं
स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः ॥ तत्पादपद्मं हृदि निर्वृतो दधौ हृ
ष्यत्तनुः क्लिन्नहृदश्रुलोचनः ॥ ६ ॥ अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः ॥ प्रेमगद्गदया वा
चा तन्न्यस्तहृदयेक्षणः ॥ ७ ॥ कालएवाहिस्तस्माद्वित्रस्ताधीर्येषां तेषां कृतमभयं येन तत् ॥ ५ ॥ तस्य करस्पर्शेः नधु
तेनिरस्तमखिलमशुभं यस्य सपदि तत्क्षणमेवाभिव्यक्तमपरोक्षीभूतं परात्मदर्शनं यस्य निर्वृतः
सन् ॥ हृदि दधौ ॥ हृष्यंती रोमांचिता तनुर्यस्य क्लिन्नं प्रेमार्द्रं हृत् ॥ यस्य ॥ अश्रूणि लोचनयोः यस्य ॥ परम
पुरुषार्थं न यावदयं ॥ नसाधनत्वेनेत्यर्थः ॥ ६ ॥ सुसमाहितत्वमेवाह ॥ तस्मिन्नेव न्यस्ते हृदयमीक्षणे

सोस्मिन्निव समस्तेषु वत्सपान्तहृद्ये । प्रह्लादः स्तौतिमत्येहि चत्वारिंशता हरिं ॥१॥ तत्र तावदात्मनो भगवतः स्तुतावनधिकारमिवाशंक्याधिकारं संभावयन्नाह ब्रह्मादय इति पंचभिः ॥ मुनयो मननशीलाः सिद्धा ज्ञानिनोपि कथं भूताः ॥ सत्वएवैकस्मिंस्तानो विस्तारो यस्याः सा मतिर्येषां ॥ तथाविधा अपि वचसां प्रवाहैरपि तथा बहुभिर्वर्द्धमानैर्गुणैरपि यमाराधयितुं न पिप्रुः न पूर्णाः न शक्ताः यथेष्टं ॥ स हरिर्मे कथं तोषं प्राप्तुमर्हति ॥ तत्र हेतुः ॥ उग्रा घोरा आसुरी जातिर्यस्य ॥ एवं हरिस्तोषणे स्व वा

प्रह्लाद उवाच ॥ ब्रह्मादयः सुरगणा मुनयोथ सिद्धाः सत्वैकतानमतयो वचसां प्रवाहैः ॥ नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ॥८॥ मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः ॥ नाराधनाय हि भवंति परस्य पुंसो भक्त्या तुतोष भगवान्गजयूथपाय ॥९॥

स्वयोग्यतामाशंक्य योग्यतां संभावयति ॥ मन्य इति द्वाभ्यां ॥ अभिजनः सत्कुले जन्म रूपं सौंदर्यं श्रुतं पांडित्यं ओजः इंद्रियनैपुण्यं तेजः कांतिः प्रभावः प्रतापः पौरुषमुद्यमः बुद्धिः प्रज्ञा योगोष्टांगः ॥ एते धनादयो द्वादशापि गुणाः परमपुंसः आराधनाय न भवंति ॥ हि यतः केवलया भक्त्यैव तुतोष गजेंद्राय तुष्टोभवत् ॥ एवं भक्त्यैव केवलया हरेः संतोषः संभवतीत्युक्तं ॥९॥

प्रजापतयोपि तदवलोकिताः प्रोचुः हे परेश ईशितेन त्वयाभिसृष्टाः प्रजेशा वयं येन निषिद्धाः सन्तः प्रजा न सृ
जामः स एष भिन्नवक्षाः नु निश्चितं मृतः शेते अतः परं प्रजाः सृजाम इति हृष्टास्त आहुः हे सत्त्वमूर्ते त
वायमवतारो जगतां मंगलं ॥ ४८ ॥ गंधर्वा अपि तदवलोकिताः प्रोचुः हे विभो वयं ते तवदीयाः नटनर्त
काः येन नाट्यगायकाः स्वात्मसात् येन स्वाधीनाः धीकृताः कथंभूतेन वीर्यशौर्यबलशक्तिः ताभ्यामोजः

प्रजापतय ऊचुः ॥ प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः ॥ स एष त्वया भिन्नवक्षा नु शेते जगन्मंगलं सत्त्वमूर्तेऽवतारः ॥ ४८ ॥ गंधर्वा ऊचुः ॥ वयं विभो ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः ॥ स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ॥ ४९ ॥ चारणा ऊचुः ॥ हरे तवांघ्रिपंकजं भवापवर्गमाश्रिताः ॥ यदेष साधुहृच्छयस्त्वयासुरः समापितः ॥ ५० ॥ यक्षा ऊचुः ॥ वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वं ॥ स तु जनपरितापं तत्कृतं जानता ते नरहर उपनीतः पंचतां पंचविंश ॥ ५१ ॥

प्रभावो यस्य तेन ॥ इमां दशां मृतिं ॥ उचितमेतदित्याहुः किमिति ॥ ४९ ॥ भवापवर्गं संसारनिवर्तकं ॥ आश्रयणे हेतुः ॥ यद्यस्मात् साधूनां हृदि भयजनकत्वेन शेते तिष्ठतीति तथा स एषोऽसुरस्त्वया समापितः अन्तं नीतः ॥ ५० ॥ मनोज्ञैः कर्मभिः अनुचरेषु मुख्याः ॥ पंचतां मरणं हे पंचविंश ॥ चतुर्विंशति तत्त्वनियामक ॥ ५१ ॥ ॥

श्री·भा·
स·टी·
३४

किंपुरुषास्तु वालेतुकेवयंवराकाइत्याहुः ॥ वयंकिंपुरुषास्त्वंतुमहापुरुषईश्वरः ॥ अयमिति ॥ ५५ ॥ सत्रेषु यज्ञेषु ॥ तेनवयमद्यतनदेहोदृतइतिकिंनवाच्यं तेइत्याशंक्यवैतालिकाआहुः ॥ अयमिति ॥ ५५ ॥ सत्रेषुय ज्ञेषु ॥ तेनवयाहृतः ॥ पतदिष्ट्या भद्रंहतः ॥ ५६ ॥ अमुनादितिजेनविष्टिंनिर्मूल्यकर्मप्रवृत्तिरेवंवेकारि

किंपुरुषाऊचुः ॥ वयंकिंपुरुषास्त्वंतुमहापुरुषईश्वरः ॥ अयंकुपुरुषोनष्टोधिक्कृतःसाधुभि र्यदा ॥ ५५ ॥ वैतालिकाऊचुः ॥ सभासुसत्रेषुतवामलंयशोगीत्वासपर्यांमहतींलभामहे ॥ यस्तामनैषीद्वशमेषदुर्जनोदिष्ट्याहतस्तेभगवन्यथामयः ॥ ५६ ॥ किंनराऊचुः ॥ वयमीशकिंनरगणास्तवानुगादितिजेनविष्टिममुनानुकारिताः ॥ भवताहरेसवृजिनोव सादितोनरसिंहनाथविभवायनोभव ॥ ५७ ॥ विष्णुपार्षदाऊचुः ॥ अद्यैतद्धरिनररूपमद्भुतंतेदृष्टंनःशरणदसर्वलोकशर्म ॥ सोयंतेविधिकरईशविप्रशप्तस्तस्येदंनिधनमनु ग्रहायविद्मः ॥ ५८ ॥ इतिश्रीमद्भागवतेमहापुराणेसप्तमस्कंधेप्रह्लादानुचरितेदैत्यराजवधोनामाष्टमोध्या यः ॥ ॥ ८ ॥ ॥

ताः ॥ अतःपरंनः विभवायसमृद्धयेभव ॥ ५७ ॥ नोस्माकंभक्तानांशरणादआश्रयप्रदसर्वेषांलो कानांशर्मसुखंयस्मात्तदद्भुतंनृरूपमद्यैवदृष्टं ॥ तवपूर्वंविधिकरः किंकरः ॥ ५८ ॥ इतिसप्तम स्कंधटीकायामष्टमोध्यायः ८ ॥

दं त्वन्नाम्नाकं हरिविभ्रमादि लाभः पुरुषार्थः ॥ किंच त्वत्परिचर्ययैव भवता उत्तरेनेन संरंभेण स्वकार्यमेवसा
धितं ॥ तस्य च सिद्ध त्वाडुपसंहरेत्तेनैकोधमित्याभायेनाह ॥ हे परमेनोस्मा स्त्वायता भवमास्वीयापव भागादेस
त्यस्या हृता ॥ अन्तर्यामिणा त्वैव भोक्तृत्वात् ॥ अस्मदीयं हृदयकमले च त्वद्दृष्टे वेनाव त्वयैतंभयदे
त्वे ता समस्तमति पर्ययेनित्वे स्थितेन देहेनाक्रांते त्वामसमस्त्ये यचोधिभयापाक रणेनविकासं नीतं तव
वैलोक्यैस्वर्यमायतार्थमयसुग्रमयतिचेत् ॥ तत्राह ॥ कालत्रयमिति ॥ तेन ॥ हे तारसिंह ॥ तरसा सिंहः

देव उवाच ॥ भूम्नानीताः परमभवतामायतानः स्वभागादेत्याकांतं हृदयकमलं त्वद्दृष्टं प्रसवेो
धि ॥ कालत्रयं किंयदिदमहो नाथ शुश्रूषतां तेस्तुतिः सैषा नहि बहुमना नारसिंह प्रपन्नैः कि
म् ॥ ४४ ॥ ब्रह्मोवाच ॥ तेनस्तपः परमसौख्यपदाश्रितेनोयेतेदमादि पुरुषात्मगतेसमर्ज्य त
द्विप्रलत्तमस्तु नाथ शरणपालरत्नाहृदीनवपुषा पुनरत्वमस्याः ॥ ४५ ॥ ॥

एवाकाराभ्यां आविर्भूतं ॥ ४५ ॥ स्वपयस्तनपः प्रवर्तितेनास्माकं ॥ महानतुग्रहः कृतः इत्याह ॥ तेनोय
दात्यय रमेष्या नत्वत्तेनतपः परमनेवहेतः ॥ आत्मनस्तव तेजः प्रभावरूपं तेदेवाह ॥ येनतपसा आ
त्मनि लीनमिदं विश्वसमसर्जसृष्टवानसि ॥ तत् ॥ अमुनादेत्येन विपलं तंकुदितं सत् ॥ हे शरणपाल अ
यरतार्थं गृहीतेनानेन वपुषा पुनरर्पितपः कृतेन त्वभ्युद्गतवानसि ॥ तस्मैतेनमइत्युत्तरश्लोक
चतुर्थपादस्यानुवन्धः ॥ ४५ ॥ ॥

श्री॰भा॰
स्क॰ टी॰
२२

पितरस्तु श्राद्धहरणेन तदपरोपकारित्वं प्रणमंति ॥ श्राद्धानि श्रद्धया कृतानि पिंडोदकादीनि नोऽस्माकं प्रसभं तनूजैर्दत्तानि प्रसभं बलात् ॥ स्वयमधिकृत्य बुभुजे ॥ किंच तीर्थस्नानसमये दत्तं तिलोदकमप्यपिबत् ॥ तानि तस्योदराद्यश्चार्छत ॥ आहृतवान् ॥ कथंभूतात् ॥ नखैर्विदीर्णा वपा यस्य तस्मात् ॥ वपाविदारणस्य तदंतःपिंडहरणमेव फलमिति भावः ॥४५॥ योगसिद्धां गतिमणिमादिसिद्धिं नानानेके दर्पा यस्य

पितर ऊचुः ॥ श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत्तिलांबु ॥ तस्योदरान्नखविदीर्णवपाद्य आर्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥४६॥ सिद्धा ऊचुः ॥ यो नो गतिं योगसिद्धामसाधुरहार्षीद्योगतपोबलेन ॥ नानादर्पं तं नखैर्विददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ॥४७॥ विद्याधरा ऊचुः ॥ विद्यां पृथग्धारणयानुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः ॥ स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यं ॥४८॥ नागा ऊचुः ॥ येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ॥ तद्वक्षःपाटनेनासां दत्तानंद नमोऽस्तु ते ॥४९॥ मनव ऊचुः ॥ मनवो वयं तव निदेशकारिणो दितिजेन देव परिभूतसेतवः ॥ भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किंकरान् ॥५०॥

ते नमस्ते तुभ्यं तेनामुद्दिश्य ॥४७॥ विद्यां मंत्रध्यानादिलक्षणां ॥ पृथग्धारणया संयमेनाराद्धां संसिद्धां स्पष्टं ॥४८॥ रत्नानि फणास्थितानि स्त्रीरत्नानि च उत्तमाः स्त्रियः आसां स्त्रीणां दत्त आनंदो येन तत्संबोधनं पदांतरे ॥ अस्माकं दत्तानंदायेति ॥४९॥ नृसिंहेनावलेपकितः संतोष्टुमिव्द्धो नलयो मनवः प्राहुः ॥ मनवो वयं धर्मपालकाः परिभूताः सेतवो वर्णाश्रमधर्ममर्यादा येषां ते प्रभुः आधिप्रत्याशीर्ह्यय ॥५०॥

२२

वीभत्समिवांगं चकार ॥ तस्येति ॥ पुरीषसुरभिना गंधेन सौगंध्यं यस्य स वायुः ॥ एवं गवादिचर्यं ।
धापानादि करोति स्म ॥ तदेवाह व्रजन्नित्यादि ॥ काकमृगगवामिवान्यदपि चरितमीहितं यस्य ॥ ना
नायोगचर्याणामाचरणं नितरां यस्य ॥ लोकपालानप्यविहाय योगिभिरेव वर्तितव्यमिति निदर्शना
य ॥ तथाह्यनन्दवान् ॥ केवलस्त्वं भगवान् ॥ यतः अविरतः परममहानन्दानुभवस्तत्र यातत्र गणात्वेनाको

तस्य ह यः पुरीषसुरभिसौगंध्यवायुस्तं देशं दशयोजनं समंतात्सु
रभिं चकार ॥ एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः
काकमृगगोचरितः पिबति खादत्यवमेहति स्म ॥ ३४ ॥ इति नाना
योगचर्याचरणो भगवान् ॥ कैवल्यपतिः ऋषभोऽविरतपरम
महानंदानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति
वासुदेवे आत्मनोऽव्यवधानानंतरोदरभावेन सिद्धसमस्ता
र्थपरिपूर्णो योगैश्वर्याणि वैहायसमनोजवांतर्धानपरका
यप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नांजसा नृप हृदयेना
भ्यनंदत ॥ ३५ ॥ इति श्रीभागवते पंचमे पंचमः ॥ ५ ॥ ॥

यथानंदत्तदंभवस्वरूपः ॥ वासुदेवे आत्मनोऽव्यवधानेनाभेदेन न विद्यते अस्मेषामिव
अंतरामध्ये उदरस्य देहोपाधेर्भावो लनं तन्निमित्तं हेतोपाधित्वेनेत्यर्थः । तत एव सिद्धैः सम
स्तैरर्थैः फलैः परिपूर्णत्वाद्योगैश्वर्याणि नाभ्यनंदत ॥ वैहायसं खेचरत्वं मनोजवं मनस
इव वेगः ॥ दूरग्रहणं दूरदर्शनादेहेतुरूप ॥ हृदयेन मनसा ॥ ३५ ॥ इति श्रीभागवते भावा
र्थदीपिकायां पंचमे पंचमः ॥ ५ ॥ ॥

सवृत्तदाग्रहगृहीतइवादृश्यत॥ तत्र देवं यत्कृष्णरतौः वलंवमानाम्बुतेकुटिलाग्रकपिशाग्रकेशाः
तेषांभूरिभारोयस्यसः अवधूतमलिनमतएवमलिनंनिजशरीरंतेनकथंभूतोऽयंरवमदृश्यत
प्रतिसुकुमाराणिकरचरणोरः स्थलानिनिम्नाविपुलाबाहूदयः तएवावयवास्तेषांविशिष्टोन्यासः
सविवेशोयस्यसः तथाप्रकृत्यैवसुंदरः स्वभावसिद्धोहासःतेनशोभनंमुखंयस्य॥ तथानवनलि
नदलवदाचरतीचेतिशिशिरताराणामरुणेआयतेनयनेताभ्यांरुचिरः तथासह
शाग्रन्नानाधिकाः सुभगाःकपोलकर्णकंठनासिकायस्य॥ तथाविगूढस्मितेनयद्वदनंतत्समभा

प्रतिसुकुमारकरचरणोरःस्थलविपुलबाहुंसगलवदनाद्यवयवविन्यासः॥ प्रकृतिस
हरः स्वभावहाससुमुखोनवनलिनदलायमानशिशिरतारारुणायतनयनरुचिरः॥ स
दृशसुभगकपोलकर्णकंठनासोविगूढस्मितवदनमहोत्सवेनपुरवनितानांमनसि
कुसुमशरासनमुपदधानः॥ परागवलंबमानकुटिलजटिलकपिशकेशभूरिभारो
ऽवधूतमलिननिजशरीरेणग्रहगृहीतइवादृश्यत॥ यर्हिवावसभगवांल्लोकमिमंयो
गस्याद्धाप्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्मबीभत्सितमितिव्रतमाजगरमास्थितः
शयानएवाश्नातिपिबतिखादत्यवमेहतिहदतिस्मचेष्टमानउच्चरितआदिग्धोद्देशः॥
होत्सवेनविभ्रमेणपुरांगनानांमनसिकामसुदीपयन्॥ एवंभूतोपितथादृश्यतेसन्नन्वयं य
र्हियदालोकंजनेयोगस्यप्रतिपक्षमाचक्षाणः एषपश्यन्बभव॥ तस्यप्रतिक्रियाकरणंचनिंदि
तमित्याचक्षाणस्तदाआजगरव्रतमास्थितःसन्॥ शयानएवाश्नातिस्मइत्यन्वयः आमंगवा
ब्रुतेनाभैकजैवस्थिवामारउकमोमभोगः अवमेहतिस्मययति॥ हदतिपुरीषमुत्सृजतिउच्च
रितेपुरीषेचेष्टमानोविलुठन॥ तेनैवादिग्धाआलिप्ताउद्देशादेहप्रदेशायस्यसः॥ ॥

५२

भा० पं० ८

अभिभाष्यमाणोपिजनानांमध्येजडादिवद्दूर्तेमानसस्तूष्णींबभूव॥ एवंयत्नसेवैवेषोयस्य॥ तत्रतत्रपु
रादिषुअनुपथंमार्गेमार्गेअवनिचरापसदैर्दुर्जनैः तर्जनताडनादिभिः परिभूयमानोपितदविगणयन्नेवै
कचरएकाकीपृथिवींपरिबभ्रामेत्यन्वयः॥ तत्रपुरंपत्तनं॥ ग्रामाःसद्वृताः आकराःखनिः खेटकाःकृ
षीवलग्रामाः॥ वाटःपुष्पादिवाटिका॥ शिबिरंसेनायावासस्थानं व्रजोगवांस्थानं॥ घोषोगोपाना
मुकं॥ एवमत्रशास्त्रमज्ञानाल्लयमनुशिष्टानपिलोकाननुशासनार्थंमहाननुभावःपरमसु
हृत्॥ भगवानृषभापदेशउपशमशीलानामुपरतकर्मणांमहामुनीनां॥ भक्तिज्ञानवै
राग्यलक्षणंपारमहंस्यधर्ममुपशिक्षमाणःस्वतनयशतज्येष्ठंपरमभागवतं
भगवज्जनपरायणंभरतंधरणिपालनायाभिषिच्यस्वयंभवनएवोर्वरितशरीरमात्र
परिग्रहउन्मत्तइवगगनपरिधानःप्रकीर्णकेशआत्मन्यारोपिताहवनीयोब्रह्मावर्ता
त्प्रवव्राज॥ जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषोभिभाष्यमाणोपिजनानां
गृहीतमौनव्रतस्तूष्णींबभूव॥ तत्रतत्रपुरग्रामाकरखेटवाटखर्वटशिबिरव्रजघोषसार्थ
गिरिवनाश्रमादिष्वनुपथमवनिचरापसदैःपरिभूयमानोमक्षिकाभिरिववनगजस्त
र्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवा
सत्संस्थानएतस्मिन्देहोपलक्षणेसदपदेशउभयानुभवस्वरूपेणस्वमहिमावस्थानेना

सार्थोयात्रिकजनसंघातः॥ आश्रमास्तपस्विनां॥ तर्जनंभयजननं॥ ताडनंप्रहारः मेहनं॥ अवपि
मूत्रणं॥ ष्ठीवनंमुखश्लेष्मप्रक्षेपः ग्रावणांपाषाणानांशकृतोरजसश्चप्रक्षेपः पूतिवातोधोवायुः दुरुक्तं
पापः एतैः अविगणनेहेतुःमदिकाभिरिवेतितद्वदेवहेतुः असतिमिथ्याभूतेसंस्थानेसन्निवे
शेदेहइत्युपलक्षणमाकारोयस्य॥ सदिवसपदेशोमात्रयस्यतस्मिन्॥ निरभिमानत्वात्केनहे

एकचरः परिबभ्राम॥३०॥

समारोपिताहंममाभिमानत्वादविखण्डितमनाः पृथ्वी

श्रीशुकः

उभयोः सदसतोरनुभवः ... स्वमहिमावस्थानेन ... परिबभ्राम

९

मे तनूर्वेदाख्या येन ब्राह्मणेन इह लोके धृता यत्र च ब्राह्मणे शमादयोष्टौ गुणाः संति ॥ ननु प
रे किं पश्यामीत्यनयः निस्पृहत्वमाह ॥ २४ ॥ मत्तोपि येषां न किंचिन्नाथनीयमस्ति तेषामितरेण
राज्यादिना किं स्यान्न किमपि ॥ २५ ॥ तदेवं ब्राह्मणसम्मानं विधायेदानीं सर्वभूतसम्मानं विधत्ते
हे सुताः सर्वाणि जंगमानि स्थावराणि च भूतानि मद्धिष्ठानतया ॥ वो युष्माभिः सम्माननी
यानि ॥ पदे पदे सततं विविक्तदृशां रागादिरहितदृष्टिर्येषां तैः तदेव मदर्हणं ॥ २६ ॥ स

धृता तनूरुशती मे पुराणी येनेह सत्वं परमं पवित्रं ॥
शमो दमः सत्यमनुग्रहश्च तपस्तितिक्षानुभवश्च यत्र ॥ २४ ॥
मत्तोप्यनन्तात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किंचित् ॥
येषां किमु स्यादितरेण तेषामकिंचनानां मयि भक्तिभाजां ॥ २५ ॥
सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ध्रुवाणि
संभावितव्यानि पदे पदे वो विविक्तदृग्भिस्तदु हार्हणं मे ॥ २६ ॥
मनोवचोदृक्करणेहितस्य साक्षात्कृतं मे परिबर्हणं हि ॥ वि
ना पुमान्येन महाविमोहात्कृतान्तपाशान्न विमोक्तुमीशेत ॥ २७ ॥

वे कर्मणामीश्वरार्पणं विधत्ते ॥ मनोवचोदृशां मम चेष्टा चक्षुरादीनां करणानामीहितस्य व्यापारस्य मे प
रिबर्हणं ॥ आराधनमेव साक्षात्कृतं मे वफलं येन परिबर्हणेन विना कालपाशाद्विमोक्तुं न
ईशो न समर्थो भवेत् ॥ २७ ॥ स्वतनया एव संशिक्षितानपि लोकानुशासनार्थमनुशास्य सुहृदो नो पार
महंस्यधर्ममुपशिक्षयिष्यन् ॥ भरतमभिषिच्य ऋषभदेवोपदेशो नाम ऋषभस्य भगवान् भवन
एवोन्मत्तदेशात्मवज्ञाने सप्रपंचः ऊर्वरितो वसितः शरीरमात्रपरिग्रहो यस्य ॥ २८ ॥॥॥

हेतुमविद्यायेत्युक्तं तत्र पंचविंशति साधनान्याह । तत्रभिः हंसे मयि गुरौ भक्तिः सेवानुवृत्तिस्तत्परे
ता ॥ विगततृष्णया सर्वत्र लोके जंतोर्व्यसनावगत्या दुःखानुसंधानेन ॥ ईहानिवृत्त्या कर्मत्यागेन
मदर्थैः कर्मभिः अहमेव देवो येषां तैः संगात् ॥ हेतुनाः देहगेहयोरात्मबुद्धेः अहं ममेति बुद्धेः ॥११॥
अध्यात्मयोगेन अध्यात्मशास्त्राभ्यासेन ॥ सध्र्यक् सम्यक् ॥ असंप्रमादेन कर्तव्यस्यापरित्यागेन ॥१२

हंसे गुरौ मयि भक्त्यानुवृत्त्या वितृष्णया द्वंद्वतितिक्षया च ॥ सर्वत्र जं
तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥१०॥ मत्कर्मभिर्म
त्कथया च नित्यं मद्देवसंगाद्गुणकीर्तनान्मे ॥ निर्वैरसाम्योपशमेन
पुत्रा जिहासया देहगेहात्मबुद्धेः ॥११॥ अध्यात्मयोगेन विविक्तसे
वया प्राणेंद्रियात्माभिजयेन सध्र्यक् ॥ सच्छ्रद्धया ब्रह्मचर्येण शश्व
दसंप्रमादेन यमेन वाचां ॥१२॥ सर्वत्र मद्भावविचक्षणेन ज्ञानेन
विज्ञानविराजितेन ॥ योगेन धृत्युद्यमसत्त्वयुक्तो लिंगं व्यपोहेत्कु
शलोऽहमाख्यम् ॥१३॥ कर्माशयं हृदयग्रंथिबंधमविद्ययासादितम
प्रमत्तः ॥ अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात् ॥१४

सर्वत्र मद्भावमानचविचक्षणेन निपुणेन विज्ञानविराजितेन अनुभवपर्यंतेन ज्ञानेन योगेन
समाधिना ॥ धृत्युद्यमसत्त्वयुक्तः धैर्यप्रयत्नविवेकैर्युक्तः सन् अहंकाराख्यमुपाधिं व्यपोहेत्त्य
जेत् ॥१३॥ ततः साधनादुपरमेदित्याह ॥ कर्म्मांशयया शोषयन्नेवोपरमेत् ॥ योगेनानुष्ठानेन ॥ यद्यपि फले
सिद्धे साधनोपरमः सिद्ध एव तथापि यावद्देहपातं न तदभ्यासस्यानाचरणायोगः ॥१४॥

ऽत्मगुणसंहरति॥ एवं सर्वं कृतं कर्म कर्तृभूतेन मनः कर्ममतं वशं प्रयुंक्ते पुनः कर्म निर्हं करोति॥ जीव
स्यात्मकर्मव्याहत्यर्थमाह॥ अविद्ययेति॥ अविद्यया आत्मन्युपधीयमाने आच्छाद्यमाने सति॥ एवं म
नात्मकर्मव्याहत्यर्थमाह॥ यदा गुणानां
नः कर्मपुरुषं कर्मवशं प्रयुंक्ते इति वा न केवलं देहयोगमात्र॥ अनर्थान्तरं चेत्याह॥ यदा गुणानां
मिथ्या ग्राणं ईहां चेष्टां॥ अयथा मिथ्या आत्मीयात्वेन भवतीति॥ विपश्चिद्विवेकी सन् न पश्यति॥ न
पश्यतीति यावत्॥ अयथा आत्मीयत्वेनेत्यर्थः॥ तत्र तदा सहसा गतस्मृतिः स्वदुःखस्मृतिशून्यः स
न्॥ अज्ञो मूढः मैथुनसत्वप्रधानं गृहं प्राप्य तापान्विंदति॥ ॥ तत्र प्रथमयोगं स्त्रिया मिथुनी

एवं मनः कर्मवशं प्रयुंक्ते अविद्ययात्मन्युपधीयमाने॥ प्रीतिर्न यावन्मयि वासुदेवे न मुच्य
ते देहयोगेन तावत्॥ ६॥ यदा न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित्॥ ग
तस्मृतिर्विंदति तत्र तापानासाद्य मैथुन्यमगारमज्ञः॥ ७॥ पुंसः स्त्रिया मिथुनीभावमेतं तयो
र्मिथो हृदयग्रंथिमाहुः॥ अतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहं ममेति॥ ८॥ यदा
मनोहृदयग्रंथिरस्य कर्मानुबद्धो दृढ आश्लथेत॥ तदा जनः संपरिवर्ततेऽस्मान्मुक्तः पर
(याम्यतिहाय हेतुं॥ ९॥

भावमाहुरेवमात्मतु भवतः कृतस्तापाः स्युः तत्राह॥ पुंस इति॥ प्रत्येकं
तयोरेकैको हृदयग्रंथिरस्त्येव पुनः मिथः स्थूलमन्यं हृदययोर्ग्रंथिं दृष्टं वदंति कृतत्वमनस्या
ह॥ अतः प्रत्याक्षिप्तमिथुनीभावात्मनोऽनेके हृदयग्रंथिनादेहेंद्रियसा हं ममेति मोहः॥ अस्या ग्रंथेः
हानिस्तिर्विधेयमत्र तेन सहाऽमोहो भवेदित्यर्थः॥ ८॥ कदाऽनस्मतर्हिं निहृतिरत्राह॥ यदा सनना
त्मकर्मभिरत्वद्वृढो हठो मनोरूपो हृदयग्रंथिः शिथिलो भवेत्तदास्मान्मिथुनीभावात्रिवर्तते तेन न
स्य हेतुमहंकारं त्यक्त्वा मुक्तः सन्॥ परं पदं याति॥ ९॥ ॥

श्री॰ भा॰ स॰ टी॰ १९

अनुवशानत्वकृत्वा तं मा धूत ॥ अपगतरोषान ॥ गुरुः पितेव देवता येषां ॥ तान् द्विषाणं न कुर्वतीति किमु वक्तव्यमि
त्यर्थः ॥ पुत्रायपुत्रस्तुहि यस्य पितृद्वेषः ॥ ताहृतो द्वेषः पुत्रस्य मरणार्थं प्रयोजितः प्रवर्त्तित इति यत ॥ पंकोत्तरहले
विधमत्रपाकृत ॥ यद्वा यस्मात्तु जायये द्वेषः ॥ स पितुर्मरणाय प्रयोजितः ॥ अतएव तंकोत्तरहले विधमत्यर्थः
ष ॥ इति श्रीसप्तमे चतुर्थः ॥ ४ ॥ पंचमे गुरुतोधीतं त्यक्ताविल्लतमो रते ॥ यातयन्हि मसपीपे: सुतं दैत्यो
तवाघाकन ॥ ॥ भगवद्भक्तिरेव विद्यैष कारणमिति वर्ण्यमाह ॥ पौरोहित्यायेत्यादिना ॥ काव्यः शुक्रः।

किमुतांत्वत्वशान्तांधूर्त्यान्हरस्यानुरुदेवताम ॥ एतत्कोत्तरहले वसप्ततस्याके विधमश्लो ॥ ४६ ॥ पितरुपु
गायय द्वेषामरणाय प्रयोजितः ॥ ४७ ॥ इति श्रीभागवते सप्तमे चतुर्थोऽध्यायः ॥ ४ ॥ नारद उ० ॥ पौरोहित्या
य भगवान्वृतः काव्यः किलासुरैः ॥ षण्डामर्कौ सुतौ तस्य दैत्यराजगृहान्तिके ॥ १ ॥ तौ राज्ञा प्रापितं बा
लं प्रह्लादं नयकोविदं ॥ पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् ॥ २ ॥ यत्तत्र गुरुणा प्रोक्तं शु
श्रुवेनुपपाठ च ॥ न साधु मनसा मेने स्वपरासद्ग्रहाश्रयं ॥ ३ ॥ एकदासुरराट् पुत्रमंकमारोप्य पांडव
पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ॥ ४ ॥ प्रह्लाद उ० ॥ तत्साधु मन्येसुरवर्य देहिनां सदा समुद्वि
ग्नधियामसद्ग्रहात् ॥ हित्वात्मपातं गृहमन्धकूपं वनं गतो यद्धरिमाश्रयेत ॥ ५ ॥

ताविति शेषः ॥ १ ॥ पाठ्यान्दंडनीत्यादीन् ॥ पाठ्यानन्सुरबालकानिति वान्वयः ॥ २ ॥ यत्तत्र सतोनत्वत्वस
पाठ च किंतु न साधु न मेने ॥ तत्र हेतुः स्वपर इत्यसद्ग्रहो मिथ्याभिनिवेश एवाश्रयो यस्य तत् ॥ ३ ॥ हे असुरवर्य
असद्ग्रहात् अहं ममेति मिथ्याभिनिवेशाद्धेतोः समुद्विग्ना धीर्येषां तेषां देहिनां वनं गतः सन् हरिमाश्रयेतेति य
त् देवाद्रं साधु मन्ये कथंभूतं गृहं हित्वात्मनः पातं अधः पातनिमित्तं कृतं अन्धकूपवत् महामोहावहं ॥ ५ ॥

५१

१९

रुदति रोदिति वैकुंठस्य चिंतया शबला व्यामिश्रा व्याकुलिता चेतना यस्य | तस्य चिंतया आह्लादो यस्य || ३९ || शब्दमु
त्कंठः उत्कंठः सन् अनुचकार तद्वेष्टादिकं स्वयं कृतवान् || ४० || संस्पर्शस्तत्कृतावापसिः तेन निर्वृतः अ
स्पंदः स्थिरो यः || प्रणयः || तेन यः आनंदः तेन यत्सलिलं तेन पूर्णे आमीलिते ईषन्मीलिते ईक्षणे यस्य ४१

क्वचिद्रुदति वैकुंठचिंताशबलचेतनः || क्वचिद्धसति तच्चिंताह्लाद उद्गायति क्वचित् | नदति
क्वचिदुत्कंठो विलज्जो नृत्यति क्वचित् | क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह || ४२ || क्वचि
दुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः || अस्पंदप्रणयानंदसलिलामीलितेक्षणः || ४३ || स
उत्तमश्लोकपदारविंदयोर्निषेवयाकिंचनसंगलब्धया | तन्वन्परां निर्वृतिमात्मनो मुहुर्दुः
संगदीनस्य मनः शमं व्यधात् || ४४ || तस्मिन्महाभागवते महाभागे महात्मनि || हिरण्य
कशिपू राजन्नकरोदघमात्मजे || ४५ || युधिष्ठिर उवाच || देवर्ष एतदिच्छामो वेदितुं तव
सुव्रत || यदात्मजाय शुद्धाय पितादात्साधवे ह्यघम् || ४६ || पुत्रान्विप्रतिकूलान्स्वान्पितरः
पुत्रवत्सलाः || उपालभंते शिक्षार्थं नैवाघमपरो यथा || ४७ || ||

आत्मनः परां निर्वृतिं तन्वन् | दुःसंगेन दीनस्य सान्यस्यापि मनः शमं शांतिं व्यधात् || ४४ || अघं द्रोहमकरो
त् || ४५ || अत्र यथा अध्यायांते एष्टसेवा दृश्यमतिविस्मयेन तु ततः पृच्छति देवर्ष इति | तव वचनतत्त्ववाक्यश्रुति
वा | साधवे अघं च मथात् | साधोर्द्रोहं कृतवानिति यत् एतद्वेदितुं || ४६ || उपालभंते आक्षिपंति अघं च
नैव कुर्वंति अपरः शत्रुरिव || ४७ || ||

श्री॰
भा॰स॰
७

भेदस्यासत्त्वं दर्शयन्नाह॥ स एष आत्मैव स्वः परश्चेति अविवेकिभिर्निरूप्यते॥ युक्तं चैतत्॥ यतो यस्य वर्त्मनि
नितां मायायां ब्रह्मादयोऽपि मुह्यन्ति॥ तत्र हेतुः॥ दुरत्ययं दुर्बोधमनुक्रमणं श्रुतिचरितं मतं वर्णितं वा यस्य सः॥१३॥ त
र्हि निर्विकारस्य कथं मतिभेदकत्वं तत्राह॥ यथा॥ भ्रमये लोहं॥ आकर्षस्यायस्कान्तस्य समीपे स्वयमेव भ्रमति
चेतस्तु चक्रपाणेः सन्निधिरेव कुतो जातं तत्राह॥ यदृच्छयेति कस्यचित्साधनादेः फलमेतदिति न ज्ञायत इ
त्यर्थः॥१४॥ राजसेवक उवाचेति शेषः॥१५॥ वेत्रं कशां उपायानां मध्ये चतुर्थः दमो दण्डः॥ अस्य दुर्बुद्धेः उदि

स एष आत्मा स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते॥ मुह्यन्ति यद्वर्त्मनि वेदवादिनो
ब्रह्मादयो ह्येष भिनत्ति मे मतिं॥१३॥ यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ॥ तथा मे भि
द्यते चेतश्चक्रपाणेर्यदृच्छया॥१४॥ एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः॥ तं सन्निर्भर्त्स्य
कुपितः सुदीनो राजसेवकः॥१५॥ आनीयतामरे वेत्रमस्माकमयशस्करः॥ कुलाङ्गार
स्य दुर्बुद्धेश्चतुर्थोऽस्योदितो दमः॥१६॥ दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः॥ यन्मूलोन्मू
लपरशोर्विष्णोर्नालायितोऽर्भकः॥१७॥ ॥

तः उक्तः शास्त्रेषु दुर्बुद्धित्वे हेतुः॥ कुलस्याङ्गारवन्नाशहेतोः॥१६॥ तदेवाह॥ दैतेया एव चन्दनद्रुमा
स्तेषां वने अयं कण्टकद्रुमः तत्र ल्याग्ना न सन्देवाह॥ यस्य वनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोः अ
यमर्भक एव नालायितः॥ नालमिवाचरत्॥ यथा परशोः छेदकत्वे बदराङ्कुरादि मतिरिक्तो दण्डः सहका
री तद्विनाच्छेदनासंभवात्॥ तथायं विष्णोर्दैत्यमूलच्छेदे हेतुर्जात इत्यर्थः॥१७॥ ॥

७

परपक्षेविष्णौसमाहिताः परितोनिष्ठिताः ॥ जहासमेवाह बुद्धिरिति ॥८॥ विष्णुपक्षैर्भार्गवैर्नैर्देवमतैः ॥ ननु मंकृ-
हकृतस्तेषांप्रवेशः सत्यंतथापिप्रतिछन्नैः ॥ वेषांतरेणाछन्नैः ॥९॥ दैत्यैर्गृहमानीतं ॥१०॥ बालान्सर्वान् ॥ अ-
ति अतिक्रम्यतुभ्यंतव ॥११॥ अहोमायामोहिताभवंतोमामाक्षिपंतीत्याशयेनतावदाह परः स्वश्चेति ॥१

नारद उ० ॥ श्रुत्वापुत्रगिरोदैत्यः परपक्षसमाहिताः ॥ जहासबुद्धिर्बालानांभिद्यतेपरबुद्धि-
भिः ॥८॥ सम्यग्विधार्यतांबालोगुरुगेहेद्विजातिभिः ॥ विष्णुपक्षैः प्रतिछन्नैर्नभिद्येतास्यधी-
र्यथा ॥९॥ गृहमानीतमाहूयप्रह्लादंदैत्ययाजकाः ॥ प्रशस्यश्लक्ष्णयावाचासमपृच्छंतसा-
मभिः ॥१०॥ वत्सप्रह्लादभद्रंतेसत्यंकथयमामृषा ॥ बालानतिकुतस्तुभ्यमेषबुद्धिविपर्य-
यः ॥११॥ बुद्धिभेदः परकृतउताहोतेस्वतोभवत् ॥ भण्यतांश्रोतुकामानांगुरूणांकुलनंदन
१२ ॥ प्रह्लाद उ० ॥ परः स्वश्चेत्यसद्ग्राहः पुंसांयन्मायया कृतः ॥ विमोहितधियांदृष्टस्तस्मै
भगवतेनमः १३ सयदानुव्रतः पुंसांपशुबुद्धिर्विभिद्यते ॥ अन्यएषतथान्योहमितिभे-
दगतासती ॥१४॥

मिथ्याभिनिवेशोयदीययामायये वकृतः तत्तुवास्तवः ॥ अतएवतयाविमोहित-
धियांभवतामेवदृष्टः ॥ नतुममतस्मै अचिंत्यमायेश्वरायनमः ॥१३॥ अहोकिमेतत्त्वयास्तिनबु-
द्धिभेदोयतोजातस्तत्कथयेत्याक्षिपः सत्य ॥ तत्प्रसादादेवेत्येतदमाह ॥ त्रिभिः सभगवान्यदाअनुव्रतः
प्रवकूलोभवति ॥ तदापशूनामिवबुद्धिः भेदगताअसतीमिथ्याविषया ॥ विभिद्यतेअभिन्नात्मनिष्ठा

भा०
स०
९

मित्रत्वेनतवजनैर्मातस्यापितवविरोधाधरणेनासंभावितमित्याह॥ संनिहितेति॥ इष्टं मैत्रं मित्रत्वं येषां ते रोगा इति
ब्रह्मसद्भावेनयत्रोगीस्यात्त्वरायः शृणावदंतकः॥ स्वाणिद्वारीतक्रुनखीडक्षर्मीशुहनेल्पागाइत्यादिस्मृतेः॥ प्र
तक्लिंतरोगायप्रोदेति॥ तथ्यातेषामवंविहेषादिकउदेतीत्यर्थः॥२७॥ मत्प्रणीतमयापाहितेनोसम्भ्रं।
कृतक्रुत्सितंदोषमासम्प्रदाः॥ अश्रगामन्नार्थः मयिहेषारोपमाक्रुयाइमर्थः॥ इंद्रप्रमोइभिनर्हिब्रास्र।

॥ संतिप्समाथवोलोकेइमैत्रप्लमवेषिणः॥ तेषामुदेस्यचेकालेरोगःपातकि
नामिव॥२७॥ गुरुसुतउ॥ नमत्प्रणीतंतपरप्रणीतं स्वतोवदन्यपतवेदशा
तैसर्गिकीयंमतिरस्यराजन्नियक्छमस्तुकुदंदाः स्वमानः॥२८॥ नारदउ॥ गु
हगोवप्रतिमोकामःयश्राहप्रासरःस्वत॥ तचेद्रुहस्तुखीयेनक्रुतोभद्रासतीम
तिः॥२९॥ प्रल्हादउ॥ मतिर्नकृष्णेपरतः स्वतोवामिथोभिपद्येतगृहव्रतानां
अदांतगोभिर्विशतांतमिस्रंपुनः पुनश्चर्वितचर्वणानां॥३०॥ ॥

रोपुनवकोपउचितः इतिभावः॥२८॥ गुरुसुतौगुरुवाक्यजनिता॥ हे ब्रमद्र॥२९॥ आस्तामियंवार्ता भवाह।
शानांविषयासक्तानामत्यंतधिकारादित्याशयेतादृमतिरिति॥ परतोगुरोः॥ स्वतोवामिथोवान्योन्यतःनाभि
पद्येतकेषांगृहएवव्रतंसंकल्पइतिक्रुत्यवितायेषां॥ अतएव अदांतैरदमतैर्गोभिरिंद्रियैर्देहस्थैः॥ त
मिस्रंसंसारविशतांतत्रचचर्वितस्येवचर्वणंयेषाम्॥३०॥ ॥

इति तं प्रह्रादं भीषयन् धर्मार्थकामवर्गस्य प्रतिपादकं शास्त्रम् अध्यापयामास ॥१९॥ ज्ञातं ज्ञेयम् उपायचतुष्टयं
येन तं ज्ञात्वा दैत्येंद्रं प्रति मात्रा मृष्टं ॥ उद्वर्त्तितस्नापितं ॥२०॥ पादसेवनं परिचर्या अर्चनं पूजा दास्यं कर्मार्पणं सख्यं
तद्विश्वासादि ॥ आत्मनिवेदनं देहसमर्पणं यथा विक्रीतस्य गवाश्वादेर्भरणपाल॥ नादिचिंता न क्रियते

इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः ॥ प्रह्रादं ग्राहयामास त्रिवर्गस्योपपादनं ॥१९॥ तत एनं गुरु
ज्ञात्वा ज्ञातज्ञेयचतुष्टयं ॥ दैत्येंद्रं दर्शयामास मातृमृष्टमलंकृतम् ॥२०॥ पादयोः पतितं बालं प्रति
नंद्याशिषासुरः ॥ परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिं ॥२१॥ आरोप्यांकमवघ्राय मूर्धन्यश्रुकला
म्बुभिः ॥ आसिंचन्विकसद्वक्त्रमिदमाह युधिष्ठिर ॥२२॥ हिरण्यकशिपुरुवाच ॥ प्रह्रादानूच्यतां तात स्व
धीतं किंचिदुत्तमं ॥ कालेनैतावतायुष्मन्यदशिक्षद्गुरोर्भवान् ॥२२॥ प्रह्राद उवाच ॥ श्रवणं कीर्तनं
विष्णोः स्मरणं पादसेवनं ॥ अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं ॥२३॥ इति पुंसार्पिता विष्णौ भक्तिश्चे
न्नवलक्षणा ॥ क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमं ॥२४॥ निशम्यैतत्सुतवचो हिरण्यकशिपुस्तदा
गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः ॥२५॥ ब्रह्मबंधो किमेतत्ते विपक्षं श्रयतासता ॥ असारं ग्राहि
तो बालो मामनादृत्य दुर्मते ॥२६॥ ॥

तथा देहं तस्मै समर्प्य तच्चिंतावर्जनमित्यर्थः ॥२३॥ इति विलक्षणा नियमस्याः ॥ सा अधीतेन चेद्भगवति विष्णौ
भक्तिः क्रियेत ॥ सा च अर्पितैव सती यदि क्रियेत ॥ न तु कृता सती ॥ पश्चादर्प्येत तदुत्तममधीतं मन्ये ॥ न तु स्वा
द्गुरोरधीतं शिक्षितं वा तथाविधं किंचिदस्तीति भावः ॥२४॥

भा
सटी
५९

अमर्षेण महता तेन सहितया रुषा आविष्टो ऽमर्षः ॥ कषायीभूते आताम्रे लोचने यस्य ॥ हे नैर्ऋताः ॥ ३३ ॥ वध्यत्वे हेतुः यतोयं मे भ्रातृहा कुलघ्नः यो विष्णोः पादाव र्चति ॥ नमस्तत्पातीत्यर्थः ॥ अतः सप दीयमित्यन्वयः ॥ ३४ ॥ अहो विष्णोरप्यविश्वसनीयं किमसौ कृतवानित्यत आह ॥ विष्णोर्वेति अहा न ॥ जहौ ॥ ३५ ॥ ननु तवायमपत्यं कथं वध्यस्तत्राह परोप्यात्मीयवद्धितकृच्चेत्संग्राह्यस्तद्वत्

आहामर्षरुषाविष्टः कषायीभूतलोचनः ॥ वध्यतामाश्वयं वध्यो निःसारयत नैर्ऋताः ॥ ३३ ॥ अयं मे भ्रातृहा सोयं हित्वा स्वान्सुहृदोधमः ॥ पितृव्यहंतुः पादौ विष्णोर्दासवदर्चति ॥ ३४ ॥ विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमंजसः ॥ सौहृदं दुस्त्यजं पित्रोरहाद्यः पंचहायनः ॥ ३५ ॥ परोप्यपत्यं हितकृद्यथौषधं स्वदेहजोप्यामयवत्सुतोहितः ॥ छिंद्यात्तदंगं यदुतात्मनोहितं शेषं सुखं जीवति यद्विवर्जनात् ॥ ३६ ॥ सर्वैरुपायैर्हंतव्यः संभोजशयनासनैः सुहृल्लिंगधरः शत्रुर्मुनेर्दुष्टमिवेंद्रियम् ॥ ३७ ॥ नैर्ऋतास्ते समादिष्टा भर्त्रा वै शूलपाणयः तिग्मदंष्ट्राः करालास्यास्ताम्रश्मश्रुशिरोरुहाः ॥ नदंतो भैरवं नादं छिंधि भिंधीति वादिनः आसीनं चाहनन् शूलैः प्रह्रादं सर्वमर्मसु ॥ ४० ॥

तेषु मतः स्वदेहजोपि अहितश्चेत् ॥ आमयवत्त्याज्यः ॥ समतायां दृष्टांतमाह ॥ अंगमपि यत्करचर णादि तदप्यात्मनोहितं चेत् ॥ छिंद्यादेवेत्यर्थः ॥ ३६ ॥ अतः सर्वैरुपायैर्हंतव्यः संभोजो भोजनं भोजनादि शुचिषादिभ्योपि त्रिभिर्योगैरित्यर्थः ॥ यथा दुष्टमिंद्रियं मुनेः शत्रुः ॥ ३७ ॥ तिग्मास्तीक्ष्णा दं ष्ट्रा येषां करालान्यास्यानि येषां ते च ते च ताम्राणि श्मश्रूणि शिरोरुहाश्च येषां ते ॥ ४० ॥

ननु श्रीकृष्णस्य परमानंदरूपत्वात् ॥ तेपि तन्निष्ठा एव किं न सुखं न दत्ता नादृत्या इत्याह ॥ नेति ॥ ये दु
राशयाः विषयवासितांतःकरणाः ते हि विष्णुं न विदुः ॥ तत्र हेतुः स्वस्मिन्नेवार्थः पुरुषार्थो ये
षां तेषां गतिं गम्यं ॥ ननु ते पि गुरूपदेशादि सत्त्वात् स्यादिति ॥ नेत्याह ॥ बहिर्विषये एवार्थो येषां ते बहिर
र्थाः ॥ ताने व गुरुत्वेन मत्वेश्वरीलयेषां ते ॥ अतः अंधैरुपनीयमानाः अंधा यथा तेन न विदुः किं तु
गर्ते पतंति ॥ तथा ते पि ईशस्य तंत्र्यां दीर्घरज्वां वेदलक्षणायां ॥ उरूणि दामानि ब्राह्मणादि नामा
नि यस्यां तस्यां ॥ काम्यैः कर्मभिः बद्धा एव भवंतीत्यर्थः ॥ तर्हि के विषयाविष्टा अविष्टचित्ता नाविष्णा
वेदाः स्वहस्तं ॥ वारुणिदिगागतं वस्तु व्रजनं दृष्ट्वा किं मामत्र यादिति ॥ ३१ ॥ ननु च ॥ एको देवः सर्वभू

न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः ॥ अंधा यथांधैरुपनीयमाना
नावाचीशतंत्र्यामुरुदाम्नि बद्धाः ॥ ३१ ॥ नैषां मतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्थापगमो
यदर्थः ॥ महीयसां पादरजोभिषेकं निष्किंचनानां न वृणीत यावत् ॥ ३२ ॥ इत्युक्तोपरते
पुत्रे हिरण्यकशिपू रुषा ॥ अंधीकृतात्मा स्वोत्संगान्निरस्यत महीतले ॥ ३३ ॥ ॥

तेनुगूढः सर्वव्यापी सर्वभूतांतरात्मेत्यादि श्रुतिमति पादितं विसंकथं न विदुः कृतो वा तेषां
तन्निष्ठप्रवेशस्तत्राह ॥ नैषामिति ॥ निष्किंचनानां निरस्तविषयाभिमानानां महतां पादरजं
साभिषेकं यावन्न वृणीत ॥ तावत् ॥ श्रुतिवाक्यतो ज्ञानमपि ॥ एषां मतिरुरुक्रमस्यांघ्रिं न स्पृ
शति न प्राप्नोति ॥ असंभावनादिभिर्विहन्यत इत्यर्थः ॥ अनर्थस्य संसारस्यापगमो यदर्थः य
स्यांघ्रिस्पर्शिन्या मतेरर्थः प्रयोजनं ॥ महदनुग्रहाभावात् ॥ न तत्तन्निष्ठयो नापि मोक्षः ते
षामित्यर्थः ॥ ३२ ॥ निरस्यत ॥ निरासयत् ॥ चिक्षेप ॥ ३३ ॥

भा॰
भी॰
४

अप्रमेयः अप्रमितो ऽनुभावो यस्य ॥ न क्षतस्त्रिदशैर्यस्य न वा भविता ॥ अप्रमेयात्मत्वेनैव भवि-
ष्यतीत्यर्थः ॥ ४ ॥ यो ज्ञानमोक्षज्ञानसः पुत्रो नीतिरितो विविक्तैकान्ते ॥ ४५ ॥ भुवो विभ्रमतो नैव
स्थितोऽत्यर्थः ॥ ४ ॥ नपपणामः पद्मालेवनेनैवास्तियद्वा॰
ब्रह्मसमस्ताधिस्थायस्मिन् तस्य चिन्तनं चक्षुरे ॥ न पपणामः पद्मालेवनेनैवास्तिपद्मा॰
स्थितिः स्नातं गुणादोषयोः पदं विषयो न भवतीत्यर्थः ॥ ४९ ॥ तथापि तवथनमसो चितस्मि-

अप्रमेयानुभावो ऽयमक्षतस्त्रिदशैरपि ॥ न तमेनं विरोधेन मन्ये ऽहं भविता न वा ॥ ४
इति तेन विनिर्मुक्तः किं विरक्तानमियमथो युवे ॥ यो ज्ञानमोक्षौ ज्ञानसो विविक्तः इति होव
के ॥ ४६ ॥ निनेवपेकेननगाद्वयं भुवो विभ्रमणात् स्ववसमस्तधिष्ठपमे ॥ न तस्य चिन्त
न वनाथ वत्स हे नैव स्मृतो गुणादोषयोः पदम् ॥ ४९ ॥ इमं तु पार्श्वे हतास्यवत्यादि
ये हि भीतोन पलायनेयया ॥ बृहस्पतेरिमोव यमार्थसेवया पावक्रूर भार्गव श्रागसि
ष्यति ॥ ५० ॥ नश्यति शक्र सुवीर्ग मनुनाथेदमब्रवीत् ॥ धर्मो यस्य मा पदे श्व्यागत्ता
येनाहमेषिता ॥ ५१ ॥ धर्ममर्थं च कामं च नितरां चानुपूर्वशः ॥ महादायो च तत्राजनं
प्रयावनमायव ॥ ५४ ॥ यथावत्त्रिवर्गमनुसिद्धमनेषपशितितं ॥ न सापुनेनेतक्षिता
देहदानमोपवर्णिनाम ॥ ५२ ॥

माहतः ॥ इमं तिनि ॥ यावद्रूहरागमिष्यति ॥ तावद्वभाति येहि ॥ ततः किं अतद्वचतः बृहस्प
मीवानावयसाभवतीति ॥ ५ ॥ अहं त्वाय तत्वेष्यगोकृत्य ॥ ५१ ॥ ततश्चतो महादायधर्मो हि कस्
वतः ॥ प्रशिक्षितस्यासावनन्तस्यान्तसे ॥ ५१ ॥ यथावत्त्रिवर्गमनुशिष्टितमपि साधुनमेतेनतां

शान्तिपर्व टी॰ ११६ मोक्षधर्मे ...

परेर्द्रष्टुरेवमुक्तः समाहितआत्मा मनो यस्य तस्मिन्नेलेषा प्रहाणानिष्फलानि ॥ ननु देहेन बंधस
णानिर्विकारे प्रतिदेशं प्रविषये भगवति निवृत्तिशायेस्वर्ये प्रविलानानि ॥ शास्त्रादीनाम
पिनियंतत्वं ॥ एवंभूते परे ॥ अपुण्यस्यतिर्दैवस्य सत्क्रियाः मद्धैश्यमावृत्व ॥ ४४ ॥ अभिचाराः कृत्या
द्यः अवपातनानिमात्रिं स्वगादयः पातनानि ॥ प्रवदादिभिः ॥ मन्निरोधेस्य ॥ ४४ ॥ एवंतानाकम
लैः एवंतान्नांतद्वपरितेषैः ॥ बहुवचनैरभिचारायाह्वतिंदशायति ॥ तद्वन नकर्तेनाभ्यपद्यत

परेब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि ॥ युक्तात्मन्यफलाआसन्न पुण्यसेवसत्क्रियाः
४५ ॥ प्रयासे पहनेतस्मिन्नेस्मिद्दृः प्रतिषाकितः ॥ चकारनहयोपायान्निर्वेधेन युधिष्ठिर
४४ ॥ हिमाने देहस्पर्केर्हे रोभिवारणवपातने ॥ मायाभिः सन्निरोधेस्य गरदानैरभोज्नैः
४४ ॥ हिमवाद्युग्निसलिलैः पर्वताक्रमणैरपि ॥ नशशाकयदाहंतमपापममरः सुतं ॥ ४
४ ॥ चिंतांदीर्घतमां प्राप्तस्तत्कर्तुं नाभ्यपद्यत ॥ एवमेवहृसाधक्तोवधोपायाश्रुतिर्मिताः
४५ ॥ तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैवतेजसा ॥ वर्तमानोविहृद्धैर्बालोपज्ञरथीरयम् ॥
न विस्मरति मेनायं स्मनः शेपदवप्रमुः ॥ ४४

नशायनाशाक्रोदिमर्थैः ॥ ४४ ॥ चिंतामेवाह ॥ ए
षद्गतिर्विभिः ॥ सेमयासाधुमरूवधयाभवतित योक्तः ॥ असद्धर्मैरपकारैरभिचारैर्वा ॥ ४५
अविहृद्धैर्वर्तमानोपिबालोप्ययं अजरथीः ॥ निर्भयचित्तः मेनाथं अन्यायं मम प्रभुत्वं वा न विस्म
रविस्मरति ॥ अजीगर्तस्ममध्यमपुत्रः शुनः शेपोनाम पितरभ्याहृहरिश्चंद्राय विक्रीतः सम
यातयोरपकारं अविस्मरंस्तद्दिपरवैविश्वामित्रमपाश्रित्य गोत्रांतरमाप्तवलहृतत् ॥ यद्वा
स्वभावापरित्यागेदृष्टांतः शुनःशेपः पुरूरवसि वेति ॥ ४९ ॥ १५ ॥

भा
सटी
४

भोगो यमः कथं त्याज्य इति चेत् ॥ तत्राह ॥ सत्वमिति ॥ सर्वत्र पश्चादावपि देवाः सर्वा दृष्टा देव ॥ ३ ॥ प्र
तत्तद्दर्शं प्रयासो न कर्तव्यः ॥ यतः प्रयासानन्तरं केवलं प्राप्तु भोग्य एव ॥ यतस्तु यात्नेन प्रकारे
णाते मन प्राप्नोति ॥ ४ ॥ भयमाश्रितः संसारं ग्रामः पुरुषः स्वपशरीरं यावत् पुष्कलमलिनं न वि
पद्येत ॥ प्रवर्तमनं नमवेत् ॥ न न संपदिति वा तावत्क्रीडते मायया तेन ॥ ५ ॥ आगुरुध्यय क्रममाह पु

सुखमैन्द्रियकं दैत्या देहयोगेन देहिनां ॥ सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्न
तः ॥ ३ ॥ तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परं ॥ न तथा विंदते क्षेमं मुकुंदचर
णांबुजे ॥ ४ ॥ ततो यतेत कुशलः क्षेमाय भयमाश्रितः ॥ शरीरं पौरुषं यावन्न
विपद्येत पुष्कलं ॥ ५ ॥ पुंसो वर्षशतं ह्यायुस्तदर्धं चाजितात्मनः ॥ निष्फलं य
दसौ रात्र्यां शेते धं प्रापितस्तमः ॥ ६ ॥ मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंश
तिः ॥ जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥ ७ ॥ दुरापूरेण कामेन मोहेन
च बलीयसा ॥ शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ॥ ८ ॥ को गृहेषु पु
मान्सक्तमात्मानमजितेन्द्रियः ॥ स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुं ॥ ९ ॥ को
न्वर्थतृष्णां विसृजेत्प्राणेभ्योपि य ईप्सितः ॥ यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको व
णिक् ॥ १० ॥

सरतिर्विभिः यद्यस्मात् ॥ श्रोते ॥ विंशति ॥ वं बांगा आयुर्याति ॥ ११ ॥ इत्याद्य देशात् दुःखैः समे
तादाहृत्यस्मात्तेन ॥ ८ ॥ नत्रयोवने गृहासक्तोपि प्रमादिहरकः सन ॥ क्षेमं पासनतो भ्या शंका ॥ तद
समवंदर्शयन ॥ कौमार एवाचरेद्दिस्येतदुपपादयति ॥ को गृहेष्विति सप्तभिः ॥ य समर्थं म
सुभिः क्रीणाति प्राणहानिमंगीकृत्यापि न स्करादिरर्थं साधयति ॥ तस्मिन्नर्थेन संसको

परावृत्तः गृहं गतः । उपहूतः संधिः पादपूरणार्थः । क्रीडार्थं कृतक्षणैः कृतोऽवसरो यैर्बालैर्वा अवसरे वृत्ति वा ॥५४॥ तेषां निष्ठां तन्मयं स्मरणादि तत्त्वं वा विद्वान् ॥५५॥ द्वंद्वारामाणामीरितैरीहितैश्चादूषिता धीर्येषां ॥ यतो बालाः ॥५६॥ तस्मिन्नेव न्यस्तं हृदयमीक्षणं च यैः ॥५७॥ इति श्रीसप्तमस्कंधे पंचमोऽध्यायः ॥५॥ एहे गुरौ गृहस्थे प्रह्लादो दैत्यबालकान् ॥ प्रत्युवाच परं तत्त्वं नारदोक्तमुपादिशत् ॥१॥ निरर्थकक्रियालापैर्गाढं भवमज्जनतां ॥ प्रह्लादः सदयं प्राह षष्ठे भागवतं कृती ॥२॥

यदाचार्यः परावृत्तो गृहमेधीयकर्मसु ॥ वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ॥५४॥
अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः ॥ उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ॥५५॥
ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः ॥ बाला अदूषितधियो द्वंद्वारामेरितेहितैः ॥५६॥
पर्युपासत राजेन्द्र तन्न्यस्तहृदयेक्षणाः ॥ तानाह करुणो मैत्रो महाभागवतोऽसुरः ॥५७॥
इति श्रीभागवते सप्तमस्कंधे प्रह्लादानुचरिते पंचमोऽध्यायः ॥५॥ श्रीप्रह्लाद उवाच ॥ कौमार आचरेत्प्राज्ञो धर्मान्भागवतानिह ॥ दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदं ॥१॥
यथा हि पुरुषस्येह विष्णोः पादोपसर्पणं ॥ यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत्

कौमार इत्यादिना ॥ इहैव मानुषजन्मनि धर्मानाचरेत् यतोऽर्थदमेतत् ॥ ननु कौमार एव ॥ यतस्तदप्यध्रुवम् ॥ नन्वेवं भूते जन्मान्तरे यतो दुर्लभं तत्र धर्मान्नैवाचरेत् ॥ न स्वार्थं प्रयासान्तरत्र च भागवतानेव न कामान् ॥१॥ इह भागवतानेव धर्मानाचरेत् ॥ एतेन दुर्लभमुपपादयति यथा हीति चतुर्भिः ॥ इह पुरुषस्य विष्णोः पादोपसर्पणमेव यथा श्रेयः उपपत्तिमाह यदि स्यात् ॥ एष प्रिय इत्यादि ॥ २ ॥ ॥ ॥ ॥

प्रस्तुतवीर्यं करोतीत्याह वित्तेष्विति नित्यमभिनिविष्टं वित्ते यस्य सः परवित्तहर्ता श्वेतन
रेकलक्षणाद्रूह चंडादिरूपं दोषं यद्यपि विद्वान् तथापि शृगालाभिलाषः तस्य एव वित्तं हर
त्येव १५ तदेवं कोशगृहेषु पुमानित्यादि सप्तभिः श्लोकैः रूपादितं गृहादिषु प्रसक्तस्य वैरा
ग्यस्यादिष्टं संभवमनुपसंहरति विद्वानपीति स्वलोकाय आत्मपरामर्शाय न कल्पते किंतु मू
ढो यथा तथा विद्वानपि तमः अभिनिवेशमेव प्रपद्यते तत्र हेतुः य इति स्वीयमिदं पार
वित्तेष्विति नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्ता प्रेत्येह वाप्यजितेन्द्रियस्त
दशांतकामो हरते कुटुंबी १५ विद्वानपीत्थं दनुजाः कुटुंबं पुष्णन् स्वलोकाय न क
ल्पते वै यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः १६ यतो न क
श्चित्क्व च कुत्र विद्वान्दीनः समर्थः ममलं स्वमात्मा विमोचितुं कामदृशां विहा
रक्रीडामृगो यन्निगडो विसर्गः १७ ततो विदूरात्परिहृत्य दैत्या दैत्येषु संगं वि
षयात्मकेषु उपेत नारायणमादिदेवं स मुक्तसंगैरिषितोपवर्गः १८ ॥ १८ ॥
कामिदमिति भिन्नो भावो भावना यस्य सः १६ तस्मात्कौमार एव भागवतान्धर्मानाचरेदि
त्सहेतुकमुपसंहरति यतः कश्चिदपि स्वमात्मानं मोचितुं न समर्थः यतः नारायणमुपेत श
रणंपातेत्युत्तरेणान्वयः असामर्थ्ये हेतुः अले दीनो लंपटः अतः कामो दृष्टिर्यासां क्रीडामृ
गास इत्वयः किंच यया सा तु निगडः शृंखलातुल्यो विसर्गः हारसायने आत्मानं यत स्त्रीणां

किंच यमित्यादि प्रियायाः संगादिकं स्मरन् कथं त्यजेदिति तत्रीयेनान्वयः मंत्रान् हितभाषितालापान् सुहृत्सु च तत्स्नेहेन सितो बद्धः कलानि मधुराण्यक्षराणि येषां तेषां संगे चानुरक्तं चित्तं यस्य ११ ताः स्वगृहे स्थिताः हृदय्या हृदयंगमाः मनोज्ञा उरवः परिच्छदा येषु तान् वृत्तीर्जीविकाः कुल्याः कुलपरंपरागताः १२ कोशस्कृत् कोशकारी कीटः सपथायं गृहं कुर्वन्नात्मनो निर्गमाय यद्द्वारमपि तावशेषयति तथा कर्माणीहमाना ता

कथं प्रियाया अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान् सुहृत्सु तत्स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ११ पुत्रान् स्मरंस्ता दुहितृर्हृदय्या भ्रातॄन् स्वसॄर्वा पितरौ च दीनौ गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् १२ त्यजेत्कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः औपस्थ्यजैह्वं बहु मन्यमानः कथं विरज्येत दुरंतमोहः १३ कुटुंबपोषाय वियन्निजायुर्न बुध्यतेर्थं विहितं प्रमत्तः सर्वत्र

ननु वितृप्तकामोपि दोषदर्शनेन विरक्तः संस्त्यजेत्तत्राह औपस्थ्यं च वा शेश्नं जैह्वं च स्तुं बहु तेवार्थिकं मन्यमानः अतो दुरंतो मोहो यस्य सतः कथं चिरेण्यैन विरक्तः स्यात् १३ दुरंतमोहत्वं दर्शयन्नाह कुटुंबपोषाय वियत् क्षीयमाणं निजमायुः अर्थं च विहितं

ततः किमत आह ॥ तुष्टे च तत्र तस्मिन् ॥ किमलभ्यं ॥ तथापि गुणपरिणामाद्दैवादेव स्वसिद्धा अयत्नतः सि
द्धये धर्मादयः तैः किं अगुणेन च मोक्षेण कांक्षितेन किं ॥ तस्य परमाप्तत्वान्नोस्माकं कांक्षितस्यापि तस्य
सिद्धेः ॥ यद्वा मास्तु मोक्षः तस्य चरणयोः सारं जुषां सर्वधा सेवमानानां तेनापि किमित्यर्थः ॥२५॥ ननु च ध
र्मादेरपुरुषार्थत्वे किमित्याचार्यैर्भ्यो वेदेष्वनेन तत्साधनत्वाभिहितः तत्राह धर्मार्थः कामश्चेति यस्त्रि
वर्गः तदर्थं च यदुक्ता द्याश्च अभिहिताः ॥ ईक्षा आत्मविद्या त्रयी कर्मविधानं यदमौ तर्को दण्डनीतिश्च वि

तुष्टे च तत्र किमलभ्यमनंत आद्ये किं तैर्गुणव्यति
करादिह ये स्वसिद्धाः ॥ धर्मादयः किमगुणेन च कां
क्षितेन सारं जुषां चरणयोरुपगायतां नः ॥२५॥ धर्मा
र्थकाम इति योभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ
विविधा च वार्ता ॥ मन्ये तदेतदखिलं निगमस्य सत्यं
स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥२६॥ ॥

विधा च वार्ता जीविका तदेतत्सर्वं निगमस्यार्थजातं ॥ स्वसुहृदः स्वान्तर्यामिणः ॥ परमस्य पुंसः स्वात्मार्प
णसाधनं चेत् ॥ तर्हि सत्यमहं मन्ये सत्यपरत्वात् ॥ अन्यथा तदसत्यमेव यद्वा तदेतदखिलं निगमस्य त्रैगुण्य
विषयस्य प्रतिपाद्यं मन्ये ॥ सत्यं तु नर्ति त्रैगुण्यफलत्वात् परमस्य पुंसः ॥ स्वात्मार्पणमेवेत्यर्थः ॥ तदुक्तं भ
गवता ॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेति ॥२६॥ ॥

वालानामस्माकं तज्जनं मवाक्यमिति चेत्॥ तत्राह॥ नह्यीति॥ बहुव्यासः प्रतिप्रयासः॥ आत्मत्वात्॥ सर्वत्र सिद्ध
त्वादिति॥ १९॥ तत्र हेतुद्वयमुपपादयति॥ परावरेष्विति चतुर्भिः॥ ब्रह्माद्यंतो येषां स्थावरआदिर्येषां तेषु जीवे
षु भौतिकेषु घटादिषु॥ महत्सु च॥ भूतेष्वाकाशादिषु॥ २०॥ गुणानां साम्ये प्रधाने॥ गुणव्यतिकरे महत्तत्वादौ
च परः॥ ब्रह्मस्वरूपः॥ २१॥ कथं तर्हि द्रष्टृदृश्यभोक्तृभोग्यादिभेदः॥ माययेत्याह॥ प्रत्यगात्मा हं द्रष्टा भो
क्ता तत्स्वरूपेण व्यापकतया निर्देश्यः दृश्यं भोग्यं देहादि तद्रूपेण च व्याप्यतया निर्देश्यो मायया ई

नह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः॥ आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः॥ १९॥ प
रावरेषु भूतेषु ब्रह्मांतस्थावरादिषु॥ भौतिकेषु विकारेषु भूतेष्वथ महत्सु च॥ २०॥ गुणेषु गुण
साम्ये च गुणव्यतिकरे तथा॥ एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः॥ २१॥ प्रत्यगात्मस्वरूपे
ण दृश्यरूपेण च स्वयं॥ व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः॥ २२॥ केवलानुभवा
नंदस्वरूपः परमेश्वरः॥ माययांतर्हितैश्वर्य ईयते गुणसर्गया॥ २३॥ तस्मात्सर्वेषु भूतेषु दयां कुरु
त सौहृदं आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः॥ २४॥ ॥

यतोऽनुभव एव यः॥ वस्तुतस्तु स्वयमविकल्पि
तोऽनिर्देश्यो यद्वा निर्देश्योऽपि एवं निर्देश्योऽपि एवं निर्देश्यः सन्नविकल्पितः यतः स्वतो नेरणात्वयः॥ २२॥ यतः केव
लानुभवात्मक आनंद एव स्वरूपं यस्य तत्तु सप्रपंचे तत्सर्वं तर्हि तत्र सर्वत्र सर्वतत्त्वानुपलंभे तत्राह॥ गुणात्म
कः सर्गो यस्याः सा गुणसर्गा तया मायया अंतर्हितमैश्वर्यं येन सः॥ २३॥ यस्मादेवं तस्मात्सर्वेषु भूतेषु यो वितंर

श्री॰ भा॰ म॰ टी॰ २४

मम्रेममातुर्गर्भस्थस्य स्मृत्वा नारदभाषितं ॥ प्रह्लादो वर्णयामास शिष्यप्रत्ययसिद्धये ॥ १ ॥ अत्रापि नारदादेतन्म
यारोगर्भे स्थितीरितं ॥ तत्प्रस्तावकथामाह पद्यैः षोडशभिः सुधीः ॥ २ ॥ अस्माकं पितरि हिरण्यकशिपौ ॥ ३ ॥ स
हतेनेवपायेन पापोसौ अभिभवितुं इति हर्षेण वदंतो युद्धोद्यमं चक्रुः ॥ २ ॥ राज्ञः शिविरमावासं स्थलं प
णीता ॥ ३ ॥ दउ॰ ॥ एवं दैत्यसुतैः पृष्टो महाभागवतोसुरः ॥ उवाच स्मयमानस्तान्स्मरन्मदनुभाषितं ॥ प्र
ह्लाद उवाच ॥ पितरि प्रस्थितेस्माकं तपसे मंदराचलं ॥ युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति ॥ १ ॥ पि
पीलिकैरहिरिव दिष्ट्या लोकोपतापनः ॥ पापेन पापोभक्षीति वादिनो वासवादयः ॥ २ ॥ तेषामतिबलो
द्योगं निशम्यासुरयूथपाः ॥ वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशं ॥ ४ ॥ कलत्रपुत्रमित्राप्तान्गृहा
न्पशुपरिच्छदान् ॥ नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ॥ ५ ॥ व्यलुंपन्राजशिबिरममरा जय
कांक्षिणः ॥ इंद्रस्तु राजमहिषीं मातरं मम चाग्रहीत ॥ ६ ॥ नीयमानां भयोद्विग्नां रुदतीं कुररीमिव ॥ य
दृच्छयागतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥ प्राह नैनां सुरपते नेतुमर्हस्यनागसं ॥ मुंच मुंच महाभाग
सतीं परपरिग्रहं ॥ ८ ॥ इंद्र उ॰ ॥ आस्तेस्या जठरे वीर्यमविषह्यं सुरद्विषः ॥ आस्यतां यावत्प्रसवं मोक्ष्ये
र्थपदवीं गतः ॥ ९ ॥ नारद उ॰ ॥ अयं निष्किल्बिषः साक्षान्महाभागवतो महान् ॥ त्वया न प्राप्स्यते सं॰

व सर्वस्वापहारेण नाशितं वंत ॥ ८ ॥ अनागसं निरपराधामेनां नेतुं नार्हसीति प्राह ॥ ७ ॥ अविषह्यं दुःसहं ॥ अ
तोतयावत्प्रसवपर्यंतमत्रास्यतां ॥ ततश्चार्थस्य पदवीं मार्गं गतः प्राप्तः सन् जातं पुत्रं हत्वा मोक्ष्यामि त्यक्ष्यामि ॥ ९ ॥
साक्षात्स्वगुणैरेव महान् ॥ न तु पित्रादिसंबंधात ॥ त्वया हेतुभूतेन वधं संस्थां मरणं न यास्यति न प्रदेनवो विधि॰

२५

तेषां विश्वासार्थं गुरुसंप्रदायमाह ॥ ज्ञानमिति ॥ यत्तु नारदः श्रोता ॥ तत्र कुतो माहशानामधिकार इति माशंकीत्याह भगवत एकांतभक्तानां यस्मात् दरजसोत आप्लुतानां स्नातानां देहिनां सर्वेषामपि तज्ज्ञानं स्यात् ॥ न तत्र मानामेव ति नियमः ॥ २७ ॥ श्रुतमेव मया पितृनारदाच्छ्रुतं विज्ञानसंयुतं श्रुतमनुभवपर्यंतं धर्मं चैतच्छ्रु ॥ २८ ॥ तत्र अति विस्मिताः पृच्छंति ॥ प्रह्रादेति ॥ एताभ्यां ॥ ऋते ॥ अन्यं गुरुं न विद्मः एतदागमनात्पूर्वमेवाहं नारदपार्श्वगत इति चेत् ॥ त

ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय ॥ एकांतिनां भगवतस्तदकिंच नानां पादारविंदरजसाप्लुतदेहिनां स्यात् ॥ २७ ॥ श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतं ॥ धर्मं भाग वतं शुद्धं नारदाद्देवदर्शनात् ॥ २८ ॥ दैत्यपुत्रा ऊचुः ॥ प्रह्राद त्वं वयं चापि नर्तेऽन्यं विद्महे गुरुम् । एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ ॥ २९ ॥ बालस्यांतःपुरस्थस्य महत्संगो दुरन्वयः छिंधि नः संशयं सौम्य स्याच्चेद्विस्रंभकारणम् ॥ ३० ॥ इति श्रीभागवते सप्तमस्कंधे षष्ठोऽध्यायः ६

चाहुः ॥ बालानामपि अतिशिशूनामपि अस्माकमेतावीश्वरौ नियंतारौ ॥ अतस्तवान्यत्र गमनं न संभ वति ॥ २९ ॥ स एवात्रागत इति अपि न संभवतीत्याहुः ॥ बालस्येति दुरन्वयः दुर्घटः विस्रंभकारणं विश्वासहेतुः ॥ ३० ॥ इति श्रीसप्तमस्कंधे टीकायां षष्ठोऽध्यायः ॥ ६ ॥

श्रीभा
स॰टी
२५

तदेवं देहधर्मास्तु षड्लक्षणेपि नात्मनो देहभेदो दर्शितः ॥ इदानीमात्मधर्मैरेव भेदं स्फुटयंस्तदहंकारादिकं त्याजयति ॥ आत्मा नित्यः ॥ अविनाशी वा अरेयमात्मेति श्रुतेः अव्ययः ॥ अपक्षयशून्यः ॥ ऋचो अक्षरे परमे व्योमन्निति श्रुतेः शुद्धः ॥ निरवद्यं निरंजनमिति श्रुतेः एकः एकमेवाद्वितीयमिति श्रुतेः क्षेत्रज्ञः विज्ञातारमरे केन विजानीयादिति श्रुतेः आश्रयः यस्मिन्द्यौः पृथिवी चान्तरिक्षमिति श्रुतेः अविक्रियः निष्कलं निष्क्रियं शान्तमिति श्रुतेः स्वदृक् ॥ आत्मज्योतिः ॥ सम्राडिति होवाचेति श्रुतेः हेतुः स इमांल्लोकानसृजतेति श्रुतेः व्यापकः सत्यं ज्ञानमनन्तमिति श्रुतेः असं[illegible]देहं विद्वान् ॥ असद्भावमि

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ॥ अविक्रियः स्वदृग्धेतुर्व्यापकोऽसंग्यनावृतः ॥ १९
एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः ॥ अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥ २०
स्वर्णं यथा ग्रावसु हेमकारः ॥ क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ॥ क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत ॥ २१ ॥

गी असंगो ह्ययं पुरुष इति श्रुतेः ॥ अनावृतः पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इति श्रुतेः ॥ १९ ॥ परैः श्रेष्ठैः विवेकसमर्थैः देहादौ देहं विद्वान् ॥ असद्भावं मिथ्याबुद्धिं त्यजेत् ॥ २० ॥ नन्वेवं विविक्तात्मस्वानिनितोप्य परोक्षानुभवेन ब्रह्मताप्राप्तिः कथं स्यात् ॥ यतोऽहंकारादिकं त्यक्तुं दृश्यपदार्थात्तत्प्राप्तिप्रकारं सदृष्टान्तमाह ॥ स्वर्णाकारः क्षेत्रेषु स्वर्णाकरोत्थपाषाणेषु योगैर्धमनोपायैस्तदुपायाभिज्ञो हेमकारो यथा स्वर्णमाप्नुयात् ॥ आत्मयोगैः आत्मप्राप्त्युपायैः ब्रह्मगतिं ब्रह्मतां ॥ अध्यात्मवित् ॥ आत्मानमधिकृत्य कार्यकार

२५

अनंतप्रियो यो योहं स च प्रियो यस्य तस्य मम भक्त्या एनां प्रदक्षिणीकृत्य ॥११॥ इहोष्यतामित्याहेति शेषः ॥१२॥
अंतिसमीपे ॥१३॥ अंतर्वत्नी गर्भिणी इच्छया भर्तुरागमनानंतरं प्रसूतये ॥१४॥ उभयमपि स्वगर्भस्य क्षेमाय तस्याः
शोकशांतये धर्मस्य तत्वं भक्तिलक्षणं ज्ञानमात्मानात्मविवेकः तदुभयं प्रादात् ॥ ईश्वरः समर्थः ॥१५॥ स्मृत्या

इत्युक्तांतां विहायेंद्रो देवर्षेर्मानयन्वचः ॥ अनंतप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ॥११॥ ततो
नो मातरमृषिः समानीय निजाश्रमं ॥ आश्वास्येहोष्यतां वत्से यावत्ते भर्तुरागमः ॥१२॥ तथे
त्यवात्सीद्देवर्षेरंतिसाप्यकुतोभया ॥ यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्त्तत ॥१३॥ ऋषिं पर्य
चरत्तत्र भक्त्या परमया सती ॥ अंतर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥१४॥ ऋषिः कारु
णिकस्तस्याः प्रादादुभयमीश्वरः ॥ धर्मस्य तत्वं ज्ञानं च मामप्युद्दिश्य निर्मलं ॥१५॥ तत्तु कालस्य
दीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे ॥ ऋषिणानुगृहीतं मां नाधुनाप्यजहात्स्मृतिः ॥१६॥ भवता
मपि भूयान्मे यदि श्रद्दधते वचः ॥ वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ॥१७॥ जन्मा
द्याः षडिमे भावा दृष्टा देहस्य नात्मनः ॥ फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना ॥१८॥ ॥

देवेत ॥ वैशारदी ॥ स्वार्थे तद्धितः देहाद्यहंकारच्छेदनिपुणेत्यर्थः ॥१७॥ कासौ वैशारदी धीरित्यपेक्षायां वैशा
रदीक्तमेव देहात्मविवेकप्रकारमाह षड्भिः ॥ जन्माद्याः जायतेऽस्ति वर्धते विपरिणमतेऽपक्षीय
ते नश्यतीत्येवंभूता इमे षड्भावा विकाराः वृक्षस्यैव यथा फलानां तद्वदेते तत इदात्मनि न यैवास्थिते दे

श्री·भा·
स·टी·
२९

विमर्शप्रकारमाह ॥ बुद्धेरिति द्वाभ्यां ॥ अध्यक्षः साक्षी ॥ २५ ॥ अत एभिर्बुद्धिभेदैः परिणामैः पर्यस्तैः परितः क्षिप्तैः
आत्मधर्मत्वेन निरस्तैः ॥ बुद्धिधर्मत्वे हेतुः त्रिवर्णैः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः बुद्धेरेव त्रिगुणात्म
कत्वात् ॥ कर्मकर्तृत्वाच्च ॥ तस्मादेवैता अवस्था आत्मा न बुध्येदन्वयात् ॥ तदवस्थावानिव भाति ॥ न तत्त्वत इ
त्यात्मनः स्वरूपं बुध्येत् जानीयादित्यर्थः ॥ अत्र दृष्टान्तः ॥ कुसुमधर्मगंधैस्तदाश्रयं वायुमिव ॥ २६ ॥ ननु तर्हि
यथा कुसुमोपाधिको वायोर्गंधो विवेकज्ञानेन निवर्तेत ॥ एवमात्मनः ॥ संसारोऽपि निवर्तेतेत्याशं

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ॥ ता येनैवानुभूयंते सोऽध्यक्षः पुरुषः प
रः ॥ २५ ॥ एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः ॥ स्वरूपमात्मनो बुध्येद्गंधैर्वा
युमिवान्वयात् ॥ २६ ॥ एतद्द्वारो हि संसारो गुणकर्मनिबंधनः ॥ अज्ञानमूलोऽपा
र्थोऽपि पुंसः स्वप्न इवार्प्यते ॥ २७ ॥ तस्माद्भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मनां ॥ बी
जनिर्हरणं योगः प्रवाहोपरमो धियः ॥ २८ ॥ ॥ ॥

क्याह ॥ एतद्द्वारः बुद्धिद्वारकस्तदवस्थाद्वारको वा न स्वतो हि यस्मात् ॥ बुद्धेर्ये गुणाः कर्माणि च तैः निबध्यत
इति ॥ तथा सत्यज्ञानमूलः अतः अपार्थो मिथ्याभूतोऽपि स्वप्नवदर्प्यते ॥ वायोस्तु गंधवत् ॥ द्रव्यसंबंधस्य
वास्तवत्वाद्विषमो दृष्टान्तः ॥ २७ ॥ यस्मादेवं निवृत्तिर्घटते ॥ तस्मात् ॥ बीजमज्ञानं तस्य निर्हरणं दहनं किं
तत् ॥ योगः ॥ कथंभूतः धियः प्रवाहं मायदादिष्टमुपरमयतीति तथा ॥ २८ ॥ ॥

प्रेतं तस्य प्रियो यो योऽहं स च प्रियो यस्य तस्य मम भक्त्या पन्नां प्रदक्षिणीकृत्य ॥११॥ इहोष्यतामित्याहेति शेषः ॥१२॥
अंतिके समीपे ॥१३॥ अंतर्वत्नी गर्भिणी इच्छया भर्तुरागमनानंतरं प्रसूतये ॥१४॥ पर्दमपि स्वगर्भस्य क्षेमाय तस्याः
शोकशांतये धर्मस्य तत्त्वं भक्तिलक्षणं ज्ञानमात्मानात्मविवेकः तदुभयं प्रादात् ॥ ईश्वरः समर्थः ॥१५॥ मया

इत्युक्तस्तां विहायेन्द्रो देवर्षेर्मानयन्वचः ॥ अनंतप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ॥११॥ ततो
मे मातरमृषिः समानीय निजाश्रमं ॥ आश्वास्येहोष्यतां वत्से यावत्ते भर्तुरागमः ॥१२॥ तथे
त्यवात्सीद्देवर्षेरंतिके साकुतोभया ॥ यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्तत ॥१३॥ ऋषिं पर्य
चरत्तत्र भक्त्या परमया सती ॥ अंतर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥१४॥ ऋषिः कारु
णिकस्तस्याः प्रादादुभयमीश्वरः ॥ धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलं ॥१५॥ तत्तु कालस्य
दीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे ॥ ऋषिणानुगृहीतं मां नाधुनाप्यजहात्स्मृतिः ॥१६॥ भवता
मपि भूयान्मे यदि श्रद्दधते वचः ॥ वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ॥१७॥ जन्मा
द्याः षडिमे भावा दृष्टा देहस्य नात्मनः ॥ फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना ॥१८॥ ॥

भवेत् ॥ वैशारदी ॥ स्वार्थे तद्धितः देहाद्यहंकारच्छेदनिपुणेत्यर्थः ॥१७॥ कासौ वैशारदी धीरित्यपेक्षायां जन्मा
द्युक्तमेव देहात्मविवेकप्रकारमाह दशभिः ॥ जन्माद्याः जायते अस्ति वर्धते विपरिणमते अपक्षीय
ते नश्यतीत्येवं भूता इमे षड्भावा विकाराः वृक्षस्य यथा फलानां तद्वदत्र देहस्य नात्मन इति नत्वेवास्थिते दे

८

श्री·भा·
स·टी·
२९

विमर्शप्रकारमाह॥ बुद्धेरिति द्वाभ्यां॥ अध्यक्षः साक्षी॥२५॥ अतएभिर्बुद्धेर्भेदैः परिणामैः पर्यस्तैः परितः क्षिप्तैः
आत्मधर्मत्वेन निरस्तैः॥ बुद्धिधर्मत्वे हेतुः त्रिवर्णैः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः बुद्धेरेव त्रिगुणात्म
कत्वात्॥ कर्मकर्तृत्वाच्च॥ तस्या एवैता अवस्था आत्मा तु बुद्ध्यन्वयात्॥ तदवस्थावानिव भाति॥ न तत्त्वतः॥
तमात्मनः स्वरूपं बुध्येज्जानीयादित्यर्थः॥ अत्र दृष्टांतः॥ कुसुमधर्मैर्गंधैस्तदाश्रयं वायुमिव॥२६॥ ननु तर्हि
यथा कुसुमोपाधिको पि वायोर्गंधो विवेकज्ञानेन न निवर्तेत॥ एवमात्मनः॥ संसारो न निवर्तेत नत्याशं

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः॥ ता येनैवानुभूयंते सोऽध्यक्षः पुरुषः प
रः॥२५॥ एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः॥ स्वरूपमात्मनो बुध्येद्गंधैर्वा
युमिवान्वयात्॥२६॥ एतद्द्वारो हि संसारो गुणकर्मनिबंधनः॥ अज्ञानमूलोऽपा
र्थोऽपि पुंसः स्वप्न इवार्प्यते॥२७॥ तस्माद्भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मनां॥ बी
जनिर्हरणं योगः प्रवाहोपरमो धियः॥२८॥ ॥ ॥

क्याह॥ एतद्द्वारः बुद्धिद्वारकस्तदवस्थाद्वारको वा न स्वतो हि यस्मात्॥ बुद्धेर्ये गुणाः कर्माणि च तैः निबध्यत
इति॥ तथा स चाज्ञानमूलः अतः अपार्थोऽपि मिथ्याभूतोऽपि स्वप्नवदर्प्यते॥ वायोस्तु गंधवत्॥ द्रव्यसंबंधस्या
वास्तवत्वाद्विषमो दृष्टांतः॥२७॥ यस्मादेवं निवृत्तिर्घटते॥ तस्मात्॥ बीजमज्ञानं तस्य निर्हरणं दहनं किं
तत्॥ योगः कथंभूतः धियः प्रवाहं मायारागादिहेतुमुपरमयतीति तथा॥२८॥ ॥

अध्यात्मविवेकमात्मप्राप्त्युपायमाह ॥ अष्टाविति त्रिभिः ॥ मूलप्रकृतिः महदहंकारौ पंचतन्मात्राणि चेत्यष्टौ ॥ त्र
यः सत्त्वादयः ते च प्रकृतेर्गुणा एव न तु भिन्नाः ॥ एकादशेंद्रियाणि पंचमहाभूतानि चेति षोडश पुमानात्मा
एकः प्रोक्तः कपिलादिभिराचार्यैः ॥ एकत्वे हेतुः एव साक्षित्वेनान्वयात् ॥ तदुक्तं ॥ मूलप्रकृतिरविकृ
तिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति ॥ २५ ॥ जगज्जंग
मं तस्थुः स्थावरं ॥ अत्रैव सर्वसंघातात्मके देह एव मृग्यः अन्वेष्टव्यः स्पष्टं चैतदित्याह ॥ नेति नेतीत्यन्या

अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः ॥ विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ॥ २५
देहस्तु सर्वसंघातो जगत्तस्थुरिति द्विधा ॥ अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन् ॥ २६ ॥ अन्व
यव्यतिरेकेण विवेकेनोशतात्मना ॥ सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥ २७ ॥ ॥

पोहे क्रियमाणोऽवशेषमेव अतत्त्यजन् ॥ अनात्मवर्गात्त्यजन्नुपलभ्यमान इत्यर्थः ॥ २६ ॥ मणिषु सूत्रमिव सर्व
गानुस्यूतत्वेनान्वयः अत एव मणिभ्यः सूत्रस्येवैकैकव्यतिरेकः ॥ तयोर्द्वंद्वं तेनानयोर्विवेकः पूर्वोक्तो वा ते
न ॥ उशता सुदृढेनात्मना मनसा सर्गस्थानसमाम्नायैः सृष्टिस्थितिसंहारैः ॥ यतो वा इमानि भूतानि जायंत इत्या
दिश्रुत्युक्तसर्गाद्यनुसंधानेनेत्यर्थः विमृशद्भिः विचारयद्भिः असत्वरैः अव्यग्रैः मृग्य इति पूर्वेणान्वयः ॥ २७

श्री भा°
स° टी°
२२

तद्भावस्येत्यादिः तस्य भावो भावना तेनानुकृती आशयाकृती मनः शरीरे यस्य निर्दग्धं बीजं यस्य तादृशोनुशयो
वासना च यस्य सः समेति प्राप्नोति ॥ ३६ ॥ ततः किमत आह ॥ अधोक्षजालंभं मनसा स्पर्शमाह तदेतस्याशु
प्रणमशुभः रागादियुक्त आत्मा मनो यस्य संसृतिचक्रशातनं निवर्तकं बुधा विदुः ॥ तदेव ब्रह्मनिर्वाणलयो
मोक्षस्तदात्मकं सुखं विदुः हृदीश्वरमंतर्यामिणं ॥ ३७ ॥ भक्तिरशक्येति चेत्तत्राह क इति छिद्रवदा

तदा पुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृतिः ॥ निर्दग्धबीजानुशयो महीयसा भक्ति-
प्रयोगेन समेत्यधोक्षजं ॥ ३६ ॥ अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनं ॥ तद्ब्रह्म-
निर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरं ॥ ३७ ॥ कोतिप्रयासोसुरबालका हरेरुपासने स्वे
हृदि छिद्रवत्सतः ॥ स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥ ३८ ॥ रायः
कलत्रं पशवः सुतादयो गृहा मही कुंजरकोशभूतयः ॥ सर्वेर्थकामाः क्षणभंगुरायुषः कुर्वंति
मर्त्यस्य कियत्प्रियं चलाः ॥ ३९ ॥ ॥

काशवत् विषयाणामुपपादनैरर्जनैः किं तत्र हेतुः ॥ सर्वदेहिनां सामान्यतः ॥ विषयनिष्ठत्वे स्रक्चादिसा-
धारणापत्तेरित्यर्थः ॥ ३८ ॥ नचैवमादौ पौनरुक्त्यं दोषाः ॥ नारदोक्तानुवादरूपत्वादस्य प्रकरणस्य ॥ अनर्थ-
कं च विषयार्जनमित्याह ॥ रायः अर्थाः क्षणभंगुरमायुर्यस्य ॥ तदुक्तमितिहासेषु ॥ धनं द्विगुरुषालोकेषु
रूपयत्नमेवावा ॥ अवश्यमेकं त्यजति तस्मात्किं धनं त्यजत्येति ॥ ३९ ॥ रामानुजाय नमः ॥ ३९ ॥ ॥

२२

तदेवं ज्ञानप्रकारमुक्त्वा तत्साधनं धर्मस्य तत्त्वं नारदोक्तमेवाह ॥ तत्रेति पंचभिः ॥ यैर्धर्मैर्यथानुष्ठितैर्वीरतिरिति ।
यत् ॥ अयमुपायो भगवतोक्तः ॥ तथाहि गीतासु ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि
कौंतेय तत्कुरुष्व मदर्पणमिति ॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः इत्यादि ॥ २९ ॥ अत्रैवान्तरंगा
ण्यमूनाह ॥ गुरोः शुश्रूषया भक्त्या प्रेम्णा सर्वेषां लब्धानामर्पणेन वा ॥ ३० ॥ तत्सल्लिंगानामर्हणानामीक्षण

तत्रोपायसहस्राणामयं भगवतोदितः ॥ यदीश्वरे भगवति यथा यैरंजसा रतिः ॥ २९ ॥ गुरुशुश्रूष
या भक्त्या सर्वलब्धार्पणेन च ॥ संगेन साधुभक्तानामीश्वराराधनेन वा ॥ ३० ॥ श्रद्धया तत्कथायां
च कीर्तनैर्गुणकर्मणां ॥ तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ॥ ३१ ॥ हरिः सर्वेषु भूत
ेषु भगवानास्त ईश्वरः ॥ इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥ ३२ ॥ एवं निर्जितष
ड्वर्गैः क्रियते [illegible] भक्तिरीश्वरे ॥ वासुदेवे भगवति यया संलभते रतिं ॥ ३३ ॥ निशम्य कर्मा
णि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि ॥ यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कंठ
उद्गायति रौति नृत्यति ॥ ३४ ॥ यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रंदते ध्यायति वंदते जनं मुहुः
श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ॥ ३५ ॥

महर्षणं वादिर्येषां वंदनादीनां तैश्च ॥ ३१ ॥ ३२ ॥ निर्जितः षण्णां कामक्रोधलोभमोहमदमत्सराणामिंद्रियाणां
वा वर्गो यैः ॥ ३३ ॥ भगवद्भक्तेर्लिंगान्याह निशम्येति त्रिभिः ॥ गुणान् ॥ भक्तवात्सल्यादीन् ॥ अतिहर्षेणोत्कं
ठाः पुलकाश्रुगद्गदानि च येनैतद्धृदयं यथा भवत्येवं प्रोत्कंठ उद्गायति ॥ ३४ ॥ ३५ ॥

चंद्रमसकांतिगुणैः तेजः अर्कस्य प्रभा स्तत्वं विद्युतां तेजांस्यग्नामोजवल्लोरत्नमालोतिवीयप्र ... नाम भगवान् तथा च श्रु
तिः न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः ॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्व
मिदं विभातीति ॥ स्मृतिश्च ॥ यदादित्यगतं तेजो जगद्भासयतेऽखिलं ॥ यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामक
मिति ॥ भूमेर्वृत्तिः प्राणिनामाधारत्वेन वृत्तेर्गंधप्रभवात् न चैव शक्तिः किंचद्देवे ॥ अपांच पेयांतस्निग्धक
रूपाणां जीवनहेतुत्वं ॥ ता आपश्च त्वं रसश्च त्वमेव ॥ किंच वायोरोजः सहादि नैव शक्तिः दिशामुपाधिक
ताकाशप्रदेशानामवकाशः ॥ दिशाश्च त्वं खं च सामान्याकाशस्तदाश्रयः स्फोटश्च शब्दतन्मात्रं गुणावस्था वा

कांतिस्तेजः प्रभा सत्ता चंद्राग्न्यर्कर्क्षविद्युतां ॥ यत्स्थैर्यं भूभृतां भूमेर्वृत्तिर्गंधोऽर्थतो भवान् ॥ ८ ॥ तर्पणं प्राणनम
पां देव त्वं ताश्च तद्रसः ॥ ओजः सहो बलं चेष्टा गतिर्वायोस्तवेश्वर ॥ दिशां त्वमवकाशोऽसि दिशः खं स्फोट
आश्रयः ॥ नादो वर्णस्त्वमोंकार आकृतीनां पृथक्कृतिः ॥ ९ ॥ इंद्रियं त्विंद्रियाणां त्वं देवाश्च तदनुग्रहः
अवबोधो भवान् बुद्धेर्जीवस्यानुस्मृतिः सती ॥ १० ॥ भूतानामसि भूतादिरिंद्रियाणां च तैजसः ॥ वैकारिको
विकल्पानां प्रधानमनुशायिनाम् ॥ ११ ॥

मित्यर्थः ॥ नादः पश्यंती ॥ ओंकारः मध्यमा वर्णाश्चाकृतीनां पदार्थानां पृथक्कृतिः पृथक्करणमभिधानं
यस्मात्तस्माद्वर्णपदाद्यात्मिका वैखरी च त्वमित्यर्थः ॥ इंद्रियाणामिंद्रियं विषयप्रकाशनशक्तिः देवाश्चें
द्रियाधिष्ठातारः ॥ तदनुग्रहस्तेषामनुग्रहशक्तिश्च त्वं अवबोधो ध्यवसायशक्तिः अनुस्मृतिः स्मृतिसंधा
नशक्तिः ॥ भूतानां कारणं भूतादिः ॥ तामसोऽहंकारस्त्वमसि ॥ इंद्रियाणां कारणं ॥ तैजसराजसोऽहंकारस्त्वं वि
विधं ॥ आधिदैवाध्यात्मभेदेन कल्प्यंत इति विकल्पाः देवास्तेषां कारणं वैकारिकः सात्विकोऽहंकारस्त्वं
अनुशायिनां ॥ जीवानां संसारकारणं प्रधानं त्वमेवेति भावः ॥ ११ ॥

ग्रपि च नश्वरेषु नाशशीलेषु इह एतेषु भावेषु यदनश्वरमवशिष्यमाणं रूपं तत् ॥ त्वमसि ॥ द्रव्यविकारे
षु हि तत्त्ववर्णादिकार्येषु कटकुंडलादिषु नश्वरेषु च द्रव्यमात्रं सुवर्णादिमात्रं च मनश्वरं यथा न हि तत् ॥ न
नु त्रिगुणात्मककार्यरूपोपि त्वमसि ॥ ग्रगुणत्वात् ॥ कथमनश्वरत्वं तत्राह ॥ सत्त्वमिति ॥ नहि त्रयस्तस्य गु
णा मायामयत्वादयः ॥ ग्रज्ञानाव ॥ तृपि परे ब्रह्मणि कल्पिताः ॥ तस्मान्न संति ॥ ननु संतानकृत्यं प्रतीतिरत
ग्राह ॥ यर्हीति सत्त्वमिति ॥ यदा विकल्पितास्तदैव प्रतीतिमात्रेणानुवर्त्तंते ॥ न चामीषु ॥ न देवकारणा

नश्वरेष्विह भावेषु तदसि त्वमनश्वरः ॥ यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितं ॥२२॥ सत्त्वं रजस्
तम इति गुणास्तत्कार्यश्च याः ॥ त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया ॥२३॥ तस्मान्न स
न्त्यमी भावा यर्हि त्वय्येव कल्पिताः ॥ त्वं चामीषु विकारेषु ह्यन्यदा व्यावहारिकः ॥२४॥ गुणा
प्रवाह एतस्मिन्नबुद्धास्ते खिलात्मनः ॥ गतिं सूक्ष्मामबोधेन संसरन्तीह कर्मभिः ॥२५॥ य
दृच्छया नृतां प्राप्य सुकल्पामिह दुर्लभाम् ॥ स्वार्थे प्रमत्तस्य वयो गतं त्वन्माययेश्वर ॥२६॥
ग्रसावहं ममैवैते देहे चास्यान्वयादिषु ॥ स्नेहपाशैर्निबध्नाति भवान् सर्वमिदं जगत् ॥२७॥

तथाऽन्वगतः ॥ ग्रन्यदा तु ॥ व्यावहारिको विकल्पः ॥ त्वमेवावशिष्यसे इत्यर्थः ॥ एवं ह्यात्मतत्त्वमज्ञात
निबंधस्य संसारं दर्शयन्नाह ॥ गुणप्रवाह इति ॥ २४ ॥ सूक्ष्मां गतिं प्रपंचागतिं मधुथा ॥ ग्रविद्वांसः ॥ ग्रबुध्ये
ति वा पाठः ॥ ग्रतश्चाबोधेन देहाभिमानेन कृतैः कर्मभिः संसरंतीति ॥ एवं तयोक्तस्य निरूप्यत द्वा
त्याशोचति ॥ २५ ॥ यदृच्छयेति ॥ नृतां मनुष्यतां सुकल्पां पटुतरेंद्रियां ॥ ग्रहो किमिति प्रमत्तोस्मि ॥ इ
ति चेत् ॥ तवायावद्भिः पाशैर्निबद्धत्वादित्याह ॥ ग्रसावहमिति ॥ [illegible] मदेहस्य ग्रन्वयादिषु च

...त्पद्यांतरगविशंकनकुवोड्वलोरत्नमालोतिवीयशाह्न...
...स्तेयस्पाः साक...

ग्रस्तविश्वस्य तत्त्वादात्तस्वरूपम् तं कारणप्रधानपुरुषानामपरो ॥ तयोः हेतुनिरूपयोरपि कारणत्वे
नेश्वरो च साक्षात् हेतुर्वा इति ज्ञानेन त्विदं विश्वमनेकैः कारकैर्जायमाने ॥ ज्ञानः प्रधानपुरुषात्मकं ऊ
नस्तरामावयोः ॥ तत्कारणत्वेनेश्वरत्वं न त्वाह ॥ यत्रेति ॥ २ ॥ तत्राधिकरणे येजकत्रीकरणेन वा यत्ता
पादानात् ॥ यस्य स्वयेन यष्ट्रार्थस्या कारकत्वेपि निमित्तनोक्ता ॥ यस्मैसंप्रदानाय ॥ यस्मादिति ॥ प्रयो
स्वकार्ये कर्म कारके दर्शितेन तु तयोर्नास्ति भेदः ॥ यथोक्तं ॥ करोतिः क्रियमाणेन न कार्यं न कर्मणा
विना ॥ भवत्यर्थस्य कर्त्ता च कारणैः कर्म जायते ॥ तथा करोत्यर्थस्य यः कर्त्ता भवितुः स प्रयोजकः ॥ भवि

तुरत्वहत्वसमद्यायोगिनं संकर्षणास नानन ॥ ज्ञानेनामस्य यत्साक्षात् प्रधान पुरुषोपरो ॥ ३ ॥ यत्र
येन यतो यस्य यस्मै यद्यथा यदा ॥ स्यादिदं भवावान्साक्षात् प्रधानपुरुषेश्वरः ॥ ४ ॥ पत
त्रानाविधं विश्वमात्मसृष्टमयोत्तम ॥ आत्मनानुप्रविश्य प्राणात्मना गुणैर्जीवो विभर्त्यजः ॥ ५

नारभेत्ताथ प्रयोज्यत्वेन पचने इति च सतं ॥ तथाप्यवस्थाभेदेन भेदो विवक्षितः हरूपने चावः
स्याभेदः तंदुलानोदनं पचति ॥ मृदं घटं करोति न देवस्तम विश्वस्य यादृशीत्याः ॥ यथेमिपदे ति
क्रियांविशेषणम् नानामस्येषां वाच्ययानामर्थः स्यादिति ॥ क्रियापदार्थो पलक्षणं ॥ एवं सर्वप्रप
वमन्यत्नकारणेभगवद्रूपतां विधत्ते ॥ इदं साक्षादिति प्रधानं भोग्यं पुरुषो भोक्ता तयोरीश्वरो भ
गवांस्तमेव साक्षादिति ॥ तयोरैकाभिप्रेत्यैकवचनं ॥ किं वा धारणपोषणकर्तृत्वमेवेत्याह
यतादिति ॥ ५ ॥ आत्मन ॥ प्राणः क्रियाशक्तिः जीवो ज्ञानशक्तिस्तन्मेव ॥ विभर्ति ॥ ५ ॥ ॥

श्री
भा॰ द॰
५९

ननु प्राणादीनां विचित्रशक्तीनां कारणत्वावगमात्कथं परमेश्वरस्यैव कारणत्वेन सर्वात्मकत्वमुच्य-
ते॰ अत्राशंकाप्राणादिशक्तयोपि तस्यैवेत्याह ॥ प्राणादीनामिति ॥ प्राणः सूत्रं ॥ तदादीनां विश्वसृजां
विश्वकारणानां याः शक्तयस्ताः ॥ परस्य परमकारणस्यैव वस्तुतः पारतंत्र्यात् ॥ यथा बोधशक्तिर्निःश्वा-
सस्य अपि तु पुरुषस्य तद्वदित्यर्थः ॥ ननु भगवतः ॥ प्राणादिवर्गस्य च साम्यं समेव किं न स्यात् ॥ अत-
आह ॥ वैसादृश्यात् द्वयोरिति ॥ चेतनाचेतनत्वेन वैसादृश्यात् ॥ द्वयोश्चेतनप्राणादिवर्गस्य चेतन

प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः ॥ पारतंत्र्याद्वैसादृश्याद्द्वयोश्चेष्टैव चे-
ष्टताम् ॥ ५ ॥

पारतंत्र्यमेव युक्तमित्यर्थः ॥ यद्वा ॥ प्राणादिषु द्वयोरेतत् ॥ वनादि सदृशानां विरुद्धक्रियाकारित्वात् ।
किंत्वनर्वहूनां न स्यादेकेन सर्वेशेन सर्वशक्तिनाधिष्ठितानां कार्याणामेव विशिष्टकार्यारंभकत्वं युक्तं
न स्वातंत्र्येणेति ॥ तथा चोक्तं ॥ यदैते संहता भावा महदिंद्रियमनो गुणाः यदायतननिर्माणे न शेकुर्ब्र-
ह्मवित्तम ॥ तदा संहत्य चान्योन्यं भगवच्छक्तिचोदिताः ॥ सदसत्त्वमुपादाय चोभयं ससृजुर्ह्यदः इति तथा
नानात्वात्क्रियावैषम्यः ॥ प्रोक्तः ॥ जलयोर्हिमवह्न्यादि ॥ ननु प्राणादीनां क्रियाकारित्वं [illegible] भावे वस्तु-
तः स्यादत आह ॥ चेष्टैव चेष्टतामिति ॥ [illegible] ॥ [illegible] व न शक्तिः यथा वा
[illegible] ॥ अत्र भाव [illegible]

५९

...यशांसगाविशंकनककोडवलोयलमालोनिवीपशावम...
...रस्तेयसूाः साक...

अनुजो विदुरः पार्थायुधिष्ठिरभीमार्जुना द्वयः यमौ नकुलसहदेवौ॥ मोहदेन क्लिन्नानि चेतांसि येषां तेमनो रथायत्तविषयः तेमेवमहार्णवं स्थूणांबलेन योमीनाज्ञानेनामीत्यर्थः कुवत्तत्राह॥ अस्मास्विति॥ ५१॥ कृतानि पुत्रैरुपकारमजानतम्॥ सर्वमेभवद्भिरप्रमितिकल्पा॥ अनुपमामैत्रीयमपिता॥ प्रत्युपकारशून्यापि कर्हिचित्

धृतराष्ट्रोऽनुजः पार्थाभीष्मोद्रोणः पृथायमौ॥ नारदोभगवान्व्यासः सुहृत्संबंधिबांधवाः॥ ५४॥ बंधूनुत्तिष्ठन्स्वयहत्नोहृदाक्लिन्नचेतसः॥ यथुर्विरहकृच्छ्रेण स्वदेशांश्चापरेजनाः॥ ५५॥ नंदस्तु सहगोपालैर्बृहत्याप्रजयार्चितः॥ कृष्णरामोग्रसेनाद्यैर्न्यवात्सीद्बंधुवत्सलः॥ ५६॥ वासुदेवोंजसोत्तीर्यमनोरथमहार्णवं॥ सुहृद्वृतः प्रीतमनानंदमाहकरेस्पृशन्॥ ६०॥ **वसुदेव उवाच**॥ भ्रातरीशकृतः पाशोनृणांयः स्नेहसंज्ञितः॥ तंदुस्त्यजमहंमन्येशूराणामपियोगिनां॥ ६१॥ अस्मास्वप्रतिकल्पेयंयत्कृताज्ञेषुसत्तमैः॥ मैत्र्यर्पिताफलावापिननिवर्तेतकर्हिचित्॥ ६२॥ प्रागकल्पाश्चकुशलं भ्रातर्वोनाचरामहे॥ अधुनाश्रीमदांधाक्षानपश्यामः पुरः सतः॥ ६३॥ माराज्यश्रीरभूत्पुंसः श्रेयस्कामस्यमानद॥ स्वजनानुतबंधून्वानपश्यतिययांधदृक्॥ ६४॥ एवंसौहृदशैथिल्यचित्तआनकदुंदुभिः॥ रुरोदतत्कृतांमैत्रींस्मरन्नश्रुविलोचनः॥ ६५॥

त॥ यद्यस्मान्ननिवर्तते॥ तस्मादीश्वर॥ पाशोयंभवतातिगम्यतइत्यर्थः अफलत्वमेवाह॥ ६२॥ प्रागिति हेभ्रातः अकल्पात्॥ असमर्थत्वात्॥ च॥ कुशलंप्रियंनहितमाचराम॥ कृतवंतोवयं॥ श्रीमदेनांधास्तीक्ष्णयेषांतेराज्यश्रीर्माभूत्॥ छांदसोऽडभावः॥ ६४॥ ॥ ॥

अथश्रीहरितिष्ठात निर्गमे॥ अथैवापराह्णेगमनताभिति॥ अपराह्णेनिर्गमेश्रीरामपताभिति॥ पुनःपुनरेवंमा
तितःयपिताःमहतासैमेन प्रष्ट्यापितः॥ यदुदेवसमहोत्सवंयज्ञादिलक्षणंस्वह्लंसंदर्शनादिकंचेति॥ ॥ इति
श्रीभागवतेभावार्थदीपिकायांचतुश्चत्वारिंशोऽध्यायः॥ ४४॥ पंचाशीतितमेरामकृष्णौसंप्रार्थितौस्वतो॥ पि

तंदत्तसप्रभुःप्रियकृत्प्रेमणागोविंदरामयोः॥ अयस्थइतिमासांस्त्रीत्वइभिर्मीतितोवसत॥ ४५॥ ततः
कामैःपूर्यमाणाःसव्रजंसहबांधवः॥ परार्ध्याभरणैःक्षौमनानानर्घ्यपरिच्छदैः॥ ४६॥ वसुदेवोग्र
सेनाभ्यांकृष्णोद्धवबलादिभिः॥ दत्तमादाययारिवर्हयापितोयदुभिर्ययौ॥ ४७॥ नंदोगोपाश्चगोप्यश्च
गोविंदचरणांबुजे॥ मनःक्षिप्तंपुनर्हर्तुमनीशामथुरांययुः॥ ४८॥ बंधुषुप्रतियातेषुवृष्णयःकृष्ण
देवताः॥ वीक्ष्याब्दंसमासंत्तोयदुर्हारवतीपुनः॥ १०॥ जनेभ्यःकथयांचक्रुर्यदुदेवमहोत्सवं॥ यदा
सीत्तीर्थयात्रायांसुहृत्संदर्शनादिकम्॥ ५१॥ इतिश्रीभागवतेदशमस्कंधेचतुश्चत्वारिंशोऽध्यायः॥ ८४॥
शुकउ० अथैकदात्मजौप्राप्तौकृतपादाभिवंदनौ॥ वसुदेवोभिनंद्याहप्रीत्यासंकर्षणाच्युतौ॥ १॥ मुनी
नांसवचःश्रुत्वापुत्रयोर्धामसूचकम्॥ तद्वीर्यैर्जातविस्रंभःपरिभाष्याभ्यभाषत॥ २॥

त्रेतातनयोमाब्रेमस्तासुत्रानयच्छतां॥ ॥ नंदधेत्वाऊरुत्वेत्रेयात्रायांसहृदोबहून तन्वक्तानंततःपित्रो
रादिशान्तरंतसहृत्भिः॥ १॥ धामप्रभावसान्तस्तंचकाजातविस्रंभः॥ उत्पन्नविश्वासःपरिभाष्यसंबोध्य॥ २॥

॥ ॥ २॥ ॥ ॥

...ण्यापृष्टांरागविशंकतनकृद्वेडवल्गोत्तमालोतिवीपमाद्र...
...त्वा स्नेतयस्याः साकं...

वित्तैषणामिति ॥ वित्तफलभूतैर्यज्ञदानैश्च वित्तैषणां वित्तेच्छां विसृजेत ॥ पुत्रैर्दारैर्गृहैश्च वित्तैर्भोगैर्दारसुतैषणां विसृ
जेत ॥ तदनुभवेनैव वनवासोत्सुकमतिर्गृहमेदेहसुते आत्मनः स्वर्गादिलोकैषणां कालेन तथानुसंधानेन विसृ
जेत ॥ देवहेवस्तदेवकालेन देवानामपि सत्तु नामत्तन्देहतनेश्वर्यं ॥ १० ॥ अत्रावादेशमाणायति यामऋ
वित्तैषणां यज्ञदानैः पुत्रैर्दारसुतैषणां ॥ आत्मलोकैषणां देवकालेन विसृजेद्बुधः ॥ ११ ॥ यामित्य
नश्च ऋणान्यपि त्रीणि यज्ञमनस्तैत ॥ त्वं त्रयमुक्तो दाम्यो वैश्रविपिशोर्महामते ॥ १२ ॥ यत्तैर्देवर्षिणेत
मचानिर्ऋणोगमशरणाभव ॥ वसुदेवभवान्नूनं भक्त्या परमयादृतिं ॥ जगतामीश्वरं प्राचैः सयदश
पुत्रतां गत ॥ १३ ॥ श्रीशुक उ० ॥ इति तद्वचनं श्रुत्वा वसुदेवो महामनाः ॥ तानृषीनृत्विजो वव्रे
मूर्ध्नानम्य प्रसाद्य च ॥ १४ ॥ तमपननस्वर्षयो राजन्नृणानाथर्मेणधार्मिकं ॥ तस्मिन्नयाजयन्क्षेत्रेमखैरुत्तम
कल्पकैः ॥ १५ ॥ तद्दीक्षायां प्रवृत्तायां वृष्णयः पुष्करस्रजः ॥ स्नाताः सुवाससोराजन्राजानः सुष्ठुलं
कृताः ॥ १६ ॥ तन्महिष्यश्च मुदिता निष्ककण्ठ्यः सुवाससः ॥ दीक्षाशालामुपाजग्मुरालिप्ता वस्तुपाणा
विभ्यः यज्ञेनदेवेभ्यः प्रजयापितृभ्यश्चादितान्यनिस्तीर्य तेषामृणानामनपाकृत्य तथा च मनुः ऋणानित्री
ण्यपाकृत्य मनो मोक्षे निवेशयेत् ॥ अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः इति निर्ऋणः निर्मुक्तऋ
णः अशरणो भव शरणं व्रज ॥ किं च अविष्णुदृष्टिनानामयं क्रमः ॥ त्वं तु कृतार्थ एवेत्याहुः वसुदे
वेति ॥ प्राचैः अर्चितः यद्यस्मात् ॥ वां युवयोः आलिप्ताः कुंकुमादिभिः वस्तुपाणयः पूर्णपात्र्याद

अक्तं नेत्र॥योरंजनेन॥ अभ्यक्तं सर्वांगेषु नवनीतेन पत्नीभिः सहितो दीक्षितो विरेजे॥ जीवेशौ सर्वजीवाना-
मीशौ॥ अनुयज्ञं प्रतियज्ञं आम्नात सर्वांगाः प्राकृताज्योतिष्टोमदर्शपूर्णमासादयः॥ तेभ्यश्चोदनालिंगाता-
दिभिरतिदेशप्राप्तांगाः वैकृताः सौर्यसत्रादयः॥ तैः सर्वैः द्रव्यं पुरोडाशादि ज्ञानं मंत्रः क्रिया कर्म तेषामी

नेदुर्मृदंगपटहशंखभेर्यानकादयः॥ ननृतुर्नटनर्तक्यस्तुष्टुवुः सूतमागधाः॥४४॥ जगुः सुकं-
ठ्यो गंधर्व्यः संगीतं सहभर्तृकाः॥ तमभ्यषिंचन्विधिवदक्तमभ्यक्तमृत्विजः॥४७॥ पत्नीभिरष्टादश-
भिः सोमराजमिवोडुभिः॥ ताभिर्दुकूलवलयैर्हारनूपुरकुंडलैः॥४८॥ स्वलंकृताभिर्विबभौ दीक्षितोऽजि-
नसंवृतः॥ तस्यर्त्विजो महाराज रत्नकौशेयवाससः॥४९॥ ससदस्या विरेजुस्ते यथा वृत्रहणोऽध्व-
रे॥ तदा रामश्च कृष्णश्च स्वैः स्वैर्बंधुभिरन्वितौ॥५०॥ रेजतुः स्वसुतैर्दारैर्जीवेशौ स्वविभूतिभिः॥ ई-
जेऽनुयज्ञं विधिना अग्निहोत्रादिलक्षणैः॥५१॥ प्राकृतैः वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरं॥ अथर्त्वि-
ग्भ्योऽददात्काले यथाम्नातं सदक्षिणाः॥५२॥ स्वलंकृतेभ्योऽलंकृत्य गोभूकन्या महाधनाः॥ पत्नी-
संयाजावभृथ्यैश्चरित्वा ते महर्षयः॥५३॥ सस्नू रामह्रदे विप्रा यजमानपुरःसराः॥ स्नातोऽलंका-
रवासांसि वंदिभ्योऽदात्तथा स्त्रियः॥५४॥ ततः स्वलंकृतो वर्णानाश्वभ्योऽन्नेन पूजयत्॥ बंधून्स-
दारान्ससुतान्पारिबर्हेण भूयसा॥५५॥ विदर्भकोसलकुरून्काशिकेकयसृंजयान्॥ सदस्यर्त्वि-
क्सुरगणान्नृभूतपितृचारणान्॥५६॥ श्रीनिकेतमनुज्ञाप्य शंसंतः प्रययुः क्रतुम्॥५७॥

पत्नीसंयाजः पत्नीसंयाजैः आवभृथः स्नानं तदंगैः॥ आश्वभ्यः श्वपाकपर्यंतेभ्योऽन्नेनापूजयत्॥ बंधादीन्॥ चारणांतान्
पारिबर्हेण प्रीतिदानेन पूजयत्॥ ते च सर्वे प्रययुः॥ प्रयाणे केषांचिद्विशेषणमाह॥ धृतराष्ट्र इति द्वाभ्यां

...यये स्तुभ्यं यद्या रागविशंकनक बोड वलो स्तमा लो तिवी प्रशावृम्प...
...नीशेस्तो यस्मि न्हस्तेय स्पः साक वर्षे...

एवं त्वां त्वां नाम मा आवेशुः स्म आदि तत्स्व विषयेषु इंद्रियेहया इंद्रियप्रवृत्तिः सैव माया तया विभ्रमच्चित्तो न वेद स्मृतेर्विवेकस्योपप्लवान्नाशात् ॥ अघौघमर्षं नाशं करोति यत्तीर्थं गंगाख्यं तीर्थं तस्यास्पदमाश्रयं ॥ ते तं सुविपक्वयोगैर्हृदि कृतं केवलं न तु दृष्टं तस्य ते अंघ्रिं ददृशिम दृष्टवंतो वयं ॥ बहुभिः पुण्यैः अतोस्मान्भक्ताननुगृहाण ॥ भक्तान्कुतः तु यदं ऊर्ध्वि त्यर्थः ॥ न तु किं भक्ता यथा पूर्वं तपः प्रवृत्ता भिमतिनस्ताकुः उत्सिक्तया भक्त्या ॥ उपहता आशया भावा जीवयोपद्रवः ... कोशो येषां ते एवं पूर्वं भवद्गतिमापुः नान्य इति ॥ उपसंगृह्य चरणौ पाणिभ्यां

एवं त्वा नाम मावेशुर्विषयेष्विंद्रियेहया ॥ मायया विभ्रमच्चित्तो न वेद स्मृत्युपप्लवात् ॥२५॥ तस्याद्य ते ददृशिमांघ्रिमघौघमर्षतीर्थास्पदं हृदि कृतं सुविपक्वयोगैः ॥ उत्सिक्तभक्त्युपहताशयजीवकोशा आपुर्भवद्गतिमथानुगृहाण भक्तान् ॥२६॥ शुक उ० ॥ इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरं ॥ राजर्षे स्वाश्रमान्गंतुं मुनयो दधिरे मनः ॥२७॥ तद्वीक्ष्य तानुपव्रज्य वसुदेवो महायशाः ॥ प्रणम्य चोपसंगृह्य बभाषेदं सुयंत्रितः ॥२८॥ वसुदेव उ० ॥ नमो वः सर्वदेवेभ्य ऋषयः श्रोतुमर्हथ ॥ कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यतां ॥२९॥ नारद उ० ॥ नातिचित्रमिदं विप्रा वसुदेवो बुभुत्सया ॥ कृष्णं मत्वार्भकं यन्नः पृच्छति श्रेय आत्मनः ॥ सन्निकर्षोत्र मर्त्यानामनादरणकारणं ॥ गांगं हित्वा यथान्यांभस्तत्रत्यो याति शुद्धये ॥३१॥

भूतावभाषे दर्शिनिसंधिरार्षः ॥ सर्वदेवा ये युष्मभ्यः ॥ यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंतीति श्रुतेः ॥ येन कर्मणा यथा कृतेन वा कर्मणां निर्हारो निरासो भवति तदुच्यतां ॥ श्रीकृष्णं हित्वास्मान्पृच्छतीति विस्मितान्प्रत्याह नारदः ॥ नातिचित्रमिति ॥३०॥ बुभुत्सया बोद्धुमिच्छया तत्रत्यः गंगातीरवासी ॥ श्रीकृष्णसंभवत्वमात्तो विद्याविजृंभितत्वात् ॥ यस्येति द्वाभ्यां ॥३१॥

भा॰ द॰ ८४

अनुभूतिर्लीनं कृतश्चिदर्पितविष्यति॥ ततसपति॥ वदेवाह कालेनकर्कटिकाफलवत् अस्यविश्वस्यलये
समादिनापिस्वतन्त्रश्चविशुद्धश्चदिवत॥ ततसपतीति॥ अत्रसाधुमुक्तरादिवत॥ घटादेर्गुणातेभूपाद्यंतरोस्मदो
वर्शवर्द्धपादि॥ नादेहादित्तिमेवकृतश्चिदप्यादृतानुभवं अतएवेश्वरं॥ किंच॥ अद्वितीयंकृत्स्नं अत्रः प्राकृतः
उपगूढमाक्लन्नेमनुष्यमस्मेत॥ के क्लेशकर्मादिभि॥ तत्रक्लेशारागादयस्तत्सर्वकाणिकर्माणिच॥ तत्प
विपाकेसावङ्ः विचसत्वादिगुणानांपुनः प्रवादस्तैः प्राणादिभिस्त्रस्वविभवैः सकार्यैः अवष्टंभः॥ मे

यस्मात्नुभूतिः कालेननयोत्मयादिनासर्वैः॥ सर्वोत्पन्नात्गुणानोतकृतश्चिन्नविष्यति॥ ३२॥ तं क्लेशक
र्मपरिपाकगुणप्रवाहैरव्याहृतानुभवमीश्वरमद्वितीयं। प्राणादिभिः स्वविभवैरुपगूढमन्यो मन्ये
तपुरुषमिवमेव हि मायागौः ॥३३॥ पुरुष उ॥ अथो नु मुंनयोराजन्नाभाष्यानकडंडभिः॥ सर्वेषां भाव
तोरां नाथ वा सुतरामयो ॥३४॥ मुनयऊचुः॥ कर्मणाकर्मनिर्हारएषसाधुनिरूपितः॥ यच्छ्रद्धयाय
जेद्विष्णुं सर्वयज्ञेश्वरंमखैः॥ ३५॥ चित्तस्योपशमोयोवैकविभिः शास्त्रचक्षुषा॥ दर्शितः सुगमोयोगो
धर्मश्चात्ममुदावहः॥ ३६॥ अयंस्वस्त्ययनः पंथा द्विजातेर्गृहमेधिनः॥ यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येतपू

वह्निमायगौः अमत्तधारगाकुभिः स्वविभवैः सूर्यमिवेति॥ चित्तस्योपशमः उपशमहेतुः योगः मोक्षोपा
यश्चशनैरात्ममुदमावहतीति तथा सुगमः कृत्स्नाश्रयत्वात्॥ यमश्चश्रावणपकः॥ अत्रयथाविदितकर
णेनमालिन्यप्रसंगात्॥ ननु॥ नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुरित्यादितात्यगोस्यवावि
दितत्वात्कथंकर्ममोक्षोपायइत्याशंक्य आदावेवत्यागस्याशक्यत्वादित्याशयेनाहुः अयमितिस्वा
र्थवद्भिः स्वस्त्ययनः स्वस्तितेमः॥ [illegible] वेनसुद्धेनामेन वित्तेनद्रव्य

...न्मभ्यां वह्यां ... गविशं केनकवोडवलो ... मालो तिवीयमान...

आत्मबुद्धिरहमितिबुद्धिः त्रयो धातवः वातपित्तश्लेष्माणः प्रकृतयो यस्य तस्मिन् ॥ कुणपे शरीरे स्वधीः स्वीया र
इति बुद्धिः भौमे भूविकारे प्रतिमादौ इज्यधीः देवताबुद्धिः सलिले यस्य तीर्थमिति बुद्धिः अभिज्ञेषु तत्त्वविज्ञु यस्यैता
बुद्धयो न सन्ति ॥ स एव गोषु पि खरः दारुणः अत्यविवेकी ॥ यद्वा गवां तृणादिभारवाहः खरो गर्दभ इति ॥ दुरन्वयं
अनुरूपं यन्मन्तीः अनवस्थिता धीर्बुद्धिर्येषां ते ईशितव्यतां अधीश्वरतामकर्माधिकारतां जनसंग्रह मा च मेत
दिमृद्भुः स्मयतः हसन्तः अनन्वयं विहायैतत् आहुः इत्यर्थः ॥ यन्मायायेति ॥ १५ ॥ तत्त्वविदुत्तमा अपि वयं यन्माय
या विमोहिताः काः सो मायायाया मोहिता इति नामाहुः यदिति यद्यस्मात् ॥ ईहया न वचेष्टितेन गूढः सन् ईशि

यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः ॥ यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्व
भिज्ञेषु स एव गोखरः ॥ श्रीशुक उ० ॥ निशम्येत्थं भगवतः कृष्णस्याकुण्ठमेधसः ॥ वचो दुरन्वयं विप्रास्तूष्णी
मासन्भ्रमद्धियः ॥ १४ ॥ चिरं विमृश्य मुनय ईश्वरस्येशितव्यताम् ॥ जनसंग्रह इत्यूचुः स्मयन्तस्तं जगद्गुरुम् ॥ १५ ॥ मु
नय ऊचुः ॥ यन्मायया तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः ॥ यदीशितव्यायति गूढ ई
हया अहो विचित्रं भगवद्विचेष्टितम् ॥ १६ ॥ अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा
भौमैर्हि भूमिर्बहुनामरूपिणी अहो विभूम्नश्चरितं विडम्बनम् ॥ १७ ॥

नव्या यतिः अनीश्वरवदाचरति भवान् नन्व
हमीश्वर एव किमित्येवमाचरेयं ॥ तत्राहुः अहो इति भगवतस्तव विचेष्टितं विचित्रं अतर्क्यं भगवत्त्वमेवाहुः
अनीह इति ॥ १६ ॥ अनीहः अक्रिय एव आत्मना स्वरूपमात्रेण बहुधेत्यत्र दृष्टान्तः ॥ यथा भौमैरिति भौमैः
घटादिविकारैः रूप्यते लक्ष्यते ॥ वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः ननु कथं
मदं जगत् ॥ सृष्ट्यादिकर्तृत्वं स्वदेवपरं नादिति ॥ तत्राहुः अहो इति ॥ विभूम्नः परिपूर्णस्य तवेदं जन्मादिचरि

सत्वं शुद्धं सत्वात्मकं बिभर्षि॥ स्वलीलया आचारेण वेदपथं च बिभर्षि॥ अत एव ब्राह्मणो भवत् मानमपि करो
षीति सहेतुकमाहुः॥ ब्रह्मन्निति ब्रह्म वेदाख्यं शुक्लं शुद्धं ते हृदयं अंतरंगरूपं तत्र ज्ञानमत आहुः यत्रेति॥ यत्र ब्रह्म
णि व्यक्तं कार्यं अव्यक्तं कारणं ततः परं सन्मात्रं केवलं च तत्पदमादिभिरुपलब्धं तद्ब्रह्म तस्मिन्हेतुर्हृदयत्वादे
द प्रवर्तकं ब्रह्मणाकुलं शास्त्रयोनेर्वेदप्रमाणकस्य तव सद्धाम श्रेष्ठमुपलब्धिस्थानं सभाजयसि तत्र स्मा
द्धेदकारणात्॥ त्वं ब्रह्मण्यानामग्रणीर्मुख्यः तत्प्रवर्तकः सत्कर्मी च वर्तसीत्यर्थः तस्मादीश्वरस्य तव वेदजन

अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्वं खलनिग्रहाय च॥ स्वलीलया वेदपथं सनातनं वर्णा
श्रमात्मा पुरुषः परो भवान्॥१९॥ ब्रह्मंस्ते हृदयं शुक्लं तपः स्वाध्यायसंयमैः यत्रोपलब्धं सद्व्यक्तम
व्यक्तं च ततः परं॥२०॥ तस्माद्ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्त्वमात्मनः॥ सभाजयसि सद्धाम तद्ब्रह्मण्याग्र
णीर्भवान्॥२१॥ अद्य नो जन्मसाफल्यं विद्यायास्तपसो दृशः॥ त्वया संगम्य सद्गत्या यदंतः श्रेय
सां परः॥२२॥ नमस्तस्मै भगवते कृष्णायाकुंठमेधसे॥ स्वयोगमायया छन्नमहिम्ने परमा
त्मने॥२३॥ न यं विदंत्यमी भूपा एकारामाश्च वृष्णयः॥ मायाजवनिकाछन्नमात्मानं कालमी
श्वरं॥२४॥ यथा शयानः पुरुष आत्मानं गुणतत्वदृक्॥ नाममात्रेंद्रियाभातं न वेद रहितं परं॥२५॥

संग्रहमात्रं वयं तत्र च संगत्या कृतार्था इत्याहुः॥ अद्येति षड्भिः॥२०॥ सतां संगत्या त्वया संगं प्राप्य यस्मा
त्वं॥ श्रेयसां परोवधिः॥ एकस्मिन्नेव स्थाने आरामो येषां ते अपि कालसृष्ट्यादिकारणमीश्वरं नियंता
रं॥ एतन्महदाश्चर्यमिति आहुः॥ यथेति शयानः स्वप्नान्॥ पश्यन्॥ यद्गुणतत्वदृक् स्वप्नविषये द्रष्टा तत्वदृष्टिः।
नाममात्रं इंद्रियेण आभातं स्वप्नसाक्षिभानं सिद्धं बाह्यादिरूपमात्मानं वेद न इति तं॥ देवदत्तादिरूपमात्मानं

श्री ३० ९२

...मैतात्पुरीष्ययोस्ताभ्यां पद्भ्यां गविशंकेन कबोड्वलोरतमालोतिवीयमानस्य...
...मकोशेयवस्त्रसंवीतोऽङ्गसो यस्मिंस्तरहस्तेयस्मा: साक्वर्षीद्रत...
...मार ॥ ...

देशाधिपत्यं साम्राज्यं सार्वभौमं सप्तद्वीपाधिपत्यं भोज्यं तदुभय भोगभाक्कं विविधं राजते इति विराट् । तस्य भावो वैराज्यं । अणिमादि सिद्धिभाक्त्वमित्यर्थः ॥ पारमेष्ठ्यं ब्रह्मपदं आनंत्यं मोक्षं हरेः पदं तत्ताल्लोकादि । न वयं कामयामहे इति ॥ यद्वा चक्रवर्तिराज्यमेकच्छत्रं सर्वलोकानां दिक्पालतत्वमाधिपत्यानि ॥ साम्राज्यभोज्यस्वाराज्यवैराज्यानि आदधीयानि । तत्किं तर्हि । तदादरं जनपवका मयते अत आहुः श्रियः । कुचकुंकुमगंधाढ्यमिति । ब्रह्मादि सेव्यया श्रिया पि सेवितत्वादि ति भावः ॥ न तु न हि प्रतिदुर्लभत्वात् । किं तर्हि इच्छयात्र तत्राहुः ॥४॥ व्रजस्त्रियइति यत् । यथा गावः गाः

न वयं साध्वि साम्राज्यं स्वाराज्यं भौज्यमप्युत । वैराज्यं पारमेष्ठ्यं च आनंत्यं वा हरेः पदं ॥४१॥ कामयामह एतस्य श्रीमत्पादरजः श्रियः । कुचकुंकुमगंधाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥४१॥ व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः । गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥४२॥ इति श्रीभागवते दशमस्कंधे त्र्यशीतितमोऽध्यायः ॥८३॥ श्रीशुक उ० ॥ श्रुत्वा पृथा सुबलपुत्र्यथ याज्ञसेनी माधव्यथ क्षितिपपत्न्य उत स्वगोप्यः । कृष्णेऽखिलात्मनि हरौ प्रणयानुबंधं सर्वा विसिस्मुरलमश्रुकलाकुलाक्ष्यः ॥१॥ इति संभाषमाणासु स्त्रीभिः स्त्रीषु नृभिर्नृषु । आययुर्मुनयस्तत्र कृष्णरामदिदृक्षया ॥२॥ द्वैपायनो नारदश्च च्यवनो देवलोऽसितः । विश्वामित्रः शतानंदो भरद्वाजोऽथ गौतमः ॥३॥ ॥

महात्मानो पि गाश्चारयंतः पादस्पर्शं च गोपा यथा वांछंति । तद्वत् । तस्य रागानां स्वलभमिति भावः ॥८३॥ इति श्रीभावार्थदीपिकायां त्र्यशीतितमः ॥८३॥ चतुर्भिरधिकाशीतितमे मुनिसमागमे । वसुदेवमखोत्साहं बंधुप्रस्थापनादिकं ॥ १ ॥ सुबलपुत्री गांधारी माधवी सुभद्रा राजानो क्षितिपानां पत्न्यः स्वगोप्यः कृष्ण समक्षं गोप्यः विसिस्मुः विस्मयं चक्रुः ॥१॥

आनर्चुः अर्चितवंतः धर्मगोप्तृ तनुर्यस्य धर्मगुप्तनुः यतानि यतावाग्यस्य तस्य सदसः ॥७॥ जन्मभृतः सफ
लजन्मानः तत्फलं जन्मफलं किं तद्योगेश्वरदर्शनम् ॥ किंच युष्माकं दर्शनं मर्चतावेद देवदेवानामपि
दुष्प्रापं अस्माकं तु स्पर्शनादिकमपि कथं तु वदितमिति विस्मयेनाह ॥ किमिति ॥९॥ स्वल्पतपसां ती
र्थस्नानादिमात्रे तपोबुद्धिर्येषां ॥ तथार्चायां प्रतिमायामेव देवबुद्धिश्चक्षुर्दृष्टिर्येषां योगेश्वरस्पर्शनादि॰

रामः सशिष्यो भगवान्वसिष्ठो गालवो भृगुः ॥ पुलस्त्यः कश्यपोऽत्रिश्च मार्कंडेयो बृहस्पतिः ॥४॥ द्वित
स्त्रितश्चैकतश्च ब्रह्मपुत्रास्तथांगिराः ॥ अगस्त्यो याज्ञवल्क्यश्च वामदेवादयोऽपरे ॥५॥ तान्दृष्ट्वा सहसोत्था
य प्रागासीनान्नृपादयः ॥ पांडवाः कृष्णरामौ च प्रणेमुर्विश्ववंदितान् ॥६॥ तानानर्चुर्यथा सर्वे सहरा॰
मोऽच्युतोऽर्चयत् ॥ स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः ॥७॥ उवाच सुखमासीनान्भगवान्धर्मगु॰
प्तनुः ॥ सदसस्तस्य महतो यतवाचोऽनुशृण्वतः ॥८॥ ॥ श्रीभगवानुवाच ॥ अहो वयं जन्मभृतो लब्धं
कार्त्स्न्येन तत्फलं ॥ देवानामपि दुष्प्रापं यद्योगेश्वरदर्शनं ॥९॥ किं स्वल्पतपसां नृणामर्चायां देवच
क्षुषां ॥ दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकं ॥१०॥ न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पु
नंत्युरुकालेन दर्शनादेव साधवः ॥११॥ नाग्निर्न सूर्यो न च चंद्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्म
नः ॥ उपासिता भेदकृतो हरंत्यघं विपश्चितो घ्नंति मुहूर्तसेवया ॥१२॥

कमिदं संभावितमित्यर्थः एतत्प्रपंच
यति नह्यम्मयानीति द्वाभ्यां ॥१०॥ वाङ्मनसयोरप्युपासनाविषयत्वं ॥ यो वाचं ब्रह्मेत्युपास्ते यो मनो ब्रह्मेत्युपा
स्त इति श्रुतेः ॥ अत एव तन्मूलमत्तानेन हरंतीति अत्र हेतुः भेदकृतो भेदकर्तारः ॥ यद्वा भेदं बुद्धिं कुर्वंतः तिरस्कृत
भेदाः तेषु हृत्तमात्रसेवयैव पापं घ्नंतीति अतः साधून्विहाय अन्यत्रात्मादिबुद्ध्यासज्जमानो तिमंद इत्याह

तत्र सकलासकलस्वैनातपुरोययोस्ताभ्यां पक्षाभ्यां गोविशं कनककोडवलो रत्नमालो निवीयपशाहूस्यपरिधा
यवनीवीवृथेनकौशिकाग्रभुतमकौशेयवस्त्रसवीडेहासो यस्मिन्स्त इहस्तेयस्य ताः साकं वर्षीयन्तः सत्नोयया
सा उद्भवः कृतलायस्मिन् ॥ कटयोस्त्रियोर्ययोस्तिगंडस्थले यस्मिन् तत्रतयस्तुव ॥ शिशिरासंतायहरोहासो
येषुतैः कदाप्तमीतैः ॥ अपागवीक्षणैर्विलासैः अनुरक्तहृदयस्य सा सादेहेयात्तसेनिद्वौ पदिश्रीकृष्णसेवैषा
मयावृत्ते सति स्पर्द्धतः स्पर्धमानाः तत्त्वेवपरमस्पर्धेहदृष्टवतोकृतः सपत्नीव सरस्तन्याद ॥ हृष्यादिताः ह

तडंगमाविशमदंकलत्तुराभ्यांपद्मौ प्रस्फुरत्कनककोज्वलरत्नमालो ॥ नूतनेनिवीयपरियाग्यवको
शिकाग्रसव्रीडहासमवदनाकवरीभूतस्रक् ॥ ४७ ॥ उत्तरीयवक्त्रपुरुकृतलकेडस्तविकृतस्थलेशिशि
रहासकदाप्तमोत्तैः ॥ राज्ञोनिरीक्ष्यपरितः श्रानकैर्मुरारे रसेवुरक्तहृदयानिदधेस्वमालो ॥ ४८ ॥
तावत्सदंगपटहाः संखभेर्यानकादयः तितडुनेटनत्रैकौनन्दतूर्याणिकाज्ञयुः ॥ ४९ ॥ एवं हृतेम
गवतिमयेशान्तपश्यपाः ॥ नसेहिरेयातसेनिस्पर्धेमोहृष्यादिताः ॥ ५० ॥ मातावद्भ्यमारोप्य
ह्यरत्नवरूथेवे ॥ शार्ङ्गसुग्रमसन्नद्धतस्थावाशैचत्तभुजेः ॥ ५१ ॥ दारुकश्चोदयामासकांचनो
पस्करंरथं ॥ मिषतांभभुजांराज्ञिमृगाणांमृगराडिव ॥ ५२ ॥ तेत्वसंजनराजन्यानिषेदुपथि
केचन ॥ संयताउद्भूतेषामायामसिंहाययथाद्विरिम ॥ ५३ ॥
कथेनकामेनार्दितावित्रशः कामवि
ह्वेभितास्यर्थेतिभावः दृयरत्नांनाचनद्दष्यंयस्मिन् ॥ तंरथहराभ्यामालिंगयपतुर्वीणोपूहीत्वाचचतुर्थ
जसतस्थौ ॥ मृगाणांमिषतांमृगराडिव ॥ तदाहरिर्जगामेतिशेषोज्ञातव्यः दारुकस्सैववामृगराजो
पमास्रवसज्जेनराजन्याः ऊष्टतः यातावभूवुः निषेद्धुंप्रतिपथंकंर्तुकेचनपुरुत्तोगात्वायथिसय
तावुभद्रविलसधिः ॥ उहतेषामाः उर्ध्वीकृतचापाः यामसिंहास्थानोद्वारिसिंहंयथेथि ॥ ५३ ॥

भा॰ उ॰ ४०

रविंछादयंतीति रविच्छदाः ध्वजेभ्यः पटाय स्यांविविचित्राणि तोरणानि यस्यां सेवसा ॥ साचत्वा ऊशास्यं लीयड॰
पतिः समाविशत् ॥ स्वकेतनं तं मंडलं ग्रस्तास्मलं वा महार्हवासः प्रभृतिभिः सुहृदः पूजयामास दासादिभिः
सह आयुधानि ॥ पूर्णाय पिदद्दौ इमा ग्रष्टौ वयं सर्व संगनिवृत्या ॥ तपसा स्वधर्मेण श्रद्धा सा तात् तस्य
गृहदास्यो बभूविम दिति जयेदिग्विजये जिता नां राज्ञां कन्याः नः ग्रस्मान् तेन रुद्धा ज्ञात्वा ततो निर्मुच्य

तेषां दुंदुभि ववृत वाणीणानैः कृतबाहुं स्त्रिकं धराः निपेतुः ॥ अथ नेके विदेके संत्यस्कुडुवुः ॥ ३४ ॥ ततः
पुरीय उपतिरप्यलंकृतां रविच्छदध्वजपटचित्रतोरणां ॥ ऊशास्य नीदिविभविवाभिसंस्तुतो
समाविशत्रर्णाणिविवस्त्वकेतनं ॥ ३५ ॥ पितामेपूजयामास सहृत्संबंधिबांधवान् ॥ महार्हवा
सोलंकारैः शय्यासनपरिच्छदैः ॥ ३६ ॥ सीदासिभिः सहसंपद्भिर्भटेभरथवाजिभिः ॥ आयुधा
नि महार्हाणि ददौ पूर्णाय भक्तितः ॥ ३७ ॥ आत्मारामस्य तस्येमा वयं वै गृहदासिकाः ॥ सर्व
संगनिवृत्याद्धा तपसा च बभूविम ॥ ३८ ॥ ॥ महिष्य ऊचुः ॥ भौमं निहत्य सगणं युधि तेन रुद्धा
ज्ञात्वाथ नः क्षितिजये जितराजकन्याः ॥ निर्मुच्य संसृतिविमोक्ष मनुस्मरंतीः पादांबुजं
परिणिनाय य आप्तकामः ॥ ३९ ॥

४०

संसृतेर्विमोक्षो यस्मात् ॥ तत्पादांबुजमनुस्मरंतीः नः परि
णिनाय ॥ उदवहत ॥ आप्तकामो यः ॥ ३९ ॥ न वयमिति ॥ साम्राज्यादि न कामयामहे किमेतस्य श्रीम
त्पादरजो मृग्या वा ऊं कामयामहे इति ॥ न तु तस्य स्पृहिरोण पूर्यं सर्वसंपन्नाजमेव कामयते ॥ अनन्ता
हुः ॥ ३९ ॥ ॥

सत्रउत्तपाः हृषभाक् ॥ बलं च वीर्यं च प्रभावश्चतोतान्युग्राणि च अतिरायितानि येषां तान् ॥ मे पित्रा कृतान्
संपादितान् ॥ बलेय सीमोदात्तुत्तितिपानां बलस्य वीर्यस्य परीक्षणाय तान्ततिप्रसिद्धान् ॥ वीराणां डुमें देह
सियेनान् ॥ तरसा शीघ्रमेव निष्पद्य दमयित्वा क्रीडन्नुतायासेनैव अजनतो कानजापयमानि वीर्यमेव शुल्कं दे
येयस्यास्तादासीभिः सह वत्तवेगिणीगजाश्चादिसेनां च शुल्कां ॥ ३ ॥ यं मिन्येकु लेदोपादतसितेव चिंतयस्या
लो ॥ मामस्तौ हिगणसेनयासह सर्वाजनैः सह येन पादस्पर्शेन ॥ आत्मवामेत केवल्याखश्रेयाभवेत्तस्य

सत्योवाच ॥ सप्तोत्तगोत्तिबलवीर्यस्तोतान्युग्राणि श्राकृता न्निमितपवीर्यपरीक्षणाय ॥ तातीर
दुर्मदहृतस्तस्मान्निपुष्कलिंजन्वंवधहृयया पिशावोजनतोकान् ॥ ३ ॥ पत्रस्य वीर्यं शुल्कांमोदासीभि
स्त्वत्तुरं गोणीं ॥ पश्यिति जित्मराजमात्रिन्यतद्दासमस्तु मे ॥ ४ ॥ मित्रविंदोवाच ॥ पिता मम
तुलेयाय स्वयमाहूय दत्तवान् ॥ कृत्स्नकृत्स्नायतश्चिन्नाम तौपदिगणपासर्वाजनैः ॥ ५ ॥ प्रसमेपाद
संसरोभवेज्जन्मनिजन्मनि ॥ कर्मभिर्भ्रामस्माणाया येनतच्छ्रेयआत्मनः ॥ ६ ॥ लक्ष्मणोवाच
ममापिरागपच्छुतजन्मक मेवक्षत्त्वाशुकृनारदगीतमासह ॥ चित्तं ॐ मुदेकिलममहृत्सापाह
तः स्तुसंविमस्पपविद्वायल्लोकपान् ॥ ७ ॥ ताता ममममतसाधिपिताडहित्तवत्सलः ॥ वृहत्सेनइ

द्ययेनकारणेन ॥ आत्मनोजीवसन्द्वेयः सएव पुरुषार्थ इति ॥ रात्तिहृद्वैापदी ॥ यथामित्रविंदायाः तथा
ममापि विंत्तमुकुंद विषयमासीत् ॥ स संप्रपसत्ति वाक्यं पञ्चस्त्यायश्रियोयतः किल अतोपिममः
विंत्तंश्रीमुकुंदेप्यासीत ॥ ८ ॥ तत्र श्रीकृष्णस्मप्रासावचीकरत् ॥ कारयामास ॥ यथाहेराजित वस्त्र यं वरे पार्श्व
सप्सया आत्मामिच्छया कृतः तथा मत्स्यं कारितवान् ॥ ९ ॥

विलाप स्तीया य म क्षीकाराट

श्री॰
भा॰ उ॰
८९

पार्थेनेपार्थस्येषुणाहतः॥ नच्छिनत्तथापि मत्स्यमर्जुनएव किं नाविध्यत॥ तत्राह॥ अयं तु तिसमत्स्यः तु हि-
रेवाच्छन्नानांतः यतः स्तंभप्रयोगार्धदृष्ट्या स लक्ष्यते॥ अयं तु न तथा॥ किं तु स्तंभमूले निहितकलशजले केवल-
दृश्यते॥ अतो दुष्टिरयं सतोऽप्यपि बलस्यामिति श्रीकृष्णव्यतिरेकेण न कस्यापि भेद्य इति भावः मत्स्यं वेद्धुं
पर्षदि संसदि मध्ये स्थितः॥ मध्ये वधार्यैव वामिति॥ अमविज्ञातो न वेद्धुं शक्य इति भावः तदेवाह॥१८॥ आदेय

यथा स्वयंवरे राज्ञां मत्स्यः पार्थेप्सया कृतः॥ अयं तु बहिराच्छन्नो दृश्यते स जले परं॥१९॥ श्रुत्वैतत्स-
र्वतो भूपा आययुर्मत्पितुः पुरं॥ सर्वास्त्रशस्त्रतत्त्वज्ञाः सोपाध्यायाः सहस्रशः॥२०॥ पित्रा संपूजिताः
सर्वे यथावीर्यं यथावयः॥ आददुः सशरं चापं वेद्धुं पर्षदि मद्धियः॥२१॥ आदाय व्यसृजन्केचित्स-
ज्यीकर्तुमनीश्वराः॥ आकोष्ठं ज्यां समुत्कृष्य पेतुरेकेऽमुनाहताः॥२२॥ सज्जं कृत्वापरे वीरा मागधा-
म्बष्ठचेदिपाः॥ भीमो दुर्योधनः कर्णो नाविदंस्तदवस्थितिं॥२३॥ मत्स्याभासं जले वीक्ष्य ज्ञात्वा च त-
दवस्थितिं॥ पार्थो यत्तोऽसृजद्बाणं नाच्छिनत्पस्पृशे परं॥२४॥ राजन्येषु निवृत्तेषु भग्नमानेषु
मानिषु॥ भगवान्धनुरादाय सज्जं कृत्वाथ लीलया॥२५॥ तस्मिन्संधाय विशिखं मत्स्यं वीक्ष्य सकृ-
ज्जले॥ छित्वेषुणापातयत्तं सूर्ये चाभिजिति स्थिते॥२६॥ दिवि दुंदुभयो नेदुर्जयशब्दयुता दिवि
ति॥ अमुना चापेन ता अविदन्॥ तदवस्थितिमिति॥ देवाश्च कुसुमासारान्मुमुचुर्हर्षविह्वलाः॥२७॥
मागधादीनां क्रियाशक्तिरेव न तु न लक्ष्याभिज्ञानेत्यर्थः॥ यत्तः यत्नवान्॥ असृजत्॥ मुमोच मत्स्यबा-
णमस्पृशन्नाच्छिनत्॥ परं केवलं पस्पर्श॥ ज्ञात्वा ज्ञानवानर्जुनः बलेनाप्राप्य इत्यर्थः सर्वार्थसाधके मुहू-
र्ते भगवत्याभिहर्षनिर्भरत्वान्तःसेवार्थायत्याद्दृष्ट्वा॥ तदङ्गमिति॥२७॥॥

८९

[illegible] ॥ [illegible] ॥

द्विवेति पदद्वयं॥ तानंवाहि॥ एवमात्मैवतनाः स्मेत्यर्थः आत्मधामात्मस्वरूपप्रकोशेन॥ विधुतानिरस्तात्मात्मकृता
बुद्धिनिर्मिताहिसेवावस्थायस्मिंस्तं॥ अत एवानंदसंप्लवं॥ सर्वानंदकदंबरूपं॥ अखंडमपरिछिन्नं॥ यतोनकुं
ठितः बोधछिन्नक्रियं स्यतेनत्वेवंरूपता श्रीकृष्णस्य कुतोमहादिवसनीतेरत्न॥ प्राकृतः कालोपसृष्टे
तित्कालेनोपसृष्टो विलुप्ताश्चतेयेतिगमाश्चतेषामवतेरत्नणार्थं॥ आत्मोपमानायोगमायया आकृति
नेराकारामूर्तिर्येनतंपरमहंसानांगतिंतां॥ अतस्त्वैवंरूपत्वादस्माकं चलन्मायायापतन्त सर्वदैव परीत्याः
हित्वात्मधामविधुतात्मकृतत्र्यवस्थमानंदसंप्लवमखंडमकुंठबोधं॥ कालोपसृष्टनिगमावनये
गमाययात्तकृतिं परमहंसगतिं नताः स्म॥ ४॥ ऋषिरुवाच॥ इत्युत्तमश्लोकशिखामणिं जनेष्वभि
द्रुपद्युवाच॥ ॥ हे वैदर्भि भद्रे हे जांबवति कौसल्ये॥ हे सत्यभामे कालिंदि शैब्ये रोहिणि लक्ष्मणे
ष्टुवत्स्वंधककौरवस्त्रियः॥ समेत्य गोविंदकथा मिथोऽगृणंस्त्रिलोकगीताः शृणु वर्णयामि ते॥ ५॥
६ हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवान्स्वयं॥ उपयेमे यथा लोकमनुकुर्वन्स्वमायया॥ ७॥ रुक्मिण्यु
वाच॥ चैद्याय मार्पयितुमुद्यतकार्मुकेषु राजस्वजेयभटशेखरितांघ्रिरेणुः॥ निन्ये मृगेंद्र इव
भागमजावियूथात्तच्छ्रीनिकेतचरणोऽस्तु ममार्चनाय॥ ८॥
तामेवतनाः स्मेति यद्वा नामिति
करणाय॥ ज्ञातत्वं त्वानतः स्मकिंकृत्वा॥ आत्मधामहित्वा॥ आत्मा शरीरं यथा मदृढंतत्र ब्रुतद्वैदेहदेहिक
सर्गोपरित्यज्येत्यर्थः समाननमन्यत॥ त्रिषु लोकेषु गीताः कौसल्ये हे सत्ये शैब्ये मित्रविंदे रोहिणी नाम
काचित्षष्ठमहिषी तत्पत्न्या॥ हे कृष्णपत्न्यः श्रीकृष्णस्य सपत्न्यः मामाम पर्यितं राजसमाजराशं यथादिष्ठसत्त्व
योरामः प्रोक्तः संकर्षणः वसुदेवस्तुरोहिण्यामष्टपुत्रानजीजनत् कीर्तिमन्तंसुषेणाचभद्रसेनमु
दारधीः॥ हु सम्मर्दनंभद्रंसंकर्षणमहीश्वरम॥ अष्टमस्तुतयोरासीत्स्वयमेवहरिः किलेति॥ ७
रोहिण्यास्तनयः प्रोक्तोरामः संकर्षणस्त्वया॥ देवक्यागर्भसंबंधः कुतोदेहान्तरंविना॥ ८॥
कस्मान्मुकुन्दोभगवान्पितुर्गेहाद्व्रजंगतः॥ क्ववासंज्ञातिभिः सार्धंकृतवान्सात्वतांपतिः
९॥ व्रजेवसन्किमकरोन्मधुपुर्यांचकेशवः॥ भ्रातरंचावधीत्कंसंमातुरद्धातदर्हणम्॥ १०॥ दे
हंमानुषमाश्रित्यकतिवर्षाणिवृष्णिभिः॥ मधुपुर्यांसहावात्सीत्पत्न्यः कत्यभवन्प्रभोः
११॥ एतदन्यच्चसर्वंमेमुनेकृष्णविचेष्टितम॥ वक्तुमर्हसिसर्वज्ञश्रद्दधानायविस्तृतं॥ १२॥
नैषातिदुःसहाक्षुन्मांत्यक्तोदमपिबाधते॥ पिबन्तंत्वन्मुखांभोजच्युतंहरिकथामृत
म॥ १३॥ सूतउवाच॥ एवंनिशम्यभृगुनंदनसाधुवादंवैयासकिः सभगवानथविष्णु
रातं॥ प्रत्यर्च्यकृष्णचरितंकलिकल्मषघ्नंव्याहर्तुमारभतभागवतप्रधानः॥ १४॥ श्रीशु
कउवाच॥ सम्यग्व्यवसिताबुद्धिस्तवराजर्षिसत्तम॥ वासुदेवकथायांतेयज्जातानै
ष्ठिकीरतिः॥ वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनातिहि॥ वक्तारंपृच्छकंश्रोतॄंस्तत्पा
नर्देवक्यागर्भसंबंधस्तत्सेवोक्त॥ सकुतोचदतेइत्याक्षेपः कस्मादितिभ॥ (दसलिलंयथा १६
गवतः केसमयशंकासंभवादित्यर्थः मातृभ्रातंवकसतस्माद्यथानर्द्धश्रद्धासात्तास्मादवधी
त्॥ ननुत्ततत्दृभ्यापीडितस्यापि॥ नवकुतः श्रवणवकाशस्तत्राह॥ १०॥ नैवेतित्यक्तोदकस्या
पिममजीवनंहरिकथामृतपाननिमित्तंतदुपरमेमयपजीवितंनस्यादित्यर्थः॥ एवंसाधुवादं

...न्मन्तरनिचेदमाह॥ २१॥

तेषां मध्ये भवनक स्याप्यलेप्रत्यय इत्याह निवृत्ततर्षैरिति गानतृप्तैर्मुक्तैरित्यर्थः मुमुक्षूणामयमे
वोपाय इत्याह भवौषधादिति विषविषयिणां परमो विषयोऽयमेवेत्याह श्रोत्रमनोभिरामादिति
अपगतापशुकृय स्यात्मात्मानं हन्तीत्यपशुघ्नात् स्यात् पशुघ्नातिनन्दनिवा किंचास्म कुलदेवं तत्कु
लं अतः तत्कथैव ग्निसं श्रोतव्येत्याशयेनाह पितामहा इति अमरान् जयंतीति तैः देवव्रतो भीष्मस्त
दादयैरतिरथैः ति मिंगिलतुल्यैर्दुरत्ययं वत्सपदमिव अनल्पं कृत्वा तत्सुलीला उत्तरन्न स यत्प्लवाः ॥ श्रीकृष्ण

अवतीर्य्य यदोर्वंशे भगवान् भूतभावनः ॥ कृतवान्यानि विश्वात्मा तानि नो वद विस्तरात्
३ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् ॥ क उत्तमश्लोकगुणानुवा
दात्पुमान्विरज्येत विना पशुघ्नात् ॥ ४ ॥ पितामहा मे समरेऽमरंजयैर्देवव्रताद्यातिरथैस्ति
मिंगिलैः दुरत्ययं कौरवसैन्यसागरं कृत्वातरन्वत्सपदं स्म यत्प्लवाः ॥ ५ ॥ द्रौण्यस्त्रवि
प्लुष्टमिदं मदंगं संतानबीजं कुरुपाण्डवानां जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः
शरणं गतायाः ६ वीर्याणि तस्याखिलदेहभाजामन्तर्बहिः पूरुषकालरूपैः प्रयच्छ
तो मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन् ॥ ७ ॥ रामाय नमो नमः ॥ राम ॥

एवं भवौषधत्वेन तस्य वीर्याणि वदस्वेति तत्र यश्लोकेनान्वयः तेन केवलं पाण्डवानेवारक्षत् ॥ इदं
मदंगं शरीरं मम पितरोरूढ्रनेनावानित्याह ५ द्रौण्यस्त्रविप्लुष्टमिति ॥ द्रोणेरस्त्रेणास्त्रज्वालया दग्धमि
दं मदंगं शरीरं च कुरूणां च पाण्डवानां च संतानस्य निदानं मम मातुः कुक्षौ प्रविष्ट आत्तचक्रो योऽजुगो
पेति ६ अखिलदेहभाजां सर्वप्राणिनामन्तर्बहिः अन्तः पुरुषरूपेण बहिः कालरूपेण अन्तर्यामिरूपे
ण वपुरूपेण संसारे मृत्युमुतामृतं प्रयच्छतो वीर्याणि वदस्व बहिश्च यथा वा तत्र्यामिरूपेण

श्री भा० द० ५८

सूर्यया नवोढया॥ प्रयाणे प्रयाणार्थं रश्मीनग्रहीत्॥ पारिबर्हं उपस्करं॥ आभाष्य रेरे कंसेति संबो
ध्य हंता हनिष्यति कुलपांसनः कुलदूषणः आरब्धः उद्युक्तः कचे केशेषु नृशंसं क्रूरं महाभाग उ
त्ययंभावः स्वजन्मनि दुंदुभिघोषणाद्देवैरानकदुंदुभिघोषणाद्वा विभगवदवतारेणाश्रयत्वमंगीकार
तासंभवतीति सांत्वयन्॥ सत्त्वात्कृपाविषयत्वोपपत्तिभिस्सामसामर्थ्येण संबोधयन्॥ ३६॥ मरण

तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः॥ देवक्या सूर्यया सार्धं प्रयाणे रथमारुहत्॥ २९॥
उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया॥ रश्मीन्हयानां जग्राह रौक्मै रथशतैर्वृतः॥ ३०॥
चतुःशतं पारिबर्हं गजानां हेममालिनाम्॥ अश्वानामयुतं सार्धं रथानां च त्रिषट्शतम्॥ ३१॥
दासीनां सुकुमारीणां द्वे शते समलंकृते॥ दुहित्रे देवकः प्रादाद्याने दुहितृवत्सलः॥ ३२॥ शं
खतूर्यमृदंगाश्च नेदुर्दुंदुभयः समम्॥ प्रयाणप्रक्रमे तावद्वरवध्वोः सुमंगलम्॥ ३३॥ प
थि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक्॥ अस्यास्त्वामष्टमो गर्भो हंता यां वहसेऽबुध॥ ३४॥
इत्युक्तः स खलः पापो भोजानां कुलपांसनः॥ भगिनीं हंतुमारब्धः खड्गपाणिः कचेऽग्रहीत्॥ ३५॥
तं जुगुप्सितकर्माणं नृशंसं निरपत्रपम्॥ वसुदेवो महाभाग उवाच परिसांत्वयन् ३६ वस

भयेन हन्मीति चेत्॥ तथापि मरणस्यापरिहरणीयत्वात्॥ देहांतरस्यावश्यंभावित्वात्तत्रापि च भोगापे
क्षा स्यादन्यादीनामविशेषात्तत्र्ड्रव्येन पापाचरणम्॥ प्रत्युक्तमित्यभिप्रेत्याह॥ मृत्युर्जन्मवतामित्या
दि देहे न सदेति विधात्रा ललाटे लिखितत्वादिति॥ तथापि कालविलंबार्थं हन्मीति चेत्तत्राह अ
द्यवेति॥ अवश्यंभाविनि मरणे विलंबमात्राय पापाचरणमयुक्तमिति भावः॥ ३८॥॥

...जन्म तर्हि न चेदं...ह॥

भगवदवतारकारणमाह ॥ भूमिरित्यादित्रिभिः श्लोकैः ॥ दृप्तनृपव्याजा ये दैत्यास्तेषामनीकशतानाम
युतैर्यो भूरिभारस्तेनाक्रान्ता विभोरन्तिके उपस्थिता सती ॥ गां पौरुषीं पुरुषस्य भगवतो गां वाचं मे मत्
तः शृणुत मा चिरं यथा विलंबितं न तथैव विधीयतां चेति ॥ २१ ॥ विज्ञापनात् ॥ पुरैव पुंसावधृत इति ॥
भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः ॥ आक्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ ॥ १७ ॥ गौ
र्भूत्वाश्रुमुखी खिन्ना क्रन्दन्ती करुणं विभोः ॥ उपस्थितान्तिके तस्मै व्यसनं समवोचत ॥ १८ ॥
ब्रह्मा तदुपधार्याथ सह देवैस्तया सह ॥ जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ॥ तत्र गत्वा
जगन्नाथं देवदेवं वृषाकपिम् ॥ पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥ २० ॥ गिरं समाधौ गग
ने समीरितां निशम्य वेधास्त्रिदशानुवाच ह ॥ गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामा
शु तथैव मा चिरम् ॥ २१ ॥ पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यताम् ॥ स यावदुर्व्या
भरमीश्वरेश्वरः ॥ स्वकालशक्त्या क्षपयंश्चरेद्भुवि ॥ २२ ॥ वसुदेवगृहे साक्षाद्भगवान्पुरुषः प
रः ॥ जनिष्यते तत्प्रियार्थं संभवन्तु सुरस्त्रियः ॥ २३ ॥ वासुदेवकलानन्तः सहस्रवदनः स्वराट् ॥
अग्रतो भविता देवो हरेः प्रियचिकीर्षया ॥ २४ ॥ विष्णोर्माया भगवती यया संमोहितं जग
त् ॥ आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति ॥ २५ ॥ श्रीशुक उवाच ॥ इत्यादिश्यामरगणान्
प्रजापतिपतिर्विभुः ॥ समाश्वास्य महीं गीर्भिः स्वधाम परमं ययौ ॥ २६ ॥ शूरसेनो यदुपतिः
र्मथुरामावसन्पुरीम् ॥ माथुराञ्छूरसेनांश्च विषयान्बुभुजे पुरा ॥ २७ ॥ राजधानी ततः सामस्त
ज्वरस्तापः ॥ देवकीगर्भसंकर्षणाय ॥ वक्ष्यमाणम् ॥ मथुरा भगवान्यत्र नित्यं संनिहि
तः मोहनादिकार्यार्थे यशोदायां संभविष्यति भोजेन्द्रबन्धनागारे वसुदेवतनयप्रस्तावकथामा
ह ॥ २७ ॥ शूरसेन इत्यादि यावदध्यायसमाप्तिः ॥ मथुरायामावसन् ॥ विषयान् ॥ देशान् ॥ २८ ॥

भा
टी
४

भामः सूर्यः शौरिर्वसुदेवः यद्वा भामो भगिनीभर्त्ता कुंतीवसुदेवस्य भगिनी ॥ अतो देवकीपांडोर्भगिनीति लौकिकव्यवहारः वरान्वर्षान् ॥ वदान्य उदारः ॥ वराणां तत्पत्नीनां तर्पणेन संतोषणेन संतोषणेन ॥२५॥ स वरूथाधिपतिः सेनानीः आदिसर्गे पूर्वजन्मनि स्मरं कामं सेन तं समभिलेभे पुत्रं लब्धवती ॥२६॥ सात्वतादीनामधिप उग्रसेनः श्रीकृष्णः नृपासनाशां राज्याभिलाषं परिहृत्य या

कच्चित्कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमंग शौरिः ॥ यो वै स्वसॄणां पितृवद्ददाति वरान्वदान्यो वरतर्पणेन ॥२५॥ कच्चिद्वरूथाधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमंग वीरः यं रुक्मिणी भगवतोभिलेभे आराध्य विप्रान्स्मरमादिसर्गे ॥२६॥ कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते ॥ यमभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् २७ असूत यं जांबवती व्रताढ्या देवं गुहं योंबिकया धृतोग्रे ॥ कच्चिद्धरेः सौम्य सुतः सदृक्ष आस्तेग्रणी रथिनां साधु सांबः ॥२८॥ क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः लेभेंजसाधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापां ॥२९॥ कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः ॥ यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ॥३०॥

तव भयेन हरेः स्थितमित्यर्थः ॥२७॥ हे सौम्य ॥ हरेः सुतः तेन सदृक्षः साधु सुखमास्ते ॥ गुहं स्वामिकार्त्तिकेयं ॥ अग्रे पूर्वजन्मनि यो भवान्या गर्भे धृतः स तु युयुधानः सात्यकिः क्षेमं कुशलमास्ते ॥ फाल्गुनादर्जुनाल्लब्धं धनुषो रहस्यं येन ॥ तदीयामधोक्षजसंबंधिनीं ॥२८॥ श्वफल्कपुत्रोऽक्रूरः बुधो विद्वान् ॥ अनमीवो रोगरहितः ॥ भगवत्प्रपन्नः प्रपन्नः ॥ प्रेम्णा विभिन्नं धैर्यं यस्य सः पंचदशगुणाढ्यचेष्टत ॥ प्रेमणा विदीर्णं वि... यत्न स्वं चेष्टतामनुतरति चेष्टत आह ॥ २९॥

तत्रप्रभासेपरस्परस्पर्धयानिमित्तेनमिथोसहद्विषिः श्लोकेः॥ इति नाशे विनाशमस्मरणोत्॥ परस्परं नाशोदृष्टो
तः वेणुजं वह्निं संश्रयते यद्वनं तद्यथा दग्धं भवति॥ तयामसक्तु॥ उत्क्रमाभिश्रुत्वं॥ विनादीनामेकादशा
तीर्थानितत्रेत्यर्थानासिहासेविनवान्॥ द्विजदेवैः ऋषिभिर्देवैश्चकृतानिश्रुंगमंगप्रतिवतेने
तिमत्स्यगात्स्वाचुधान्वितेशुम्वुचक्रे तेनांकितानिमन्दिराणिहेमकुंभेशुविद्विनातियेशुमानिनाना
यानिविष्णोरायतनानिदेवगृहाणितीर्थानिचतानिषेवे॥ येषांचक्रांकितमंदिरवर्तादर्शनात्॥ ज्ञाति

तत्राथशुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयं॥ संस्पर्धया दग्धमथानुशोचन्
सरस्वतीं प्रत्यगियाय तूष्णीं॥२१॥ तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः॥ ती
र्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे॥२२॥ अन्यानि चेह द्विजदेवदेवैः कृतानि
नानायतनानि विष्णोः॥ प्रत्यंगमुख्यांकितमंदिराणि यद्दर्शनात्कृष्णमनुस्मरंति॥२३॥ त
तस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान्कुरुजांगलांश्च॥ कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भा
गवतं ददर्श॥२४॥ स वासुदेवानुचरं प्रशांतं बृहस्पतेः प्राक्तनयं प्रतीतं॥ आलिंग्य गाढं प्रणये
न भद्रं स्वानामपृच्छद्भगवत्प्रजानां॥२५॥ कच्चित्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह
किलावतीर्णौ॥ आसात उर्व्याः कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे॥२६॥

ज्ञातिक्षयमपाबुद्धवः श्रामंस्तावदयमपियमुनामुपेत्य सविदुरः प्राक्तनयं पूर्वशिष्यं नीतियाम्ने
पादौनतेयाभ्रमोनयोनीतिशास्त्रे येनतेमतीतंप्रख्यातंस्वानांज्ञातीनांभद्रंमपृच्छत्तत्प्रश्नेहेतुः॥ भगव
तः प्रजानां यो ध्यानोग्रयमंतावत॥ रामकृष्णयोः कुशलं पृच्छति॥ कच्चिदितिषड्भिः॥ स्वनाभोभवः स्व
नाभ्यः पाद्मोब्रह्मा तस्यानुवृत्त्या प्रार्थनयाऽवतीर्णौ कुशलमासाते वर्तते नेकृतक्षणोत्सवौ
सर्वं प्राकृतोत्सवा विविनिवात योर्नित्यंकुशलत्वेपि॥ उतविशेषेणाविशिष्टोप्यस्येत्सकच्चिद

५

भा
टी
२
षे १

यातिवचनानि पुंसोऽभीक्ष्णं दीनामस्तायमानानि प्रमत्तस्यावीति ॥ तानाहूतेन राज्ञः दुर्योधनेनोवा ॥ अह
बहूनमेने ॥ अनीशः पुण्यलेशो यस्य सः ॥ न सत्त्वकीर्तिः धर्मादिहेतुः पुण्यलेशो वासी तस्यापिनष्ट
त्वादनाहूतत्वानि मर्थः ॥ ५ ॥ यदानीं विदुरस्यैव वक्तृत्वे पराभवदर्शयति षड्भिः यदाश्रवेनेन मन्त्रायोपह
तौ तर्हि हे प्रविष्टामं त्रेष्टः सन् ॥ अप्यानन्तवतदाह ॥ किं मन्त्रिणो याप्युपहेतु रिकं विदुरवाकामि
निवर्तति नदाह ॥ अजातशत्रोरिति ॥ ५ ॥ तवारः अपराधं सहमानस्य दायं प्रतिपद्ये देहि ॥ यदाश्रौ
गाढेयुक्ते सहवर्तमानो हकोदरहमोहिः क्रोधेन व्यसनं ॥ वर्जते ॥ यद्यस्माममत्स्येविभेषि म

यदा च पार्थप्रहितः सभायां जनार्दनो हृष्टयानि जगाद हृष्टं ॥ ननानि शेसामस्तायमानानि
राज्ञोऽहमेने दत्तपुण्यलेशाः ॥ ६ ॥ यदैषपहृतोभवनं प्रविष्टो मन्त्रायहृष्टः किल सर्वजनेन
अयाहत तस्मंत्रयोवर्तीयान्यस्मैत्रिणो वेदुरिकं वदति ॥ ७ ॥ अजातशत्रोः प्रतिपद्ये
दायं तितिक्षतो दुर्विषहे नवाराः ॥ सहाध्वज्ञोऽयं वृकोदरो हिः स्वसन्तुष्यायतमलं वि
भेषि ॥ ११ ॥ पार्थोऽस्तदेवो भगवान्कृष्ण इतोरहीनवानस्तिति देवदेवः ॥ आत्मस्वपु
योऽयं वृद्दैव देवो विनिर्जितारोषनन्ददेवदेवः ॥ १२ ॥

मनाहयाः पुत्रावहव संतीति सर्वमाहयाः इत्याह ॥ पार्थोऽस्त्विमं कृष्ण आत्मीय त्वेन गृहीतवा
न ॥ स च देवस्तु नापि भगवान् ॥ ननु प्राकृतं किंचसहदिति देवविशेषः देवैर्ब्रह्मादिभिर्वर्जितम
नः यतोऽसौ नन्देव विष्णोर्देवा प्रेमस्थः ॥ स च स्वपृथ्वामेव स्वमायेन त्वसगुरगानं किं च यदुदे
वानादेवः इत्याह ॥ यतोऽसौ न त्रैवयदुभवी तः ॥ किं वन्ददेवे पुभस्थले स्वरेश्वर्यमिति प्रकाशयते रा
तिनन्ददेवदेवाः राजानः विनिर्जिता अशेषनन्ददेवदेवाः येन यतोऽसौ ॥ तत्रैव सर्वराजानः आ
पार्थानो दायं देहीति दुर्योधनं स्तवमम्मनत इतिचेदत आह ॥ १२ ॥

तत्र संगमम् आस बभूव ववृधे वरीयसि श्रेष्ठे अल्पार्थः उदयो यस्मात् ॥ तथाभूतो न भवति ॥ साधुवादे
न सतां मोदनेन उपबृंहितः संवर्धितः यद्वा साधोः मैत्रेयस्य वादेनोत्तरेण श्लाघितः तत्र त्वर्थं
भागान् हृत्वापि गृहत्यागे हेतुत्वेन कौरवापराधानाह ॥५॥ यदेत्यादिद्वादशभिः एतेषां च तत्र
सतत्रायथादिमेकादशश्लोकियासंबंधः ॥ यविष्ठस्यानिष्ठस्य पांडोः विबंधून् पितृहीनान् ६ कु

राजोवाच ॥ क्व ब्रह्मन् भगवता मैत्रेयेणास संगमः ॥ कदा वा सह संवाद एतद्वर्णय नः प्रभो ॥ १
न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः ॥ तस्मिन्वरीयसि प्रश्नः साधुवादोपबृंहितः ॥ ४
सूत उवाच ॥ स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता ॥ प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयता
मिति ॥ ५ ॥ श्रीशुक उवाच ॥ यदा तु राजा स्वसुतानसाधून्पुष्णन्नधर्मेण विनष्टदृष्टिः ॥ भ्रातुर्य
विष्ठस्य सुतान्विबंधून्प्रवेश्य लाक्षाभवने ददाह ॥ ६ ॥ यदा सभायां कुरुदेवदेव्याः केशाभि
मर्शं सुतकर्म गर्ह्यं ॥ न वारयामास नृपः स्नुषायाः स्वास्रैर्हरंत्याः कुचकुंकुमानि ॥ ७ ॥ द्यूते त्वध
र्मेण जितस्य साधोः सत्यावलंबस्य वनं गतस्य ॥ न याचतोऽदात्समयेन दायं तमोजु
षाणो यदजातशत्रोः ॥ ८ ॥

कुरुदेवस्य युधिष्ठिरस्य देव्या द्रौपद्याः आत्मनः स्नुषायाः स्वीयै
रस्रुभिः स्वकुचकुंकुमानि रिपुस्त्रीणां वा नदूरं वधेन हरंत्याः ॥ ७ ॥ सत्यावलंबस्य सत्याश्रयस्य
वनाय निर्गतस्य ॥ समयेन द्यूतवेलकृतेन दायं याचमानस्य यद्दानं प्रदानं न ददौ तमः मोह
जुषाणः ॥ ८ ॥

भा
टी
३

सगजाह्वयाद्विर्गतः सन् ॥ तीर्थपादस्यानंतस्य हरेः पदानि क्षेत्राणि पुण्यचिकीर्षया अन्वाक्रम
त् ॥ अत्र पद्ये तु कौरवाणां पुण्येन लब्धः इति तेषां भाग्यमेव तेन रूपेणागतमिति ॥ सूचितं ॥ उ
र्व्यां सहस्रमूर्तिः ब्रह्मरुद्रादिकेनेकमूर्तिः सन् ॥ तीर्थपदानि यान्यधिष्ठाय स्थितः तानि तानि
नगरसेव्यः ॥ १७ ॥ पुण्यानि यान्युपवनादीनि तेषु कुंजेषु लतादिगूढस्थानं ॥ अपंकानि तोयानि
येषां तेषु सरित्सरस्सु च तीर्थायतनेषु च देवक्षेत्रेषु ॥ अनंतस्य लिंगैर्मूर्तिभिः स

स निर्गतः कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि ॥ अन्वाक्रमत्पुण्यचिकीर्षयो
र्व्यामधिष्ठितो यानि सहस्रमूर्तिः ॥ १७ ॥ पुरेषु पुण्योपवनाद्रिकुंजेष्वपंकतोयेषु स
रित्सरःसु ॥ अनंतलिंगैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः ॥ १८ ॥ गां पर्यटन्मे
ध्यविविक्तवृत्तिः सदाप्लुतोधःशयनोवधूतः ॥ अलक्षितः स्वैरवधूतवेषो व्रतानि
चेरे हरितोषणानि ॥ १९ ॥ इत्थं व्रजन्भारतमेव वर्षं कालेन यावद्गतवान्प्रभासं
तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः ॥ २० ॥

समलंकृतेषु अनन्यः एकाकी ॥ १८ ॥ किंच गां पर्यटन् ॥ व्रतानि चेरे अचरत् मेध्या पवित्रा वि
विक्ता ॥ असंकीर्णा च वृत्तिर्जीविका यस्य ॥ सदाप्लुतः प्रतितीर्थं स्नातः ॥ अधः शयनं यस्य अव
धूतः असंस्कृतदेहः अवधूतवेषो वल्कलादिधारी ॥ अत एव स्वैरलक्षितः ॥ एकस्यैव चक्रं से
ना यस्यामेवातपत्रं यस्यां तां अजितेन श्रीकृष्णेन सहायेन ॥ २० ॥

॥ पुनाभिलि ...

... स्यात ॥ नरा ...

सएष महान्दोष एव गरिष्ठान्नविष्ट ग्रासेदोषवतेदेवः पुरुषद्विषश्री कुसलदेशाकोसौ पंचपद्मवुद्धा पुसा-
सि ॥ नवपद्मसमसौनवपतस्तस्मादित्यपद्मशाङ्कः ॥ गतानाश्रीयेस्मान्सन्वमिति ग्राकोशाति ॥ अतपनमशो-
वमसेगलमाग्रत्यजकयं पुत्रस्याज्यस्तनाह ॥ कलस्य कौशलाय सजेदेकं कुलस्यार्थे इति न्यायः स्म-
विवानेव सुकृवान् ॥ असौ दत्तासनं तस्य हर्णायं शीलयस्य संकर्णाङ्कः शासनशाकुनिसहिते नइर्थो
यनेन तिरस्कृतः ॥ तिरस्कारमाह ॥ कुत्र ति ॥ २४ ॥ दासीसवतोयग्राहानामनहः जिह्मश्रकुटिलः जिह्मता स-
ह ॥ यस्य वलिनाग्रन्वेन पुष्टः तस्मिन्नेव प्रतीपः प्रतिकूलः परेषांकार्ये वर्त्तते ॥ अतः पुरान्निर्वासनं तो

सएष दोषः पुरुषद्विषस्तेगरिष्ठामविष्टोयमपन्नपुद्या ॥ पुसा सिक्तस्याहिमुखोगतश्रीस्तमा-
सयैनं कलकौशलाय ॥ २५ ॥ अस्य विवासनं संघोयनेन प्रहद्रकोपस्फुरिताधरेण अ सत्कृ-
तः संस्तुहर्णीयशीलः ॥ दत्तासनकर्णीपुजसौवलेन ॥ २६ ॥ कृपनमयोपजहावजिह्मं दासां-
सवतं तह्वलिनेव पुष्टः ॥ तस्मिन्प्रतीपः परकृत्यग्राले निर्वासनमामाप्नुपुराइसानः ॥ २७ ॥
त इत्यपुत्रत्वणकर्णीवाणीभीतः पुरेमर्मसतनाडितोपि ॥ स्वंपंथतं हीरितिनिधायमायांग

तमथोयाइहमन्यमानः ॥ २८ ॥

समन् ॥ जीवमात्र शेषद्स्यर्थः यान्तंतरेषमशानवद्मंगलः
२८ ॥ अस्य स्त्रयोः कर्णयोर्वाणवत्सविशद्भिः पुरुषवाक्यैः मर्मसतनाडितोपि गतमयः तत्र हेतः मा-
यां ॥ उरूत्वदुमन्यमानः अहोमायायामहास्यमिति ॥ तामेवतत्र हेवमन्यमानः ॥ तन्निस्सारणा
सर्वनिर्गमनकिंकृत्वा ॥ पतेनूनंमविंध्यति ॥ किंयत्पुषेति ॥ नस्पहारियत्पुर्तिधायवयहाभीमा
दिभिः संगतास्सामिः योस्मतीतिनिमायांकीदितियत्पुर्तिधाने ॥ ततो निर्गतस्मतीर्थाटनप्र-
कारमाह ॥ सहत्यइभिः ॥ २९ ॥

महतां गुणानामात्मनि संपादयितुं शक्तोपि ॥ असतो गुणान्संभावनामात्रेण कः स्तावयेत ॥ यद्वा आदावेव सतोपि कः स्तावयते ॥ सत्पव प्रख्यापिसिद्धेः ॥ अन्यस्तु मिथ्यागुणस्तुतिं स्वाखादयत्याह ॥ त इति ॥ यद्यपं गायकाभ्यां मादिकं मकरिष्यत ॥ तर्ह्यस्य ते विद्यादयो गुणा अभविष्यन्निति क्रियातिपत्त्या विप्रलब्धः जनानामवहासं न वेद ॥२४॥ किंच प्रभवोपि विश्रुता अपि ह्रीमन्तो जुगुप्सन्ति ॥ चेति दृष्टान्तः यथातिस्तोत्रं यमाणा यावि गर्हितं ब्राह्मणवदादि पौरुषं निंदं नित यो चितामपि स्तुतिं न सहंत इत्यर्थः ॥२५॥ व

महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेऽसतोपि ॥ तेस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्न वेद ॥२४॥ प्रभवो ह्यात्मनः स्तोत्रं जुगुप्सन्ति हि विश्रुताः ॥ ह्रीमन्तः परमोदाराः पौरुषं वा विगर्हितं ॥२५॥ वयं त्वविदिता लोके सूताद्यापि वरीमभिः ॥ कर्मभिः कथमात्मानं गापयिष्याम बालवत् ॥२६॥ इति श्रीभागवते चतु॰ २॰ अध्यायः ॥१५॥ मैत्रेय उवाच ॥ इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः ॥ तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया ॥१॥ नालं वयं ते महिमानुवर्णने यो देववर्योवततार मायया ॥ वेनांगजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः ॥२॥ अथाप्युदारश्रवसः पृथोर्हरेः ॥ कलावतारस्य कथामृतादृताः ॥ यथो

कर्माणि वयं वितन्महि ॥३॥

रीमभिर्विततैर्दीर्घमार्पेषभवित्तस्य धानस्यायतिर्दर्पः वरिष्ठैः कर्मभिरविदिता इत्यर्थः ॥२६॥ इति श्रीचतुर्थस्कंधे भावार्थदीपिकायां पंचदशोध्यायः ॥१५॥ षोडशे सर्वलोकेशैः सम्भृतभार्ययोगयुतैः ॥ स्तुतिप्रयुक्ताः सूताद्याः स्तवनिस्ते विवर्ण्यते ॥१॥ गायकाः सूतादयः नालं समर्थाः ॥ यो भवानवतारे वयस्य साधिकामाह ॥ वेनस्यांगजातस्य ते पौरुषाणि प्रति वाचस्पतीनां ब्रह्मादीनामपि धियो बभ्रमुः भ्रान्ताः पुनर्वयं तद्वर्णने समर्था भवेम ॥२॥ अथापि यथावद्वर्णयितुमसमर्था अपि

दशाचंद्रकाराणि विवानिको शेषस्तनमसिंधवइंशानचंद्रचर्मरूपाश्रयमतिसुंदरं ॥१७॥ अनस्तगोस्य
मूलाभ्यां निर्मितेचापेयोगमध्योपादस्पर्शमात्रेणाभीष्टदेशप्रापके ॥१८॥ नागाद्रिकोशलेषुवेचराः अ
स्मिंस्तागमंव ॥१९॥ तस्मिन्नेनुसमुपस्थितः ॥२०॥ लावकाव ॥ लातमुपस्तानु ॥ अभिप्रेसन्नानां ॥२१॥ लोक
सप्तगुणास्यसमीमेस्तनिः स्यात ॥ अधुनाकिमाश्रयोमेस्तवोयोस्मतोश्रतोवः गिरोपुनामथिविनया
माभूवन ॥ यदालोकेऽधुनाग्रस्तसप्तगुणास्यमेकिमाश्रयः स्तवः स्यात ॥ अनवषविक्रियमाणाः स्तवः मद

दशाचंद्रमसिंरुद्रःशानचंद्रमध्याविका ॥ सोमोमृतमयानस्यालंबशानूपाश्रयंरथं ॥१७॥
अग्निराजगवंचापंसूर्योरश्मिमयानिषुं ॥ भूपादुकेयोगमध्येयोः पुष्पावलिमनंदं ॥१८॥
नारदस्तगीतवादित्रमनर्थानवृखेचराः ॥ मरुद्यशाशिषः सत्याः सप्तद्वंशावमान्मने ॥१९॥
सिंधवः पर्वतानयोरथवीथीमेदानवाः ॥ सूनोपमागथावेदीनेस्तोनुमुपतस्थिरे ॥२०॥
लावकास्तानभिप्रेसप्तपुर्वेसः प्रतापवान ॥ मेघनिर्ह्रादयावाचाप्रहसन्निदमब्रवीत ॥२१॥

इत्युरुवाच ॥ भोःसूतनहेमागधसाम्प्रवंदिलोकेऽधुनासप्तगुणास्यमेस्यात ॥ किमाश्रयोमेद
स्तवपृषयोस्मतामामयप्रभूवन्निनयागिरोवः ॥२२॥ तस्मात्सुरोलंस्मद्रूपाश्रितास्मलेकीर
थ्यस्तोत्रमपीथ्यवाचः ॥ सत्वतनमस्तोकगुणानुवादेस्तुपुष्टिनेनः स्तवयोनिसम्पाः ॥२३॥
मस्तयोस्मतोनतुमेवितथाक्षिमानापतेविनर्थः ॥२४॥ तस्मात्सुरोतेकालंनरेस्यपृष्टगुणाणोपुस्त
स्तुअस्माकमुपप्रकृतानियशांसिप्रतिस्तोत्रमलमस्यर्थकरिष्यथ ॥ रुत्रपीथ्यवाचः मधुरागिरः
सभ्येः पेरितावयंत्वामवस्तमउतिचेमप्रहि ॥ उनमस्तोकस्यगुणानुवादेकार्येमतिनगुप्ति
तंअर्वाचीननः ॥ स्तावयंनि ॥ ननुसंभाविनेरेवशौरात्मानेजननः स्तावयतीतिचेनप्रा ॥२५॥

श्री
भा॰ च॰
टी॰
५५

दुरासदः शत्रोर्मनसापि प्राप्तुमशक्यः दुर्विषहः प्रा[illegible]ता ऽमशक्यः ॥ विदूरवत्तेरो रूपेणाभिभवितु
मशक्यः वेन पवारुणीस्तस्मादुत्थितः ॥ ११ ॥ चारसौर्गंजस्त्रैः पश्यन् स्तोतिनिदाहीन् ॥ उदासीन इव
वृत्तिष्यते ॥ अथाऽदेहितामध्युत्तरोधिकृतन ॥ आत्मभूतो वायुः स्वात्मानहृत ॥ १२ ॥ आत्मद्विषांहनति
निस्तत्वदुःशोस्त्वात्मज साम्यापर्यधर्मपद्दतथर्मस्यमस्प्रष्टेने स्थितः ॥ १३ ॥ चक्रमासासेनावारयस्त्वा चकं
मानसाचलमभिव्याप्य प्रवर्तते नार्कपर्यंतमित्यत आहाकोवरश्मिगणोर्यावन्प्रतिनावत ॥ १४ ॥ यद्य
दुरासदो दुर्विषह आसन्नोपि विदूरवत् ॥ नेवाभिभवितुं शक्यो वेनारण्युत्थितोनलः ॥ ११ ॥ अंतर्ब
र्बहिश्च भूतानां पश्यन्कर्माणि चारणैः ॥ उदासीन इवाध्यक्षो वायुरात्मेव देहिनां ॥ १२ ॥ नादं
ड्यं दंडयत्येष सुतमात्मद्विषामपि ॥ [illegible] ॥ दंडयत्यात्मजमपि दंड्यं
धर्मपथे स्थितः ॥ १३ ॥ अस्याप्रतिहतं चक्रं पृथोरामानसाचलात् ॥ वर्तते भगवानर्को
यावत्तपति गोगणैः ॥ १४ ॥ रंजयिष्यति यल्लोकमयमात्मविचेष्टितैः ॥ अथामुमाहू राजा
नं मनोरंजनकैः प्रजाः ॥ १५ ॥ दृढव्रतः सत्यसंधो ब्रह्मण्यो वृद्धसेवकः ॥ शरण्यः सर्वभूता
नां मानदो दीनवत्सलः ॥ १६ ॥ मातृभक्तिः परस्त्रीषु पत्न्यामर्ध इवात्मनः ॥ प्रजासु पितृव
त्स्निग्धः किंकरो ब्रह्मवादिनां ॥ १७ ॥ देहिनामात्मवत्प्रेष्ठः सुहृदां नंदिवर्धनः ॥ मुक्तसंगप्र
संगोयं दंडपाणिरसाधुषु ॥ १८ ॥ पयदोग्धा महीवीरो गोसनीमाजसोषधीः ॥ समीकरिष्य
तेच मांधनुष्कोट्यासमासतः ॥ १५ ॥ अयं तु साक्षाद्भगवांस्त्र्यधीशः कूटस्थ आत्मा कलया
स्साऽइजयिष्यति ॥ अयं तस्यात्मनो रंजनैर्दंतुभिः अमुं राजानमाहुः ॥ मनोरंजनकैरिति चेष्टितवि
शेषणाच ॥ १६ ॥ मातृभक्तिर्भजनं यस्य आत्मनो देहस्यार्ध इव पत्न्या प्रीतिमान् ॥ १७ ॥ आनंदस्य
त्ववर्धयतीति तथा ॥ मुक्तसंगप्रसंगः संगोयस्य दंडपाणिरित्यपराधान् पेक्षणमुच्यते ॥ दंड्य
मित्यपत्यानाभावरूणः ॥ १८ ॥ अयमिति ॥ नृशाहेन निरूपमनर्दर्पायति ॥ कोसावात्मान

मैत्रे
१०

ततो ऽस्य देहे लोकपालानां तनूर्मूर्तीः ॥ काले काले विभजति ॥ यथाभागं पालनपोषणानुरंजनादिकार्यानुरंजनादिकार्यानुसारेण यज्ञादिप्रवर्तनेन स्वर्गस्यादिनष्टस्यादिना च भूर्लोकस्य हितं यथा भवति तथा ॥५॥ सूर्यादितनुधारणमेवाहाष्टभिः वसु धनं करादानकाले आयत्ते ॥ दुर्भिक्षादिकाले विमुंचति च ॥ अष्टौ मासान्सूर्यो यथा वसु जलमादत्ते विमुंचति च वर्षासु तद्वत् ॥६॥ मरुत्कोपादेना क्रमतामपि प्राणिनां भूतानामन्तिकं संसद्दिष्यते हि निर्वृतिः सर्वसद्गुणं साक्षान्निर्यस्यास्ति स तथा ॥३॥ दे

एष धर्मभृतां श्रेष्ठो लोकं धर्मेऽनुवर्तयन् ॥ गोप्ता च धर्मसेतूनां शास्ता तत्परिपन्थिनां ॥४॥ एष वै लोकपालानां बिभर्त्येकस्तनौ तनूः ॥ काले काले यथाभागं लोकयोरुभयोर्हितं ॥५॥ वसु काल उपादत्ते काले चायं विमुंचति ॥ समः सर्वेषु भूतेषु प्रतपन्सूर्यवद्विभुः ॥६॥ तितिक्षत्यक्रमं वैन्य उपर्याक्रमतामपि ॥ भूतानां करुणः शश्वदार्तानां क्षितिवृत्तिमान् ॥७॥ देववर्षत्यसौ देवो नरदेववपुर्हरिः ॥ कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यञ्जसेन्द्रवत् ॥८॥ आप्याययत्यसौ लोकं वदनामृतमूर्तिना ॥ सानुरागावलोकेन विशदस्मितचारुणा ॥९॥ अव्यक्तवर्त्मैष निगूढकार्यो गंभीरवेधा उपगुप्तवित्तः ॥ अनन्तमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृतात्मा ॥

देववर्षतीति एष कृच्छ्रगताः प्राणा यासां ताः प्रजाः स्वयं वृष्टिं कृत्वा रक्षिष्यति ॥ अत्र हेतुः असौ नरदेववपुर्हरिरिति ॥८॥ वदनमेवामृतमयमूर्तिश्चन्द्रः तेन सानुरागो ऽवलोको यस्मिन् विशदं स्मितं तेन चारुणा ॥ अव्यक्तविद्वर्त्म मार्गो निर्देश्यो वर्त्मानसाक्षी यस्य वर्त्मानं वदेति ॥ भूतानि दैशास्त्रप्रगांभीर्याद्भूतं नवधे गतिरित्यर्थः ॥ नवधं वर्त्म प्रवेशनिगमयोर्मा गोप्यं स्यनिगूढ निष्पन्नः पूर्वं नविज्ञातं कार्यं यस्य तत्त्वं कार्यं गंभीरं विमृश्यमेतदेवतामित्यन्यैरज्ञाताभिप्रायो वेधसः इति तथा उपगुप्तं संवरतितं वित्तं यस्य ॥ अनन्तमाहात्म्य आसौ गुणानामेकं धाम विस्तर्यस्मिन् ॥ अनन्तमाहात्म्योपेता गुणाः पृथग्स्थानं यस्येति वा ॥ संवृता संयतात्मा मूर्तिः ॥ समुद्र इव संवृतेन च रत्नात्स्याप्यते गुणाः इत्यर्थः ॥ १०॥

ततः समदर्शो लोकतत्त्वं प्रयाणमयन्पृथुः ॥ यस्तबीजो मदोदंतु यन्नोभीष्मान याल्ततः ॥ २ ॥ नंदयामास तनो
पिनवान् ॥ २ ॥ भृत्यानमात्यान् पुरोधसः पुरोहितान् श्रेणी तैलिकतोद्वलिकादीन्यौरविशेषान् प्रकृतीः
नियोगिनः ॥ २ ॥ दोहनं पात्रं ॥ ३ ॥ मेध्यं यज्ञार्थं ॥ ४ ॥ स विज्ञानमपरोक्षज्ञानसहितं ॥ ५ ॥ पूर्वदेहः पृथ्यवता

मैत्रेय उवाच ॥ एवं स भगवान्वैन्यः ख्यापितो गुणकर्मभिः छंदयामास तान्कामैः प्रतिपूज्याभिनंद्य च ॥ १
ब्राह्मणप्रमुखान्वर्णान् ॥ भृत्यामात्यपुरोधसः ॥ पौरान्जानपदान्श्रेणीः प्रकृतीः समपूजयत ॥ २ ॥ वि
दुर उवाच ॥ कस्माद्दधार गोरूपं धरित्री बहुरूपिणी ॥ यां दुदोह पृथुस्तत्र को वत्सो दोहनं च किं ॥ ३ ॥ प्रकृ
त्या विषमा देवी कृता तेन समा कथं ॥ तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत् ॥ ४ ॥ सनत्कुमाराद्भगवतो ब्रह्म
न्ब्रह्मविदुत्तमात् ॥ लब्ध्वा ज्ञानं सविज्ञानं राजर्षिः कां गतिं गतः ॥ ५ ॥ यच्चान्यदपि कृष्णस्य भवान्भगवतः
प्रभो ॥ श्रवः सुश्रवसः पुण्यं पूर्वदेहकथाश्रयं ॥ ६ ॥ भक्ताय मेनुरक्ताय तव चाधोक्षजस्य च ॥ वक्तुम
र्हसि योदुह्यद्वैन्यरूपेण गामिमां ॥ ७ ॥ सूत उवाच ॥ चोदितो विदुरेणैवं वासुदेवकथां प्रति ॥ प्रशस्य तं
प्रीतमना मैत्रेयः प्रत्यभाषत ॥ मैत्रेय उवाच ॥ यदाभिषिक्तः पृथुरंग विप्रैरामंत्रितो जनतायाश्च पालः
प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन् ॥ ९ ॥ वयं राजञ्जाठरेणाभितप्ता यथाग्नि
ना कोटरस्थेन वृक्षाः ॥ त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः ॥ १० ॥ तन्नो भवानीह
तु रातुमन्नं क्षुधार्दितानां नरदेवदेव ॥ यावन्न नंक्ष्यामह उज्झितोर्जा वार्तापतिस्त्वं किल लोकपालः ॥ ११
र ॥ तत्कथाश्रयं सह ध्रुवयोयस्य ॥ ६ ॥ जनतायाः लोकपालश्च स्वामी विनो नियुक्तः तदा निरन्ने क्षितितले सति क्षुधा
क्षामाः क्षीणदेहा यास्ताः प्रजाः पत्यपतिं पृथुमब्रुवन् ॥ ८ ॥ जाठरेणाग्निनाभितप्ताः साधितो विप्रैः संपादितः येनेन
संपादितः तं त्वां शरणं याताः ॥ १० ॥ तत्तस्मात्त्वमस्माकं अन्नं रातुं ईरुत ईरुतां यत्नं करोतु ॥ उज्झितान्नाः मकाला

आउदयाद्दैलात्पर्यंतं गोप्ता गोपयिष्यति ॥ नद्यर्थं पर्यस्तनेपर्यटिष्यति प्रदक्षिणीकरिष्यतीत्यर्थः ॥ २० ॥ अस्मै
नयाप्रदक्षिणाकुर्वते मस्पतेजसा स्पतिन स्पोद्धं तत्र्यः उदाहरेत्यः ॥ २२ ॥ इंद्रइवाडीनि भिदन् ॥ २४ ॥ लोकालमुत्र
मध्यमयाहरोगेन्स्वरतिनयायत्तु विस्फूर्जयन् ॥ यदात्मामचरत् ॥ २४ ॥ यत्रप्रादुरभाविप्राडम्बेता क
अयंभुवोमंडलमोदयाद्दैगोप्तैकदेवोनरदेवनाथः ॥ आस्थाय जैत्रं रथमात्तचापः पर्यस्तनेदक्षि
णतोयथार्कः ॥ २० ॥ अस्मैनृपालाः खलतत्रतत्रबलिंहरिष्यतिसलोकपालाः ॥ मंस्यंतएषांस्त्रि
यआदिराजंचक्रायुधंतद्यशउद्धरंत्यः ॥ २२ ॥ अयंमहीं गांदुदुहेधिराजः प्रजापतिर्वृत्तिकरः प्रजा
नां ॥ योलीलयाद्रीन्स्वशरासकोट्याभिंदन्समांगामकरोद्यथेंद्रः ॥ २३ ॥ एषोश्वमेधान्शतमाजहार
समरस्वतीप्रादुरभाविपत्र ॥ अहार्षीद्यस्यहयंपुरंदरः शतक्रतुश्चरमेवर्तमाने ॥ २४ ॥ विस्फूर्जयं
त्राजगवंधनुः ॥ स्वयंयदाचरत्स्मामविषह्यमाजौ नदातिलिल्युर्दिशिदिक्षुसंतोलांगूलमुद्यम्य
यथामृगेंद्रः ॥ २५ ॥ एषस्वसद्मोपवनेसमेत्यसनत्कुमारंभगवंतमेकं ॥ आराध्यभक्त्यालभतामलं
तज्ज्ञानंयतोब्रह्मपरंविदंति ॥ २६ ॥ तत्रतत्रगिरस्तास्ताइतिविश्रुतविक्रमः ॥ श्रोष्यत्यात्माश्रितागा
थाः पृथुः पृथुपराक्रमः ॥ २७ ॥ दिशोविजित्याप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः ॥ सु
रासुरेंद्रैरुपगीयमानमहानुभावोभविता [illegible] पतिर्भुवः ॥ २८ ॥ इतिश्रीभागवतेमहापुरा
णेचतुर्थस्कंधेषोडशोध्यायः ॥ १६ ॥ मेकमेविविद्विष्णतत्राहार्षीत् ॥ २४ ॥ विश्रुतोविक्रमोयस्यगाथाः
प्रवंधान् ॥ २७ ॥ उपगीयमानोमहाननुभावोयस्य ॥ २८ ॥ इतिश्रीभागवतेमहापुराणेभावार्थदीपिकायांच
तुर्थस्कंधेषोडशोध्यायः ॥ १६ ॥ रामानुजायनमः ॥ रामचंद्रायनमः ॥ ॥ श्री ॥ ॥ ॥ ॥

आत्मनि देहे तु हानिः ॥२३॥ मद्धये सर्वथा त्वं न स्यादिति चेदतआह ॥२४॥ अमषां प्रजानां मेदसा मांसेन ॥ यद्भूतं योऽ
षां कायेदानिष्यतीति न आह ॥ उमानिति ॥२५॥ तस्य वधो वधपक ॥२६॥ यच्चोमेक यमेभसिथास्य सीति तत्राह
त्वामिति ॥२७॥ तिलशः तिलप्रमाणानि खंडानि स्थैवं कृतानि व स्याम्नीतौ ॥२८॥ मन्तुमयीम् निर्विघ्नेतः इत्येतो
तन्तुल्यत्व मुच्यते तन्तुकृतानन्तामन्तुमयी मूर्तिरिति ॥ मायया विन्यस्तार्चितानानार्थोवादिततवः येन गुणा
त्मने गुणमयत्वेन प्रतीयमानाय ॥ वस्तुतस्तु निर्गुणाति रस्ता इव्यक्रिया कारकेषु अधिष्ठाता ध्यात्मा ध्यदैवेषु वि
वेषवल्लौषधिबीजानि प्राकृतानि स्वयंभवा ॥ नमुचस्य वदह्यानि मामवज्ञाय मेदथीः ॥३३॥ अमषां त्व
मेव नाना मार्ननापवि देविन ॥ गाम यिष्यामि महाराणे भिन्नायास्तव मेदसा ॥२४॥ पुमान्योषिदुत क्लीव
आत्मसंभावनोऽधमः ॥ भवेदुनिरनुक्रोशो नृपाणां न तद्वधो वधः ॥२५॥ त्वां स्तब्धोडमुदान्तीत्वामाया
मानि तिलशः शरैः ॥ आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥२६॥ एवं क्रुद्धमयीं मूर्तिं दृष्टा नातमि
वविध्नं ॥ प्रणतां प्रांजलिः प्राह मही संजातवेपथुः ॥२७॥ सुहृत्तत्नन्तु देवमकास्यादिति दारुः
णां ॥ वीस्यमाणा एवं ऐसी त्वाएवक रणोकिभिः ॥२८॥ धराद्भवे ॥ नमः परस्मै पुरुषाय मायया वि
न्यस्तनानातनवे गुणात्मने ॥ नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये ॥२९॥ येना
दमात्मायतनं विनिर्मिताधात्रा यतोऽयं गुणसर्गसंग्रहः स एव मां हन्तुमुदायुधः स्वराडुपस्थितोऽन्य
शरणं कमाश्रये ॥३०॥ भमो हंकारस्तन्निमित्ता कुमेयो रागद्वेषादयश्च यस्मिंन तस्मै नमः ॥२९॥ अर्दोस
र्वजीवाश्रयत्वे नत्स्येशो मां कथं हन्तुं प्रवर्तते तत्राह ॥ येन विधात्राग्रात्मनां जीवानां गरुं निर्मितायनो यस्मा
मयि गुणासर्गस्य चतुर्विधभूतग्रामस्य संग्रहः ॥ धारणीस्वराहवेनत्रं ॥ सृष्टिसंस्कारकोरु मवेनि चतया
पिप्रजापालने प्रवृत्तस्य मद्धयो नु चितपर्वेत्याह ॥ ३० रामानन्दाय नमः ३० ॥ ॥

परिदेवितं विलापं॥ निमित्तं देहं तु अन्वपश्यत् ज्ञातवान्॥ २३॥ पृथिव्योषधीर्बीजानि ग्रस्तानीति त्वव्यवसि
तो निश्चितवान् सन्॥ २३॥ मृगयुर्नाऽनुद्रुता मृगीव॥ २४॥ रोदसी द्यावापृथिव्यौ तयोरंतरं अंतरिक्षं॥ अनुद
मैत्रेय उवाच॥ पृथुः प्रजानां करुणं निशम्य परिदेवितं॥ दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोऽन्वपद्यत
१२॥ इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः॥ संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा॥ १३॥ प्रवेपमा
ना धरणी निशाम्योदायुधं च तं॥ गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता॥ १४॥ तामन्वधावत्तद्वैन्यः
कुपितोऽत्यरुणेक्षणः॥ शरं धनुषि संधाय यत्र यत्र पलायते॥ १५॥ सा दिशो विदिशो देवी रोदसी चां
तरं तयोः॥ धावंती तत्र तत्रैनं ददर्शानूद्यतायुधं॥ १६॥ लोके नाविंदत त्राणं वैन्यान्मृत्योरिव प्रजाः
त्रस्ता तदा निववृते हृदयेन विदूयता॥ १७॥ उवाच च महाभागं धर्मज्ञापन्नवत्सल॥ त्राहि मामपि
भूतानां पालनेऽवस्थितो भवान्॥ १८॥ स त्वं जिघांससे कस्माद्दीनामकृतकिल्बिषां॥ अहनिष्यत्कथं
योषां धर्मज्ञ इति यो मतः॥ १९॥ प्रहरंति न वै स्त्रीषु कृतागःस्वपि जंतवः॥ किमुत त्वद्विधा राज
न्करुणा दीनवत्सलाः॥ २०॥ मां विपाट्याजरां नावं यत्र विश्वं प्रतिष्ठितं॥ आत्मानं च प्रजाश्चेमाः
कथमंभसि धास्यसि॥ २१॥ पृथुरुवाच॥ वसुधे त्वां वधिष्यामि मच्छासनपराङ्मुखीं॥ भागं बर्हि
षि या वृंक्ते न तनोति च नो वसु॥ २२॥ यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः॥ तस्यामेवं हि दुष्टा
हतउ घ्नतमात्रं ध्येयेन नम॥ १५॥ यो धर्मज्ञ इति मतः स भवान्॥ योषामाक (यां दंडो नात्र न शस्यते॥ २२
यमहनिष्यः हनिष्यसे इति॥ १९॥ अजरां दृढां धास्यसि धारयिष्यसि॥ २१॥ बर्हिषि यज्ञे या भवती देवता रू
पेण भागं वृंक्ते भजते न च वसु धान्यादिकं॥ २०॥ गां रूपेण यवसं तृणं जग्धि अत्ति॥ पयस्तन दोग्धि
ग्धं न स्रवति॥ अत्रापराधे॥ २३॥

प ३४५

त

नूनमिति॥ ईश्वराणां स्वसृष्टगुणसर्गरूपया मायया मोहितं चित्तमेव वर्त्म येषां मोहितानि चित्तवर्त्मानि येषामभि
निवेशैर्जनैः ईश्वराणामीहितं विभक्तानामेव नानावादीहितं न ज्ञायते॥ ॥ किंपुनरस्मत्स॥ ॥ ॥ परमे
श्वरस्यातः परमेश्वररूपेभ्योपि नमः एवं केवलं वीराणां जितेन्द्रियाणां यशः कुर्वन्ति ये तेभ्यः यथा वीराणां
यशोवर्धनं तथा चेष्टितं तेषामिति भावः ३६॥ इति श्रीभागवतभावार्थदीपिकायां चतुर्थस्कंधे स
प्तदशोऽध्यायः॥१७॥ अष्टादशे मही वाक्याद्वत्सपात्रादिभेदतः॥ पृथ्व्यादिभिस्तत्क्रमशः सा च दुग्धा गविनी

नूनं नु नेरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया॥ न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो
नमो वीरयशस्करेभ्यः ३६॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे सप्तदशोऽध्यायः॥ १७॥ मैत्रे
य उवाच॥ इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरम्॥ पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना॥ १
पृथ्व्युवाच॥ सन्नियच्छाभिभो मन्युं निबोध श्रावितं च मे॥ सर्वतः सारमादत्ते यथा मधुकरो बुधः॥ २
अस्मिँल्लोकेऽथवामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः॥ दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयः प्रसिद्धये॥ ३
तानातिष्ठति यः सम्यगुपायान्पूर्वदर्शितान्॥ अवरः श्रद्धयोपेत उपायान्विन्दतेऽञ्जसा॥ ४॥ ताननादृ
त्य योऽविद्वानर्थानारभते स्वयम्॥ तस्य व्यभिचरन्त्यर्था आरब्धाश्च पुनः पुनः॥ ५॥

यन्निरुद्धमिति॥ हे अभिभो प्रभो यद्वा भो देव अभिभव यं यथा भवसि एवं मन्युं सन्नियच्छ श्रावितं विज्ञापितं न मद्वाक्ये
अनादरः कर्तव्य इत्याह॥ बुधो हि सर्वतः सारमादत्ते॥ २॥ मयि जीर्णा ओषधी रूपायेन महाराणीति
वक्तुं उपायेन सर्वं सिध्यति नान्यथेत्याह॥ अस्मिन्निति त्रिभिः॥ पुंसां श्रेयसः पुरुषार्थस्य प्रसिद्धये अ
स्मिँल्लोके कृष्यादयः अमुष्मिँल्लोके अग्निहोत्रादयो योगा उपाया दृष्टाः प्रयुक्ताश्च तत्पूर्वैर्द
र्शितान् अवरोऽर्वाचीनः॥ ४॥ अविद्वानविद्वानपीति वा व्यभिचरन्ति न सिद्ध्यन्ति ५ सदेनुकमुपायमा

यपतइति॥ आत्मात्माश्रययाजीवविषयिणया॥ अतोऽहं त्वं यमीसूर्यवेश्मितमित्याह॥ नूनमिति॥ ११॥ सृष्टा

त्मानमभिविदितमचिन्॥ स ईश्वरः स्वतंत्रः अकरोत्॥ ब्रह्माणं॥ तेन ब्रह्मणा चराचरमकारयत्॥ यस्

स्वतंत्रैकः परतो मायया ऽनेकः॥ १२॥ तस्मा अविमृश्यशक्तये केवलं नमस्करवाह॥ सर्गादिजन्मस्थितिभंग

मस्य जगतो ऽनुरुणद्धि अनुवर्तते करोति॥ द्रव्याणि महाभूतानि क्रियाइंद्रियाणि कारकादेवाः चेत

नाबुद्धिः आत्मा ऽहंकारः तैः स्वशक्तिरूपैः समुन्नद्धाः समुत्कटविरुद्धाः शक्तयो यस्य॥ १३॥ भागीनाथा

यपनदादावसृजच्चराचरं स्वमाययात्माश्रययावितर्क्यया॥ तयैव सोऽयं किल गोप्तुमुद्यतः कथं

नु मां धर्मपरो जिघांसति॥ ११॥ नूनं बतेशस्य समीहितं जनैस्तन्मायया दुर्जययाकृतात्मभिः॥ न

लक्ष्यते यस्त्वकरोदकारयद्योऽनेक एकः परतश्च ईश्वरः॥ १२॥ सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्य

क्रियाकारकचेतनात्मभिः॥ तस्मै समुन्नद्धविरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे॥ १३॥ स वै भ

वानात्मविनिर्मितं जगद्भूतेन्द्रियान्तःकरणात्मकं विभो संस्थापयिष्यन्नज मां रसातलादभ्युज्जहाराम्

भस आदिसूकरः॥ १४॥ अपामुपस्थे मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल॥ स वीरमू

र्तिः समभूद्धराधरो यो मां पयस्युग्रशरो जिघांससि॥ १५॥ रसायेमां रसातलादुद्धृत्य मेदानीं प्रजारक्ष

णोपबृंहतस्य महतो नपुष्करनिसकरणमाहद्वाभ्यां॥ स दिग्रजयः स्वभावास्त निर्मितं चराचरं जगत्॥ सम्प

कस्थापयिष्यन्मादिसूकरः॥ सन्मामभ्युज्जहार॥ १४॥ स एव धराधरो वराहो यः अपामुपस्थे उपरि मयि नाः

विद्याधारभूतायामवस्थिताः प्रजारक्षितुमिच्छुः वीरमूर्तिः पृथुरूपः समभून्नत्वयं मूलः सन्त्वं पयसि स्थितां

मिवे मां जिघांससीति विचित्रमित्यर्थः॥ १५॥ तस्मादीश्वरवेष्टितं दुर्ज्ञेयमिति केमुत्यन्यायेनोपसंहरति

१५॥ रामजीनमः

सुरासुरास्तवेतालादिमयेवा ॥ १९ ॥ मधुमाधुर्यं ॥ वार्द्धौ भगं मौं स्वयं तत्स्कंदितं ॥ २० ॥ कव्यं पितॄणाममन्नं ग्रा
मुपात्रे स्वपक्वम्णमयं प्रयुक्तं ॥ २१ ॥ संकल्पनामयं [illegible]णिमादि सिद्धिं ॥ ये विद्याधरादयस्ते च कपिलं सेव ह
त्स्य संकल्पनं भस्यं वपात्रे खेचरत्वादि रूपां विद्यां दुदुहुः ॥ २२ ॥ अन्ये च किंपुरुषादयः अंतर्धानेनाद्भुतानां त
वधिनीमायाधारणामयीं संकल्पमात्रप्रभवा ॥ २३ ॥ भूतेशो रुद्रः स एव वत्सो येषां ते तज्जे रुधिरं ते देवास

दैत्ययादानवा वृत्रं सप्रल्हादमसुरर्षभं ॥ विद्याधराह्दुदुहुः क्षीरमयः पात्रे सुरा वै सेम ॥ १६ ॥ गंधर्वा
प्सरसोधुक्षन् पात्रे पद्ममये पयः ॥ वत्सं विश्वावसुं कृत्वा गांधर्वं मधुसौभगं ॥ १७ ॥ वत्सेन पितरोर्यम्णा
कव्यं क्षीरमधुक्षत ॥ आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः ॥ १८ ॥ प्रकल्प्य वत्सं कपिलं सिद्धाः सं
कल्पनामयीं ॥ सिद्धिं नभसि विद्यां च ये च विद्याधरादयः ॥ १९ ॥ अन्ये च मायिनो मायामंतर्धानाद्भुता
त्मनां ॥ मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीं ॥ २० ॥ यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः ॥
भूतेशवत्सा दुदुहुः कपाले क्षतजासवं ॥ २१ ॥ तथाहयो दंदशूकाः सर्पा नागाश्च तक्षकं ॥ विधाय व
त्सं दुदुहुर्बिलपात्रे विषं पयः ॥ २२ ॥ पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषं ॥ अरण्यपात्रे चाधुक्ष
न्मृगेंद्रेण च दंष्ट्रिणः ॥ २३ ॥ क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे ॥ सुपर्णवत्सा विहगाश्चरं
चाचरमेव च ॥ २४ ॥ वटवत्सा वनस्पतयः पृथग्रसमयं पयः ॥ गिरयो हिमवद्वत्सा नानाधातून्स्वसानुषु ॥ २५
सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक्पयः ॥ सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताम् ॥ २६ ॥

वं ॥ २१ ॥ अहयो निष्फणाः दंदशूका वृश्चिकादयः सर्पाः सफणाः ॥ तएव वक्राः संतः तिर्यग्गतानागाः विलेपा
त्रे स्वे ॥ २२ ॥ यवसं तृणं गोवृषं ककुद्वाद्यं नंदिवृषभं ॥ दंष्ट्रिणो व्याघ्रादयः ॥ २३ ॥ क्रव्यं मांसं ॥ चरं कीटादि ॥ अच
रं फलादि ॥ २४ ॥ अनुक्तसमुच्चयार्थमाह ॥ सर्वे स्वजातीयो यो मुख्यस्तेन वत्सेन ॥ उपसंहरति ॥ एवमिति ॥ २६ ॥

वीर४

८

भवद्भिरिति निराज्ञ सामान्याभिप्रायेण ॥ अपालिता चौराद्यनिवारणात् ॥ अनादृता च यज्ञादिप्रवर्त्तनाभावात्
यज्ञार्थेऽग्रसं गिलितवती अन्यथा धृतव्रतैर्भक्ष्याः नष्टा स्युरिति ॥ ततश्च यज्ञादयो न सिद्धेरन्निति भावः ॥७॥ क्षी
णा जीर्णाः ॥८॥ वत्सं दोहनं दोहपात्रं दोग्धारं चोपकल्पय यथा स्नेहप्रस्रविष्यामि ॥ महाबाहो भूतभावन ॥९॥ भू
तानामभीप्सितमन्नमूर्जस्वि बलप्रदम ॥१०॥ अपगतेष्वपि वर्षर्त्तौ यथा मे सर्वतो वर्त्तेत ॥ प्रसंगाद् यातरेश्रा

पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशांपते ॥ भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः ॥६॥ अपालि
तानादृता च भवद्भिर्लोकपालकैः चौरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः ॥७॥ नूनं ता वीरु
धः क्षीणा मयि कालेन भूयसा ॥ तत्र युक्तेन योगेन भवानादातुमर्हसि ॥८॥ वत्सं कल्पय मे वीर
येनाहं वत्सला तव ॥ धोक्ष्ये क्षीरमयान्कामाननुरूपं च दोहनं ॥९॥ दोग्धारं च महाबाहो भूतानां भू
तभावन ॥ अन्नमीप्सितमूर्जस्वि भगवान्वाञ्छते यदि ॥१०॥ समां च कुरु मां राजन्देववृष्टं यथा पयः अ
पर्त्तावपि भद्रं ते उपावर्त्तेत मे विभो ॥११॥ इति प्रियं हितं वाक्यं भुव आदाय भूपतिः ॥ वत्सं कृत्वा मनुं पा
णावदुहत्सकलौषधीः ॥१२॥ तथापरे च सर्वत्र सारमाददते बुधाः ॥ ततोऽन्ये च यथाकामं दुदुहुः
पृथुभाविता ॥१३॥ ऋषयो दुदुहुर्देवीमिंद्रियेष्वथ सत्तम ॥ वत्सं बृहस्पतिं कृत्वा पयश्छंदोमयं शु
चि ॥१४॥ कृत्वा वत्सं सुरगणा इंद्रं सोममदूदुहन् ॥ हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः ॥१५॥

यथा पृथुः एवं सर्वत्र वाक्ये परेऽपि सारमाददते ॥ प्रस्तुतमनुवर्णयति ॥ ततोऽन्ये ऋष्यादयः पंचदश दुदुहुः ॥ पृ
थुना भाविता वशीकृता ॥१३॥ देवीं पृथ्वीं वाङ्मनः श्रवणे वेदग्रहणादिंद्रियाणां पात्रत्वे ॥१४॥ सोममद्र
तं वीर्यं मनः शक्तिं तेज इंद्रियशक्तिं बलं देहशक्तिं ॥ तदेव पयः ॥१५॥

अप्रमादाय प्रमादापनयनं भवत्येव कृतं इत्यनेनाह ॥ न धीरिति ॥ एकांतभक्तानां धीराशीर्भिः प्रलोभिर
पि न विद्यते नासक्तं ततः इत्यर्थः तिरेकमाह ॥ युंजानानामिति ॥ उत्थितं विषयाभिमुखं तत्र भक्तं वयुक्तमभि
षयं तत्तपसि लोकसंग्रहे च वर्तयति ॥ दग्धमेति ॥ ५१ ॥ इति श्रीदशमस्कंधे भावार्थदीपिकायामेकपंचा

श्रीभगवानुवाच ॥ सार्वभौममहाराज मतिस्तेविमलोर्जिता ॥ वरैः प्रलोभितस्यापि न कामैर्विहता
यतः ॥ ५९ ॥ प्रलोभितो वरैर्यत्वमप्रमादाय विद्धि तत ॥ न धीरेकांतभक्तानामाशीर्भिर्भिद्यते क्व
चित ॥ ६० ॥ युंजानानामभक्तानां प्राणायामादिभिर्मनः ॥ अक्षीणवासनं राजन्दृश्यते पुनरु
त्थितं ॥ ६१ ॥ विचरस्व महीं कामं मय्यावेशितमानसः ॥ अस्त्वेवं नित्यदा तुभ्यं भक्तिर्मय्यनपायि
नी ॥ ६२ ॥ क्षात्रधर्मस्थितो जंतून्न्यवधीर्मृगयादिभिः ॥ समाहितस्तत्तपसा जह्यघं मदुपाश्रि
तः ॥ ६३ ॥ जन्मन्यनंतरे राजन्सर्वभूतसुहृत्तमः ॥ भूत्वा द्विजवरस्त्वं वै मामुपैष्यसि केवलं ॥ ६४ ॥
इति श्रीभागवते महापुराणे दशमस्कंधे उत्तरार्द्धे एकपंचाशत्तमोध्यायः ॥ ५१ ॥ श्रीशुक उवाच
इत्थं सोनुगृहीतोंग कृष्णेनेक्ष्वाकुनंदनः ॥ तं परिक्रम्य सन्नम्य निश्चक्राम गुहामुखात ॥ १ ॥ सं
वीक्ष्य क्षुल्लकान्मर्त्यान्पशून्वीरुद्वनस्पतीन ॥ मत्वा कलियुगं प्राप्तं जगाम दिशमुत्तरां ॥ २ ॥
तपःश्रद्धायुतो धीरो निःसंगो मुक्तसंशयः ॥ समाधाय मनः कृष्णे प्राविशद्गंधमादनं ॥ ३ ॥ ब
दर्याश्रममासाद्य नरनारायणालयं ॥ सर्वद्वंद्वसहः शांतस्तपसाराधयद्धरिं ॥ ४ ॥

शत्तमोध्यायः ५१ ॥ द्विपंचाशत्तमे थावन्मयादिव गतः पुरीम ॥ अन्वमोदत सद्देशोरुक्मिण्यादिज
वर्णितं ॥ १ ॥ तत्स्वकानसलम्बमानाणान ॥ तपसि प्रहाणतः मन बदर्याश्रमम ॥ ४ ॥ ॥
॥ ॥

ममचुमसंगमाम्नृर्वमेव योगाम्यादिसंगविक्षेदोत्नानः सोयं तथा महाननुग्रहः कृतः इत्याह ममयइति ॥ ते तया साधुभिर्विवेकिभिः तपसेवनं प्रवेष्टुमिच्छद्भिः स्वयंत्वकमलभमानैः प्रार्थ्यतइति ॥५४॥ तदेवं विषयसेवामार्गं भगवत्सेवामार्गं च विविच्य वरान्नृणीष्वेति यदुक्तं तयोत्तरमाह ॥ न कामयइति ॥ अकिंचना निस्पृहा निरभिमानाः आर्यो विवेकी ॥५५॥ रजस्तमः सत्वगुणैरनुबन्धेतइति तथाभूताः येऽस्य यो द्विशत्रुमरणादिधर्मरूपाः ॥ विसृज्य परं पुरुषमीश्वरं त्वामिमां त्वां नत्वबंधुतोतिरंजनं नन्त्कतः नि र्गुणं नष्टपिकृतः अद्वयमतएवात्सं रत्वोशरणं व्रजामीति ॥५६॥ भृंस्वतावज्ञो गात्नकैवल्यं तनावक

मन्ये ममानुग्रह ईश ते कृतो राज्यानुबंधापगमो यदृच्छया ॥ यः प्रार्थ्यते साधुभिरेकचर्यया वनं विविक्षद्भिरखंडभूमिपैः ॥५४॥ न कामयेऽन्यं तव पादसेवनादकिंचनप्रार्थ्यतमाद्वरं विभो ॥ आराध्य कस्त्वां ह्यपवर्गदं हरे वृणीत आर्यो वरमात्मबंधनं ॥५५॥ तस्माद्विसृज्याशिष ईश सर्वतो रजस्तमः सत्वगुणानुबंधनाः ॥ निरंजनं निर्गुणमद्वयं परं त्वां ज्ञप्तिमात्रं पुरुषं व्रजाम्यहम् ॥५६॥ चिरमिह वृजिनार्तस्तप्यमानोऽनुतापैरवितृषषडमित्रोऽलब्धशांतिः कथंचित् ॥ शरणद समुपेतस्त्वत्पदाब्जं परात्मन्नभयमृतमशोकं पाहि मापन्नमीश ॥५७॥

रस्यमेवेति ॥ वृजिनैर्दैः मलोभयेनं श्रीकृष्णपादोपगमनेन प्रार्थ्य वनेचिरमिति ॥ वृजिनैः कर्मफलैरार्तः ॥ पुनस्तद्वासनाभिस्तप्यमानः ॥ तथाप्यवितृषषडमित्रः तदुक्तं ... स्वानविगतैषाः षडमित्राः श्रोत्रादयः इंद्रियतर्पणाय समासः ॥ अतएवालब्धशांतिः कथंचिद्दैववशेन लब्धशांतिरिति ॥ चरणरेणुसंस्तनानेन त्वद्दानीति ॥ तथा हे शरणद ॥ समुपेतः प्राप्तोऽहं ॥ अशोकत्वे हेतुरभयं ॥ तत्रापि हेतुः ऋतं ॥ आपन्नं ॥ आपदापन्नं मां पाहीति ॥५७॥

किंचकाममस्वेस्तकरादिद्यपिसंभवति॥भगवद्भजनंतमानुषव्यतिरेकेणनभवतीति॥मानुष्यंप्रा
पलामभजनन्नतिमूढरमाहलडेनयरकमेभमौग्रंअंगमविकलांगंकिंचश्रुतिविषयस्तलेम
तिर्यस्यसःनरहमेवांधकूपलस्मिन्पतितःयथावस्तुहललञ्चांधकूपेपतनीति॥४८॥नकेव
लमस्यजनस्यपंगतिःकिंतममापि॥नथैवेत्याह॥ममेति॥मस्मैपापीरेग्रामतुद्विपंस्यममश्र
नप्वस्तनादिघासज्जमानस्य॥४८॥उत्तरहमद्भंभगंचयति॥कलेवरश्नि॥वटकश्रादिसहपो

लब्धाजनोदुर्लभमत्रमानुषंकथंचिदव्यंगमयत्नतोनघ॥पदारविंदेन
भजत्यसन्मतिर्गृहांधकूपेपतितोयथापशुः॥४७॥ममैषकालोजितनि
ष्फलोगतोराज्यश्रियोन्नद्धमदस्यभूपतेः॥मर्त्यात्मबुद्धेःसुतदारकोश
भूष्वासज्जमानस्यदुरन्तचिंतया॥४८॥कलेवरेस्मिन्घटकुड्यसन्निभेनिरू
ढमानोनरदेवइत्यहं॥वृतोरथेभाश्वपदात्यनीकपैर्गांपर्यटंस्त्वागणय
न्सुदुर्मदः॥४९॥प्रमत्तमुच्चैरितिकृत्यचिंतयाप्रवृद्धलोभंविषयेषुलाल
सं॥त्वमप्रमत्तःसहसाभिपद्यसेक्षुल्लेलिहानोहिरिवाखुमंतकः॥५०॥

नान्यति॥यतएवंसदुर्मदोभवं॥अतोममैषकालोनिष्फलोगतइतिस्वमगणायतं॥४९॥त्वमा
क्रमसीत्याह॥प्रमत्तमिति॥प्रमत्तमनवहितंप्रत्नेनतकर्मविरागच्छदेहादिप्रासक्तमितिपाव
न॥कृत्यप्रमत्तमितिकृत्यचिंतया॥एवमेवंकर्त्तव्यमितिमनोरथेभग्नेपिविषयेषुलालसं
सस्पृहंक्षामेपितृनःप्रवृद्धोलोभस्याथस्यतं॥क्षुल्लकलमभिपद्यसेग्रसेअभिभवसीत्यर्थःयथा
सृक्किणीलेलिहानोहिःसर्पआखुंमूषकमिति॥५०॥

किं च कालात्मना त्वयाभिपन्नो देह एवं भवतीत्याह ॥ पुरेति श्वसृगालादिभिर्भक्षितो विट्संज्ञितः तैरभ
क्षितः कृमिसंज्ञितः दग्धो भस्मसंज्ञितो भवतीति बुद्ध्या विचार्य ॥ एवंभूते शरीरे ममता कर्तव्येत्यज्ञाना
हंकारादयः प्रतीते आत्मनि शत्रुभूतास्तेषां संततं यतः योनेः सहस्राणि बहूनि गतानि ॥ दुःखेन लब्धा
पि च मानुषत्वस्यावहेलितं विसृष्टे मत्स्वात्मा आत्मनि शत्रुभूता इति ॥ ४९ ॥ किं च ग्रहेष्वेकयामैः प्राग्वि
द्विविजयिनोऽप्यात्मनोऽपि पारतन्त्र्यं दुःखेन दवस्यमेवेत्याह ॥ निर्जित्येति ॥ अभूतविग्रहः अविद्यमानसपत्ना
मः हृदयेषः समलैः राजभिर्वन्दितोऽपि मिथुनो भावस्तत्त्वमेव परं येभ्यस्तेभ्यो योषितां गृहेषु क्रीडामृग

पुरा रथैर्हेमपरिष्कृतैश्चरन्मतंगजैर्वा नरदेवसंज्ञितः ॥ स एव कालेन दुरत्ययेन ते कलेवरो
विट्कृमिभस्मसंज्ञितः ॥ ५० ॥ निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः समराजवन्दितः ॥ गृ
हेषु मैथुन्यसुखेषु योषितां क्रीडामृगः पूरुष ईश नीयते ॥ ५१ ॥ करोति कर्माणि तपःसुनिष्ठितो
निवृत्तभोगस्तदपेक्षयाददत् ॥ पुनश्च भूयेयमहं स्वराडिति प्रवृद्धतर्षो न सुखाय कल्पते ॥ ५२ ॥
भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ॥ सत्संगमो यर्हि तदैव सद्गतौ प
रावरेशे त्वयि जायते मतिः ॥ ५३ ॥

दृतस्ततो नीयते ॥ ५१ ॥ किं च तथापि स्वर्गफलस्य न भोगवतः क
ल्पितस्वल्पीत्याह ॥ करोतीति ॥ तपसि सुष्ठु धः शयन ब्रह्मचर्यादौ सुनिष्ठितः पुनश्च स्वराडिन्द्रः स्यामिति
यदाजन्मान्तरेष्येवमेव चक्रवर्ती स्यामिति ॥ ५२ ॥ तदेवमष्टभिः श्लोकैरीशबहिर्मुखानां संसारे प्रवृ
त्तमभक्तानां निवृत्तिक्रममाह ॥ भवापवर्ग इति ॥ भो अच्युत भ्रमतः संसरतो जनस्य यदा त्वदनुग्रहे
णैव सर्वेषस्य ॥ अपवर्गः अन्तो भवेत् ॥ आसन्नकालः स्यात् ॥ तदा सतां संगमो भवेत् ॥ यदा च
सत्संगमो भवेत् ॥ तदा सर्वसंगनिवृत्त्या कार्यकारणनियन्तरि त्वयि भक्तिर्भवति ॥ ततो मुच्यत इत्य

पर्षितः प्रभिमन्तः तुर्यं थमस्पृष्ट्वं विपने प्रशरणे॥ तत्रापि निविवेशी हुरेदुप्य वेशास्यानेन तापि॥ उरुकंटके पमस
लाश्रमं दृष्ट्वाभ्यां पद्मामं विचरसीति॥१९॥ तेजोमूर्तिः प्रभावो दीप्तिर्वा सर्वचाय पतिनोघादादृ॥२०॥ मन्यते
त्वमेवं वैन्यपोमध्ये वोयधुत्वामवेनतः॥ सत्वयाहहमा चल्लभस्मीभवतनल्लणात॥२१॥ यवदेहम
स्ससाद्धीते भगवान्सात्वतर्षभः॥ आत्मानं दर्शयामास मुचुकुंदाय धीमते॥२२॥ तमालोक्य घनश्याम
पीतकौशेयवाससं॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभेन विराजितं॥२३॥ चतुर्भुजं रोचमानं वैजयं
त्या च मालया॥ चारुप्रसन्नवदनं स्फुरन्मकरकुंडलं॥२४॥ प्रेक्षणीयं नृलोकस्य सानुरागस्मिते
क्षणम्॥ अपीच्यवयसं मत्तमृगेंद्रोदारविक्रमं॥२५॥ पर्यपृच्छन्महाबुद्धिस्तेजसा तस्य धर्षितः
शंकितः शनकै राजा दुर्धर्षमिव तेजसा॥२६॥ मुचुकुंद उवाच॥ को भवानिह संप्राप्तो विपिने
गिरिगह्वरे॥ पद्भ्यां पद्मपलाशाभ्यां विचरस्युरुकंटके॥२७॥ किंस्वित्तेजस्विनां तेजो भगवान्वा वि
भावसुः॥ सूर्यः सोमो महेंद्रो वा लोकपालो परोपि वा॥२८॥ मन्ये त्वां देवदेवानां त्रयाणां पुरुषर्षभ
यद्बाधसे गुहाध्वांतं प्रदीपः प्रभया यथा॥२९॥ शुश्रूषतामव्यलीकमस्माकं नरपुंगव॥ स्वज
न्म कर्म गोत्रं वा कथ्यतां यदि रोचते॥३०॥ वयं तु पुरुषव्याघ्र ऐक्ष्वाकाः क्षत्रबंधवः॥ मुचुकुंद इति
प्रोक्तो यौवनाश्वात्मजः प्रभो॥३१॥ चिरप्रजागरश्रांतो निद्रयापहतेंद्रियः॥ शयेस्मिन्विजने कामं
केनाप्युत्थापितोधुना॥३२॥ सोपि भस्मीकृतो नूनमात्मीयेनैव पाप्मना॥ अनंतरं भवान्श्रीमां
ल्लक्षितोमित्रशासनः॥३३॥ तेजसा तेविषह्येण भूरि द्रष्टुं न शक्नुमः॥ हतौजसो महाभाग मान
नीयोसि देहिनाम्॥३४॥ एवं संभाषितो राज्ञा भगवान्भूतभावनः॥ प्रत्याह प्रहसन्वाण्या मेघ
गुरुवर्षभं प्रीतिविलोलसद्धांते॥ अनंतस्त्वमः॥३५॥ वयमिति वंशाभिप्रायेण बहुवचनं॥ ते षट्कं श्रुत
केरद्वति प्रोक्तः॥ युवनाश्वो मांधातुः पिता॥ अतो मांधाता यौवनाश्वः॥ ३५॥

भा
द०
५

कुचित्कदाचित्कश्चिद्यदि रजांसि सम्यग्विविमसे गणितवान् ॥ तथापि जन्मानि कर्माणि विमिमीते ति
तिस्म यद्वा यानि मितेन न मयैव वद्दस्य: अहं तानि हमितियोपि विनेप्रदाप्तमेदे तेषु तानि भूप यथा शोचा
ति नैवं मां प्रपन्नः ॥ मदं नववाणा मत्प्रयत्नादिति भावः ॥ अणा विंदानि मे गुणो भगवान नवतरि ष्यती
ति हृद्गार्गवचनमनुस्मरन्निमर्थः ॥ वद्धकिरेवके लवडुलेभा ॥ कामा तत्कामनवरता योगपाद्रमा

श्रीभगवानुवाच ॥ जन्मकर्माभिधानानि संति मेंग सहस्रशः ॥ न शक्यंते नुसंख्यातुमनंतत्वान्म
यापि हि ॥ ३६ ॥ कचिद्रजांसि विममे पार्थिवान्युरुजन्मभिः ॥ गुणकर्माभिधानानि न मे जन्मानि
कर्हिचित् ॥ ३७ ॥ कालत्रयोपपन्नानि जन्मकर्माणि मे नृप ॥ अनुक्रमंतो नैवांतं गच्छंति परमर्षयः
३८ ॥ तथाप्यद्यतनान्यंग शृणुष्व गदतो मम ॥ विज्ञापितो विरंचेन पुराहं धर्मगुप्तये ॥ ३९ ॥ भू
मेर्भारायमाणानामसुराणां क्षयाय च ॥ अवतीर्णो यदुकुले गृह आनकदुंदुभेः ॥ ४० ॥ वदंति
वासुदेवेति वसुदेवसुतं हि मां ॥ कालनेमिर्हतः कंसः प्रलंबाद्याश्च सद्द्विषः ॥ ४१ ॥ अयं च य
वनो दग्धो राजंस्ते तिग्मचक्षुषा ॥ सोहं तवानुग्रहार्थं गुहामेतामुपागतः ॥ ४२ ॥ प्रार्थितः प्र
चुरं पूर्वं त्वयाहं भक्तवत्सलः ॥ वरान्वृणीष्व राजर्षे सर्वान्कामान्ददामि ते ॥ ४३ ॥ मां प्रपन्नो ज
नः कश्चिन्न भूयोर्हति शोचितुं ॥ ४४ ॥ श्रीशुक उवाच ॥ इत्युक्तस्तं प्रणम्याह मुचुकुंदो मुदान्वितः ॥ ज्ञात्वा
नारायणं देवं गर्गवाक्यमनुस्मरन् ॥ ४५ ॥ मुचुकुंद उ० ॥ विमोहितोयं जन ईश मायया त्वदी
यया त्वां न भजत्यनर्थदृक् ॥ सुखाय दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वंचितः ॥ ४६ ॥ पर

शापेन ॥ अभक्तानां संसारे अस्ति दुःखं प्रपंचयन्स्तौति ॥ ४६ ॥ विमोहित इति । हे ईश योषित्पुरुष
श्चेति द्विविधोप्ययं जनस्त्वदीयया मायया विमोहितः ॥ अतश्चानर्थं दृग्गार्थं परमार्थं स्वरूपं न
पश्यतीति तथा ॥ अतस्त्वां न भजति किंतु परस्परं वंचितः सुखेच्छया दुःखानामेव प्रभवो येषु ते

मुचुकुंदस्तुतिः ५८ ॥

एकंपंचाशत्तमे हत्वा मुचुकुंददृशा हरिः ।। यवनं मुचुकुंदेन स्तुतः सन्ननुकंपनः ।।१।। यवनेन हतात्कालयवना
द्युद्भीवशात्ततः ।। हरिर्हरतिरः स्वैरं पालनायापलायत ।।२।। यदा गार्ग्यः स्यालेन वृष्णिभिश्च तत्कलदाय
ढ इत्युपहसितः क्रुद्धोऽसौ श्रीमहादेवं प्रसाद्य यदुभीषणं पुत्रं वरं लब्धवान् ।। ततः स यवनेंद्रेण स्वक्षेत्रेषु
योन्यामुत्पादितो यथार्थं ततो गार्ग्यः कालयवनमजीजनदिति पुराणप्रसिद्धं पुरद्वाराद्विनिष्क्रांतं उज्जिहान

श्रीशुक उवाच ।। तं विलोक्य विनिष्क्रांतमुज्जिहानमिवोडुपं ।। दर्शनीयतमं श्यामं पीतकौशेय
वाससं ।।१।। श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं ।। पृथुदीर्घचतुर्बाहुं नवकंजारुणेक्षणं ।।२
नित्यप्रमुदितं श्रीमत्सुकपोलं शुचिस्मितं ।। मुखारविंदं बिभ्राणं स्फुरन्मकरकुंडलं ।।३।। वासुदे
वोऽह्ययमिति पुमान्श्रीवत्सलांछनः ।। चतुर्भुजोऽरविंदाक्षो वनमाल्यतिसुंदरः ।।४।। लक्षणैर्ना
रदप्रोक्तैर्नान्यो भवितुमर्हति ।। निरायुधश्चलन्पद्भ्यां योत्स्येऽनेन निरायुधः ।।५।। इति निश्चित्य यव
नः प्राद्रवंतं पराङ्मुखं ।। अन्वधावज्जिघृक्षुस्तं दुरापमपि योगिनां ।।६।। हस्तप्राप्तमिवात्मानं हरि
णा स पदे पदे ।। नीतो दर्शयता दूरं यवनेशोऽद्रिकंदरं ।।७।। पलायनं यदुकुले जातस्य तव नोचि
तं ।। इति क्षिपन्ननुगतो नैनं प्रापाहताशुभः ।।८।। एवं क्षिप्तोऽपि भगवान्प्राविशद्गिरिकंदरं ।।
सोऽपि प्रविष्टस्तत्रान्यं शयानं ददृशे नरं ।।९।। नन्वसौ दूरमानीय शेते मामिह साधुवत् ।। इति
मत्वाच्युतं मूढस्तं पदा समताडयत् ।।१०।। स उत्थाय चिरं सुप्तः शनैरुन्मील्य लोचने ।। दिशो व
लोकयन्पार्श्वे तमद्राक्षीदवस्थितम् ।।११

उडुपं ।।१।। नित्यप्रमुदितमित्यादि मुखारविंदं विशे
षणं ।।३।। नारदोक्तैर्लक्षणैरयं वासुदेव एव नान्यो भवितुमर्हति ।। अयं च निरायुधः ।। अतोऽनेन प
द्भ्यामेव चलन्निरायुधोऽहं योत्स्यामि ।।५।। इति निश्चित्य पराङ्मुखं प्राद्रवंतमन्वधावदित्यन्वयः ।।६।।
आत्मानं हस्तप्राप्तमिव दर्शयता ।।७।। अहताशुभः अक्षीणकर्मा ।।८।। शयानमच्युतं मत्वा ।। अ

तस्य क्रुद्धस्य दृष्टिपातेन संदीप्तोग्निः स्वदेहजोग्निस्तेन यवनमर्दयतिरिति स्तीति यवनार्दनः ॥ तथा सक्तस्य एवं किंवीर्यः कीदृक्प्रभाववान् ॥ किंतेजः कस्य वीर्यं प्रद्युम्नस्पर्धः शिष्ये शयितवान् ॥ सम्मः संग रोत्रु इंद्रमति त्रावायस्य गुहेकान्तिकेयः स्वःपालः स्वर्गपालकं सेनानं मुचुकुन्दं नाम स्यकामागता दयार्धः ॥ १६

स तावत्तस्य रुष्टस्य दृष्टिपातेन भारत । देहजेनाग्निना दग्धो भस्मसादभवत्क्षणात् ॥ राजोवाच ॥ को नाम स पुमान्ब्रह्मन्कस्य किंवीर्य एव च । कस्माद्गुहां गतः शिष्ये किंतेजो यवनार्दनः ॥ श्रीशुक उवाच ॥ स इक्ष्वाकुकुले जातो मांधातृतनयो महान् । मुचुकुंद इति ख्यातो ब्रह्मण्यः सत्यसंगरः ॥ १५ स याचितः सुरगणैरिंद्राद्यैरात्मरक्षणे । असुरेभ्यः परित्रस्तैस्तद्रक्षां सोकरोच्चिरं ॥ १६ ॥ लब्ध्वा गुहं ते स्वःपालं मुचुकुंदमथाब्रुवन् । राजन्विरमतां कृच्छ्राद्भवान्नः परिपालनात् ॥ १७ ॥ नरलोके परित्यज्य राज्यं निहतकंटकं । अस्मान्पालयतो वीर कामास्ते सर्व उज्झिताः ॥ १८ ॥ सुता महिष्यो भवतो ज्ञातयोमात्यमंत्रिणः । प्रजाश्च तुल्यकालीना नाधुना संति कालिताः । कालो बलीयान्बलिनां भगवानीश्वरोऽव्ययः । प्रजाः कालयते क्रीडन्पशुपालो यथा पशून् ॥ १९ वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः । एक एवेश्वरस्तस्य भगवान्विष्णुरव्ययः ॥ २१ ॥ प एवमुक्तः स वै देवानभिवंद्य महायशाः । अशयिष्ट गुहाविष्टो निद्रया देवदत्तया ॥ २० ॥

किंच सुतादयस्तुल्यकालीनाः समानकालीनाः कालिता विचालिताः मन्त्रिणोऽमात्याः कालये इति ॥ वेदेन प्राहुः कालयति ॥ कालयते इति स्वालयति ॥ न तस्य केवलस्य ॥ २१ ॥ गुहायां प्रविष्टः शेते स्म ॥ २२ ॥

अथ यत्र तस्मिन्नयन मेघरूपं प्रभुं मां
अस्त्वेवं राजराजं स्तोकरति द्वांवपेपाति ते ।

प्रतिपन्नवन्तः स्वयं निमग्नः ॥४३॥ अष्टादशमे अष्टादशे संग्रामे भाविनि तन्मध्ये अकस्मात् कालयवनः ॥४४॥ आत्म
सम्मितान् स्वतुल्यान् वृष्णीन् श्रुत्वा उभयतः ॥ यवनाज्जरासंधाच्च ॥४६॥ तदा हृष्ट्येन निरुंधे निरुणद्धि अ
ल्पद्येन ॥४७॥ समुद्रमध्ये दुर्गं तन्मध्ये नगरं कृत्स्नाद्भुतं सर्वाश्चर्यमयं अचीकरत् कारयामास ॥५०॥
त्वाष्ट्रं विश्वकर्मणः संबंधि शिल्पनैपुणं वक्रियाकौशलं ॥५१॥ तदाह सार्धैस्त्रिभिः रथ्येति रथ्या राजमार्गाः
पुरतो वीथ्यः उपमार्गाः पश्चिमतः उभयतोपि चत्वराणि अंगनानि तन्मध्ये कोष्ठाः ततोप्यंतः स्ववर्ण

प्रदिष्टे स्वस्थले सर्वे वृष्णयः कृष्णदेवताः ॥ इतेप्यते ह्यतीकेभ्यस्तक्तोगात् विभिर्न्यप ॥४३॥ अष्टा
दशमसंग्रामे आगामिनि तु गदाग्रजः नारदप्रेषितो वीरो यवनः प्रत्यदृश्यत ॥४४॥ रुरोध मथुरा
मेत्य तिसृभिर्म्लेच्छकोटिभिः नृलोके चाप्रतिद्वंद्वो वृष्णीन् श्रुत्वात्मसम्मितान् ॥४५॥ तं दृष्ट्वाचिंत
यत्कृष्णः संकर्षणसहायवान् अहो यदूनां वृजिनं प्राप्तं ह्युभयतो महत् ॥४६॥ यवनोयं निरु
ंधेस्मानद्य तावन्महाबलः ॥ मागधोप्यद्य वा श्वो वा परश्वो वागमिष्यति ॥४७॥ आवयोर्युध्यतोर
स्य यद्यागंता जरासुतः ॥ बंधून् वधिष्यत्यथवा नेष्यते स्वपुरीं बली ॥४८॥ तस्मादद्य विधास्या
मो दुर्गं द्विपददुर्गमं ॥ तत्र ज्ञातीन् समाधाय यवनं घातयामहे ॥४९॥ इति संमंत्र्य भगवान् दुर्गं
द्वादशयोजनं ॥ अंतःसमुद्रे नगरं कृत्स्नाद्भुतमचीकरत् ॥५०॥ दृश्यते यत्र हि त्वाष्ट्रं विज्ञानं शि
ल्पनैपुणं ॥ रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितं ॥५१॥ सुरद्रुमलतोद्यानविचित्रोपव
नान्वितं ॥ हेमशृंगैर्दिविस्पृग्भिः स्फाटिकाट्टालगो
भवनानि तु परिस्फाटिकाट्टालकाः तदुपरि हेमशृं
रति ॥ वृक्षभूमिकं यथावास्तु स्थानादि निर्माणस्थानं तमतिक्रम्य विनिर्गतं सुरतरूणां द्रुमलतानां चोद्याने
तान्युद्यानानि विचित्रोपवनानि च तैरन्वितं हेममयानि शृंगाणि येषां तैर्दिविस्पृग्भिः अत्युच्चैः स्फा
टिकाश्च ह्यट्टालाश्च उपरितनभूमिकाः गोपुराणि च द्वाराणि तैर्निर्मितं मित्युत्तरेणान्वयः ॥५२॥

वा ५

राजतप्राकारकूटैः रम्यतेवप्राकारकूटैर्वैपीतलोहैस्ताम्रमयैर्निर्मितैः कोष्ठैः प्रसस्थशालानवशालादिभिः कथंभवेद्धे
मकुंभैः प्रलंकृतैस्त्वयारत्नकूटैः पद्मरागादिभिस्त्वेवैः हेमैः सौवर्णैः महामरकतमयानि स्थलानि य
भूमेरेहैस्व ॥५१॥ किंचनगरस्य हादौवास्तोष्पतीनादेवानांचगरहर्वत्सभीभिश्चंद्रशालिकाभिश्चनि
र्मितेयहदेवगरहैः राजनरहेहल्लसद्धोभमानेपारिजातेप्राहिणोन सस्यापयामासे निस्तुकयरी
विलसवादस्वर्वभाविलात ॥ भक्तनिदेशं मत्स्यधर्मः त्वमियामास्विषहूमिभिः ॥५४॥ विधिपतिः

राजतारकूटैः कोष्ठैर्हैमकुंभैरलंकृतैः ॥ रत्नकूटैर्गृहैर्हैमैर्महामरकतस्थलैः ॥५२॥ वास्तोष्प
तीनांचगृहैर्वल्लभीभिश्चनिर्मितैः ॥ चातुर्वर्ण्यजनाकीर्णं यदुदेवगृहोल्लसत् ॥५३॥ सुधर्मांपा
रिजातंचमहेंद्रः प्राहिणोद्धरेः ॥ यत्रचावस्थितोमर्त्यो मर्त्यधर्मैर्नयुज्यते ॥५४॥ श्यामैककर्णा
न्वरुणोहयान्शुक्लान्मनोजवान् ॥ अष्टौनिधिपतिः कोशान्लोकपालोनिजोदयान् ॥५५॥ यद्य
द्भगवतादत्तमाधिपत्यंस्वसिद्धये ॥ सर्वंप्रत्यर्पयामासुर्हरौभूमिगतेनृप ॥५६॥ यत्रयोग
प्रभावेननीत्वासर्वजनंहरिः ॥ प्रजापालेनरामेणकृष्णः समनुमंत्रितः ॥ निर्जगामपुर
द्वारात्पद्ममालीनिरायुधः ॥ ॥ इतिश्रीभागवतेदुर्गनिवेशनंनामपंचाशत्तमोऽध्यायः

५०

कुबेरः अष्टौकोशान्निधीन ॥ पद्मश्चैवमहापद्मोमत्स्यकूर्मौतथोदकः नीलोमुकुंदः शंखश्चनिधयः
योष्टौप्रकीर्तिताः इतिप्रसिद्धान्निजोदयान्निजविभक्तीः ॥५५॥ अन्येचसिद्धादयोभगवतास्था
धिकारसिद्धयेयद्यद्वाधिपत्यंदत्तमासीत् ॥ तत्सर्वंप्रत्यर्पयामासुरिति ॥५६॥ यथाकालयवना
नवेत्तिनचायौनत्स्याथायोगप्रभावेननीत्वात्वमत्रस्थित्वाप्रजाः पालय ॥ अहंपालयिष्येइतिस

...तेमिते...तां...समृत्तासकलं...

अथास्मिन्भगवान्वैन्यः प्रजानां वृत्तिदः पिता॥ निवासान्कल्पयांचक्रे तत्र तत्र यथार्हतः॥ ३०॥
ग्रामान्पुरः पत्तनानि दुर्गाणि विविधानि च॥ घोषान्व्रजान्सशिबिरानाकरान्खेटखर्वटान्॥
प्राक्पृथोरिह नैवैषा पुरग्रामादिकल्पना॥ यथासुखं वसंति स्म तत्र तत्राकुतोभयाः॥ ३२॥
इति श्री भागवते चतुर्थे अष्टादशः॥ १८॥ मैत्रेय॥ अथादीक्षत राजा तु हयमेधशतेन सः॥
ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती॥ १॥ तदभिप्रेत्य भगवान्कर्मातिशयमात्मनः॥ शत
(क्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवम्॥ २
नविंशो यत्र मेधांगहयापहरणास्पृथोः॥ इंद्रेहेनं प्रवहत्न
सप्ताश्रावारस्तार्ग्र्यान्ते॥ १॥ हयमेधशतेन नितिमितेनादीचनदीहितोभक्त॥ शतानामेधसंकल्प
मकरोदिनसर्ष्यं ब्रह्मावर्ते॥ सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं॥ तंदेवनिर्मितं देशं ब्रह्मावर्तं प्रच
क्षते॥ १॥ आत्मनः समस्तकर्माणि शतेनइमतिशयमभिप्रेत्य तानातदितिनेरुप्सोर्यंज्ञमहोत्सवेन॥

तिर्यङ्नरादिभिः परिचिंतितस्यात्मनो संतस्य विशेषाय समस्तादीन्यनेकाविकारणानि यस्य हे पर
मस्य जनतेरहं स्वविहंविना रूपं केवलं वेमि अतः परं स्वरूपं न वेमि ॥ यद्वा दः शाङ्कृत्या पापेनाक्षित
हृदयस्य स्वरूपं च न वेमि । अतोऽभिमानो न निवर्तते इति भावः ॥ तदैव श्री भगवद्रूपकेऽपि तद्रूपं हृदयस्था
नेत्र स्वरूपमनुवर्णय नमस्करोति ॥ कस्मान्न रतिः ॥ ४ ॥ एतद्वै लोकपद्मं भगवतो नाभिसरोरुहकमलं
हिरण्मयं योगनिद्रा हृदन्तात् ॥ अथ तेन सर्वः शेषसहायः ॥ तदेकं शेषाङ्गं योगपर्यङ्कमाभिरेव सिंधुः समुद्र
तस्मिन्नाश्रितो निनयान्तस्य कोऽवनलोकपद्मस्य गर्भे कर्णिकायां शुभ्रासनस्थ ब्रह्मा भवति तं प्रण
तिर्यङ्नरा हि पसरोरुपदेवदेवस्य मत्स्यादिभिः परिचिन्तितः सदृश हि शोषं ॥ रूपं स्वविष्टमननेन म
हदाद्येनैकेनान्तः परं परमेव यन्न यद्वा दः ॥ ५ ॥ कस्मान्न एतदखिलं च हरे शरहृस्योऽनेकमा
त्वहं गानेन सर्वस्वदं के । यत्नाभिसिन्धुरुहकोऽवनलोकपद्मगर्भे द्युमान् भगवते प्रणतोऽस्मि त
स्मै ॥ ६ ॥ तदिति समुत्कपरिशुद्धविशुद्धयात्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः ॥ यद्बुद्ध्यवस्थि
तिमखण्डितया स्वदृष्ट्या द्रष्टा स्थितावधिमखो व्यतिरिक्त आस्से ॥ ७ ॥ यस्मिन्विरुद्धगतयो
ह्यनिशं पतन्ति विद्यादयो विविधशक्तय आनुपूर्व्यात् । तद्ब्रह्म विश्वभवमेकमनन्तमाद्यमा
नन्दमात्रमविकारमहं प्रपद्ये ॥ ८ ॥

नोऽस्मीत्यर्थः ॥ तत्तु समाधिपत्तौ पापाद्यवस्थात्रैकोऽजीवादि शोचयन्नत्राह ॥ ७ ॥ तेन तत्त्वमिति त्रिकोऽजीव
विलक्षणमेवास्मीति हष्टि ॥ वैलक्षण्यमेवाह ॥ त्वमिति समुक्तः जीवलक्षण्यसादाक्यने ॥ तं परिशुद्धं
सन्नमलिनं त्वं विशुद्धः सत्त्वः त्वमात्मा समन्तरः तत्कूटस्थः सन्नविकारी ॥ त्वमादिपुरुषः सत्तादि
मान् ॥ त्वं भगवान् ॥ तत्तु भगाहीनः त्वं त्र्यधीशः गुणानामधीशः सत्त्वपरं तत्रः ज्ञानपरहं ज्ञाल
एवं ॥ यद्यतो बुद्ध्यवस्थितिं बुद्धेः संलीनामवस्थाम खण्डितया स्वदृष्ट्याविकृतया दृष्ट्या पश्यसि ॥ द्र
ष्टेति स्वमन्यतः अतो बुद्ध्यवस्थितिमित्युत्पन्नभावः तथाभूतपवतं स्थितो पालनेऽत्यधि
मखः यज्ञाधिष्ठाताश्रीविष्णुः ॥ ७८ ॥ तमेव श्रीविष्णुं ब्रह्मरूपेण तानानमस्करोति यस्मिन्निति म ॥

स्प

सकामभजनाद्विमोक्षमाशंक्याह ॥ हे भगवन् ॥ पुरुषार्थः परमानंदः स एव मूर्त्तिर्यस्य सतस्तव
पादपद्ममाशिषो राज्यादेः सकाशात् ॥ सत्याशीः परमार्थफलं इति निश्चितं कस्तथात्मेव
प्रकारेणात्मसेव पुरुषार्थ इत्येवं निष्कामतया तुभ्यं भजतां ॥ यद्यप्येवं तथापि हे अर्य स्वामिन् ॥ दी
नान् कामान् प्रयच्छसि ॥ भगवान्सवात्सान्विपाति संसारभयादत एव ॥ यतो नु गृह्णे हितावरणो का
तरः प्रवत्स्यः यथा नवप्रसूता वा स्वापे तु वत्सलीरपाययति हकादिभ्योरक्षति वत्स इत ॥ १७ ॥ एव
मितं सत्संकल्पितेन ॥ १८ ॥ तत्प्रयच्छामि मीनत्वं किं तदित्यपेक्षायामाह ॥ नान्यैरिति साधो भद्र ॥ हे भद्र ध्रुव
सत्या शिषो हि भगवंस्तव पादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः अप्येवमर्य भग
वान्परिपाति दीनान्वाश्रेव वत्सकमनुग्रहकातरोऽस्मान् ॥ १७ ॥ मैत्रेय उवाच ॥ अथाभिष्टुत एवं
वै सत्संकल्पेन धीमता ॥ भृत्यानुरक्तो भगवान्प्रतिनंद्येदमब्रवीत् ॥ १८ ॥ श्रीभगवानुवाच ॥ वेदाहं
ते व्यवसितं हृदि राजन्यबालक ॥ तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत ॥ १९ ॥ नान्यैरधिष्ठि
तं भद्र यद्भ्राजिष्णु ध्रुवक्षिति ॥ यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितं ॥ २० ॥ मेढ्यां गोचक्रव
त्स्थास्नु परस्तात्कल्पवासिनां ॥ धर्मोग्निः कश्यपः शुक्रो मुनयो ये वनौकसः ॥ २१ ॥ चरंति दक्षि
णीकृत्य भ्रमंतो यत्सतारकाः ॥ प्रस्थिते तु वनं पित्रा दत्वा गां धर्मसंश्रयः ॥ षट्त्रिंशद्वर्षसा
हस्रं रक्षिताव्याहतेंद्रियः ॥ २२ ॥ त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मनाः ॥ अन्वेषंती वनं माता
तीति निवासो यस्मिंस्तादृशं स्थानमर्पितं ॥ २३ ॥ धात्राकृतमगाणां यथा भामसा गणानां पस्पतों वेधनं लोभो मेढी
तस्यां बलीवर्दसमूह इव स्वातंत्र्यकल्पवासिनां च रस्तात् विस्थास्नुलोकत्रयनाशेप्यनुपरि ध्रुवो यादृ
यो नक्षत्रह पार्श्वलोकः सः समर्पयः यदृक्षिणी कृत्य परिसिन्नन्ध्रुवमदक्षिणीकृत्य भ्रमंतश्चरंति ॥ २१ ॥
एतच्च पुत्रास्त्रान् रभविष्यती साह ॥ प्रस्थित इति ॥ तस्य च छंदीदत्वा वनं प्रस्थिते भावेक्त ॥ वनं प्रति
गमने कृते सति रक्षिता रक्षिष्यसि ॥ तथा संकल्पितमपि मद्भक्तस्य तवद्रोहादेव भविष्यतीत्या

दावाग्निं सा प्रवेक्ष्यति

श्री॰ भा॰ टी॰ १०

देयातः स्वं स्वं सत्वं निजं नव वपुर्न भवेच्चेत्॥ तर्हि विज्ञानेन विशिष्टमपरोक्षं ज्ञानं न भवेदित्यनुषंगः कथंभूतं ज्ञा
नमभिदापमार्जनं अज्ञानेचूतन्त्कृतामिरांचूतयोरूपमार्जनेन निवर्तकं॥ यद्वा॥ ज्ञाने भिन्नमीत्यज्ञानमिति विज्ञा
नेमार्जनमापयानमेवेति॥ ननु नश्यानां बुद्ध्यादीनां यतः प्रकाशस्तद्रूस्येति ज्ञानं भवेदेव न गुणप्रकाशैः
गुणावच्छिन्नैः प्रकाशैः भवान्सर्वसाक्षी सूक्ष्मः केवलमनुमीयते कल्पने॥ न तु साक्षात्क्रियते इत्यर्थः
गुन्नमानप्रकारमाहुः प्रकाशते यस्य च येन वा गुणा इति यस्य संबंधी॥ अथ बुद्ध्यादिगुणाः प्रकाशन्ते
या गुणसाक्षी संबंधेन वा बुद्ध्यादिरूढेन प्रमाणा वा सोगुणाः प्रकाशन्त इत्यर्थः॥ अद्गुस्तत्ववपुषित्वयि सेव्यमा

सक्तं न चेद्ज्ञातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनं॥ गुणप्रकाशैरनुमीयते भवान्प्रका
शते यस्य च येन वा गुणः॥ २४॥ न नाम रूपे गुणजन्मकर्मभिर्निरूपितव्ये भवतोस्य साक्षिणः म
नोवचोभ्यामनुमेयवर्त्मनो देव क्रियायां प्रतियंत्यथापि हि॥ २५॥ शृण्वन्गृणन्संस्मरयंश्च चिन्त
यन्नामानि रूपाणि च मंगलानि ते॥ क्रियासु यस्त्वच्चरणारविंदयोराविष्टचेता न भवाय क
ल्पते॥ २६॥ तेन तदाकारांतःकरणेन तत्प्रसादेन साक्षात्कारो भवेदिति भावः॥ २४॥ एवं तावद्गुणका
नामप्युदयापवर्गार्थत्वं रूपाणि॥ विभूषीत्युक्तं तान्नपि भजनीयानि केवलं न तु ज्ञातुं शक्यते॥ अनेन ना
दतकीत्वात्वमनोवचसोरगोचरत्वादित्याहुः न नाम रूपे इति॥ गुणजन्मानि च कर्माणि तैर्निरूपितं
व्येन्निरूपणार्हं न॥ भवतः कुतो नु मेयवर्त्मगोचरस्य न वेत्ति नशापि हेतुः॥ अस्य साक्षिण इति न हि साक्षि
णस्तत्वं मनोवचोगोचर इत्यर्थः॥ एवं बहुधा द्योतमानं अथापि क्रियायामुपासनादिक्रियायां त्वां प्र
तियंत्युपासकाः साक्षात्प्राप्नुवन्ति॥ हि प्रसिद्धं॥ न स्माङ्गसेवमात्रस्तुपसेव्हरिस्थ एव त्रिति॥ २५॥ अन्यत्या
नपि संस्मरयन् क्रियासु देवार्चनादिकर्मसु॥ २६॥ विशेषणं॥ श्रीकृष्णावतारमभिनंदति दिशेति।

५४

५

कथं त्वत्पादाश्रयणमात्रेणातीर्णाः अत उक्तं भवान् ॥ सदनुग्रहात्मतो भक्ताननुगृह्णातीति ॥ ३१ ॥ ननु विवे
किनां किं सङ्गेन न मुक्ताः प्रवर्तितेनत्राहुः येन्य इति ॥ विमुक्तमानिनो विमुक्ता वयमिति मन्यमानाः त्व
य्यस्तो यो भावस्तभावः ॥ तस्माद्भक्तेरभावादित्यर्थः ॥ न विशुद्धा बुद्धिर्येषां ते तथा ॥ यद्वा त्वय्यस्तभा इति
छेदः अस्तमतयो वादिष्वेव विशुद्धबुद्धयः कृच्छ्रेण बहुजन्मतपसा परं पदं ॥ मोक्षसन्निहितं संनिहितं
सत्कुलतपश्चरणादि पतन्ति विघ्नैरभिभूयंते ॥ न त्वाहृता युष्मदंघ्रयो यैस्ते ॥ त्वदीयास्तु कदाचिदपि न
पतन्तीत्याहुः तथा न ते इति ॥ विनायका विघ्नदेवताः तेषामनेकानि सैन्यानि यानि तेषां मूर्ध
सु विचरंतीति विघ्नान् ॥ अरिशान् जयन्तीत्यर्थः ॥ त्वद्भक्तान् भ्रंशयंतीति किमाश्चर्यं यस्मात्तेषामुपकारा

येन्ये रविंदाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ॥ आरुह्य कृच्छ्रेण परं पदं ततः
पतंत्यधो नादृतयुष्मदंघ्रयः ॥ ३२ ॥ तथा न ते माधव तावकाः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्ध
सौहृदाः ॥ त्वयाभिगुप्ता विचरंति निर्भया विनायकानीकपमूर्धसु प्रभो ॥ ३३ ॥ सत्त्वं विशुद्धं
श्रयते भवान्स्थितौ शरीरिणां श्रेयउपायनं वपुः वेदक्रियायोगतपःसमाधिभिस्तवा

यस्मात्त्रिकं शरीरं भगवान् ॥ स्वीकरोतीति ॥ ३३ ॥ सत्तां स्वभावा वहानिद्रयाणि र्हणं येन जनः समी
धारयसीत्युक्तं विभर्षि रूपाणीति तत्केन प्रकारेण स्वाभावत्वमित्यपेक्षायामाहुः ॥ सत्त्वं विशुद्धमि
ति ॥ ३४ ॥ सत्त्वं वपुः श्रयते इत्यन्वयः श्रेयउपायनं कर्मफलदातृ कथं येन वपुषा जनस्तवार्हणं पूजा
मीहते करोति कैः ॥ वेदाश्च क्रियायोगाश्च तपश्च समाधिश्च तैः अन्तराश्रमधर्मैरित्यर्थः ॥ वपुषानाश्र
यणेऽर्हणसंभवात्कर्मफलसंभावसिद्धिः स्यादिति त्वयं भुजादेत्याप्यादिना श्लोकत्रयेण भगवद्भ
क्तानामेव मोक्षो नान्येषामित्युक्तं तत्र धर्मफलभक्तिं विना मा भूत् ॥ मोक्षस्य तु ज्ञानैकसाध्यत्वात् ॥ किं भ
क्त्येत्याशङ्क्याहुः सत्त्वं न चेदिति ॥ ३५ ॥

तृतीये निजरूपेण संभूतस्तु हरिः स्वयं ॥ पितृभ्यां संस्तुतो नीतः पित्रा भीतेन गोकुले ॥ अथेति मंगलार्थं यदि स
र्वगुणोपेतः कालो बभूव ॥ तदा देवक्यां विष्णुराविरासीत् ९ इत्यष्टमश्लोकगतेनान्वयः परमशोभनत्वमेवाह
यर्ह्येवादिना ॥ अजनात् नारायणाज्जन्म यस्य प्रजापतेस्तस्य ऋक्षं तद्रोहिणीनक्षत्रं कथंभूतं शांतानि क्रूरग्रहाग्न्यश्वि
न्यादीनि ग्रहाश्च तारकाश्च यस्मिन् ॥ तत्र यदीति सर्वत्रानुषज्यते निर्मलानामुदयो यस्मिंस्तत् तया मंगलभूयि

श्रीशुक उवाच अथ सर्वगुणोपेतः कालः परमशोभनः ॥ यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकं १
दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयम् ॥ मही मंगलभूयिष्ठपुरग्रामव्रजाकरा ॥ २ ॥ नद्यः प्रसन्नस
लिला ह्रदा जलरुहश्रियः ॥ द्विजालिकुलसन्नादस्तवका वनराजयः ॥ ३ ॥ ववौ वायुः सुखस्पर्शः पुण्य
गंधवहः शुचिः ॥ अग्नयश्च द्विजातीनां शांतास्तत्र समिंधत ॥ ४ ॥ मनांस्यासन्प्रसन्नानि साधूनामसुर
द्रुहां ॥ जायमानेऽजने तस्मिन्नेदुर्दुंदुभयो दिवि ॥ ५ ॥ जगुः किन्नरगंधर्वास्तुष्टुवुः सिद्धचारणाः विद्याधर्य
श्च ननृतुरप्सरोभिः समं मुदा ॥ ६ ॥ मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः ॥ मंदं मंदं जलधरा जगर्जु
रनुसागरं ॥ ७ ॥ निशीथे तमउद्भूते जायमाने जनार्दने ॥ देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः आ
विरासीद्यथा प्राच्यां दिशींदुरिव पुष्कलः ॥ ८ ॥

ष्ठाः पुरादयो यस्यां सा जलरुहैः श्रीः शोभा येषां ते ॥ द्विजालिकुला
नां सन्नादो येषु ते स्तवका यासु ताः समिंधत ॥ अजागमाभावोऽदृष्टवशः समेधन्ते निस्माविदीप्तावभूवुरित्यर्थः ॥ ३ ॥ अ
सुरद्रुहां कंसादिव्यतिरिक्तानां सर्वप्राणिनाम् अजने जायमाने आसन् प्रसवो यस्मिन्समये तमसा उद्भूते घनतमसि
निशीथे यथावत् ॥ देवरूपेण ॥ ८ ॥

दिष्ट्याभई तव पदः ॥ पादस्थयाः ईश्वरस्य तव जन्ममात्रेण भुवो भार अपनीत एव किंच त्वत्पदकैः कोमलैः पदैः सुशोभ
नैर्वज्रांकुशादिशुभलक्षणैः गां पृथ्वीं द्यां स्वर्गं च तव तया अनुकंपितां ॥ तव जन्मना भारोपनीतः इत्युक्तास्मा पि किं जी
वन्मुक्तवदुक्तः न हि न हीत्याहुः नेति ॥ ३९ ॥ न वदेह ईश असंसारिणस्ते जन्मनः कारणं क्रीडां विना न तर्कयामः किं
च अभयाश्रये अभयेआश्रयत्वयीति ॥ तथात्ततत्स्वबोधनं देनित्यमुक्तस्यथेः ॥ तव जन्मकारणं नास्तीति किं वक्तव्य
यतो जीवात्मन्यपि भवादयस्त्वयि विषये या विद्या तया कृताः न परमार्थतः संतीति प्रस्तुतं प्रार्थयंते ॥ ४० ॥ मत्स्या

दिष्ट्या हरेस्या भवतः पदो भुवो भारोपनीतस्तव जन्मनेशितुः ॥ दिष्ट्यांकितां त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां
द्यां च तवानुकंपिताम् ॥ ३९ ॥ न तेभवस्येश भवस्य कारणं विना विनोदं वत तर्कयामहे ॥ भवो निरोधः स्थिति
रप्यविद्यया कृता यतस्त्वय्यभयाश्रयात्मनि ॥ ४० ॥ मत्स्याश्वकच्छपवराहनृसिंहहंसराजन्यविप्रविबुधेषु
कृतावतारः ॥ त्वं पासि नस्त्रिभुवनं च तथाधुनेश भारं भुवो हर यदूत्तम वंदनं ते ॥ ४१ ॥ दिष्ट्यांब ते कुक्षिगतः
परः पुमानंशेन साक्षाद्भगवान्भवाय नः ॥ माभूद्भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः ॥ ४२
श्रीशुक उवाच ॥ इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवम् ॥ ४३ ॥ इ
ति श्रीभागवते महापुराणे दशमस्कंधे विलोः कृता गर्भस्तुतिर्नाम द्वितीयोध्यायः ॥ २ ॥ ॥ ॥ ॥ (

त्रैलोति ॥ नः अस्मान्त्रिभुवनं च ॥ अमदाय यथा पासि ॥ तथाधुनापि पाहीति वंदनं ते सर्वे शिरोभिः प्रणमंति देवकीं
प्रत्याहुः दिष्ट्येति ॥ ४१ ॥ नोस्माकं भवाय उद्भवाय साक्षात्परः पुमांस्ते कुक्षिंगतः अतो भयं माभूदिति ॥ ४२ ॥ यस्य रू
पमनिदं प्रत्यग्भूतं यथा यथावत् ॥ अस्मान्वंचयित्वा पुनराविर्भविष्यामि इति मन्यमानाः ब्रह्मेशानौ पुरोधाय पु
रः कृत्वा ययुः ॥ ४३ ॥ इति श्रीभागवते दशमस्कंधे भावार्थदीपिकायां द्वितीयोध्यायः ॥ २ ॥ ॥ ॥

श्री० भा० द० ११

सएवोक्तस्तद्रूपएव त्वंनत्वेवकीजवदेशप्रविष्टइत्यर्थः ॥ ननुविश्वंसृष्ट्वातदनुप्रविष्टस्यकिमेतदद्भुतं अतआह स्वमह्रते
तिस्वमाययासृष्ट्वातदनन्तमप्रविष्टएवेति ॥ ननुकथंतर्हिसृष्ट्वैवोच्यते ॥ तत्सृष्ट्वादेवानुप्रविशदिति अतआह प्र
विष्टइवेतिभाव्यसेनिरूप्यसेप्रपन्नैर्वामहदादिरूपेणाप्रविष्टइवलक्ष्यसे ग्रहदृष्टान्तः यथेति ॥ १४ ॥ इमेविकृताभावा
महदादयोयथा ॥ तथेति ॥ सहदृष्टान्तेविद्गुणोतितेविकृतैरिति ॥ तेहिविकृतैः षोडशविकारैः सहसन्निपत्यवि

सएवस्वप्रकृत्येदंसृष्ट्वाग्रेत्रिगुणात्मकं ॥ तदनुत्वंह्यप्रविष्टः प्रविष्टइवभाव्यसे ॥ १४ ॥ य
थेमेविकृताभावास्तथातेविकृतैःसह ॥ नानावीर्याःपृथग्भूताविराजंजनयंतिहि ॥ १५ ॥
सन्निपत्यसमुत्पाद्यदृश्यंतेनुगताइव ॥ प्रागेवविद्यमानत्वान्नतेषामिहसंभवः ॥ १६ ॥

राजंजनयंति ॥ सन्निपतनेहेतुः यतः पृथग्भूताः संतः नानावीर्याविशिष्टकार्यसमर्थानभवंति अतः
सन्निपत्येतिएवं ॥ समस्यायानुगताः प्रविष्टाइवदृश्यंतेनपुनः ॥ प्रविष्टाः कुतइत्यतआह प्रागेवकारणात्मना
विद्यमानत्वात् नतेषामिहसृष्टेः कार्येपश्चात्संभवः प्रवेशइति १६ ननुतेषांकार्येप्रवेशः कथंकल्प्यते
कार्यंचदेवाभिन्नंवाभिन्नंवाजायतइतिकिंनस्यादितिचेन्नआह ॥ प्रागेवतेषांविद्य ॥ मानत्वान्नतेषांभूताना॰
नामिह ॥ कार्यसंभवइतिदार्ष्टान्तिकेतिदिशति ॥ एवंभवानिति ॥ १६ ॥ ॥

तमद्भुतं बालकं॥ वसुदेव ऐक्षतेति द्वितीयश्लोकेनान्वयः॥ अद्भुतत्वे हेतुगर्भाणि विशेषणानि अंबुजेक्षण मित्यादीनि श्रीवत्सलक्षणं गलेन शोभते गलशोभि सन्कौस्तुभो यस्मिन्॥९॥ परिष्वक्तः सहस्रकुंतलं किरीट कुंडलादीनां त्विषा स्फुरदपरिमितकेशाभित्यर्थः विस्मयेन उत्फुल्ले विशिष्टे लोचने यस्य स गवामयुतमस्पृश न्मनसा दत्तवान्॥ कंसनिगृहीतस्य दानासंभवात्‌ कंसनिगृहीतस्य स्पृष्टे हेतुः कृष्णावतारेति॥ मुदाआ

तमद्भुतं बालकमंबुजेक्षणं चतुर्भुजं शंखगदाद्युदायुधं॥ श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीतांब रसांद्रपयोदसौभगम्॥९॥ महार्हवैडूर्यकिरीटकुंडलत्विषा परिष्वक्तसहस्रकुंतलं॥ उद्दामकांच्यंगदकंकणादिभिर्विरोचमानं वसुदेव ऐक्षत॥१०॥ स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुंदुभिस्तदा॥ कृष्णावतारोत्सवसंभ्रमोस्पृशन्मुदा द्विजेभ्योयुतमाप्लुतो गवाम्॥११॥ अथैनमस्तौदवधार्य पूरुषं परं नतांसः कृतधीः कृतांजलिः स्वरोचिषा भारत सूतिकागृहं विरोचयंतं गतभीः प्रभाववित्॥१२॥ वसुदेव उवाच॥ विदितोसि भवान्साक्षात्पुरुषः प्रकृतेः परः॥ केवलानुभवानंदस्वरूपः सर्वबुद्धिदृक्॥१३॥

स्तुतोआमः॥ ज्ञात्वा नत इति वा कृतधीः शुद्धबुद्धिः प्रथमं पुत्रबुद्ध्या प्रपन्नतोपरितम्याह॥१२॥ अहो विदितोसीति कथं विदितोसि भवान्प्रकृतेः परः॥ पुरुष इति॥ ननु किं मया प्रत्यर्थं पुरुषस्य प्रकृतेरन्यत्वादेवेति॥ अत आह॥ साक्षादिति प्रत्यक्षत्वेनेत्यर्थः॥ ननु अत्र तत्सविकृष्टं प्रत्यक्षतत उपलभ्यते किं चित्रमिति॥ अत आह॥ केवलेति केवल श्चासावनुभवश्च॥ आनंदश्च तावेव स्वरूपं यस्य सः किंच सर्वबुद्धिदृक् न त्वेवंभूतोहं प्रपो भवन्नीत्यर्थः॥१३॥

आत्मनो दृश्येषु गुणेषु देहादिषु सद्व्यतिरेकत आत्मव्यतिरेकेण दृश्यकाभावात् ॥ अयं देहादिरिति व्यवस्यते निश्चिनोति यः पुमान् स अबुधः ॥ अविद्वान् व्यतिरेकदर्शनात् ॥ किं च मनीषितं विचारितं सत् देहादि सर्वं । यतो विनानुवादं वाचारंभणमात्रं विना न सम्यग्भवति । अतो वस्तुत्वेन त्यक्तं बाधितमेव वस्तुबुद्ध्या उपाददत् स्वीकुर्वन् अबुधः इत्यर्थः ॥ एवं परमेश्वराद्दृश्यस्य तद्व्यतिरेकेण सत्त्वमुक्तं परमेश्वरोपादानत्वादपि तद्व्यतिरेकेण सत्त्वमित्याह ॥ त्वत्तोऽस्येति ॥ १८ ॥ न चैवं सत्यपि विकारित्वमित्यर्थः ॥ अनीहादिति ॥ १९ ॥ अगुणत्वादनीहत्वं ततो विका

यथात्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः ॥ विनानुवादं न च तन्मनीषितं सम्यग्यतस्त्यक्तमुपाददत्पुमान् ॥ १८ ॥ त्वत्तोऽस्य जन्मस्थितिसंयमान्विभो वदन्त्यनीहादगुणादविक्रियात् ॥ त्वयीश्वरे ब्रह्मणि नो विरुध्यते त्वदाश्रयत्वादुपचर्यते गुणैः ॥ १९ ॥ स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः ॥ सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तमसा जनात्यये ॥ २० ॥ त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेऽवतीर्णोऽसि ममाखिलेश्वर ॥ राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना
निहनिष्यसे चमूः ॥ २१ ॥

रित्वमित्यर्थः ॥ ननु निरीहस्य कथं कर्तृत्वं कर्तृत्वे वा कुतो विकारित्वं ॥ तत्राह त्वयीश्वर इति ब्रह्मत्वादविकारित्वं ॥ ईश्वरत्वाच्च कर्तृत्वमिति न चैतदपि विरुद्धमेव नेत्याह त्वदाश्रयत्वादिति। गुणैः ॥ कर्तृत्वादिकं त्वयि सृष्ट्यादिकर्तृत्वमुपचर्यते गुणाश्रयत्वात् ॥ यथा भृत्यकृतं राज्ञ इति ॥ एवंभूतस्य तव यथा विश्वस्थितिसर्गलयार्थं त्रिवर्णा गुणावतारा एवं पापवायक्ष्माभारावतरणार्थमसीति ज्ञानमित्याह त्वमिति श्लोकद्वयेन रिरक्षिषुरवतीर्णोऽसि ॥ श्रीकृष्णेन वर्णेन अतः साधूनां रक्षणार्थं राजन्यसंज्ञा ये असुरकोटियूथपास्तैर्निर्व्यूह्यमाना स्तन्त्रा ल्पमाना च मूः ॥ सेनां विहनिष्यसे संहरिष्यसि किं तत्र यापयम

श्री० भा० द० २१

ननुयद्यहमप्रत्यक्षस्तर्ह्यनुमेयस्तत्स्वरूपप्रकारणात् यथा कार्येर्वर्तन्ते तर्हि विद्वद्भिरुह्यमाणो ऽप्यनुमेयग्रहणो किंनास्ति तत्राह॥ वृत्तानुमेयलक्षणोऽसीति बुद्ध्यादिरूपादिज्ञानेनानुमेयंलक्षणंस्वरूपंयेषांतेरिंद्रियैः ग्राह्यैः गुणैः सहसन्नपिवर्तमानोऽपितद्गुणाग्रहः॥ तैः गुणैः सहनगदह्यसेत्रयंभावः॥ नहि ग्राह्यैः सहभावमात्रेणग्रहणेकारणंकिंतिंद्रियाणांशक्तिः साचकार्येकः॥ समधिगम्याययाकार्यमेवकल्प्यते॥ अतोयथाचक्षुषा रूपग्रहणेरसादिग्रहणंनास्ति॥ नचैवंविषयग्रहणोत्तग्रहणमपीति॥ अविषयत्वेनग्रहणानर्हत्वमुक्तमेवमसर्वबुद्धिहगिति॥ अत्रैवंनाव त्वागेवविद्यमानत्वात्प्रवेशोनास्तीत्युक्तं॥ किंचपरिच्छिन्नस्यनीडप्रसादेदेवप्रवेशोभवेत्॥ नवलनाष्टनत्वार

एवंभवान्तुद्यननुमेयलक्षणोग्राह्यैर्गुणैःसन्नपितद्गुणाग्र
हः अनावृतत्वाद्बहिरंतरंनतेसर्वस्यसर्वात्मनआत्मवस्तुनः॥१४॥

परिच्छिन्नत्वेनबहिरंतरंभेदोनास्तिकुतः प्रवेशाद्युत्पादः॥ अनावृतत्वादिति अनावृतत्वेहेतुनाह॥ सर्वस्येति नहिसर्वस्वरूपस्यान्यदावरकमस्ति॥ सर्वात्मनोनह्येकेनावृतोऽन्यस्यात्माभवेत्॥ आत्मवस्तुनइति॥ आत्मनो वस्तुनः श्रुतिहेतुद्वयं॥ अतसातत्यगामनेइत्यस्मादततिव्याप्नोतीत्यात्मा॥ नहिव्यापकस्यावरणंवस्ते॥ तथाव स्तुनः॥ परमार्थस्यवस्तुनः॥ अवरणंनद्यदतेइत्यर्थः॥ तस्मान्नवांतर्यामितया प्रवेशोनमुख्योऽस्तिकुतस्तरांगर्भेप्र वेशः अतः केवलोनुभावानंदस्वरूपप्रवृत्तेविदितोसीत्याश्रयंममभाग्यमित्यर्थः॥ नन्वेतद्देत्तुचत्तुष्टयंप्रपंच स्यावस्तुत्वेघटेत नमुतत्संभवति॥ सत्यत्वेनप्रतीतेरित्याशंक्याह॥ यदुति॥१२॥ ॥

श्री
भा॰ द॰
९३

नष्टे लोक इति । तदा च वै लोके महाभूतेषु लीनेषु तेषु आदिभूतं तमस्तत्त्वं प्रविष्टेषु तस्मिन्नपि व्यक्ते अव्यक्तं प्रधानं प्राप्ते अशेषात्मके प्रधाने संज्ञा प्रज्ञा यस्य एवं तत्र विलीनमिदमखिलं पश्चादेवमुद्बोधनीयमिति ॥ सोऽशेषसंज्ञ इति वा ॥ किंच ॥ एवं प्रलयहेतुर्योऽयं कालः हे अव्यक्तबन्धो प्रकृतिप्रवर्तक ॥ तस्य प्रलयावधिभूतस्य तेते तव चेष्टा लीला चेष्टते विपरिवर्तते तं त्वां क्षेमधामाश्रयं भयस्थाने प्रपद्ये शरणं व्रजे क्षेमधामत्वमेवाह ॥ २६ ॥ मर्त्य इति

नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु ॥ व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यते शेषसंज्ञः ॥ २५ ॥ योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुश्चेष्टते येन विश्वम् ॥ निमेषादिर्वत्सरान्तो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ॥ २६ ॥ मर्त्यो मृत्युव्यालभीतः पलायन्सर्वाँल्लोकान्निर्भयं नाध्यगच्छत् ॥ त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्युरस्मादपैति ॥ २७ ॥ स त्वं घोरादुग्रसेनात्मजान्नः त्राहि त्रस्तान्भृत्यवित्रासहासि ॥ रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्यक्षं मांसदृशां कृषीष्ठाः ॥ २८ ॥ जन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन ॥ समुद्विजे भवद्धेतोः कंसादहमधीरधीः ॥ २९ ॥ उपसंहर विश्वात्मन्नदो रूपमलौकिकं ॥ शङ्खचक्रगदापद्मश्रिया जुष्टं चतुर्भुजम् ॥ ३० ॥

लोकानत्यतियन् यदृच्छया केनापि भाग्योदयेन देव अद्य प्राप्य त्वत्तः अपयाति स त्वमिति ॥ २७ ॥ भृत्यानां वित्रासं हन्तीति भृत्यवित्रासहा असि भृत्यवदिति वा छेदः । पौरुषमीश्वरं ध्यानधिष्ण्यं ध्यानास्पदं मांसदृशां मांसचक्षुषां प्रत्यक्षं मा कृथाः ॥ भवत ॥ एवं हेतोर्निमित्तं भवतो हेतोः समुद्विजे बिभेमि ॥ यत एवं अधीरा चित्ता किमित्युपसंहर त्रेधा ॥ एवं भक्तेन मया प्रार्थितो गान्तव महतीमवाप्स्यादिति नाहं विघ्नमिति ॥ ३० ॥ ॥

अयमिति असभ्यः खलः समर्पितं कथितं ॥२२॥ उपाधावत् अभीता ॥२३॥ त्वयि भयशंकैव तावन्नास्तीति श्लोकचतु
ष्टयेनाह देवकी किंचिद्विज्ञापयितुं ॥ रूपमिति यत्किमपि रूपं वस्तु प्राहुर्वेदाः किं तदत आह ॥ अव्यक्तं ॥ अव्यक्तत्वे
आद्यं कारणं किं परमाणवः न ब्रह्म बृहत् किं प्रधानेन ज्योतिश्चेतनं ॥ किं वैशेषिकाणामिव ज्ञानगुणं न निर्गुणं ॥
किं मीमांसकानामिव ज्ञानपरिणामि न निर्विकारं ॥ किं प्रकृत्यादीनामिव शक्तिविक्षेपपरिणामि न
सत्तामात्रं तर्हि किं सामान्यं न निर्विशेषं तर्हि किं कारणत्वात्सक्रियं ॥ न निरीहं ॥ सन्निधानमात्रेण कारणं

अयं त्वसभ्यस्तव जन्म नौ गृहे श्रुत्वाग्रजांस्ते न्यवधीत्सुरेश्वर ॥ स तेऽवतारं पुरुषैः समर्पितं श्रुत्वाधुनैवा
भिसरत्युदायुधः ॥२२॥ श्रीशुक उवाच ॥ अथैनमात्मजं वीक्ष्य महापुरुषलक्षणं ॥ देवकी तमुपाधावत्
कंसाद्भीता शुचिस्मिता ॥२३॥ देवक्युवाच ॥ रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारं स
त्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपः ॥ २४ ॥

एवंभूतं किमपि कार्यकलं स एव त्वं साक्षाद्विष्णुरिति ॥ अपरोक्षमित्याह ॥ अध्यात्मदीप इति बुद्ध्यादिकरण
संघातप्रकाशक इत्यर्थः ॥ अथवा व्यक्तेन केनापि प्रकारेणाव्यज्यत इत्युक्ते कथमुपस्याताव्यक्तस्य
तत्राह ॥ आद्यं सर्वस्य कार्यस्याद्यमनादीत्यर्थः ॥ तथा ब्रह्मज्योतिर्निर्गुणं निर्विकारमिति च
तुर्भिः पदैर्देशेन प्रकाशेन च गुणेन च व्यक्तिं निराकरोति ॥ तथा सत्तामा
त्रमिति ॥ विशेषेण निर्विशेषमिति ॥ सामान्येन निरीहमिति क्रियया
च व्यक्तिं निराकरोति ॥ अव्यक्तसमानं ॥ एवंभूतस्य तव न भयशं
केति भावः किंच महाप्रलयेऽपि वशिष्यमाणस्त्वं नो भ
यमित्याशंक्याह ॥ २४ ॥

अदित्यां कश्यपाद्वामनश्चासेतियत् ॥ तदपि तद्रूपयोर्युवयोः अहमेव पुनरासमित्यर्थः श्वाक्यथमेतावदेतत ॥ वामे जन्मेति स्मरणाय तत्तानायदर्शितं ॥ मद्भवं मद्विषयं ॥ अनंतरं त्वदिच्छया बालोपि भविष्यामीति भावः ॥ ननु त्वयि प्रसन्नेपि किमित्यावयोः पुनः पुनर्जन्मेति अतः परेन भविष्यतीत्याह ॥ ४४ ॥ यु

अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः समं ॥ अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ॥ ४१ ॥ तयोर्वां पुनरेवाहमदित्यामास कश्यपात् ॥ उपेंद्र इति विख्यातो वामनत्वाच्च वामनः ॥ ४२ ॥ तृतीयेस्मिन्भवेहं वै तेनैव वपुषाथ वां ॥ जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ॥ ४३ ॥ एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे ॥ नान्यथा मद्भवं ज्ञानं मर्त्यलिंगेन जायते ॥ ४४ ॥ युवां मां पुत्रभावेन ब्रह्मभावेन वासकृत् ॥ चिंतयंतौ कृतस्नेहौ यास्येथे मद्गतिं परां ॥ ४५ ॥ श्रीशुक उ॰ ॥ इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ॥ पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ॥ ४६ ॥ ततः शौरिर्भगवत्प्रणोदितः सुतं समादाय स सूतिकागृहात् ॥ यदा बहिर्गंतुमियेष तर्ह्यजा या योगमायाजनि नंदजायया ॥ ४७ ॥ रामनुजायनमो नमः ॥ ॐ नमः रामाकृष्णायनमः

वामिति ॥ यदि कंसाद्बिभेषि ॥ तर्हि मां गोकुलं नय ॥ यशोदायाश्च कन्यां मन्मायां मानयेति ॥ प्रथममेव भगवता प्रचोदितो वसुदेवो यदा गंतुमैच्छत्तदैव ॥ अजापि ॥ या योगमाया सा नंदजायया निमित्तमात्रभूतया ॥ अजनि जाता ॥ ४७ ॥ ४७ ॥

निशांते प्रलयावसाने यथावकाशमसंकोचतः। असंभावितत्वाद्यदास्यतैवस्यादित्यर्थः चतुर्भुजरूपेण
विर्भावे कारणं तावदाह त्वमेवेत्यादिचतुर्दशभिः॥३१॥ पूर्वसर्गे प्रथमजन्मनि अभूः आसीः पृश्निर्नाम स्वा
यंभुवे मन्वंतरे ऽयं वसुदेवः॥३२॥ तेपाथे तपः कृतवंतौ तपतोः आचरतोः ईयुः॥ गतानि मदात्मनोर्मयि

विश्वंयदेतत्स्वतनौ निशांते यथावकाशं पुरुषः परो भवान्॥ बिभर्ति सोयं मम गर्भगोऽभूदहो नृ
लोकस्य विडंबनं हि तत्॥३१॥ ॥श्रीभगवानुवाच॥ त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायंभुवे सति तदायं सु
तपा नाम प्रजापतिरकल्मषः॥३२॥ युवां वै ब्रह्मणादिष्टौ प्रजासर्गे यदा ततः॥ सन्नियम्येंद्रियग्रामं
तेपाथे परमं तपः॥३३॥ वर्षवातातपहिमघर्मकालगुणाननु॥ सहमानौ श्वासरोधविनिर्धूतम
नोमलौ॥३४॥ शीर्णपर्णानिलाहारावुपशांतेन चेतसा॥ मत्तः कामानभीप्संतौ मदाराधनमीह
तुः॥३५॥ एवं वां तप्यतोस्तीव्रं तपः परमदुष्करम्॥ दिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः॥३६॥
तदा वां परितुष्टोहममुना वपुषानघे॥ तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः॥३७॥ प्रादुरा
सं वरदराड् युवयोः कामदित्सया॥ व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः॥३८॥ अजुष्टग्राम्य
विषयावनपत्यौ च दंपती न वव्राथेऽपवर्गं मे मोहितौ देवमायया॥३९॥ गते मयि युवां लब्ध्वा वरं
मत्सदृशं सुतं ग्राम्यान्भोगानभुंजाथां युवां लब्धमनो

त्वयोः॥३७॥ अमुना वपुषा प्रादुर्भूतोऽस्मि वरदराड् वरदेषु श्रेष्ठ इत्यर्थः॥ तेन सकृद्रूपेण वारंवारं याविर्भावे कारणमुक्तं॥ कामस्य दित्सया दातुमिच्छया॥ मादृशो मत्सदृशः॥३८॥ नेमं मत्तोपि युवामपवर्गं न वव्रा

श्री॰ भाग॰ ८५

ङौ चतुर्थे वेदिकावाक्यमाकर्ण्यातिभयाकुलः दुर्मतिभिर्हितं मेने केसो बालादिहिंसनं ॥ तदृष्टसं जन्मकोला
हलः प्रगाढ्याता: दीनदीनवत् ॥ दीनादपि दीनवत् ॥ ननु तथा पुत्रस्याप्यनीतं नन्वात ॥ साच योगमायेति ज्ञा
तत्वा याच नो पिशाचि छिद्रे ग्राह कृष्णजग्राह ॥ ७ ॥ अपोथयद्दुलेनाचिदेपसैव देवी मूर्ताक्रपणामिति प्र

श्रीशुक उवाच ॥ ॥ बहिरंतः पुरद्वारः सर्वाः पूर्ववदावृताः ॥ ततो बालध्वनिं श्रुत्वा गृहपालाः स
मुत्थिताः ॥ १ ॥ ते तु तूर्णमुपव्रज्य देवक्या गर्भजन्म तत् ॥ आचख्युर्भोजराजाय यदुद्विग्नः प्रती
क्षते ॥ २ ॥ स तल्पात्तूर्णमुत्थाय कालोयमिति विह्वलः ॥ सूतीगृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्धजः
॥ ३ ॥ तमाह भ्रातरं देवी कृपणा करुणं सती ॥ स्नुषेयं तव कल्याणी स्त्रियं मा हन्तुमर्हसि ॥ ४ ॥ बह
वो हिंसिता भ्रातः शिशवः पावकोपमाः ॥ त्वया दैवनिसृष्टेन पुत्रिकैका प्रदीयतां ॥ ५ ॥ नन्व
हं ते ह्यवरजा दीना हतसुता सती ॥ दातुमर्हसि मंदाया अंगेमां चरमां प्रजां ॥ ६ ॥ श्रीशुक उवाच ॥ ॥
उपगुह्यात्मजामेवं रुदत्या दीनदीनवत् ॥ याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः ॥ ७ ॥ तां
गृहीत्वा चरणयोर्जातमात्रां स्वसुः सुतां ॥ अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः ॥ ८ ॥ सा
तद्धस्तात्समुत्पत्य सद्यो देव्यंबरं गता ॥ अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ॥ ९ ॥ दिव्यस्रगंबरा
त्नाभरणभूषिता ॥ धनुःशूलेषुचर्मासिशंखचक्रगदाधरा ॥ १० ॥ सिद्धचारणगन्धर्वैरप्सरःकिन्न
रोरगैः ॥ उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ॥ ११ ॥ किं मया हतया मंद जातः खलु तवां

त्यात् ॥ शिशून्निघ्नतीति ज्ञात्वा वारयति पाठांतरे तु मासां कृपणां त्वया हिंसीः इतवानपि वरुणा मनिके

लेपर

१८

हताः प्रत्ययार्थाः सर्वे द्वास्थयो द्रवं । अथवा हताः प्रत्ययाः स्वास्थ्यं येषां जाग्रतामपि तथाभूतेषु द्वारपालेषु लोह
कीलकयुक्तैः शृंखलैर्बृहद्भिः कवाटादिभिर्दुरत्यया इति । स्वयमेवापयीत विवृता इत्यर्थः अनूयेत इति वक्तव्ये
गुणस्थानादसा रवेर्निमित्तात् ॥४९॥ गंभीरो यस्तोयौघस्तस्य जवेन ये ऊर्मयस्तैः फेनिलाः । फेनव्याप्ता भयानकः

तदा हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ ॥ द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्
कपाटायसकीलशृंखलैः ॥४८॥ ताः कृष्णवाहे वसुदेव आगते स्वयं व्यशीर्यंत यथा तमो रवेः वव
र्ष पर्जन्य उपांशुगर्जितः शेषोन्वगाद्वारि निवारयन् फणैः ॥४९॥ मघोनि वर्षत्यसकृद्यमानुजा
गंभीरतोयौघजवोर्मिफेनिला भयानकावर्तशताकुला नदी मार्गं ददौ सिंधुरिव श्रियः पतेः
५० नंदव्रजे शौरिरुपेत्य तत्र तान् गोपान्प्रसुप्तानुपलभ्य निद्रया सुतं यशोदाशयने निधाय तत्
सुतामुपादाय पुनर्गृहानगात् ५१ देवक्याः शयने न्यस्य वसुदेवोथ दारिकां प्रतिमुच्य पदो
र्लोहमास्ते पूर्ववदावृतः ॥५२॥ यशोदा नंदपत्नी च जातं परमबुध्यत न तल्लिंगं परिश्रांता निद्र
यापगतस्मृतिः ॥५३॥ ॥ इति श्रीभागवते महापुराणे दशमस्कंधे श्रीकृष्णजन्म तृतीयोध्यायः
॥ ३ ॥ राम ॥ ॥ ॥

कैरावर्तशतैः व्याप्तापि श्रियः पतेः निद्रयाय जया प्रतिमुच्य बद्धा पदोः पादयोः लोहं निगडं स्था
लिंगं जातं किं वा इति केवलमबुध्यत न तु पुत्रः कन्या वेति योगनिद्रया मोहितेति ॥३५॥ ॥ ॥ इति श्रीभा
गवते महापुराणे दशमस्कंधे श्रीकृष्णभावार्थदीपिकायां तृतीयोध्यायः ॥ ३ ॥ ॥ ॥ ॥ ॥

अज्ञानाश्रयकर्मवाहमाह ॥ पर इति ॥ कथं न हिंसा स्मृणादिदं तु स्वस्थस्याय श्विनादिश्रवणां ॥ अज्ञानमूलमेवे-
त्याह यावदिति ॥ २१ ॥ अस्वदृक् देहाभिमानी नर इति मानी तस्य देहस्य हननमात्मन्यमानः इत्यर्थः श्यालः स्वस्रोरि-
ति ॥ स्वसृशब्देन द्विवचनानुपपत्त्या मिथुनलक्षणया स्वसृतनयोरभिधाने लिंगसमवायेन प्राणभृत
उपदर्शीतेति देवकीवसुदेवयोः प्रत्येकं पादावग्रहीदित्यर्थः श्यालशब्देन कथंचिद्वसुदेवाभिधाने आत्म

तस्माद्भद्रे स्वतनयान्मया व्यापादितानपि ॥ मा शोचं तं यतः सर्वः स्वकृतं विंदते वशः ॥ २१ ॥ यावद्ध-
तोस्मि हंतास्मीत्यात्मानं मन्यते स्वदृक् ॥ तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् ॥ २२ ॥ क्षमध्वं
मम दौरात्म्यं साधवो दीनवत्सलाः ॥ इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रोरथाग्रहीत् ॥ २३ ॥ मोच-
यामास निगडाद्विश्रब्धः कन्यकागिरा ॥ देवकीं वसुदेवं च दर्शयन्नात्मसौहृदं ॥ २४ ॥ भ्रातुः सम-
नुतप्तस्य क्षांत्वा रोषं च देवकी ॥ व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह ॥ २५ ॥ एवमेतन्महाभाग
यथा वदसि देहिनां ॥ अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः ॥ २६ ॥ शोकहर्षभयद्वेषलोभ-
मोहमदान्विताः ॥ मिथो घ्नंतं न पश्यंति भावैर्भावं पृथग्दृशः ॥ २७ ॥ श्रीशुकः ॥ कंस एवं प्रस-
न्नाभ्यां विशुद्धं प्रतिभाषितः ॥ देवकीवसुदेवाभ्यामनुज्ञातो विशद्गृहं ॥ २८ ॥ तस्यां रात्र्यां व्यतीता-
यां कंस आहूय मंत्रिणः ॥ तेभ्य आचष्ट तत्सर्वं यदुक्तं योगनिद्रया ॥ २९ ॥ आकर्ण्य भर्तुर्गदितं तमू-
चुर्देवशत्रवः ॥ देवान्प्रति कृतामर्षा दैतेया नातिकोविदाः ॥ ३० ॥ रामजी नमो नमो नमो नमः (

सौहृदं प्रियवादादिना दर्शयन् ॥ स्वपरभेददर्शने किं भवति तदाह शोकहर्षेति ॥ २७ ॥ भावैर्देवनिमित्तभूतै-
र्मिथो भावान् घ्नंतं भावमीश्वरं ॥ पृथग्दृशस्तेन पश्यंति ॥ किंतु अहमेव हंता हत इति मन्यंत इत्यर्थः वि-
शुद्धं यथा भवति ॥ २८ ॥ नातिकोविदाः ॥ दृष्टमात्रमतयः ॥ ३० ॥ ॥ ॥ ॥

परमविस्मितः ॥ कथं दैवी वागनृता जातेति ॥१४॥ हे भाम हे भगिनीभर्तः ॥ पुरुषादो राक्षसो यथा स्वापत्यमेव हिनस्ति दे
महाभागौ स्वकृतंभुजः स्वारब्धकर्मभोक्तृन किंच जंतवः प्राणिनः सदा एकत्र नासते किंतु स्वस्वकाले भवंतदपि ए
कत्र नासते किंतु विप्रकृष्य तथापि देवाधीनाः सदा नासते ॥ इत्यनेन यदुक्तं जन्ममरणादि तदपि देहानामेव नात्म
न इत्याह ॥१८॥ भुवीति भूतानि देहा यथा यांति अपयांति च भवंति न भवंति चेत्यर्थः ॥ यथा भुवि भौमानि च घटादी
नि तद्वदेतेषु जन्मादिभिर्विक्रियमाणेष्वपरोक्षतया प्रत्यभिज्ञायमानो नात्मा विपर्येति विपर्ययं न प्राप्नोति ॥ प

तयाभिहितमाकर्ण्य कंसः परमविस्मितः ॥ देवकीं वसुदेवं च विमुच्य प्रश्रितोऽब्रवीत् ॥ कंस उवाच ॥ अ
हो भगिन्यहो भाम मया वां वत पाप्मना ॥ पुरुषाद इवापत्यं बहवो हिंसिताः सुताः ॥१५॥ स त्वहं त्यक्तकारु
ण्यस्त्यक्तज्ञातिसुहृत् खलः ॥ कान् लोकान्वै गमिष्यामि ब्रह्महेव मृतः श्वसन् ॥१६॥ दैवमप्यनृतं वक्ति न
मर्त्या एव केवलं ॥ यद्विश्रंभादहं पापः स्वसुर्निहतवान् शिशून् ॥१७॥ मा शोचतं महाभागौ आत्मजान्स्व
कृतंभुजः ॥ जंतवो न सदैकत्र दैवाधीनास्तदासते ॥१८॥ भुवि भौमानि भूतानि यथा यांत्यपयांति च
नायमात्मा तथैतेषु विपर्येति यथैव भूः ॥१९॥ यथानेवंविदो भेदो यत आत्मविपर्ययः ॥ देहयोगवि
योगश्च संसृतिर्न निवर्तते ॥२०॥

कद्रूपपववर्त्तने इत्यर्थः ॥ भौमेषु विक्रियमाणेषु यथा भूस्तथेति ॥ एवं
विचार्यमाणे मृतिर्न शोकाद्यवकाशः अज्ञानतस्तु न निवर्तत इत्याह ॥ यथेति ॥२०॥ यथावत् ॥ अनेवंविदः
अनात्मविद एवं विपर्यये देहात्मबुद्धिर्भवति ॥ देहाहंकारेण ह्यात्मनि परिच्छिन्ने सतीदमहंकारास्पदं भिन्नं भव
ति ॥ यतो देहपुत्रादिभिः सह योगो वियोगश्च संसृतिः सुखदुःखे इति यावत् ॥ अज्ञानेन न निवर्तत इत्यर्थः ॥ ए
वमुक्तप्रकारेण न तेन तव तनयाः ॥ अहं तु तान् ॥ न वा तिनवान् ॥ तथाप्यज्ञानहृष्ट्या सतनयानयावापादिता
न पिमानुशोचतमिति सान्त्वयति तस्मादिति ॥२०॥ राम राम राम ॥ ॥

सि

आयान्तमीपमानाततोमृत्युर्येषांतेसतांविद्वेषोनमस्तुमाचेरेतः॥ किंतवदनर्थकारीत्याह॥ आयुः श्रियमिति॥ इति श्रीदशमस्कंधेभावार्थदीपिकायां चतुर्थोऽध्यायः॥ ४॥ ॥ ॥ पंचमेजातकेनंदः सूनोः कृत्वामहोत्सवम्॥ गत्वाथमथुरांप्रायवसुदेवाद्यामोत्सवं॥ १॥ महामनाउदारचित्तः श्रीनंदनंदनायधेनूनांनियुतेद्वेलक्षेसमतिलपर्वतान्प्रादात्॥ कथंभूतान्॥ रत्नौघैरत्नसमूहैः शातकौंभांबरैः सुवर्णवस्त्रैश्चावृतान्

विप्रागावश्चवेदाश्चतपः सत्यंदमः शमः॥ श्रद्धादयातितिक्षाचक्रतवश्चहरेस्तनूः॥ ४१॥ सहिसर्वसुराध्यक्षोह्यसुरद्विड्गुहाशयः॥ तन्मूलादेवताः सर्वाः सेश्वराः सचतुर्मुखाः॥ ४२॥ अयंवैतद्वधोपायोयदृषीणांविहिंसनं॥ ४३॥ श्रीशुक उवाच॥ एवंदुर्मंत्रिभिःकंसः सहसंमंत्र्यदुर्मतिः॥ ब्रह्महिंसांहितंमेनेकालपाशावृतोसुरः॥ ४४॥ संदिश्यसाधुलोकस्यकदनेकदनप्रियान्॥ कामरूपधरान्दिक्षुदानवान्गृहमाविशत्॥ ४५॥ तेवैरजः प्रकृतयस्तमसामूढचेतसः॥ सतांविद्वेषमाचेरुरारादागतमृत्यवः॥ ४६॥ आयुः श्रियंयशोधर्मंलोकानाशिषएवच॥ हंतिश्रेयांसिसर्वाणिपुंसोमहदतिक्रमः॥ ४७॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुर्थोऽध्यायः॥ ४॥ ॥ श्रीशुक उवाच॥ नंदस्त्वात्मजउत्पन्नेजाताह्लादोमहामनाः॥ आहूयविप्रान्वेदज्ञान्स्नातः शुचिरलंकृतः॥ १॥ वाचयित्वास्वस्त्ययनंजातकर्मात्मजस्यवै॥ कारयामासविधिवत्पितृदेवार्चनंतथा॥ २॥ धेनूनांनियुतेप्रादाद्विप्रेभ्यः समलंकृते॥ तिलाद्रीन्सप्तरत्नौघशातकौंभांबरावृतान्॥ ३॥

द्रव्याणांहिरण्यादीनांतन्मध्येकेषांचिद्द्वानैरेवशुद्धिर्यथानथादानादिभिःजातकर्मादिसंस्कारैरेवगर्भाणां शुद्धिरितिदर्शयितुंप्रतिनियतानिशोधकानिदृष्टांतत्वेनोदाहरति॥ ३॥ कालेनेति॥ कालेनभूम्यादिः स्नानेनदेहादिः शौचेनामेध्यादिःसंस्कारैर्गर्भादिः तपसाइंद्रियादिः॥ इज्ययाब्राह्मणादिः दानेनद्रव्याणि

ननिर्गतानि दृष्टादिनानि येषां तान् ॥ अन्यास्य अस्ततो विधृतः उत्तरस्य रणं त्यक्त्वा ॥ अन्यासक्तान्विमुखान् आश्रेति न दंसिते
मेनिर्भये देशाभूरैः संग्रामादन्यत्र विकत्थने प्रौढिवादो येषां तैः ॥ ननु दूरे विभेमि शंभो आश्रेति तत्राह ॥ रहोजुषेति
सर्वस्यायं जनः प्रविष्टेन क्वापि दपि बहिरदृष्टेनेत्यर्थः पुरुषप्रवेशारहितमिव दृष्टं तं वनमोकोयस्य तेन शंभुना

एवं चेत्तर्हि भो नैनं दूरग्रामगर्जनादिषु ॥ अनिर्दृष्टा त्रिदशांश्च हनिष्यामो ह्यवैशिष्ट्यं न ॥३१॥ किमुद्य
मैः करिष्यन्ति देवाः समरभीरवः ॥ नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ॥३२॥ अस्त्रस्तस्येषा
रवाद्भिरिहन्यमाना सन्ततः ॥ रणे जीविषवत्तस्य पलायनपरायणः ॥३३॥ केचित्प्राञ्जलयो दीना
न्यस्तशस्त्रा दिवौकसः ॥ मुक्तकच्छशिखाः केचिद्भीताः स्मः इति वादिनः ॥३४॥ न त्वं विस्मृतशस्त्रा
स्त्रान्विरथान्भयसन्नतान् ॥ हंस्यन्यासक्तमनसो भग्नचापानयुध्यतः ॥३५॥ किं क्षेमशूरैर्विबुधैरसं
युगविकत्थनैः ॥ रहोजुषा किं हरिणा शंभुना वा वनौकसा ॥ किमिंद्रेणाल्पवीर्येण ब्रह्मणा वा
तपस्विना ॥ तथापि देवाः सापत्या नोपेक्ष्या इति मन्महे ॥३६॥ ततस्तन्मूलखनने नियुंक्ष्वास्मान् अनुव्र
तान् ॥३७॥ यथामयोंगे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुं ॥ यथेंद्रियग्राम उपेक्षित
स्तथा रिपुर्महान्बद्धबलो न चाल्यते ॥३८॥ मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः ॥ तस्य च ब्रह्म
गोविप्रास्तपो यज्ञाः सदक्षिणाः ॥३९॥ तस्मात्सर्वात्मना राजन्ब्राह्मणान्ब्रह्मवादिनः ॥ तपस्विनो
यज्ञशीलान्गाश्च हन्मो हविर्दुघाः ॥४०॥ यद्यपि देवाः क्षुद्रमैः न किंचिद् पि कर्तुं समर्थाः तथापि नीतिवस्तु
सर्वे वध्या इत्याह ॥ तथापीति रूढपदो बद्धमूलः देवानां मूलं विष्णुः स च यत्र धर्मस्तत्रास्ते ॥ धर्मस्य मूलं वेदादय
इति ॥ किं च विप्रादयो हरेरेव तनवो यस्मात्तस्मादयमेवोपाय इत्याह ॥ ४१ ॥

श्री॰ भा॰ द॰ ९८

तेभ्यः प्रादाद्यथोचितमन्यानप्यपूजयत् ॥ हरेर्निवासेन ये आत्मनि गुणाः तैः रमाया आक्रीडं विहारस्थानं
वार्षिकं प्रतिवर्षं देयं भ्रातरं स्वीयम् अवमोचनं वसतिस्थानं पुनर्भवः पुनर्जात इव देहस्तु गर्भविशेषणाः
संसारचक्रे परिवर्तमान इति ॥ २४ ॥ दुर्लभं त्वमेवादृ ॥ नैकत्रेति प्रियश्चासौ संवासश्च प्रियसंवासः ॥ हे प्रिय

अवाद्यंत विविधानि वादित्राणि महोत्सवे ॥ कृष्णे विश्वेश्वरेऽनंते नंदस्य व्रजमागते ॥ १३ ॥ गोपाः परस्प
रं हृष्टा दधिक्षीरघृतांबुभिः ॥ आसिंचंतो विलिंपंतो नवनीतैश्च चिक्षिपुः ॥ १४ ॥ नंदो महामनास्तेभ्यो
वासोऽलंकारगोधनम् ॥ सूतमागधवंदिभ्यो येऽन्ये विद्योपजीविनः ॥ १५ ॥ तैस्तैः कामैरदीनात्मा
यथोचितमपूजयत् ॥ विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च ॥ १६ ॥ रोहिणी च महाभागा नंद
गोपाभिनंदिता ॥ व्यचरद्दिव्यवासःस्रक्कंठाभरणभूषिता ॥ १७ ॥ तत आरभ्य नंदस्य व्रजः सर्वस
मृद्धिमान् ॥ हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप ॥ १८ ॥ गोपान्गोकुलरक्षायां निरूप्य मथुरां
गतः ॥ नंदः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह ॥ १९ ॥ वसुदेव उपश्रुत्य भ्रातरं नंदमागतं ॥ ज्ञात्वा
दत्तकरं राज्ञे ययौ तदवमोचनम् ॥ २० ॥ तं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतं ॥ प्रीतः प्रियत
मं दोर्भ्यां सस्वजे प्रीतिविह्वलः ॥ २१ ॥ पूजितः सुखमासीनः पृष्ट्वानामयमादृतः ॥ प्रसक्तधीरात्म
जयोरिदमाह विशांपते ॥ २२ ॥ दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते ॥ प्रजाशाया निवृत्तस्य प्र
जा यत्समपद्यत ॥ २३ ॥ दिष्ट्या संसारचक्रेऽस्मिन्वर्तमानः पुनर्भवः ॥ उपलब्धो भवानद्य दुर्लभं प्रि
यदर्शनम् ॥ २४ ॥ नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणाम् ॥ ओघेन व्यूह्यमानानां प्लवानां

निवासो न सामोघेन नीयमानानां स्रवंतीति स्रवाः तरणकाष्ठादयः तेषां यथा नैकत्र स्थितिस्तद्वत्

सौमंगल्यगिरः स्वस्तिवाचका विप्रादयो बभूवुः तत्र सूताः पौराणिकाः प्रोक्ता मागधाः वंशशंसकाः वंदि
नस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ॥ संमृष्टानि संसिक्तानि च द्वाराणी अजिराणि अंगनानि च गृहांतराणि
हृमध्यानि च यस्मिन्स्तथा चित्रध्वजैश्च पताकाभिः स्रजः चैलतोरणानि च तैर्भूषिताः हरिद्रातैलरूषिताः लि
प्ता विचित्रा धातवः बर्हं स्रजश्च वस्त्राणि च कांचनमालाश्चालंकारा यथा विद्यंते येषां ते तथा भूता गवादयो व

सौमंगल्यगिरो विप्राः सूतमागधवंदिनः ॥ गायकाश्च जगुर्नेदुर्भेर्यो दुंदुभयो मुहुः ॥५॥ व्रजः
संमृष्टसंसिक्तद्वाराजिरगृहांतरः ॥ चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः ॥६॥ गावो वृषा व
त्सतरा हरिद्रातैलरूषिताः विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ॥ महार्हवस्त्राभरणकंचु
कोष्णीषभूषिता ॥ गोपाः समाययू राजन्नानोपायनपाणयः ॥८॥ गोप्यश्चाकर्ण्य मुदिता यशोदा
याः सुतोद्भवं आत्मानं भूषयांचक्रुर्वस्त्राकल्पांजनादिभिः ॥९॥ नवकुंकुमकिंजल्कमुखपंक
जभूतयः बलिभिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥१०॥ गोप्यः सुमृष्टमणिकुंडलनिष्क
कंठ्यश्चित्रांबराः पथि शिखाच्युतमाल्यवर्षाः ॥ नंदालयं सवलया व्रजतीर्विरेजुर्व्यालोलकुं
डलपयोधरहारशोभाः ॥११॥ ता आशिषः प्रयुंजानाश्चिरं पाहीति बालके हरिद्रातैलचूर्णाद्भिः
सिंचंत्योऽजनमुज्जगुः ॥१२॥ भूतिः संपदर्थः ॥ आकल्पा अलंकाराः नवकुंकुमकिंजल्कैर्मुखपंकजे
भूतिः ॥ श्रोणी येषां ताः ॥ आमृष्टानि उज्ज्वलितानि मणिवलयानि कुंडलानि ॥ निष्काः पदकानि कंठे यासां
ताः च्युताश्च शिखाभ्यः च्युतानि माल्यवर्षाणि यासां ता नंदालयं व्रजंतीर्व्रजंत्यः पथि विरेजुः सवलयाः कंक
णभूषिताः व्यालोलैः कुंडलादिभिः शोभा यासां ताः जनं सिंचंत्यः अजनमुज्जगुरिति वा ॥१२॥

श्रीकृष्णविषये शंकमानं राजानं प्रति अविषये प्रवृत्ता सैव मरिष्यतीति स्ववध आहृत नयेति ॥१॥ यत्र श्रीकृष्णस्य श्रवणा
दीनि न संति तत्रैवासौ शक्तिः सा त्वास्मिंस्त्वेव सति कायाशंकेति भावः ॥ योषित्वा वेशतो वशनारीमिवात्मानं कृ
त्वा ननु निर्लज्जा निर्विशंका च सती कथं परसद्मनि प्रविष्टा तत्राह कामचारिणीति ॥ नहि कामचारिणी छिद्र
विचरमित्यर्थः ॥ तां वनितां अपतिं इष्टमागतां अतिरूपवतीं श्रियमिव गोप्यः अमंसत इत्येवं श्लोकगतेनान्वयः श्री
साम्यार्थानि विशेषकानि ॥ केशबंधव्यतिषिक्तमल्लिका धम्मिल्लसंसिक्तमल्लिकाकुसुमा बृहन्नितंबेन

नंदः पथि वचः शौरेर्न मृषेति विचिंतयन् ॥ हरिं जगाम शरणमुत्पातागमशंकितः ॥ कंसेन प्रहि
ता घोरा पूतना बालघातिनी ॥ शिशूंश्चचार निघ्नंती पुरग्रामव्रजादिषु ॥२॥ न यत्र श्रवणादीनि रक्षो
घ्नानि स्वकर्मसु ॥ कुर्वंति सात्वतां भर्तुर्यातुधान्यश्च तत्र वै ॥३॥ सा खेचर्येकदोपेत्य पूतना नंदगोकु
लं ॥ योषित्वा माययात्मानं प्राविशत्कामचारिणी ॥४॥ तां केशबंधव्यतिषिक्तमल्लिकां बृहन्नितंब
स्तनकृच्छ्रमध्यमां ॥ सुवाससं कल्पितकर्णभूषणत्विषोल्लसत्कुंतलमंडिताननां ॥५॥ वल्गुस्मिता
पांगविसर्गवीक्षितैर्मनो हरंतीं वनितां व्रजौकसां ॥ अमंसतांभोजकरेण रूपिणीं गोप्यः श्रियं द्र
ष्टुमिवागतां पतिं ॥६॥ बालग्रहस्तत्र विचिन्वती शिशून्यदृच्छया नंदगृहेऽसदंतकं ॥ बालं प्रतिच्छ

स्तनाभ्यां चोभवत आक्रांतमिव कृच्छ्रं कृशं मध्यमुदरं यस्यास्तां सुवाससं रमणीये वाससी यस्यास्तां कल्पितयोः
कर्णभूषणयोस्त्विषोल्लसद्भिः कुंडलैर्मंडितमाननं यस्यास्तां वल्गु रम्यं स्मितं येन युतेन याभूतापांगविस
र्गेण युतैर्वीक्षितैर्व्रजौकसां मनो हरंतीं अतो गोपा हृतमनस्त्वेन तां न निवारितवंत इत्यर्थः अंबुजके भवति गो
प्यः श्रियमिव मन्वानास्तूष्णीमासत ॥ अतः केनाप्यनिवारिता सती प्रविवेशेति भावः बालग्रहः पूतनाऽसदं
तकं बालं ददर्श ॥ असतामंतकं इह श्लोकयंन विभेतीत्याह ॥ प्रतिच्छन्ननिजोरुतेजसं बालभावेन प्रतिच्छ

कच्चिदिति॥पशव्यादिरूपे तस्मिन्वने निर्दोषगोपयोदध्यादि प्रभूतगोपिकास्तन्यादिना पुत्रस्तेऽभिवर्द्धतइत्यादि पृच्छ
ति॥ प्रसक्तार्थी एतन्न जयोरित्युक्तनात भवद्भ्यामुपलालितः सकच्चिद्वर्त्ततेइतिशेषः॥ पुत्रादर्शनक्लेशानाह पुंसइ
ति॥२८॥ सुहृदो बंधव स्तैरनुभावितः संपादितोयस्त्रिवर्गः॥ सद्धिपुंसोविहितोयुक्तः शास्त्रेणवाप्रोक्तः॥ न स्वमा
त्रपर्यवसितः॥ अतस्तेषु क्लिश्यमानेषु सद्यावायन भवतीत्यर्थः॥ नंदोवसुदेवसांत्वयन्नाह॥ कंसचारभयशोकः
मानोनंदः॥ कदाहेणोक्तं देवतान्यदेवाह॥ अदृष्टएवनिष्ठासमाप्तिर्यस्यसः यदेवपुत्रादिप्राप्त्यवध्यदृष्ट
कच्चित्पशव्यं निरुजं भूर्यंबुतृणवीरुधं॥ बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः॥२६॥ भ्रातर्मम सुतः
क कच्चिन्मात्रा सह भवद्व्रजे॥ तातं भवंतं मन्वानो भवद्भ्यामुपलालितः॥ पुंसस्त्रिवर्गो विहितः सुहृदो ह्यनुभावि
तः॥ न तेषु क्लिश्यमानेषु त्रिवर्गोर्थाय कल्पते॥२७॥ नंदउवाच॥ अहो ते देवकीपुत्राः कंसेन ब
हवो हताः एकावशिष्टावरजा कन्या सापि दिवं गता २८ नूनं ह्यदृष्टनिष्ठोयमदृष्टपरमो जनः अ
दृष्टमात्मनस्तत्वं यो वेद न स मुह्यति॥२९॥ वसुदेवउवाच॥ करो वै वार्षिको दत्तो राज्ञे दृष्टा वयं च
वः नेह स्थेयं बहुतिथं संत्युत्पाताश्च गोकुले॥३०॥ श्रीशुकः॥ इति नंदादयो गोपाः प्रोक्तास्ते
शौरिणा ययुः अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य गोकुलं॥ इति श्रीभागवते दशमस्कंधे पंचमो
ध्यायः॥५॥ श्रीशुकउवाच॥ ह्रीयते॥ न देवतेपुत्रादयोपि न भवंतीत्यर्थः॥ तथा ह्यदृष्टपरमः अदृ
ष्टमेव परमं यस्य सः यद्यपि पुत्रादयो वियुक्ताः॥ तथापि तान ह्यदृष्टमेव पुनः संगमयतीत्यर्थः॥ एवमदृष्ट
मात्मनस्तत्त्वमव्यभिचारकारणं सुखदुःखविपर्ययौ वेद स न मुह्यति॥ तस्मादिदानीं त्वयाः दुःखं न भावीयं
मृतानामपि वियुक्तानामपि चकालांतरे दर्शनयोगयोः संभवात्॥ अस्मदादिभिरपि कालांतरेणहि
योगे सत्यपीतिनंदस्य देवीवागन्याभाविसूचिकातां बुद्ध्वा वसुदेवो दुःखेन्यत्कानंदमाह॥२९॥ करोवैर

निवेष्वपि: २८ इति श्री...
कृष्णं तोषय...

व्यादायमुखंविवृत्यनिजरूपमास्थितामरणसमयेकपटमपुक्तंविततस्यादेहः षट्क्रोशमध्यवर्त्तिनोद्रुमान्॥
चूर्णयामास॥ ईषामात्रोग्रदंष्ट्रास्यं॥ ईषालांगलदंडस्तत्प्रमाणाउग्रादंष्ट्रायस्मिंस्तद्यावत्तन्मास्यंयस्मिंस्तत्तस्याः
कलेवरंवीक्ष्यगोपागोप्यश्चसंतत्रसुः॥ संत्रासहेतुत्वेनपुनर्विशेषणैःपदैर्विशिनष्टि॥ गिरिकंदरवन्नासिकेय।
स्मिंस्तत्॥ गिरेःस्थूलौस्थूलोपलौतद्वत्स्तनौयस्मिंस्तत्॥ रौद्रंघोरंप्रकीर्णाअरुणामूर्धजायस्मिंस्तत्॥ अं
धकूपाविवगंभीरेऽक्षिणीयस्मिंस्तत्॥ पुलिनवदारोहोजघनंतेनभयंभीषणं॥ बद्धाःसेतवइवभुजोरूअंघ्र

निशाचरीत्थंव्यथितस्तनाव्यसुर्व्यादायकेशांश्चरणौभुजावपि॥ प्रसार्यगोष्ठेनिजरूपमास्थिता
वज्राहतोवृत्रइवापतन्नृप॥१३॥ पतमानोऽपितद्देहस्त्रिगव्यूत्यंतरद्रुमान्॥ चूर्णयामासराजेंद्रमह
दासीत्तदद्भुतं॥१४॥ ईषामात्रोग्रदंष्ट्रास्यंगिरिकंदरनासिकम्॥ गंडशैलस्तनंरौद्रंप्रकीर्णारुण
मूर्धजम्॥१५॥ अंधकूपगभीराक्षंपुलिनारोहभीषणम्॥ बद्धसेतुभुजोर्वंघ्रिशून्यतोयह्रदोदरं
॥१६॥ संतत्रसुःस्मतद्वीक्ष्यगोपागोप्यःकलेवरं॥ पूर्वंतुतन्निःस्वनितभिन्नहृत्कर्णमस्तकाः॥ बालं
चतस्याउरसिक्रीडंतमकुतोभयं॥ गोप्यस्तूर्णंसमभ्येत्यजगृहुर्जातसंभ्रमाः॥१८॥ यशोदारोहि
णीभ्यांताःसमंबालस्यसर्वतः॥ रक्षांविदधिरेसम्यग्गोपुच्छभ्रमणादिभिः॥१९॥ गोमूत्रेणा
स्नापयित्वापुनर्गोरजसार्भकं॥ रक्षांचक्रुश्चशकृताद्वादशांगेषुनामभिः॥२०॥ गोप्यःसंस्पृष्टस
लिलाअंगेषुकरयोःपृथक्॥ न्यस्यात्मन्यथबालस्यबीजन्यासमकुर्वत॥२१॥ ग्रामनारायणा।

ग्रीचयस्मिंस्तत्॥ अस्मतोयह्रदइवोदरंयस्मिंस्तत्॥ इतिपूर्वमेवतस्याःशब्देनभीताः पुनर्दर्शनेनातित्रस्त
संतित्याह॥ पूर्वंत्विति॥ तस्यानिःस्वनितेनशब्देननिर्भिन्नानिहृत्कर्णमस्तकानियेषांते॥ द्वादशांगेषुल
लाटादिषुकेशवादि॥ द्वादशनामभिः॥ अत्राचातापवच्च प्रथमंनिःसंभ्रमेणैवरक्षांकृत्वाकिंचित्स्वस्था
मः पुनस्तन्मयेणबीजन्यासमकुर्वतेत्याह॥ संस्पृष्टसलिलाआचांताआत्मनिप्रथमंगोपकरयोश्च

चराचरात्मत्वाद्दैवतां विबुध्य निमीलितेक्षण आस ॥ स्वयमनंतं दुष्टानामंतकं ॥ अंकं ॥ आरोपयत् बालं मत्वा
यथोरगं सुप्तमबुद्धिरज्जुधीः ॥ रज्जुधीश्च ॥ मृग्राज्ञानतो रज्जुबुद्ध्या गृह्णातीति तद्वत् ॥ ननु यशोदारोहिण्यौ ।
नाकथयतां वा कथं तेनान्तर्गृहं तामिति ॥ ९ ॥ वामेव वल्गु जनन्या इव चेष्टितं यस्यास्तां वरस्त्रियं च ॥ सदृशैर्वा नरा
हमध्ये वीक्ष्य ॥ अतस्ते तौ पवदिश्च मा देवेह्यतः कोशपरिच्छदासिवत् ॥ मृदु चर्म चित्रमयः कोशः परि

विबुध्य तां बालकमारिकाग्रहं चराचरात्मा स निमीलितेक्षणः अनंतमारोपयदंकमंतकं
यथोरगं सुप्तमबुद्धिरज्जुधीः ॥ ८ ॥ तां तीक्ष्णचित्तामथ वामचेष्टितां वीक्ष्यांतरा कोशपरिच्छदा
सिवत् ॥ वरस्त्रियं तत्प्रभया च धर्षिते निरीक्षमाणे जननी ह्यतिष्ठतां ॥ ९ ॥ तस्मिन्स्तनं दुर्जरवी
र्यमुल्बणं घोरांकमादाय शिशोर्ददावथ ॥ गाढं कराभ्यां भगवान्प्रपीड्य तत्प्राणैः समं रोष
समन्वितोऽपिबत् ॥ १० ॥ सा मुंच मुंचालमिति प्रभाषिणी निपीड्यमानाखिलजीवमर्मणि ॥
विवृत्य नेत्रे चरणौ भुजौ मुहुः प्रस्विन्नगात्रा क्षिपती रुरोद ह ॥ ११ ॥ तस्याः स्वनेनातिगभीर
रंहसा साद्रिर्मही द्यौश्च चचाल सग्रहा ॥ रसा दिशश्च प्रतिनेदिरे जनाः पेतुः क्षितौ वज्रनि

च्छद आवरणं यस्यासेः खड्गस्य तद्वत् ॥ तत्प्रभया च धर्षिते अभिभूते ते ॥ अहमस्य जननी इयं वेति मोहि
वसंतौ निरीक्षमाणौ परं केवलमतिष्ठतां न निवारितवत्यौ ॥ तस्मिन्स्थाने दुर्जरवीर्यं विषयुक्तत्वात्
नेनेह्य स्तनमेकमादाय तस्मै शिशवे ददौ अथानंतरमेव प्रपीड्य केवलं विषमपथ्यमिति मत्वैव तस्याः
प्राणैः सहापिबत् ॥ चरणौ भुजौ च मुहुर्मुहुः क्षिपती निर्भिन्नानि स्वेदयुक्तानि गात्राणि यस्याः

कृष्णेन विनिर्मुक्तः ॥ अतएव सपद्योहतः पाप्मा यस्य सः प्रसंगाद्भक्तिवैभवं कैमुत्यन्यायेनाह पूतनेनेति ॥ ३३ ॥ अ
द्धया आत्मिकेन भक्त्या प्रेम्णा रक्ताः (तेन नामोक्तमिति) स्निग्धास्तन्मातरइति ॥ वत्साहरणलीलाभिप्रायेण
बहुवचनम् ॥ गोगोपिकास्तदा मातरो भवन्निति ॥ पतन्त्या तन्नामोक्तमार्भकमर्भकचरितं तत्र तन्नामोक्तामि
कलेवरं परशुभिश्छित्वा ततो व्रजौकसः दूरे क्षिप्त्वावयवशो न्यदहन्काष्ठवेष्टितं ॥ दह्यमानस्य दे
हस्य धूमश्चागुरुसौरभः ॥ उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः ॥ ३४ ॥ पूतना लोकबालघ्नी रा
क्षसी रुधिराशना ॥ जिघांसयापि हरये स्तनं दत्वाप सद्गतिं ॥ ३५ ॥ किं पुनः श्रद्धया भक्त्या कृष्णाय परमात्मने ॥ यच्छन्प्रियतमं किं नु रक्तास्तन्मातरो यथा ॥ ३६ ॥ पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां लोक
वंदितैः ॥ अंगं यस्याः समाक्रम्य भगवानपि वत्स्तनं ॥ ३७ ॥ यातुधान्यपि सा स्वर्गमवाप जननीगति
म ॥ कृष्णभुक्तस्तनक्षीराः किमु गावोनुमातरः ॥ ३८ ॥ पयांसि यासामपिबत्पुत्रस्नेहस्नुतान्यलं ॥ भग
वान्देवकीपुत्रः कैवल्याद्यखिलप्रदः ॥ ३९ ॥ तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणं ॥ न पुनः क
ल्पते राजन्संसारोज्ञानसंभवः ॥ ४० ॥ कटुधूमस्य सौरभ्यमवघ्राय व्रजौकसः किमिदं कुत एवेति
वदंतो व्रजमाययुः ॥ ४१ ॥ ते तत्र वर्णितं गोपैः पूतनागमनादिकं ॥ श्रुत्वा तन्निधनं स्वस्ति शिशो
श्चासन्सुविस्मिताः ॥ ४२ ॥ नंदः स्वपुत्रमादाय प्रेत्यागतमुदारधीः ॥ मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरू
द्वह ॥ ४३ ॥ य एतत्पूतनामोक्षं कृष्णस्यार्भकमद्भुतं ॥ शृणुयाच्छ्रद्धया मर्त्यो गोविंदे लभते रतिं ॥ ४४ ॥
ति ॥ ४३ ॥ अनंतदैत्यकुलानीशः पूतनायाः शिशुच्छलात ॥ स्तन्यापोषणतः प्राणैः प्राणानकृत निमकल्मष
दिति ॥ ॥ ॥ इति श्रीदशमस्कंधे भावार्थदीपिकायां षष्ठोध्यायः ॥ ६ ॥ ॥ उक्तिपञ्चाकटभ्रोणितृणावर्तमधः
दिपनं ॥ दर्शयन्निश्रमास्येच कृष्णः क्रीडति सप्तमे ॥ १ ॥ ॥ ॥ राम ॥ ॥

श्रीः भा॰ टी॰ २९

प्रज्ञाद्येकादशबीजानां मध्ये एकरश्मिद्धैशीर्णिकरयोः ॥ मयि भुवत्वारितयोम्मादवेवैके कं बीजंन्यस्य वालस्या
प्येगेघृतयैवाकुर्वत ॥ अंघ्रिमध्री जानु जान्बुनी भुजंभुजौ कंशिरः ॥ तथ्यादित्वरवलामकुर्वन्नित्याह ॥ २२ ॥ चक्र्यग्रत
इति ॥ वक्रसहितो हरिस्त्वावाग्रतोख्यसगादेगदा ॥ सहितो हरिस्त्वपश्चाद स्तत्वत्पार्श्वयोर्धनुर्धरोमधुहा
सिथरः अजनश्चसमेतात ॥ शंखथरउरुगायत्तः अकोणेषु दितावथस्तात ॥ एवं बहिः रक्षांकृत्वा

अव्याद ज्ञोंघ्रिमणिमांस्तव जान्वथोरू यज्ञोच्युतः कटितटं जठरं हयास्यः ॥ हृत्केशवस्त्वदुरईशइ
नस्तुकंठं विस्मुर्भुजं मुखमुरुक्रमईश्वरः कं ॥ २२ ॥ चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्त्वत्पार्श्वयो
र्धनुरसी मधुहाजनश्च ॥ कोणेषु शंखउरुगाय उपर्युपेंद्रस्तार्क्ष्यः क्षितौ हलधरः पुरुषः समं
तात् ॥ २३ ॥ इंद्रियाणि हृषीकेशः प्राणान्नारायणोवतु ॥ श्वेतद्वीपपतिश्चित्तं मनो योगीश्वरोवतु
॥ २४ ॥ पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान्परः क्रीडंतं पातु गोविंदः शयानं पातु माधवः ॥ २५ ॥ व्रजं
तमव्याद्वैकुंठ आसीनं त्वां श्रियः पतिः ॥ भुंजानं यज्ञभुक्पातु सर्वग्रहभयंकरः ॥ २६ ॥ डाकिन्यो यातु
धान्यश्च कुष्मांडा येर्भकग्रहाः भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः ॥ २७ ॥ कोटरा रेवती ज्येष्ठा पू
तना मातृकादयः ॥ उन्मादा ये ह्यपस्मारा देहप्राणेंद्रियद्रुहः ॥ २८ ॥ स्वप्नदृष्टा महोत्पाता वृद्धबालग्र
हाश्च ये ॥ सर्वे नश्यंतु ते विष्णोर्नामग्रहणभीरवः ॥ इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम पा
यपित्वा स्तनं माता संन्यवेशयदात्मजं ॥ ३० ॥ तावन्नंदादयो गोपा मथुराया व्रजंगताः विलोक्य पूत
तदेहगामकुर्वन्नित्याह ॥ ३१ ॥ इंद्रियाणीति प्रात्मानमहंकारं संन्यवेशयायामास ॥ २० ॥ विस्मयमेवाहनूनं
मिति व न संविधे माप्रतेसरर्षिः जपः प्रभाववानेनयोगीशो ज्ञानी वा सम्भ्रमास ॥ यन्तः सपवहर इति

तदर्थः॥ शयानस्याशिशोरल्पकस्यासौ प्रवालवन्मृदुः अंघ्रियों क्षिप्तो नद्दतं शकटं व्यवर्त्तत विपरीतमगमत् विध्वस्तानि नानारसवंति॥ कुप्यभाजनानि सुवर्णरजतातिरिक्तकांस्यादिमयानि यथा भवंति॥ तथा चक्रे चक्रद्वाक्षं च क्रान्ताः अत्यस्ताश्च क्रान्ताः यस्मिन् विभिन्नः कूवरो युगंधरः॥ यस्य तच्च तच्च यथा भवति॥ तं यथा व्यवर्त्ततेति॥ अद्भुतदर्शनेनाकुला बभूवुः॥ तदेवाह॥ कथमिति विपर्ययगात्॥ विपरीतमगात्॥ तच्च

अर्थः शयानस्याशिशोरनोल्पकप्रवालमृद्वंघ्रिहतं व्यवर्त्तत॥ विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभिन्नकूवरं॥७॥ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः॥ नंदादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात्॥८॥ ऊचुरव्यवसितमतीन् गोपान् गोपीश्च बालकाः॥ रुदतानेन पादेन क्षिप्तमेतन्न संशयः॥९॥ न ते श्रद्दधिरे गोपा बालभाषितमित्युत॥ अप्रमेयं बलं तस्य बालकस्य न ते विदुः॥१०॥ रुदंतं सुतमादाय यशोदा ग्रहशंकिता॥ कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत्॥११॥ पूर्ववत्स्थापितं गोपैर्बलिभिः सपरिच्छदं॥ विप्रा हुत्वार्चयांचक्रुर्दध्यक्षतकुशांबुभिः॥१२॥ येऽसूयानृतदंभेर्ष्याहिंसामानविवर्जिताः॥ न तेषां सत्यशीलानामाशिषो विफलाः कृताः॥१३॥

इति येन विश्वासं जग्मुः उताऽपि बालस्येतत्तत्संभवति॥ एते च बालाः किं जानंतीति रुदतोच्चैः सूक्तैः॥ कृता भगवत्प्रभावानभिज्ञविप्रचेष्टितं किं वयत्राह॥१२॥ पूर्ववदित्यादिना बलिभिः प्राक्तैः यद्वा दृष्टदित्सबलिभिः सहितं सपरिकरं यथा पूर्वं स्थापितं॥ विप्रा दध्यादिभिरर्चयामासुः कृत्वा ग्रहादिहोमं विधाय॥ अस्तूयागुणेषु दोषाविष्करणं॥ ईष्यासहनोतिः॥ तेषामाशिषः कृताः तैः प्रयुक्ता इतीति॥१३॥ ॥॥

कृत्स्नार्भकस्तथापि सिंधुसंज्ञवानंदनिर्भरः। भूयस्तदेवसंपृष्टुं राजान्यदभिनंदति॥१॥ येन मत्स्याद्यवतारे
णापि यानि कर्माणि करोति तानि कर्णसुखावहानि मनःप्रीतिकराणि भवंत्येतत्यापि॥ यच्छृण्वतः पु
सः पुरुषमात्रस्यारतिर्मनोग्लानिः॥ तन्मूलभूतावितृष्णा रूपापगच्छति॥ यथा सत्त्वं शुद्धिः हरौ
भक्तिः हरिदासैः सख्यं तिच भवति॥ तदेव हारं हरिचरितं मनोहरं च वद अत्र च यद्यन्यदिकारोपी

श्रीराजोवाच॥ येन येनावतारेण भगवान्हरिरीश्वरः॥ करोति कर्णरम्याणि मनोज्ञानि च
नः प्रभो॥१॥ यच्छृण्वतो पैत्यरतिर्वितृष्णा सत्त्वं च शुद्ध्यत्यचिरेण पुंसः॥ भक्तिर्हरौ तत्पुरुषे च स
ख्यं तदेव हारं वद मन्यसे चेत्॥२॥ अथान्यदपि कृष्णस्य तोकाचरितमद्भुतम्॥ मानुषं लोकं
मासाद्य तज्जातिमनुरुंधतः॥३॥ श्रीशुक उवाच॥ कदाचिदौत्थानिककौतुकाप्लवे जं
मर्क्षयोगे समवेतयोषितां॥ वादित्रगीतद्विजमंत्रवाचकैश्चकार सूनोरभिषेचनं सती॥४॥ न
दस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः॥ अन्नाद्यवासःस्रगभीष्टधेनु
भिः संजातनिद्राक्षमशीशयच्छनैः॥५॥ औत्थानिकौत्सुक्यमना मनस्विनी समागतान्पूजय
ती व्रजौकसः॥ नैवाशृणोद्वै रुदितं सुतस्य सा रुदन्स्तनार्थी चरणावुदक्षिपत्॥६॥
ति औत्सुक्येन विशिनष्टि॥ अर्थेति॥ अनुरुंधतः अनुकुर्वतः॥ उत्थानं स्थितो यो रंगप्रवर्तनं तत्र कर्णी
ये कौतुकमाप्लवे॥ उत्सवाभिषेकतयो॥ तस्मिन्नेव दिने जन्मर्क्षस्यापि प्रयोगे प्राप्ते महोत्सवे सती॥ समवेतयो
षितां मिलितपुरंध्रीणां मध्ये वादित्रादिभिः शोभितं तमभिषेचनेय शोदाचकार॥ अन्नादिभिः सुपूजितै
र्विप्रैः॥ कृतमंगलं॥ संजातनिद्रे आक्षिणी यस्य तं॥ ततः अशीशयत्॥ शायितवती॥ शकटस्याधस्तात्

श्रीः भा० द० ३१

खरपवनवर्षात्पांसुवर्षे सति॥ उपारतः पांसुवर्षस्य वेगो यस्मिन्॥ तथाभूते पवने सति॥ तत्र तस्या रुदि-
तमनुनिशम्य गोप्यो रुरुदुः वात्याचक्रवातस्तद्रूपधरः कृष्णं हरन् शान्तरयः कुण्ठितवेगो गतः ततः प-
रं गंतुं नाशक्नोदित्यर्थः॥ गुरुमत्तया गरिम्णा तेन तथा अश्मानं मन्यमानः एवं तं पर्वतप्रायं मन्यमानः॥ ते

इति खरपवनचक्रं पांसुवर्षं सुतपदवीमबलाविलक्ष्य माता॥ अतिकरुणमनुस्मरंत्यशोच-
द्भुवि पतिता मृतवत्सका यथा गौः॥२४॥ रुदितमनुनिशम्य तत्र गोप्यो भृशमनुतप्तधियोश्रुपू-
र्णमुख्यः॥ रुरुदुरनुपलभ्य नंदसूनुं पवनउपारतपांसुवर्षवेगे॥२५॥ तृणावर्तः शांतरयो वा-
त्यारूपधरो हरन्॥ कृष्णं नभोगतो गंतुं नाशक्नोद्भूरिभारभृत्॥२६॥ तमश्मानं मन्यमान
आत्मनो गुरुमत्तया॥ गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकं॥२७॥ गलग्रहणनिश्चेष्टो दैत्यो
दिमद्भः स्रजः १ उक्तैकत्रिंशताध्यायैर्भुक्तिरेकादशेततः जायन्तेयेतिहासाद्यैःसमासव्याससूपत
नारदोवसुदेवायसमासेनव्यवर्णयत् भगवानुद्धवायाथविस्तरेणापपार्निभिः ३ तत्रतुप्रथमेऽ
येयदुवंशस्यसंलयः उपोद्घातोविरागायमौशलव्यपदेशतः ४ प्रश्नस्ततःपरानंदकृष्णक्रीडानव
ता तन्निहत्यापरानंदपदारोहोनुवर्ण्यते ५ एवंतावद्दशमस्कंधेभूभारावतारणायनिजविभू
विभूषितयदुवंशस्ययदुवंशावतारितसकलसुरांशस्यभगवतःश्रीकृष्णस्यषड्विंशतिप्रहतिविडंबनन
कुर्वणादिपरगणापेक्षामानन्दकारणंक्रीडानिरूपिता अथेदानीमुपशमितयोगमायावैभव
क्तोनामात्मतत्वोपदेशपूर्वकंक्रीडार्थंभूतलेऽवतारितानांचाधिकारिणांस्वरांशानांमोक्ष
देशाननत्रतदधिकारिपदप्रापणंएवंकेचब्रह्माद्युपहायनिजपदारोहोनिरूप्यते तत्रादि
यामविरक्तस्यवसुदेवस्यकर्मणाकर्मनिर्हारोयथास्यात्तथोच्यतामित्येवंकृतेपृच्छत ३
नारदादिभिःकर्मयोगोनिरूपितः कर्मणाकर्मनिर्हारए[illegible]समाश्रुतिरितिरतः [illegible]नेनिपा
शुक्लेन[illegible]पुरुषइत्यादिनातेनचविशुद्धसत्वस्यश्रीकृष्णस्य[illegible]पापेरतः
यन्नाध्याये[illegible]हमेनात्मतत्वमुपदिश्य[illegible]चावःसमवेतायेताते[illegible]चपिसर्वेभविष्यन्तीत्यर्थः
तन्वय[illegible]हत[illegible]नादिना नचो[illegible]
[illegible]तिशा[illegible]

श्री॰ भा॰ उ॰ द॰ ५५

ननु यत्किंचित्कुर्वतो मम सन्निधानात्किं स्यादत आह ॥ निमित्तमिति ॥ अयमर्थः ॥ यथा तवारूपस्य कालात्मनो विश्वसर्गे निमित्तं केवलं हिरण्यगर्भः ॥ तथा शर्वश्च तन्निरोधे तथा चत्वमेवसन्निधिमात्रेण जरासंधप्रहृतानां राज्ञां देव्यः ॥ पश्यः तेविषादं कर्मस्वादद्भुबालकलालनादौ गायंतीति ॥ द ॥ अतो नैनोपायेन त्वयाशीघ्रं हंतव्यं तस्य शायेनाह ॥ द ॥ गायंतीति तथा शोऽजरासंधस्य वधं ॥ आत्मनो पत्नीनां विमोक्षणं च ॥ वत्समारादीः श्रीकृष्णमेवं करिष्यतीति अत्र दृष्टांतः ॥ गोप्यश्चत्यादयः ॥ यथा गोप्यः ॥ शंखचूडवधं समोक्षं च गायंति ॥ तेऽत्र वनाराज्ञ्यो नजं

निमित्तं परमीशस्य विश्वसर्गनिरोधयोः ॥ हिरण्यगर्भः शर्वश्च कालस्यारूपिणस्तव ॥ द ॥ गायंति ते विशदकर्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च ॥ गोप्यश्च कुंजरपतेर्जनकात्मजायाः पित्रोश्च लब्धशरणा मुनयो वयं च ॥ ८ ॥ जरासंधवधः कृष्ण भूर्यर्थायोपकल्पते प्रायः पाकविपाकेन तव चाभिमतः क्रतुः ॥ १० ॥ इत्युद्धववचो राजन्सर्वतोभद्रमच्युत ॥ दे

कुंजरपतेर्गजेंद्रात् ॥ जनकात्मजायाः सीतायाः ॥ पि वर्षिर्यद्धृष्टा ग्राहग्रस्तकष्टस्य मत्स्य छ्जनयत्तोस्त्वं कं समुद्धृतात् ॥ मोक्षमुनयो पि विशदं कर्म गायंति नित्यशत्रोः क्रोधस्य वधं आत्मनो जीवात्मनो संसारविमोक्षणं च वयं च सामान्नानाभक्ता यस्य तस्य विशदं च विचगानकुर्मः ॥ अतएवं भूतानां नानां सा कृपया त्वया तव वक्तव्यमिति भावः ॥ ९ ॥ किंच जरासंधवधइति भूयर्थाय ये न ततः शिशुपालवधादि पि सकलसाध्या भविष्यतीति भावः ॥ एतत्सर्वं भविष्यत्येवेति संभावयन्नाह ॥ प्राय इति ॥ पच्यतइति पाकः ॥ कर्मतस्य विपाकः ॥ फलं तेन राज्ञां पुण्यविपाकेन ॥ जरासंधादीनां पापविपाकेनेति पाठे तेन जरासंधस्य पापविपाकेनेति ॥ तेनायं क्रतुस्तवाभिमतः तस्य गानेन सिद्धं भविष्यतीत्यर्थः

प्रभुनिर्ययपायान्मोयत्र हृष्टाहृदयत्तरकि ५ हृत्यत्स याकासत्य किसिवस्तेति ५५ विनम्

अथैकसप्ततितमेउद्धवस्यानुमंत्रणं इंद्रप्रस्थंगतेकृष्णेपार्थोऽपरमोत्सवः॥ राजसूयमिषंकृत्वाभी
मदुर्योधनादिषु॥ कलिमुत्पाद्यतद्द्वाराभूभारमहरत्प्रभुः॥१॥ देवर्षेर्मतराजसूयगमनंसभ्यानांमतं
राजरक्षाकृष्णस्यतन्मयं॥२॥ यक्ष्यतः यागंकरिष्यतः॥ पैतृष्वस्रेयस्य पितृष्वसुः पितृष्वसुः
पुत्रस्यसाचिव्यंसाहाय्यंतवद्वा येनत्वयाशरणार्थिनांराज्ञांरक्षाकार्या॥३॥ तत्रप्रथमंराजसूयार्थं
तावत्ततोराजरक्षाकर्तव्येत्याह यष्टव्यमित्यष्टभिः॥ अतोदिग्विजयहेतोः॥ उभयार्थः राजसूयार्थः

श्रीशुकउवाच॥ इत्युदीरितमाकर्ण्यदेवर्षेरुद्धवोब्रवीत॥ सभ्यानांमतमाज्ञायकृष्णस्य
चमहामतिः॥१॥ उद्धवउवाच॥ यदुक्तमृषिणादेवसाचिव्यंयक्ष्यतस्त्वया॥ कार्यंपैतृष्वस्रेय
स्यरक्षाचशरणैषिणां॥२॥ यष्टव्यंराजसूयेनदिक्चक्रजयिनाविभो॥ अतोजरासुतजयउ
भयार्थोमतोमम॥३॥ अस्माकंचमहानर्थोह्येतेनैवभविष्यति॥ यशश्चतवगोविंदराज्ञोब
द्धान्विमुंचतः॥४॥ सवैदुर्विषहोराजानागायुतसमोबले॥ बलिनामपिचान्येषांभीमंसमब
लंविना॥५॥ द्वैरथेसतुजेतव्योमाशताक्षौहिणीयुतः॥ ब्रह्मण्योभ्यर्थितोविप्रैर्नप्रत्या
ख्यातिकर्हिचित॥६॥ ब्रह्मवेषधरोगत्वातंभिक्षेतवृकोदरः॥ हनिष्यतिनसंदेहोद्वैर०

शरणागतरक्षार्थंयजनार्थंचत्वामाश्रित्यत्वयासहैवजरासंधंहंतुमिच्छतोयादवानांलक्ष्याद॥ सवाइ
ति ग्रन्थेषां॥ ततोबलिनामपिसमबलएवभीमः॥ तथापितंविनाभीमादेवतस्यमृत्युर्विहि
तइतिभावः॥५॥ ननुबलसाम्येपिसेनाबलेनाधिकमितिचेत्तत्राह॥ द्वैरथइति॥ द्वंद्वयु
द्धे शतेनाक्षौहिणीभिर्युक्तोमाजेतव्यइत्यर्थः॥ ननुसोऽसहसैवचयुद्धार्थंनिर्जनेनकृतलं
नद्वैरथमितिजताद॥ ब्रह्मण्यइति नप्रत्याख्याति॥ ननिराकरोति॥६॥ भिक्षेतद्वंद्वयुद्धंचयाच

श्रीः
भा॰ द॰
पु॰
५४

वामबाहुकृतवामकपोलत्वप्रसादीनि द्वादशयुगलानि ॥ हे गोप्यः वामबाहौ तन्मूले वा कृतोर्पितो वामकपोलो येन सः । वल्गितेन नर्तितेन भ्रुवौ येन सः वल्गितभ्रूः मुकुन्दः अधरे अर्पितं वेणुं कोमलाङ्गुलीभिराश्रितो मार्गः सप्तच्छिद्रमार्गो येन सः यदा यत्रेरयति ॥ ३ ॥ तदा व्योमयानानां सिद्धानां वनिताः सिद्धैः स्वपतिभिः सह वर्तमाना अपि तद्वेणुरवमुपधार्याकर्ण्य प्रथमं विस्मिता विस्मितचित्ताः ततः काममार्गणेभ्यः समर्पितानि चित्तानि याभिः स्त्रीः पश्चात्पार्श्वस्थपत्युः सलज्जाः सत्यः कश्मलं मोहं ययुः

गोप्य ऊचुः ॥ वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुम् ॥ कोमलाङ्गुलिभिराश्रितमार्गं गोप्य ईरयति यत्र मुकुन्दः ॥ २ ॥ व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥ ३ ॥ हन्त चित्रमबलाः शृणुतेदं हारहास उरसि स्थिरविद्युत् ॥ नन्दसूनुरयमार्तजनानां नर्मदो यर्हि कूजितवेणुः ॥ ४ ॥ वृन्दशो व्रजवृषा मृगगावो वेणुवाद्यहृतचेतस आरात् ॥ दन्तदष्टकवला धृतकर्णा निद्रिता लिखितचित्रमिवासन् ॥ ५ ॥

युः तत्र लिखितमपस्मृता नीवी याभिरिति यद्वैवं मत्तस्य कृष्णस्य विरहं कथं सहामहे इति सर्ववाधकबाधः ॥ ३ ॥ हन्त हे अबलाः इदं चित्रं शृणुत हारवद्धासः हार इव शुद्धो हासो यस्य सः यद्वा वेणुवाद्येन अधोवदनेन हसनं हारे स्फुरन्हासो यस्य ॥ हारवच्छोभनो वा हासो यस्य सो यस्य सः यद्वा हारा हाराणां हासाः उद्भवविकाशा यस्मिन्निर्गन्धरसे इति वा ॥ उरसि स्थिरा विद्युदिव लक्ष्मीर्यस्य सः यर्हि यदा कूजितवेणुर्भवति ॥ ४ ॥ तदा व्रजे ये वृषाः मृगा गावश्च वेणुवाद्येन हृतानि चेतांसि येषां ॥ आरात् दूरादेव दन्तैर्दष्टाः कवला ग्रासाः यैः धृताः उत्तम्भिताः कर्णाः यैः ते निद्रिता इव लिखितचित्रमिवासन् ॥ अविदुषो तिरस्कारामिदमतिचित्रमित्यर्थः ॥ किंचाचेतनानामपि सरितां

५८

मूर्छिता गृहीततल्लीनचित्ताः स्रंसत् ॥ भ्रंशत् दुकूलं यस्मात्तं आत्मानं देहं स्रस्ताः केशेभ्यः स्रजो यस्य तं ततो नाविदन् ॥ निरीक्षतो निरीक्षमाणयोः तौ नाथौ यस्य तं कालयामास ॥ गा इव स्वगतास्ताः दस्युना व्याघ्रेण मा भैष्ट भयं त्यजत इत्यभयारावौ शिरः सह चूडामणिना जहारेत्यर्थः ॥३२॥ इति श्रीदश

गोप्यः स्तद्गीतमाकर्ण्य मूर्छिता नाविदन्नृप स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः ॥२४॥

एवं विक्रीडतोः स्वैरं गायतोः संप्रमत्तवत् ॥ शंखचूड इति ख्यातो धनदानुचरोऽभ्यगात् ॥२५॥

तयोर्निरीक्षतो राजंस्तन्नाथं प्रमदाजनं ॥ क्रोशंतं कालयामास दिश्युदीच्यामशंकितः ॥२६॥

क्रोशंतं कृष्ण रामेति विलोक्य स्वपरिग्रहं ॥ यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावतां ॥२७॥

मा भैष्टेत्यभयारावौ शालहस्तौ तरस्विनौ ॥ आसेदतुस्तं तरसा त्वरितं गुह्यकाधमं ॥२८॥

स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् ॥ विसृज्य स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया ॥२९॥

तमन्वधावद्गोविंदो यत्र यत्र स धावति ॥ जिहीर्षुस्तच्छिरोरत्नं तस्थौ रक्षन् स्त्रियो बलः ॥३०॥

अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः ॥ जहार मुष्टिनैवांग सहचूडामणिं विभुः ॥३१॥

शंखचूडं निहत्यैवं मणिमादाय भास्वरं ॥ अग्रजायाददात्प्रीत्या पश्यंतीनां च योषितां ॥३२॥ इ

ति भागवते दशमस्कंधे शंखचूडवधश्चतुस्त्रिंशोऽध्यायः ॥ श्रीशुक उवाच ॥ गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः ॥ कृष्णलीलाः प्रगायंत्यो निन्युर्दुःखेन वासरान् ॥१॥

मस्कंधे भावार्थदीपिकायां चतुस्त्रिंशोऽध्यायः ॥३४॥ पंचत्रिंशे वने याते कृष्णे गोकुलयोषितः युग्मश्लो

काभिर्गीतेन निन्युर्दुःखेन वासरान् ॥ एवं रात्रिषु श्रीकृष्णेन स्वैरमभिरमितानां दिवा न हरिस्तासा

नामनुगीतेन निस्तार प्रकारमाह गोप्य इति दुःखेन कृच्छ्रेण ॥१॥

श्रीभाग० द० ४८

तासामङ्गसङ्गेन घृष्टाया स्रक् तस्याः अत एव तासां कुचकुङ्कुमेन रञ्जितायाः संबन्धिभिः गन्धर्वपा
लिभिः गन्धर्वपा गन्धर्वपतयः॥ गायन्तो ये तैरनुद्रुतः सन् श्रान्तो वाः उदकमाविशत्॥ भिन्न
सेतुर्विदारितवप्रः॥ स्वयं चातिक्रान्तलोकवेदमर्यादः स्वरतिरात्मारामोऽपि॥ अत्र गोपीभिः सह
श्रमसिवास्खलज्जलक्रीडां दर्शयति॥ वनक्रीडां दर्शयति॥१९॥ ततश्चेति यमुनाया उपवने जलस्थ
लप्रसूनानां गन्धो यस्मिंस्तेनानिलेन जुष्टानि दिक्तटानि यस्मिन्॥ यद्वा दिशश्च तटं च

ताभिर्युतः श्रममपोहितुमङ्गसङ्गघृष्टस्रजः स कुचकुङ्कुमरञ्जितायाः॥ गन्धर्वपालि
भिरनुद्रुत आविशद्वाः श्रान्तो गजीभिरिभराडिव भिन्नसेतुः॥२४॥ सोऽम्भस्यलं युवतिभिः
परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोऽङ्ग॥ वैमानिकैः कुसुमवर्षिभिरीड्य
मानो रेमे स्वयं स्वरतिरत्र गजेन्द्रलीलः॥२५॥ ततश्च कृष्णोपवने जलस्थलप्रसूनग
न्धानिलजुष्टदिक्तटे॥ चचार भृङ्गप्रमदागणावृतो यथा मदच्युद्द्विरदः करेणुभिः
॥२६॥ एवं शशाङ्कांशुविराजिता निशाः स सत्यकामोऽनुरताबलागणः सिषेव आ
त्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः॥२७॥

स्थलवद्यस्मिंस्तस्मिन्वने भृङ्गा नाम॥ प्रमदानां च गणेनावृतः रासक्रीडां निगमयति॥ एवमिति
२९॥ सत्यकामः सत्यसंधः सत्यसंकल्पः॥ अनुरागिणी अबलागणो यस्य सः एवं सर्वा निशाः॥ सेवितवान्॥ शा
रत्काव्यकथारसाश्रयाः॥ शारदी भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूता निशाः॥ द्
रत्कतयोऽपि तीया शृङ्गाररसाश्रयाः शारदी प्रसिद्धाः काव्येषु याः कथास्ताः सिषेवे इति॥ एवम
प्यात्मन्येवावरुद्धसौरतः चरमधातुः न तु स्खलितो यस्य इति कामजयोक्तिः॥२७॥

४८

तदंशोति॥ नस्यांशास्ते गतेनोक्तश्चासुन्दीतिस्तयाश्राकुलानिश्रवशानिइंद्रियाणियासांताः स्विस्मय
वेथान्न॥ केशाहीन॥ अज्ञसाप्रतिबोढव्यथापूर्वंयन्तुनालंसमर्थानबभूवुः॥ विन्नस्तामालाभ्राभ
रणानिचयासांताः॥ नकेवलंनाय्यैवाकुलेंद्रियाः॥ किंतुदृष्टोपीत्याहकृष्णविक्रीडितमिति॥१९
किंचशशांकश्चेतिसुन्नेनैवहृष्टविनिशशांकेनविस्मितेनगतोविस्तरतोयातततः प्राक्तनाः सर्वेपिग्र
हास्तैवतस्थुः तथादेवीभिस्तवात्रिभुवयथासुखविचक्रुरिति॥ किंचकृत्वेति॥२०॥ अयंभावः का
तदगामस्यागमुदाकुलेंद्रियाः केशानुकूलकुचपट्टिकांतयाः॥ ताजेः प्रतिबोढुमलंबज
स्त्रियोविस्रस्तमालाभरणाः कुरूद्वह॥१९॥ कृष्णविक्रीडितंवीक्ष्यमुमुहुः खेचरस्त्रियः
कामार्दिताः शशांकश्चसगणोविस्मितोभवत्॥२०॥ कृत्वातावंतमात्मानंयावतीर्गोपयो
षितः॥ रेमेसभगवांस्ताभिरात्मारामोपिलीलया॥२१॥ तासामतिविहारेणश्रांतानांवद
नानिसः॥ प्रामृजत्करुणःप्रेम्णाशंतमेनांगपाणिना॥२२॥ गोप्यः स्फुरत्पुरटभासुरकुं
डलत्विड्गंडश्रियासुधितहासनिरीक्षणेनमानंदधत्यस्वृषभस्यजगुः कृतानिपुण्यानि
तत्करमहस्पर्शप्रमोदाः॥२३॥ (स्वायतिमहामायेमहायोगिन्यधीश्वरि नंदगोपसुतंदेवि
पतिंमेकुरुतेनमइतिमंत्रकेनाभिः प्रार्थनाद॥ भगवताग्नि॥ यातावलोब्रजंसिद्धामयेमारंस्य
थक्षपा॥ इति॥ तथैवप्रतिश्रुतत्वात्॥ तावंतमात्मानंकृत्वारेमेइति यावतीः यावत्यः कृपाति
शायमाहतासामिति॥ ततोतिहृष्टानांगोपीनांचरितमाह॥२४॥ स्फुरत्पासरीकुंडलानांत्विषा
गंडश्रियाश्रोत्सत्यासुधितेनायितेनहासससहितेननिरीक्षितेनचऋषभस्यप्रभुः श्रीकृष्णस्या
नंदयन्त्यः तत्कर्माणिजगुः तत्स्पर्करतहैर्नखैः स्पर्शेनप्रमोदोयासांताः॥२३॥ अजनजलकेलि

षड्विंशो मनसा यानाम्नात्स्मरनागरसोक्तितः ॥ नहुदिम्यागयोगाभ्यां संहतिः साख्ययोच्यते ॥ ५ ॥ नदेव
मात्मनितृयार्थ्यविकल्पेनी सुषुप्तावस्थाजाग्रदवस्थावाक्यादानीस्वप्नावस्थामाहः ॥ सप्तकंदेतिदशभिः
महान्निषष्ठोऽव्यक्तः केवलमोक्तृत्वायभिनिवेशो यः स सत्वप्रमाह्यं पंचभूतस्यवनमेणाहितिरात्मीय
नानयः ॥ रथ्यतदनीमेव विधुनेत्यमदेहज्ञात्रदेहस्याने सर्वतत्वेरोधभोगप्रधानेनोक्तत्वान ॥ पंच
तानेंद्रियाणि यस्य ॥ आश्रुगंधीत्रुगाति देष्ट्रहन्ता ममतेदेवे दशिके यस्य ॥ देशुणपावचक्रेय
स्य ॥ पकंप्रधानमनोऽयस्यप्रयोगुणावेणावोधजा यस्य ॥ पंचप्राणा वपुसाणि वेयनानि यस्य ॥ ८
एकं मनो रश्मिभिः प्रग्रहो यस्य ॥ एकादशं दिदं मनः सत्वो यस्य तेच मनच ॥ एकं हृदयं नीडं रथि नउप

नारद उवाच ॥ सप्तकं दामहे शास्त्रेषु पंचाश्रमाश्रुगा ॥ द्वौ पृष्ठि चक्रमेकात्मके विवेकं पंचवं
धुरं ॥ १ ॥ एकरश्म्येकदमनमेकनीड द्विकूबरं ॥ पंचप्रहरणं सप्तवरूथं पंचविक्रमं ॥ २
हेमोपस्करमारुह्य स्वर्णवर्मा त्वयेषुधिः ॥ एकादशा चमूनाथः पंचप्रस्थमथाहवं ॥ ३ ॥

वेधस्थानं यस्मिन् ॥ हेमोपस्करमो हेतु कूबरे युगवेधन स्थानं यस्य पंचशब्दादयो विषयाः प्रद्विपं
नेप्रतिपुंनेयस्मिन ॥ अस्य स्वाक्षोनं भविष्यति ॥ पंचेंद्रियार्थश्लेषप्रतिसमधान्तवोवरुथा रथ
सांचं वसंग्रावरणानि यस्य पंचकर्मेंद्रियाणि विक्रमागति प्रकारा यस्य ॥ ५ ॥ हेमोपस्करणं स
णं वसंक्व वंरजोगुणा हेतरंति ॥ अवरंपेषुधिः ऽक्षयपि निषंगः ॥ एकेनवासनाहंकारो माथिः
एकादशो मनो इपप्रमनुनाथः सेनापतिर्यस्य मनसः प्रधानत्वात् ॥ संकल्पविकल्पात्मकस्य
बहुलत्वेन वलमाणास्य च मूनाथत्वमिति ॥ विभागः पंचशब्दादयो विषयाः प्रस्थाः सानवो
यस्मिन्स्तदनेन भननीपदेयामसमास ॥ १ ॥ ॥

भा
वटी
७८

प्तानारहितानाद्यवयोगादेवादिरूपाः कार्मकंच भोगायभिनिवेशादूर्ध्वयेनजायांविवेकवतीबु
द्धिविहायप्रतदहीनागान्होनामेहेतःस्पर्शंतरनिस्पृगाःविषयाःतेषुव्यसनेभोगासक्तिःतेन
लालसास्पृहायस॥४॥बाद्येनानाविधिभिर्वनेषुभजनीयदेवोभुवनगोचरान्भजनीयविषयात्प्र
हननं॥आलसादृतवान॥कथापवेद्येपिनस्पृहमेव॥५॥आसक्तिरहितमाश्रित्यमेनिकिंचिन्नि
रणादिनियते॥कथापवेतावद्धानोविहितैवसा॥अथात्मपदेनोवसविषयभोगोविहितस्य
वेत्याहकाहतीर्थेचित्तिविभिः॥अयंभावःनहिस्तरागयावधीयतेरागप्राप्तत्वात्किंतुनियम्यते

वचारमृगयांतत्रदैवयात्रेषुकार्मुकः॥विहायजायामतदर्हींस्वगायसनलालसः॥४॥आ
सक्तिरहितमाश्रित्यबोराज्ञानिरहंकृतः॥स्वरनविप्रांस्तैर्वाणैर्वनेषुवनगोचरान्॥५॥
तीर्थेषुप्रतिदृष्टेषुराजामेध्यान्पशून्वने॥यावदर्थमलंलब्धोहन्यादितिनियम्यते॥६॥
एवंकर्मनियतंविद्वान्कुर्वीतमानवः॥कर्मणातेनराजेंद्रज्ञानेनसलिप्यते॥७॥अ
न्यथाकर्मकुर्वाणोमानारूढोनिबध्यते॥गुणप्रवाहपतितोनष्टप्रज्ञोव्रजत्यधः॥८॥

नियममेवयममेवपद्धिर्यदर्शयति॥ययलमर्थलब्धोरागीभवन्॥तीर्थेषुश्राद्धादिष्वेवहत्या
यमतिदृष्टेषुमध्यानेषुवनेनित्यश्राद्धादिषु॥नत्वाधिकानेवननत्वाधिमेध्यान्नन्यत्रयावदुप
योगमेवेति॥एवंजीवस्यविषयसेवाधियावदुपयोगंनत्वधिकमितिनियमएवेत्यर्थः॥अतो
नावधपकलमितिमाहयदुति॥६॥एवंनियतकर्मविद्वान्॥तेनेन्यपलक्षणं॥तेनात्मेनवाक
र्मणाएवमनुष्ठितेनज्ञानंभवति॥तज्ज्ञानेनदेहेनात्मोरुद्धाज्ञानलिप्यते॥७॥अन्यथानियमे
ग्वनेनोतःकरणशुद्ध्यभावात्कर्तृत्वाभिमानमारूढःकर्मभिरवबध्यते॥गुणप्रवाहेव

भा
प्र टी
५०

विशेषतः श्रीकृष्णावतारसौभाग्यं वर्णयति ॥ अहो इति त्रिभिः ॥ यत्र यस्मादेष पुरुषोत्तमः श्रि
यः पतिः स्वजन्मना यदोः कुलं अंचति ॥ सत्करोति ॥ अतः श्लाघ्यतमं ततः ॥ चंक्रमणेन च मधोर्वने
मथुरां सत्करोति ॥ अतएव तत्पुण्यतममिति ॥ नमाद्यं श्लाघ्यं संततातिशयेनालमिति तत्राप्याश्च
र्यमहो इत्युक्तं ॥२५॥ अहो वत स्वर्गस्यापि यशः किं तत्कुशस्थली द्वारका स्वर्गं उल्लंघ्य इति यत्र या
लसति तिरस्करी पवित्रमधिकं भुवस्तु एव यशस्करी भवति ॥ यत्र तः यत्र स्थाः सर्वाः प्रजाः स

अहो अलं श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोर्वनं ॥ यदेष पुंसामृषभः श्रियः प
तिः ॥ स्वजन्मना चंक्रमणेन चांचति ॥२६॥ अहो वत स्वर्यशसस्तिरस्करी कुशस्थली पुण्य
यशस्करी भुवः ॥ पश्यंति नित्यं यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्रजाः ॥२७॥ नू
नं व्रतस्नानहुतादिनेश्वरः ॥ समर्चितो ह्यस्य गृहीतपाणिभिः पिबंति याः सख्यधरामृ
तं मुहुः व्रजस्त्रियः संमुमुहुर्यदाशयाः ॥२८॥

अनुग्रहेण ईषितं प्रेषितं स्मितसहितं अवलोकं यस्मात्तं
यद्वा ॥ अनुग्रहार्थं इषितं इष्टं स्वस्यात्मनः ॥ पतिं श्रीकृष्णं ननु पित्रादिवदेहमात्रपतिं नित्यं पश्यं
ति स्म ॥ उषितमिति पाठे स्वानुग्रहार्थं ॥ उषितं कृतनिवासं नैनेन स्वर्गलोकस्पर्धी ॥२७॥ हे सखि
अस्य गृहीतपाणिभिः ॥ पत्नीभिरीश्वरो यमेव नूनं जन्मांतरेषु समर्चितः ॥ यस्मिन्नधरामृते आ
शयस्थितं येषां तासां ताः ॥ संमोहं प्रापुरिति मनोहरत्वमुक्तं ॥२८॥

ग्रस्मद्दर्शनमतितुर्ह्लभममस्वामिभिर्लब्धमित्याहुः॥ सवाग्रयमिति॥ सर्वेअग्रयंपसपदंसहूपंश्रेष्ठिवा
निर्जितोमातरिश्वाप्राणोयैः॥ हसमार्थंतेसरयपवपर्यंतिकेनभक्ताउकलितउक्तेदिलोःम
लोपयात्मानुद्दित्वन॥ हस्पनेत्वग्ग्राणवक्षेतिस्फुनेः॥ बुद्धिवैमलस्याण्यमेवहेत्वरित्याहुः न
तुद्देसाविपषपवसत्वंतुद्दिपरिमार्ष्टुंसमकृपायोपपितमर्हति॥ ननपोगादयद्भ्रमर्थः यदा
तुग्रहोपषसत्वेत्तानेपरिमार्ष्टुंनाशापितेहरगमतेनाप्रस्पत्तीभविनेनार्हति किंतनेनसहेव
गतमविमर्षः॥ २२॥ ब्रुताप्स्रोकत्तामाहुः॥ हेसखियोवेदेश्वरहस्यागमेश्वरहस्यनिरूपकैः
सवाग्रयंयसदमवसरयोजितैर्हियातिर्जितमातरिश्वनः॥ पश्यंतिभक्तानकलितामला
मेवाहिभिःयपकर्षणोनगदात्मलीलयाप्तजनस्यवत्सलितनतमसज्जते॥ २३॥ सवाग्रयेसखिगुगीतसतकेयोवेदेशुरयेशुवरा
मेपनमोर्धियोत्स्पानीवनितनश्चैवहिसत्वनःकिल॥ यतेभगोसमस्तनेदयोपयोगभवा
ग्रनुगीताःसम्यः॥ कथायस्यसपवार्ये॥ गानपकारमाहुः॥ यप॰ यहूपागितदयगुरोगुरो॥ २४
केहमाख्यादि॥ २४॥ एवंभूतस्यनानावतारेकारत्तमाहुः॥ यदाहीति॥ नमोऽयमाधीर्यै
र्वातेन्स्पास्यधर्मेणजीवंतिकेवलेप्राणानरुषमेतिनत्रनदापषपवभवायस्थितैः॥ सत्वतः
विशुद्धरूपेणजीवंतिकेवलमात्मानरुषमेतेतत्रपागितदयतभगाद्दीनियतेः॥ प्रकटयति
दुगेदुगेतनदवसरेभगपेप्सर्येसत्वसमप्रतितेनत्व॥ क्तेनेयथार्थोपदेशाकलेनदयोभक्त
कृपायथाश्रुतकर्मतं॥ २५॥

भा॰ प्र॰ टी॰ ४४

ननु धर्मं हित्वा कलिं सर्वथा किं न हतवान् ॥ तत्राह ॥ नानुद्वेष्टीति ॥ सारंगो भ्रमरस्तद्वत्सारभुक् सा
रग्राही ॥ यद्यस्मिन् कुशलानि शुभानि ॥ आशु संकल्पमात्रेण फलन्ति इतराणि पापानि आशु
न सिध्यन्ति यतस्तानि निष्कृतान्येव सिध्यन्ति न तु संकल्पमात्रेण ॥ ७ ॥ ननु दोषाधिक्यात् हन्तव्य एव
वृकः न धीरेषु तस्मात् किं विरक्तत्वादित्याह ॥ किं नु तेन भवेत् ॥ बालेषु अधीरेषु शूरेण अप्र
प्रमत्तः प्रवर्तितः सन् यो वृक इव वर्तते ॥ ८ ॥ पारीक्षितमाख्यानं यदपृच्छत ॥ पृष्टवन्तो यूयं ॥ ९ ॥

नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक् ॥ कुशलान्याशु सिध्यन्ति नेतराणि कृतानि य
त् ॥ ७ ॥ किं नु बालेषु शूरेण कलिना धीरभीरुणा ॥ अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्तते
८ ॥ उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया ॥ वासुदेवकथोपेतमाख्यानं यदपृच्छत ॥ ९
या याः कथा भगवतः कथनीयोरुकर्मणः ॥ गुणकर्माश्रयाः पुंभिः संसेव्यास्ता बुभूषु
भिः ॥ ऋषय ऊचुः ॥ सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः ॥ यस्त्वं शंससि कृष्णस्य म
र्त्यानाममृतं हि नः ॥ ११ ॥

किं बहुना अनेन तावदेव कर्तव्यमिति सर्वशास्त्रसारं कथयति ॥ कथनीयान्युरूणि कर्माणि य
स्य तस्य गुणकर्मविषया बुभूषुभिः सद्भावमिच्छद्भिः ॥ १० ॥ पुनर्विस्तरेण कथनार्थं सूतं तोषयन्ति
तत्स्नेहं चाभिनन्दन्ति ॥ सूतेति त्रिभिः शाश्वतीः समाः ॥ अनेनात्र वक्ष्यमाणान् जीव ॥ अत्यन्तसं
योगे द्वितीया विशुद्धं यशः कीर्तयसि ॥ यत् अस्माकं मर्त्यानाममृतं मरणनिवर्तकम् ॥ ११

श्री

रात्तक्षकादेशोनस्य ब्रह्मशापो निरूप्यते ॥ स चानुग्रहरूपो व्यासक्तानां वैराग्यमावहन् ॥ १ ॥ परीक्षितो
निर्याणमत्याश्चर्यं वक्तुं तत्संभावनाय जन्माद्याश्चर्यं स्मारयति ॥ यो वा इति ॥ विप्लुष्टो निर्दग्धः
मः ॥ १ ॥ ब्रह्मकोपादुत्थितात्तक्षकात् यः प्राणविप्लवः प्राणनाशस्तस्माद्यदुरुभयं तेन स्मात्तेसं
मुमोह ॥ अत्र हेतुः भगवत्येवार्पितः आशयो येन तं करणत्वेन ॥ २ ॥ किं च ॥ उत्सृज्येति वैयासकेः शुक
स्य शिष्यः सन् विज्ञाता अजितस्य हरेः संस्थितिर्निष्ठा तत्त्वं येन सः ॥ ३ ॥ न चैतच्चित्रमित्याह उत्तमश्लो

सूत उवाच ॥ यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः ॥ अनुग्रहाद्भगवतः कृष्णस्याद्भुतक
र्मणः ॥ १ ॥ ब्रह्मकोपोत्थिताद्यस्तु तक्षकात्प्राणविप्लवात् ॥ न सम्मुमोहोरुभयाद्भगवत्य
र्पिताशयः ॥ २ ॥ उत्सृज्य सर्वतः संगं विज्ञाताजितसंस्थितिः ॥ वैयासकेर्जहौ शिष्यो गंगायां स्व
कलेवरं ॥ ३ ॥ नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतं ॥ स्यात्संभ्रमोऽन्तकालेऽपि स्मर
तां तत्पदांबुजं ॥ ४ ॥ तावत्कलिर्न प्रभवेत्प्रविष्टोऽपीह सर्वतः ॥ यावदीशो महानुर्व्यामा
भिमन्यव एकराट् ॥ ५ ॥ यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गां ॥ तदैवेहानुवृत्तोऽसाव
(धर्मप्रभवः कलिः ॥ ६ ॥

कस्यैव वार्ता ये जुषन्त एव तेषां तत्कथामृतं स्मरतां जुषतां सं
भ्रमो न स्यात् ॥ ४ ॥ तस्मिन् राज्ञि सति तत्रान्तरा न च चित्रमित्याशयेनाह ॥ तावदिति ॥ आभिमन्योः
पुत्रः एकराट् चक्रवर्ती ईशः पतिः स यावत् ॥ ५ ॥ न तु तदा कलेः प्रवेश एव नास्ति प्रविष्टोऽपि न प्र
भवेदिति ॥ कुतस्तत्राह ॥ यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे गां मही त्यक्त्वा अनुवृत्तः प्रविष्टः अ
धर्मस्य प्रभवो यस्मिन् ॥ ६ ॥

तास्ताः स्वजातीः सवनशः मंदमध्यतारभेदेन यतो गीतध्वनिरागतः ॥ ततश्चाननतकं परावितं च येषां
वडुपथायेसमपगाकर्णकवयः कोविदाश्चर्पितेन निश्चितं ततं ततं इति ये केवलकमलमोदयगुरि
ति श्रस्साकंतमोद रकिंच्च मद्रुमाद्रु ॥ निजपदाब्जदले इति ॥ ५ ॥ ध्वजादीनि विविधानि ललामानि चि
न्हानि येषां तैः निजानि पदानि पदाब्जदलानि तैः व्रजभुवः खुरतोदखुराक्रमणव्यथाशमयन् ॥ वर्ष्म
सवनशस्तडुपथार्यमहरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ॥ कवयश्चाननतकंपरचित्ताः कश्मलं
यथुरनिश्चिततत्त्वाः ॥ ५ ॥ निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः ॥ व्रजभुवः शा
मयन्खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः ॥ ६ ॥ व्रजति तेन वयं सविलासवीक्षणार्पितमनोभ
ववेगाः ॥ कुजगतिं गमिता न विदामः कश्मलेन कबरं वसनं वा ॥ ७ ॥ मणिधरः क्वचिदाग
णयन्गा मालया दयितगंधतुलस्याः ॥ प्रणयिनोनुचरस्य च असे प्रक्षिपन्भुजमगायत यत्र ॥ ८ ॥
गोपिकाः इवविमुक्तगृहाशाः ॥ ९ ॥ पिंजोमनोभववेगाया सतावयकुजादूता नेषां गतिं गमिताः
सन्तः मोहनेन विदामः कबुरं वा वसनं वेति ॥ ७ ॥ किंच मणिधरः मणिग्रथितान् गोगणान्गा यथा
रयती मणिधरः क्वचिद्देशे तैर्मणिभिः गाश्रासमेतागायन् ॥ तथा दयितगंधा या तुलसी तस्या
मालया सह वर्तमानः प्रियस्यानुचरस्यांसे भुजं प्रक्षिपन्यत्र यदा यत्र कदाचिदगायत् ॥ ८ ॥ न
वनदाक्षकिणीनस्यवेणोरवेणाविचितान्यपहृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य हरिणो ग
हिण्याः भार्याः गणाण्णांशुगणाणास मुइदकृष्णमनुगताप्राप्य हसमेवान्यासतननस्यवत्मनेस्य

तदेवं वृंदावनप्रदेशेषु क्रीडितां मध्याह्ने गोधनानि परावृत्य यमुनायां क्रीडत्तत्सौभाग्यमनुवर्णयति॥ कुंदेति॥ गोपीनामुत्सवाय कुंददामभिः कृतः कौतुकेनोत्सवेन वेषो लीलाकारो येन सः दृष्टनवे यशोदेनववत्सः पुत्रः नंदसूनुः कृत्स्नः यद्वा सहसैव वयः कथयन्त्यः काश्चिन्नववत्स इति काश्चिन्नंदसूनुरिति बाहुर्नर्मदः सनूपदि विजहार क्रीडतिस्म॥२०॥ तदामलयजस्य चंदनस्य व्यवहरभिः प्रीतलः स्पर्शः तेन तं कृ संमानयन्॥ अनुकूलं यथा भवति॥ तथा उपवाति वीजयति॥ यद्वा मलयजो दक्षिणो वायुः यद्वा मलयजस्पृष्टो स न स्वांगे उलिप्तस्पर्शेन मानयन्निति॥ किं च वंदिन इति ह्लावकाः संतः गंधर्वादिगणाः॥ वाद्यगीतपुष्पवर्षादिभिः परिवव्रुः पर्युपासत आयांतमालोक्य सह

कुंददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम्॥ नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार॥२०॥ मंदवायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शेन॥ वंदिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः॥२१॥ वत्सलो व्रजगवां यदगध्रो वंद्यमानचरणः पथि वृद्धैः॥ कृत्स्नगोधनमुपोह्य दिनांते गीतवेणुरनुगेडितकीर्तिः॥२२॥ उत्सवं श्रमरुचापि दृशीनामुन्नयन्खुररजश्छुरितस्रक्॥ दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः॥२३

घ्नंत्यः परस्परं कृष्णस्तु वत्सल इति॥२१॥ व्रजस्य गवां च यद्वा व्रजे निबद्धानां गवां अन्येषां कृष्यमाणानाम् अस्माकमपि स्पर्धः॥ वत्सलो दितत्वात् क्रमेव यस्मात् अगध्रः॥ अगोधारयतीति गोवर्धनोद्धरणाः बहुशो वः लेणस्योपलक्षणमेतत्॥ वृद्धैर्ब्रह्मादिभिः सर्वैः पथि वंद्यमानचरणः इत्यर्थः॥ सायप्रीतिब्रह्मायां तेन ददातीति भावः उपोह्य एकीकृत्य गीतश्च वेणुर्येन सः॥२२॥ अनन्यगुणकपि कान्यानेत्राणां हर्षमुन्नयन्॥ उच्चैः प्रापयन् खुररजोभिर्धूम्राः मालाः स्रजो यस्य सः सुहृदाम् अस्माकमाशिषो वांछितान्याशिषा तु मिच्छ(

नबनेजनः सौंदर्याद्यतिशयेन विस्मिताभ्यः सखीभ्यः स्मारस्त्रियः कथयंति ॥ नात्र विस्मयः कार्यः सा
नाहीश्वरत्वादसेति ॥ सवारतिचत्तभिः ॥ वैसम्यगेकिलेतिप्रसिद्धप्रमाणद्योतनं ॥ एष एक एवा
द्वितीयः पुरुष आसीत्स एवाद्ये श्रीकृष्णः ॥ कुत्रासीदविशेषे आत्मनि ॥ प्रपंचे निजरूपे कदाग्रे
गुणेभ्यः ॥ गुणक्षोभात्पूर्वं ॥ तथानिविशेषलये च ॥ तस्य लक्षणं ॥ जगतामात्मनि जीवे निमीलिता
त्मनि तिलमसत्समंप्तनयदंजोपैकवचनेदेश्वरलीनरूपे शुजीवे शसत्त्विमर्थः ॥ नतुजीवानात्र
सत्वात्कथं लयप्रसंगात् ॥ समासप्राक्तिशुतनत्वेशुजीवोपाधिभूतसत्वादिशक्तिलय एव जीव

स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ॥ अ
ग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु ॥ २१ ॥
स एव भूयो निजवीर्यचोदितां स्वजीवमायां प्रकृतिं सिसृक्षती ॥
अनामरूपात्मनि रूपनामनी विधित्समानोऽनुससार शास्त्रकृत ॥ २२

लयइत्यर्थः ॥ २१ ॥ तदेवं सृष्टेरादौ प्रलयानंतरं च तिः प्रपंचावस्थानशुक्तास्सृष्टिप्रलययोर्म
ध्ये सप्रपंचावस्थानमाहुः ॥ सएव अपरस्तुतस्वरूपस्थितिरेव प्रकृतिमनुससार ॥ अथ चिदृष्टिप्र
लयप्रवाहस्यानादित्वात् ॥ कीदृशीं निजवीर्यचोदितां स्वकालशक्तिप्रेरितां ॥ स्वांशभूतां
तांजीवानां मायां मोहिनीं ॥ अत एव सिसृक्षतीं स्रष्टुमिच्छंतीं ॥ किमर्थं अनुससार ॥ अनाम
रूपे आत्मनि जीवे रूपनामनी विधातुमिच्छन् उपाधिसृष्ट्या जीवानां भोगायेत्यर्थः ॥ कर्मा
णि च विधाय वेदान्कृतवानित्याह ॥ शास्त्रकृदिति ॥ २२ ॥ ॥

अनपवातिनिमिषैर्नेत्रैस्तमेववीक्ष्यमाणास्तत्रतत्रार्हेणानयनायप्रार्थ्य चलंतिसयतःस्वैरेनसमयव
हः यतनपवनमंडगतानि चेतांसियैर्याते ॥१४॥ अगाराद्विनिर्यातिनिर्गच्छतिसतिगैलंक्ष्याहेतोः
उल्लसत्सवनवाक्यंअक्रूरस्वरूपतः ॥ नेत्रेषुवस्तुमितवमः ॥ तत्रहेतुः ॥ अमङ्गलोनोस्यात ॥ अमंगाले
मामदृष्टिविनदर्शनं मेतनहृर्षे ॥१५॥ मदंगादयोदशावाद्यभेदाः ॥१६॥ प्रेमवीजस्मितनहर्षमोदर्शन

सर्वेतेनिमिषैर्नेत्रैस्तमद्भुतचेतसः ॥ वीतंतःस्नेहसेवहाविवेरु[illegible]लवननहृ ॥१७॥
स्वरूपत्तुहलहास्यमोलंक्ष्याद्देवकीसुते ॥ निर्यास्यमानान्नोभद्रक्षितिसांद्रांयवस्त्रियं
मदंगाद्याखभेर्यश्चवीणापणवगोमुखाः ॥ धुंधुर्यानकवंशाद्यानेदुर्दुंदुभयास्तथा ॥१८॥
प्रासादशिखरारूढाकुरुनार्योदिदृक्षया ॥ ववृषुःकुसुमैःकृष्णंप्रेमवीजस्मितेक्षणाः ॥
सितातपत्रंजग्राहमुक्तादामविभूषितं ॥ रत्नदंडंगुडाकेशःप्रियःप्रियतमस्यह ॥१९॥
उद्धवःसात्यकिश्चैवव्यजनेपरमाद्भुते ॥ विकीर्यमाणःकुसुमैरेजेमधुपतिःपथि ॥२०॥
अश्रूयंताशिषः[illegible]सत्यास्तत्रद्विजेरिताः ॥ नानुरूपानुरूपाश्चनिर्गुणस्यगुणात्मनः ॥२१॥
अन्योन्यमासीत्संजल्पउत्तमश्लोकचेतसां ॥ कौरवेंद्रपुरस्त्रीणांसर्वश्रुतिमनोहरः ॥२२॥

यासांतत ॥२२॥ गुणाकानिदानस्याद्वैषोजितसर्वक्षोर्जवः ॥२०॥ अतएवबामवेअरहवः श्रीहः
स ॥ २॥ समाःश्रीहृत्से ॥ नासामव्यभिचारात ॥ किंतनानुरूपाश्चनानुरूपाश्चनिर्गुणस्य
परमानंदस्वरूपाविभवेत्यादयोनानुरूपाः ॥ गुणात्मनामनुष्यनाट्यावतारेनुरूपाश्चेत्यर्थः
॥२१॥ सर्वासांश्रुतीनांमनोहरउपनिषदोपिमन्निर्मित्यसंजल्पसमभवदित्यर्थः ॥ २०॥

भा
वटी
७

ग्रसिस्मि विद्याविभिर्हे षितान ॥ ७ ॥ कस्मयाहेतभूतयायातयामः न ॥ विगताग्राम्सनोगतिं पारलौ
किकीपेहिकः ध्यादिसेरस्रयसनः सेहाहिलिवापादः सतांस्रापुरेजनोहानेप्रचकमे ॥ इपक्रांतवा
नितिहूपोरन्वयः ॥ ९ ॥ ग्रतिकामतोः निवृत्तापि ॥ १० सपरिच्छदः भस्मवर्गसहितः ऊर्ध्वदेहिवे
निकोर्ध्वदेहिकः ॥ ऊर्ध्वं विमानसंधिनं विवक्षितः सान्वयः ध्यादिसहितः ॥ ११ ॥ एवं वनेरूपरुद्धामाय

पातर

ग्रामानेकस्यकायस्थंपंचालाविविहरणात् ॥ इतंतविंताभापन्नोतलेभेतस्यनिष्क्रियां ॥ ८ ॥
कामानभिलषन्दीनोयामोमुक्कस्यया ॥ विगतान्स्मरतिस्वेहः ग्राम्यानामसुलालयन् ॥ ९ ॥
गंधर्वेपवनाक्रांतोकालकर्मोपमर्दितो ॥ हातंपचक्रमेराजातांपुरीमतिकामतः ॥ १० ॥
भयुतानान्योयज्ञोभ्रातान्सवरः पत्रपरिसितः ॥ ददाहतांपुरीकृत्स्नांभ्रातः प्रियचिकीर्षया
तस्यांसंदह्यमानायांसपौरः सपरिच्छदः ॥ कौर्ध्वदेहिकः कृर्ध्वविन्याग्र्यपातघ्नतसान्वयः ॥ ११
एवंतोपरुद्धायतनोग्रलायोकालकन्यया ॥ ग्रर्थाग्रसत्वरसंस्पृष्टः शरपालोन्वतप्यत ॥ १२ ॥
नसोकेसोवितेतद्यपुरूरुकृत्योरुवेपथु ॥ गंतमेकृतनोहेतकोटरादिवसानलात् ॥ १३ ॥
शिथिलावयवोयर्हिगंधर्वेर्हृतपौरुषः ॥ यवनैररिभिराजन्नुपरुद्धोरुदोदह ॥ १४ ॥ द
हितृः पुत्रपौत्रांश्चज्ञातिनामात्यपार्षदान् ॥ सस्नावशिष्टं यत्किंचिद्गृहकोशपरिच्छदं ॥ १५
ग्रहंममेतिस्वीकृत्यगृहेषुकुमतिर्दहीः ॥ दध्यौप्रमदयादीनोविप्रयोगाउपस्थिते ॥ १६ ॥

ततानिषस्समपुरपालः ॥ ग्राणः श्रुत्वकृत्स्नं तेनोरुर्वेपथुर्यस्सानलाहृतकोटरादिवसर्पः
केवेउपरुद्धोरुदोदवृत्तबुद्दृरतिधनिंचकार ॥ १५ ॥ इतिमीदीस्थ्याविस्मृत्तरेणान्वयः नामयोत्र
स्वघांसवनमानेणावशिष्टंमोगास्तु माग्रेवदीणः ॥ १७ ॥

८२

किंच प्रज्वर इति मारकौ वैसवोज्वरः माहेश्वरस्य व्याध्येतः पातित्वात् ॥ भीमा घोराः सैनिका यस्य ॥३०॥ इति
श्रीभागवतभावार्थदीपिकायां चतुर्थस्कंधे सप्तविंशोऽध्यायः ॥२७॥ अष्टाविंशे तु वैदर्भीभावेनेन स्त्री
विचिंतया ॥ सेतो ममस्य दैवेन कदाचिन्मुक्तिरुच्यते ॥१॥ इदानीं पुरंजनस्य स्वदेहत्यागपूर्वकं स्त्री
त्वप्रकारमाह ॥ सैनिका इत्यादि राजसिंह स्त्रे वे धमनी अंतेन दिष्टं दैवं ऊर्ध्वं नीतितया मृत्योरादेशका

प्रज्वारोयं मम भ्राता त्वं च मे भगिनी भव ॥ चराम्युभाभ्यां लोकेस्मिन्नव्यक्तो भीमसैनिकः ॥३०॥
इति श्रीभागवते महापुराणे चतुर्थस्कंधे सप्तविंशः ॥२७॥ नारद उवाच ॥ सैनिका भय
नाम्नो ये बर्हिष्मन्दिष्टकारिणः ॥ प्रज्वारकालकन्याभ्यां विचेरुरवनीमिमां ॥१॥ त एकदा तु
रभसा पुरंजनपुरीं नृप ॥ रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालितां ॥२॥ कालकन्यापि
बुभुजे पुरंजनपुरं बलात् ॥ ययाभिभूतः पुरुषः सद्यो निःसारतामियात् ॥३॥ तयोपभु
ज्यमानां वै यवनाः सर्वतो दिशं ॥ द्वार्भिः प्रविश्य सुभृशं प्रार्दयन्सकलां पुरीं ॥४॥ तस्यां प्र
पीड्यमानायामभिमानी पुरंजनः ॥ अवापोरुविधांस्तापान्कुटुंबी ममताकुलः ॥५॥ क
न्योपगूढो नष्टश्रीः कृपणो विषयात्मकः ॥ नष्टप्रज्ञो हृतैश्वर्यो गंधर्वयवनैर्बलात् ॥६॥
विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान् ॥ पुत्रान्पौत्रानुगामात्यान्जायां च गतसौहृदां ॥७॥

दिष्टा इति वा ॥१॥ जरत्पन्नगेन जीर्णप्राणेन पालितां ॥२॥ द्वार्भिः श्रोत्रादिभिः रोगादिरूपेण प्रविश्य
कन्यया जरया पुरुषः सन् ॥३॥ तस्याः क्रियायां लेभे इति द्वितीयेनान्वयः ॥४॥ हृतैश्वर्यः ॥५॥ अमात्यानादिब
शक्तिः ॥६॥ प्रतिकूलान् ॥ अननुवर्तिन विषयप्रापणात् ॥ अनादृतानाहरम कुर्वाणान् ॥ स्वा
धीनत्वाभावात् ॥ अनुगामादि पारगोऽमात्यादिः दिग्देवा गतसौहृदां समव्यवस्थाभावात् ॥७॥

येभ्यो भूतेभ्यो भयं नायेत ॥ तेष्वेव कृपया हिंसाचरणेन ॥ दैवं देवोपसर्गनिमित्तं ॥ तृष्या मनःपी
डादिनं डःकं याज्ञवल्क्येन ॥ विमनाविफलावेभः संसीदन्ति मित्त्रनश्यति ॥ आत्मजं देहजं योग
वीर्येण प्राणायामादिबलेन ॥ सत्त्वनिषेवया सात्त्विकाहारादिना ॥ २४ ॥ ननु कथं गुरौ भक्त्या
सर्वमुज्जयः स्यात् ॥ तस्यापि मनुष्यत्वेन तदवश्यत्वात् ॥ तत्राह ॥ यस्येति ॥ मर्त्यो सद्धीः मनुष्य इति
दुर्बुद्धिः ॥ तस्य सर्वं श्रवणादि कुंजरस्नानवद्व्यर्थं ॥ २९ ॥ ननु गुरोः पितृपुत्रादयः ॥ तत्तत्मेव मन्यंते
कृपया भगवज्जनं स्वंदेवं जह्यात्समाप्तिना ॥ आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया ॥
२४ ॥ रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च ॥ एतत्सर्वं गुरौ भक्त्या पुरुषो ह्यंजसा जयेत् ॥
२५ ॥ यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ ॥ मर्त्यासद्धीः श्रुतं तस्य सर्वं कुंजरशौचव
त् ॥ २६ ॥ एष वै भगवान्साक्षात्प्रधानपुरुषेश्वरः ॥ योगेश्वरैर्विमृग्यांघ्रिर्लोको यं मन्यते
नरं ॥ २७ ॥ षड्वर्गसंयमैकांताः सर्वा नियमचोदनाः ॥ तदंता यदि नो योगानावहे
युः श्रमावहाः ॥ २८ ॥ अत्राह ॥ एष गुरुः साक्षाद्भगवानेव लोकस्तु नरो मा वितिबुद्धिर्भ्रां
तिरित्यर्थः ॥ यद्ज्ञानं हि तत्सुखादेर्मनुष्यबुद्ध्या मन्यमानो पि गुरुर्भगवान्न भवेत् ॥ यद्वो
पश्री हस्तइत्यर्थः ॥ २७ ॥ एवं सर्वैरुपायैः कामादिवेगनिरासानियतेंद्रियो भूत्वा ध्यानपर
रो भवेत् ॥ अन्यथा तत्प्रति सर्वशास्त्रवैफल्यं स्यादित्याह ॥ षड्वर्गेति ॥ सर्वा अपि नियमचो
दनाः शास्त्रोक्तादिविधयः षडिंद्रियवर्गस्य यः संयमः तस्मिन्नेवैकस्मिन्नंतो यासां तदेक
परा इत्यर्थः ॥ न च तावता पि चरिता र्था इत्याह ॥ तदंताः सत्योपि यदि योगान् ॥ पारंपर्या

नसमाधीत मोक्षावेहः नमायेष्टः तर्हिकेवलं कृष्णवद्वापदेशपर्यः २८

पतदेवदृष्टांतेनाह॥ यथावातादयः स्पृष्टादयः॥ अर्थात्सफलानि च योगस्यार्थमोदनंनमाथ
यंति॥ प्रकृतमनुसर्थायमेसा यायेवत्मस्ततोवर्दिर्षिसखसशशुक्तेगोपितया॥ २९॥ एवंयोगंयुंज
तोपियस्यकुडुवादिसंगेनविनेविदिप्यत॥ नस्यहृस्तमाह॥ यश्चित्तस्यविजययतउथु
कः समिन्तुः स्यात्॥ सन्नसेत्॥ तथाचश्रुतिः॥ दृढाहृतस्यगार्हस्थ्यध्यानभगादिकार
ण॥ लक्ष्यितागहदोसस्पष्टसन्नसेदविचारयत्रिति॥ भिन्तयाश्रमेमितमशानंचयस्य॥ ३०
यथावातादयोह्यर्थायोगस्यार्थनविभाति॥ अनर्थायभवेपुक्तप्रष्टेमिष्टतयामत॥ २९
यश्चित्तविनयेयतः स्याद्रिः संगोपरिग्रहः॥ एकोविविक्तचारणाभिन्नभिन्नामिता
प्रातः॥ ३०॥ देशेश्चैवोसमेरागानुत्तस्यायाप्यासनमात्मनः॥ स्थिरंहृदंसमंतस्मिन्नाक्षी
तज्ज्वंगाओमिति॥ ३१॥ प्राणापानोसमौनित्यंस्पानस्थरजुभकरेचकैः॥ यावन्मनस्सजेका
मान्स्तनामाग्रनिरीक्षणः॥ ३२॥ यतोयतोनिःसरतिमनः कामहतंभ्रमत्॥ ततस्तत
उपाहृत्यदृष्टिहृत्याद्धुनैर्बुधः॥ ३३॥ एवमभ्यसतश्चित्तंकालेनाल्पीयसायतेः॥ प्रति
यांतस्यनिर्वाणायात्यनिंधनवह्निवत्॥ ३४॥ कामादिभिरनाविद्धप्रशांताखिलवृत्ति
यत्॥ चित्तंब्रह्मसुखस्पृष्टंनैवोत्तिष्ठेतकर्हिचित्॥ ३५॥ यः प्रव्रज्यगृहात्पूर्वंत्रिवर्गा
स्त्तुसमममेगायसमः स्वतत्यथाभवत्सेवमासीत॥ ओमित्युच्चारयन्निति शेषः॥ ३६॥ एवम
निशाममभ्यसतस्तस्ययतेश्चित्तंनिर्वाणप्राप्नोति याति॥ ३७ नचपुनर्विक्षिप्यतेत्याह॥ कामा
दिभिरदुभिनयश्चित्तंततोनिष्टेत॥ यतः प्रशांतान्याखिलावृत्तयोयस्य॥ ऊनः ब्रह्मसुखेन

श्री॰
भा॰ स॰
६२

रागादियो जेतव्याः शत्रवः तत्र स्नेहोऽभिनिवेशः क्वचिद्विचारात् समाधेः सत्त्वप्रकृतयोऽपि परोपकारादिरूपप्रवृत्तिहेतुत्वात्
शत्रवः ॥ ४४ ॥ नृकायरूपं रथं आत्मवशाउपकल्पं इंद्रियादिपरिकरो यस्मिन् ॥ तथाभूतं यावद्धत्ते ता-
वदेव गरिष्ठानां गुरूणां चरणार्चनया निशितं ज्ञानखड्गं बिभ्रत् ॥ अच्युताश्रयः सन्निरस्तशत्रुरूपशां-
तः स्वानंदेन तुष्टो भूत्वा इदं रथादिकमुपेक्षेतेत्यर्थः ॥ ४५ ॥ अच्युताश्रयाभावे बाधकमाह ॥ नो चेदि-
ति ॥ असंतो वादिमुखाये इंद्रियवाजिनः ॥ सूतं च अनेन उत्पथं प्रवृत्तिमार्गं नीत्वा विषयाख्येषु दस्युषु निक्षि-
रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ॥ मानोऽवमानोऽसूया च माया हिंसा च मत्सरः ॥ ४४
रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः ॥ रजस्तमःप्रकृतयः सत्त्वप्रकृतयः क्वचित् ॥ ४४ ॥ यावन्नृ-
कायरथमात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातं ॥ ज्ञानासिमच्युतबलो दधदस्तश-
त्रुः स्वानंदतुष्ट उपशांत इदं विजह्यात् ॥ ४५ ॥ नो चेत्प्रमत्तमसदिंद्रियवाजिसूता नीत्वोत्पथं वि-
षयदस्युषु निक्षिपंति ॥ ते दस्यवः सहयसूतममुं तमोंधे संसारकूप उरुमृत्युभये क्षिपंति ॥ ४६ ॥
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकं ॥ आवर्तते प्रवृत्तेन निवृत्तेनाश्नुतेऽमृतं ॥ ४७ ॥ हिंस्रं द्रव्य-
मयं काम्यमग्निहोत्राद्यशांतिदं ॥ दर्शश्च पौर्णमासश्च चातुर्मास्यं पशुः सुतः ॥ एतदिष्टं प्रवृत्ताख्यं
पंक्तिरूपैः सुतेन च सह वर्तमानं तमोंधे नमसा (हुतं प्रहुतमेव च ॥ पूर्तं सुरालयारामकूपाजीव्या-
त्यामे ॥ उरु महन्मृत्युभयं यस्मिन् ॥ ४७ ॥ ननु च वेदविहितेष्टापूर्तादिकारिणः पुंसः कथमेवमनर्थप्रा-
प्तिः स्यादित्याशंक्य वेदोक्तकर्मणां द्वैविध्यं दर्शयन् फलभेदमाह ॥ प्रवृत्तं चेति द्वाभ्यां ॥ हिंस्रं रूपेणादि-
कर्म ॥ अशांतिदं ॥ अन्यासक्तिपुष्कलं ॥ श्रादिषा द्रव्यार्थविवरणं दर्शश्चेति ॥ पशुः पशुयागः सुतः सोम-

नवेदमस्त्वदितिंहद्दश्रनादिमात्‌॥ यैः पूर्वं सदेहः ॥ अनात्मादिरूपः स्तनश्रिंतितः ॥ नपवश्चनेदेनाः
मात्ते तिमताश्लाघ्यतिस्तावयतिस्तावयतिदि ॥ ३७॥ घतिमुपलद्दाणीकृत्यात्मानंपिस्वथमे
त्यागिनोनिंदति गृहस्थस्येतिद्वाभ्यां ॥ ३८॥ नवात्मतत्वज्ञस्य भिन्नोविंद्रियलोल्येपिकोदो
षस्तत्राह ॥ आत्मानं परं ब्रह्म चेज्जानीयाज्ज्ञानेन धुतानिरस्ताशेषाशयावासनायस्य नस्यज्ञाति
नोलोल्यमेवनसंभवतीत्यर्थः ॥ तथा च श्रुतिः ॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति ॥ ४१॥ अज्ञस्य तु लोल्येन रकपातापतेरस्यमने
यैः सदेहः स्मृतोऽनात्मा मर्त्यो विह्रक्रीमिभस्मसात्‌॥ न पतत्यात्मसात्कृत्वा स्नात्वयति
संसनमाः ॥ ३७॥ गृहस्थस्य क्रियात्यागो व्रतत्यागो वटोरपि ॥ तपस्विनो ग्राममेवाभिन्नो
विंद्रियलोलता ॥ ३८॥ आश्रमापसदा ह्येते खल्वाश्रमविडंबकाः ॥ देवमायाविमूढांस्ता
स्त्वनुपेक्षेतानुकंपया ॥ ३९॥ आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः ॥ किमिच्छन्क
स्य वा हेतोर्देहं पुष्णाति लंपटः ॥ ४०॥ आहुः शरीरं रथमिंद्रियाणि हयानभीषून्मन इं
द्रियेशं ॥ वर्त्मानि मात्रा धिषणां च सूतं सत्वं बृहद्बंधुरमीशसृष्टं ॥ ४१॥ अक्षं दशप्राण
मधर्मधर्मौ चक्रे भिमानं रथिनं च जीवं ॥ धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं परमेव लक्ष्यं
नसहसनतसज्ञानेयतिनवमितीममर्थः ॥ आत्मानं रथिनं विद्धि शरीरं रथमेव च ॥ त्यादिश्रुत्युक्तरा
थरूपेकद्वारेणाह ॥ आहुरिति षड्भिः ॥ ४० ॥ इंद्रियेशं मनोऽभीषून्‌ वल्गाः सात्विकाः शब्दा
दीव ॥ वर्त्मानि गंतव्यदेशाना ह्यः ॥ सत्वं चित्तं बृहद्देहव्यापि बंधुरं बंधनं चित्तविनाशतिवे

भा
स टी
९९

श्रीहृत्सलसेवामहत्तामवत्तयाभयपतिनत्कृपयाचसिद्धतीति ॥ दर्शयन् ॥ सर्वेहृमोतमा
ह ॥ अहमिति सार्थैः पंचभिः ॥ नाम्नाउपवर्हणः पेशलेसौकुमार्य्येरूपादिभिः प्रियदर्शनं

अहंपुराभवंकश्चिद्गंधर्वउपवर्हणः ॥ नाम्नातीतेमहाकल्पेगंधर्वाणांसुसम्मतः
॥ ७१ ॥ रूपपेशलमाधुर्य्यसौगंध्यप्रियदर्शनः ॥ स्त्रीणांप्रियतमोनित्यंमत्तस्तुपुरलं
पटः ॥ ७२ ॥ एकदादेवसत्रेतुगंधर्वाप्सरसांगणाः ॥ उपहूताविश्वसृग्भिर्हरिगाथो
पगायने ॥ ७३ ॥ अहंचगायंस्तद्विद्वान्स्त्रीभिःपरिवृतोगतः ॥ ज्ञात्वाविश्वसृजस्तन्मे
हेलनंशेपुरोजसा ॥ ७४ ॥ याहित्वंशूद्रतामाशुनष्टश्रीःकृतहेलनः ॥ तावद्दास्या
महंजज्ञेतत्रापिब्रह्मवादिनाम् ॥ ७५ ॥ शुश्रूषयानुषंगेणप्राप्तोहंब्रह्मपुत्रताम् ॥ ध
र्मस्तेगृहमेधीयोवर्णितःपापनाशनः ॥ गृहस्थोयेनपदवीमंजसान्यासिनामि
यात् ॥ ७७ ॥ यूयंनृलोकेवतभूरिभागालोकंपुनानामुनयोभियंति ॥ येषांगृहाना
वसतीतिसाक्षाद्गूढंपरंब्रह्ममनुष्यलिंगं ॥ ७८ ॥

यस ॥ महदाह्वानंविद्वान् ॥ उन्मत्तःसन्गायंश्चैवागतः ॥ ७४ ॥ त्वंतत्कृतार्थपदवेतिहर्षेणाहनः

आत्मनः स्वसज्ञापादीनां स्वार्थं प्रकाशस्य स्वनयोः देहादीनां पंचभूतात्मकत्वेन भोक्तृत्वपर
मात्मत्वेनाभेदालोचनेनार्थकामयोर्यद्वैकदर्शनमित्यर्थः उक्तानां धर्मार्थकामानां स्वस्तिप्रा
प्ता ॥ यदिति ॥ ९० ॥ यद्वृष्टेपेनोपायेन यतः सकाशात् ॥ प्रस्वतं प्रपसंहरति ॥ ९४ ॥ एतैरिति
अस्य श्रीकृष्णस्य गतिं तदङ्घ्रिभाक् ॥ तस्य भक्तः एतत्त्वं सर्वसाधारणमुक्तं भक्तस्य भक्तिरेव

आत्मनायासस्नानादीनाम नेषां सर्वदेहिनां ॥ यस्मार्थकामयोरैकं दुःखाहैनेतदुच्यते
९० ॥ यथा स्ववानि विशिष्टं स्वाद्येन यत्रपनोत्स्य ॥ सनेनेहेन कार्याणि नरो नाम्मेरनापदि
९० ॥ एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः ॥ गेहेप्यस्य गतिं यायाद्राजंस्तद्भक्तिभा
ग्नरः ॥ ९४ ॥ यथा हि पुरुषः पन्नपदेवड स्वजनादापन्नगणाड्नतरनात्मनः प्रभोः ॥ यस्माद
पंकेरुहसेवया भवानकार्षीन्निर्जितदिग्गजः क्रतून् ॥ ९० ॥ ॥

सर्वं पुरुषार्थहेतुरितिपांडवानेव लक्षीकृत्याह ॥ यथाहीति ॥ ९४ ॥ हेनृपदेव ॥ नृपदेवैं
प्रसहायैड्स्वजनादितिवा ॥ आत्मनः श्रीकृष्णादेव प्रभोर्हेतोः प्रभावस्यार्थः यथा यथा
वत् ॥ तमेव भजनेतिशेषः ॥ यद्वा यथा आपन्नगणाड्मीरीस्त्वं ॥ तथा यक्षतून् ॥ अकार्षीत
तथा ॥ श्रीकृष्णादेवतारकात् ॥ संसाराद्उत्तरतेत्यर्थः ॥ ७० ॥ ॥

भा
सटी
९६

रु मौदर्शनादिसंकल्परूपे मनसि वैकारिके ॥ विकारयुक्तं मनो वाचि विद्यादिलक्षणयावावा
हि मनः कार्त्स्न्यादिविकारं भजति वर्णानां समाम्नाये समुदाये ॥ न द्विशोषवत्ता हावः स्वरे अकारा
दिस्वरत्रयात्मके ॥ ५४ ॥ ओंकारे बिंदौ नत च नादे ॥ प्राणास्त्यात्मनि मरुति वस्मिन् अग्निरिति न
नदीभिमानिनो देवताः तां प्राप्नोतीति सर्ववत् ॥ दिवा हः प्राहुस्तस्य वानः राकाशुक्लपक्षस्या
तः पद्दशमहोराके ति चषण्मासमते ॥ उत्तरमयनं स्वराज्यस्य ॥ ५५ ॥ पवेत्रस लोकं यातस्य भोग
वसाने मोक्षप्रकारमाह ॥ विश्वइति ॥ विश्वः स्थूलोपाधिः स स्थूले सूक्ष्मे विलाप्य सूक्ष्मोपाधि
र्निनतो भवति ॥ सूक्ष्मं च कारणे विलाप्य कारणोपाधिः ॥ प्राज्ञो भवति कारणं च सर्वेश्वरादि
देहिपाणिमनसामौवाविवैकारिकं मनः ॥ वाचं वर्णसमाम्नायेन मोंकारे स्वरे मसेत ॥ ५६
ओंकारं बिंदौ नादे च तत्तु प्राणे महत्स्मगुं ॥ अग्निः सूर्यो दिवा प्राहुः शुक्लो राकोत्तरं स्वराट् ॥ ५७
विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात ॥ देवयानं समिदं प्राहुः भूत्वाभूत्वानुपूर्वशः ॥
प्राक्सपात्स्य पशोत्तात्मा सात्मस्थानं निवर्तते ॥ यएते पितृदेवानामयने वेदनिर्मिते ॥ ५ ॥
शास्त्रेण ववृत्त्यावेदं जनस्योपि न गृहाति ॥ आदावंते जनानां सद्वहिरंतः परावरः ॥ ५८ ॥
तेनानयोस्ता विविरूपे विलाप्य तत्पो भवति । तानेतेपव वोवाच्यतमोत्मानि मिल्व पंस्वय
तेषांच यथिचा विणसार्पतिगालपे प्रूड आत्मा भवति ग्युतनुइत्यर्थः पयो तरोभूत्वा निव
र्ततेतयावनति वर्तेइत्यर्थः ॥ ५९ ॥ वेदेन निर्मितेन तेपथमभिसंभवतीत्यादिना ते अर्चिरभि
संभवतीत्यादिना निरूपयेन विविच्य ज्ञापिते इत्यर्थः जनस्यापि देहस्योपितगृहाति ॥ ६० ॥ म
यदेहसमाह ॥ आदावीति ॥ जनानां देवादीनां मादौ कारणत्वेन अंते चावधित्वेन पत्वात ॥ तथा
वहिर्भोक्तृ ॥ अंतर्भोक्तृ परमवरं च उच्चनीचं तमात्मप्रकाशोज्योतिः प्रकाशं तत्त्वसर्वे अधंतः

प्रहतेन कर्मणा प्रारोहावरोहाभ्यामाहेति प्रकारमाह ॥ द्रव्यस्य चरुद्वयेन प्रागाइः स त्वौषिपा
कः परिणामो देहांतरारंभकः ॥ येन संपरिष्वक्तो गच्छति ॥ यच्च भुक्तावपक्वं हेतोक्तं इति
उपचयस्यापाकृतावपः पुरुषवचसो भवतीति पाठांतरे द्रष्टव्या हेन तेजोमात्रा धातो नयंतीति
प्रागिरा ॥ द्युव्यविपाक प्राहेन हृदयाग्रप्रद्योतः ॥ तथा च श्रुतिः ॥ स एता स्तेजोमात्राः समभ्याद
दानो हृदयमेवान्ववक्रामतीति ॥ तथा तस्य हैतस्य हृदयस्याग्रं प्रद्योतते ॥ तेन एष आत्मा नि
ष्क्रामति ॥ धूमादिना हेतस्तनरभिमानि मोदवनाः तथा पतय कृत्सपतः सोमः सोमलो
कः तत्र भुक्तयोगसावरोहणप्रकारमाह ॥ इष्टापूर्तादि ॥ इष्टा इति विपरीतललनणया विनि
ष्क्रमणो जातस्य शोकाग्निनादेहलयनादर्शनमुच्यते ॥ एतद्व कर्म भवति ॥ भूतसत्त्वमुक्तोप्यमा
द्रव्यस्य त्वं विपाकप्रधूमा रात्रिरपरपक्षः ॥ प्रयानरतिणसोमोदर्शोभेषयितो हृदयः ॥ ११
प्रवर्तनेन तिलेशापितयानेषु तन्भवः ॥ एकैकप्रेण नातूर्ध्वं भूत्वा भूतेन जायते ॥ १२ ॥
निषेकादिश्मशानांतैः संस्कारैः संस्कृतो द्विजः इंद्रियेषु क्रियायत्ता ज्ञानदीपेषु जुहति
याति वाह्निकदेवताभिः सोमलोकं प्राप्य तत्रोपभोगावसाने ॥ विलीनदेहो हि द्रव्यैः ॥
धीरो हयादिस्नामापतिक्रमेण जायते ॥ १३ ॥ एवं पुनर्भवदेहैः पितृयानपथकर्मसा
योगीति ॥ स्नेषाहेभूयते ॥ पुनर्भवमेवाह ॥ एकैकप्रेण पश्चात्क्रमेण भूत्वा नत्वानि एव
प्राप्य हमोनोपयते ॥ १४ ॥ तत्रापि कारणमाह ॥ निषेकादीति ॥ अग्निहोत्रादिकार्यं यस्य वेद
मन्त्रैरुत्सर्गे ॥ निहामकर्मनिष्ठस्यापासनाविशेषयुक्तपरिशान्तविरादिमार्गेण
स्वर्लोकं प्राप्य माह ॥ इंद्रियेष्विष्टादिना ॥ यदाद्रव्यपत्नीषु हिंसापाडुर्वाद इतिसुष्वनि
हवनैकर्मवद्गर्भायनाह ॥ ज्ञानेनदीप्यंते इति तयातेषु ॥ इंद्रियव्यापारणाम् निष्ठाप्रजोदीना

ननु तर्हि कथं घटाग्रस्यास्यापि प्रतीयते तत्राह ॥ आवापितत्तत्केविशेषेण सर्वतोपि आभासः
प्रतिबिंबादिवत्तत्र यथायथा स्फुटः ॥ न हृदैंद्रियिकं सर्वं सर्वथैव न विकसितं ॥ न तत्परमार्थतो
दुष्टेर्द्रत्वात् ॥ तदेवाह ॥ क्षित्यादीनां पंचभूतानां छायापेक्षया लंबनं दृष्टदेहादिसंज्ञानां
भपरिणामानां मध्ये कतमापि अमतमापि न भवति ॥ न तावत्तेषां संघातः हस्तामिवव
तं ॥ एकदेशाक्षेपेण सर्वाक्षेपणानुपपत्तेः ॥ न चैकस्मिन्नेव तत्राक्षेपे सर्वं च तत्राक्षेप्यते
न च विकारः आरब्धो वयवी ॥ अपि शाल्लान्न परिणामोपि कृतः ॥ स किं सावयवेभ्यो वा परि
णमते ॥ तेभ्यो वा पृथक्त्वेनान्वितो वा ॥ न तावदसंतेप्यक्रं ॥ तथाप्रतीतेः न वान्वितः

आवापितोपि ह्याभासो यथावस्तुतया स्फुटः ॥ दुर्वेदत्वादैन्द्रियकं तद्दर्शे विकसितं
२ ॥ क्षित्यादीनां सिद्धापोनां छायानकतमापि हि न संघातो विकारो वा न पृथगान्वितो
मृषा ॥ ३ ॥ यानवोवयविनावस्तुनस्तावयवैर्विना नसंसर्ग समयवयविसंस्तवयव
वीनतः ॥ ४

स किं प्रत्यवयवं समन्वेति सर्वेषेन वा आद्ये अंगुलिमात्रेपि देहबुद्धिः स्यात् ॥ द्वि
तीये न स्यात् [illegible] कारे सम्यन्नव स्यात् ॥ अतो मृषैवेत्यर्थः एवं देहादेर्मिथ्यात्वमुक्त्वा
तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमाह ॥ यानवंतीति ॥ यानवो महाभूतानि ॥ तन्मात्रैः
सत्वैरवयवैर्विना न संतुः ॥ अवयविनां तेषामपि ॥ तदवयवः ॥ सत्यमुक्तिचेतत्राह ॥ उक्त
प्रकारेणावयवि असति ॥ अवयवोप्यतत्तोसत्त्वेवस्यात् अवयविप्रतीसत्तयानुपपत्तिं
विनातत्सद्भावप्रमाणाभावादित्यर्थः तदुक्तं पंचमस्कंधे ॥ एवं निरुक्तं क्षितिशब्दवृत्त ॥

भा
स टी
९५

नन्वेवं यदि विनोभावेऽप्यागमापायित्वाद्विश्वस्यात्मादि शुक्तिसोऽयं देवदत्त इति प्रत्यभिज्ञानेन स्यात् ॥ नेद-
तेऽभ्युहेतः स्याद्विभावव्यतिरेकाभावयमेकेस्वनपाधिपनत ॥ नइमीमि ॥ नचाइस्यादिति ॥ वस्तुनः प
इमात्मनोविकल्पभेदेप्रसक्ति ॥ यद्वाः वस्तुनो विकल्पसक्ति ॥ इदं सर्वशेषमाहप्रयान ॥ सप
वेतिम्बमः स्यात ॥ सचतावदेवयावदविद्यानिवृत्तिः ॥ ननु सर्वमिथ्यात्वेशास्त्रस्यविधिनि
षेधनाकथंतत्राह ॥ सममस्थेनात्मत्वावधवस्यायथेति ॥ इदानींमुक्तमेवाद्वैतभावना
त्रयोपदेशेनद्रढीकरोति ॥ भावाद्वैतमितित्रिभिः ॥ ९३ ॥ विवर्तमानालोचयन् ॥ स्वानुभूत्या

स्वात्मानुभवमस्ताबुद्धिकल्पसतिवस्तुनः ॥ जाग्रत्स्वापौ यथा स्वमे
नया विधिनिषेधना ॥ ९२ ॥ भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथात्मनः
वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः ॥ ९४ ॥ कार्यकारणवा
स्त्वैक्यदर्शनं पटतन्तुवत् ॥ अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्य
ते ॥ ९५ ॥ यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणं ॥ मनोवाक्तनु
भिः पार्थ क्रियाद्वैतं तदुच्यते ॥ ९६ ॥

प्रात्मनन्त्वाज्ञभवेत्त्रीन् ॥ जाग्र
दादीन् ॥ त्रयमाव मथा
वपः स्वप्ना इति प्रतेः ॥ यद्वा वस्तुभेदबुद्धिरेकः स्वप्नः ॥ ततस्तन्नदयिकारभेदेन बुद्धिर्द्विती
यः ततो मनः कर्मसाधितत्वेन फले ॥ ममैवभोग्यमितितृतीयः तान्धुनुते निवर्तयति ॥ ९४
कार्यकारणयोर्वस्त्वैक्यदर्शनं न्यालोचनम् ॥ ९५ ॥ मनोवाक्तनुभिः कृतानां कर्मणां सम
र्पणात्मनः समर्पणमितिवा ॥ यद्वा फलभेदादिक्रियाभेदद्वैतं ईश्वरार्पणेन तदभावात्कि

गत्या च अनुराग स्मितेनाभ्यां विभ्रमेक्षितेनानि विलासनिरीक्षणानि तैश्च मनोरमालापा विहाराः क्री
डाविभ्रमाश्चान्ये च विलासास्तैरस्य रमापतेर्गत्यादिभिः । यद्वा गतिस्मितान्याक्षिप्तानि चित्तानि यासां ताः ॥ अ
तस्तस्मिन्नेवात्मा यासां ताः तस्यैव विविधाश्चेष्टा जगृहुः तदनुकरणेनाक्रीडन् ॥ अपि च गतिस्मिते
ति ॥ २ ॥ प्रियस्य गत्यादिषु प्रतिरूढा आविष्टा मूर्तयो यासां ताः अतः कृष्णविहारविभ्रमाः क्रीडावि
लासा यासां ताः ॥ अहमेव कृष्ण इति परस्परं निवेदितवत्यः किं च गायन्त्य इति ॥ ३ ॥ एवं नाट्येनान

गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः ॥ आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः ॥ २ ॥ गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः ॥ असावहं त्वित्यबलास्तदात्मिका न्यवेदिषुः कृष्णविहारविभ्रमाः ॥ ३ ॥ गायन्त्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनं ॥ पप्रच्छुराकाशवदन्तरं बहिर्भूतेषु सन्तं पुरुषं वनस्पतीन् ॥ ४ ॥ दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः ॥ नन्दसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ॥ ५ ॥ कच्चित्कुरबकाशोकनागपुन्नागचम्पकाः ॥ रामानुजो मानिनीनामितो दर्पहरस्मितः ॥ ६ ॥ कच्चित्तुलसि कल्याणि गोविन्दचरणप्रिये ॥ सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेतिप्रियोच्युतः ॥ ७ ॥

गायन्त्यो विचिक्युः अन्वेषयन् ॥ उन्मत्ततुल्यत्वमाह ॥ वनस्पतीनप्रच्छुः भूतेष्वन्तर्मध्ये सन्तं पुरुषं ब
हिश्च सन्तमपि तिरोहितं पश्यन्ति न वयमिति ॥ प्रेमहासविलसितैरवलोकनैरस्माकं मनो हृत्वा चोरवद्
गतः ॥ पुष्पाभिः किं दृष्ट इति महान्तः स्वपुष्पैर्बहूपकारिणः अतिकृपया ... पृच्छन्ति कच्चि
दिति ॥ ५ ॥ हे कुरबकादयः दर्पहरस्मितं यस्य स इतो गतः कच्चिदिति ॥ अलिकुलैः सह त्वां वि
भ्रत् ॥ न वासि प्रियत्वाय हृष्ट इति गुणातिरेकेपि न मत्सरादिमनोः पश्ये ... दृष्टः क्वापि ॥ ७ ॥

प्रियेक्षणोत्फुल्लानि मुखानि यासां ताभिः उदारहास एव द्विजाश्च तेषां कुंदवत् दीधितिर्यस्य सः एणांकश्चंद्रः बाहुप्रसारश्च परिरंभश्च करादीनामालभनं स्पर्शश्च नखाग्रपातैश्च तैः क्रीडयाक्ष्वेल्यावलोकैश्च हसितैश्च कामं तासामुदीरयन् ॥ रमयामास ॥ महात्मनो विकृताविकारस्य ॥ तन्मो भगवान्

ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ॥ उदारहासद्विजकुंददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः ॥४३॥ उपगीयमान उद्गायन्वनिताशतयूथपः ॥ मालां बिभ्रद्वैजयंतीं व्यचरन्मंडयन्वनं ॥४४॥ नद्याः पुलिनमाविश्य गोपीभिर्हिमवालुकं ॥ रेमे तत्तरलानंदकुमुदामोदवायुना ॥४५॥ बाहुप्रसारपरिरंभकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः ॥ क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिं रमयांचकार ॥४६॥ एवं भगवतः कृष्णाल्लब्धमाना महात्मनः ॥ आत्मानं मेनिरे स्त्रीणां मानिन्योभ्यधिकं भुवि ॥४७॥ तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ॥ प्रशमाय प्रसादाय तत्रैवांतरधीयत ॥४८॥

इति श्रीभागवते महापुराणे दशमस्कंधे बालचरित्रवर्णने नामैकोनत्रिंशोध्यायः ॥२९॥

श्रीशुक उवाच ॥ अंतर्हिते भगवति सहसैव व्रजांगनाः ॥ अतप्यंस्तमचक्षाणाः करिण्य इव यूथपम् ॥१॥

सहायीनतां मानं गर्वं च केशवः कश्च ईशश्च तौ वशयति यस्यासः ॥४८॥ इति श्रीदशमस्कंधे भावार्थदीपिकायां टीकायामेकोनत्रिंशोध्यायः ॥२९॥ त्रिंशे विरहसंतप्तगोपीभिः कृष्णमार्गणं ॥ उन्मत्तवत्समस्तेषु वनेषु तद्वनेषु वर्तते ॥१॥ अचक्षाणाः अपश्यंत्यः ॥१॥